॥ नवग्रह मंण्डलम् ॥

अधिदेवता / प्रत्यधिदेवता / पंचलोकपाल / वास्तोष्पते / क्षेत्राधिपते / दशदिक्पाल

ब्रह्मा मुरारी त्रिपुरान्तकारी, भानु शशि भूमि-सुतो बुधश्च ।
गुरुश्च शुक्र शनि राहु केतवः , सर्वे ग्रहा शांति करा भवंतु ॥

ईशान मण्डलं कृत्वा ग्रहाणां स्थापनं ततः ।
वृत मण्डल आदित्यमर्धचन्द्रं विशाकरम् ॥
त्रिकोणं मंगलं चैव बुधं च धनुषाकृतिम् ।
गुरुमष्टदलं प्रोक्तं चतुष्कोणं च भार्गवम् ॥
नराकृतिं शनिं विन्द्याद्राहुं च मकराकृतिम् ।
केतुं खड्गसमं ज्ञेयं ग्रहमण्डलके शुभा ॥

नवग्रह नाम मन्त्राः

संख्या	नवग्रह	अधि देवता	प्रत्यधि देवता	पंचलोक पाल देवता	दशदिक्पाल देवता
१	सूर्याय नमः	ईश्वराय नमः	अग्नये नमः	गणपतये नमः	इन्द्राय नमः
२	सोमाय नमः	उमायै नमः	अद्भयो नमः	अम्बिकायै नमः	अग्नये नमः
३	भौमाय नमः	स्कन्दाय नमः	पृथिव्यै नमः	वायवे नमः	यमाय नमः
४	बुधाय नमः	विष्णवे नमः	विष्णवे नमः	आकाशाय नमः	निर्ऋतये नमः
५	बृहस्पतये नमः	ब्रह्मणे नमः	इन्द्राय नमः	अश्विभ्यां नमः	वरुणाय नमः
६	शुक्राय नमः	इन्द्राय नमः	इन्द्राण्यै नमः		वायवे नमः
७	शनैश्चराय नमः	यमाय नमः	प्रजापतये नमः		सोमाय नमः
८	राहवे नमः	कालाय नमः	सर्पेभ्यो नमः		ईशानाय नमः
९	केतवे नमः	चित्रगुप्ताय नमः	ब्रह्मणे नमः	वास्तोष्पतये नमः	ब्रह्मणे नमः
१०				क्षेत्राधिपतये नमः	अनन्ताय नमः

॥ नवग्रह स्थापनम् पूजनम् ॥

१. सूर्यम् मण्डल के मध्य में लकडी - मदार फल - द्राक्ष

- **ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च ।**
  हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥
- **जपा कुसुम संकाशं काश्यपेयं महाद्युतिम् ।**
  तमोऽरिं सर्व पापघ्नं प्रणतोऽस्मि दिवाकरम् ॥
- ॐ भूर्भुवः स्वः कलिंगदेशोद्भव काश्यपस गोत्र रक्त वर्ण भो सूर्य । इहागच्छ । इहतिष्ठ सूर्याय नमः । सूर्यम् आवाहयामि, स्थापयामि, पूजयामि ।

२. चन्द्रम् मण्डल के अग्निकोण में लकडी - पलास फल - गन्ना

- **ॐ इमं देवाऽअसपत्क्न ७ सुवध्वं महते क्षत्राय महते ज्यैष्ठयाय महते जानराज्या येन्द्रस्येन्द्रियाय । इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोमी राजा सोमो स्माकं ब्राह्मणाना ७ राजा ॥**
- **दधि शंख तुषाराभं क्षीरोदार्णव सम्भवम् ।**
  नमामि शशिनं सोम शम्भोर्मुकुट भूषणम् ॥
- ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयस गोत्र शुक्ल वर्ण भो चन्द्र । इहागच्छ । इहतिष्ठ चन्द्रमसे नमः । चन्द्रमसम् आवाहयामि, स्थापयामि, पूजयामि ।

३. भौमम् मण्डल के दक्षिण में लकडी - खैर फल - सोपारी

- **ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्याऽअयम् ।**
  अपा ७ रेता ७ सि जिन्वति ॥
- **धरणी गर्भसंभूतं विद्युत्कान्ति समप्रभम् ।**
  कुमारं शक्ति हस्तं च मंगलं प्रणमाम्यहम् ॥
- ॐ भूर्भुवः स्वः अवन्तिकापुरोद्भव भरद्वाजस गोत्र रक्त वर्ण भो भौम । इहागच्छ । इहतिष्ठ भौमाय नमः । भौमम् आवाहयामि, स्थापयामि, पूजयामि

४. बुधम् मण्डल के ईशान कोण में लकडी – चिचडी फल - नारंगी

- **ॐ उद्बुध्य स्वाग्ने प्रति जागृहि त्वमिष्टा पूर्ते स ७ सृजेथा मयं च ।**
  अस्मिन्सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत ॥
- **प्रियंगु कलिका श्यामं रुपेण प्रतिमं बुधम् ।**
  सौम्यं सौम्य गुणोपेतं तं बुधं प्रणमाम्यहम् ॥
- ॐ भूर्भुवः स्वः मगधदेशोद्भव आत्रेयस गोत्र हरित वर्ण भो बुध । इहागच्छ । इहतिष्ठ बुधाय नमः । बुधम् आवाहयामि, स्थापयामि, पूजयामि ।

५. बृहस्पतिम्

मण्डल के उत्तर में लकडी - पीपल फल - निम्बु

- **ॐ बृहस्पतेऽ अति यदर्यो अर्हाद्युमद् विभाति क्रतुमज्जनेषु।**
  यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम्॥
- **देवानां च ऋषीणां च गुरुं कांचन सन्निभम्।**
  बुद्धिभूतं त्रिलोकेशं तन्नमामि बृहस्पतिम्॥
- ॐ भूर्भुवः स्वः सिन्धुदेशोद्भव अंगिरस गोत्र पीत वर्ण भो बृहस्पते। इहागच्छ।
  इहतिष्ठ बृहस्पतये नमः। बृहस्मतिम् आवाहयामि, स्थापयामि, पूजयामि।

६. शुक्रम्

मण्डल के पूर्व में लकडी - गूलर फल - बीजोरु

- **ॐ अन्नात् परिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः।**
  ऋतेन सत्य मिन्द्रियं विपान ७ शुक्र मन्धस इन्द्रस्येन्द्रिय मिदं पयोऽमृतं मधु॥
- **हिम कुन्द मृणालाभं दैत्यानां परमं गुरुम्।**
  सर्वशास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहम्॥
- ॐ भूर्भुवः स्वः भोजकटदेशोद्भव भार्गवस गोत्र शुक्ल वर्ण भो शुक्र। इहागच्छ।
  इहतिष्ठ शुक्राय नमः। शुक्रम् आवाहयामि, स्थापयामि, पूजयामि।

७. शनिम्

मण्डल के पश्चिम में लकडी - शमी फल - कमल गट्टा

- **ॐ शन्नो देवी रभिष्टय आपो भवन्तु पीतये। शंय्यो रभि स्त्रवन्तु नः॥**
- **नीलांजन समाभासं रविपुत्रं यमाग्रजं।**
  छाया मार्तण्ड सम्भूतं तन्नमामि शनैश्चरम्॥
- ॐ भूर्भुवः स्वः सौराष्ट्र देशोद्भव काश्यपस गोत्र कृष्ण वर्ण भो शनैश्चर। इहागच्छ
  । इहतिष्ठ शनैश्चराय नमः। शनैश्चरम् आवाहयामि, स्थापयामि, पूजयामि।

८. राहुम्

मण्डल के नैर्ऋत्य कोण में लकडी – दुब फल - नारियल

- **ॐ कयानश्चित्र ऽ आभुवदूती सदावृधः सखा। कया शचिष्ठया वृता॥**
- **अर्द्धकायं महावीर्यं चन्द्रादित्य विमर्दनम्।**
  सिंहिका गर्भ संभूतं तं राहुं प्रणमाम्यहम्॥
- ॐ भूर्भुवः स्वः राठिनापुरोद्भव पैठीनस गोत्र कृष्ण वर्ण भो राहो। इहागच्छ।
  इहतिष्ठ राहवे नमः। राहुम् आवाहयामि, स्थापयामि, पूजयामि।

९. केतुम्

मण्डल के वायव्य कोण में लकडी - कुशा फल - दाडिम

- **ॐ केतुं कृण्वन्न केतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः॥**
- **पलाश पुष्प संकाशं तारका ग्रह मस्तकम्।**
  रौद्रं रौद्रत्मकं घोरं तं केतु प्रणमाम्यहम्॥
- ॐ भूर्भुवः स्वः अन्तर्वेदिसमुद्भव जैमिनिस गोत्र कृष्ण वर्ण भो केतु। इहागच्छ।
  इहतिष्ठ केतवे नमः। केतुम् आवाहयामि, स्थापयामि, पूजयामि।

॥ अधिदेवता स्थापनम् पूजनम् ॥

- विशेष पूजा, यज्ञ, अनुष्ठान, इत्यादि में नवग्रहों की स्थापना के उपरान्त सूर्य आदि ग्रहों के दाहिने (दक्षिण) की तरफ अधिदेवताओं का आवाहन एवं स्थापन करें।

१. ईश्वरम् सूर्य के दायें

ॐ त्रयम्बकं यजामहे सुगन्धिम् पुष्टिवर्द्धनम्।
उर्वारुक मिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥

- **ॐ पंचवक्त्रं वृषारुढमुमेशं च त्रिलोचनम्।**
आवाहयामीश्वरं ते खट्वांगवर धारिणम्॥
- ॐ भूर्भुवः स्वः ईश्वर इहागच्छ। इहतिष्ठ ईश्वराय नमः। ईश्वरम् आवाहयामि, स्थापयामि, पूजयामि।

२. उमाम् चंद्र के दायें

ॐ श्रीश्चते लक्ष्मीश्च पत्न्या वहोरात्रो पार्श्व नक्षत्राणि रूपमश्विनौ व्यात्तम्।
इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण॥

- **ॐ हेमाद्रि तनयां देवीं वरदां शंकर प्रियाम्।**
लम्बोदरस्य जननीमुमामावाहयाम्यहम्॥
- ॐ भूर्भुवः स्वः उमाम् इहागच्छ। इहतिष्ठ उमायै नमः। उमाम् आवाहयामि, स्थापयामि, पूजयामि।

३. स्कन्दम् मंगल के दायें

ॐ यद क्रन्दः प्रथमं जायमानः उद्यन्त् समुद्रा दुत वा पुरीषात्।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महिजातं ते अर्वन॥

- **ॐ रुद्रतेजः समुत्पन्नं देवसेनाग्रगं विभुम्।**
षण्मुखं कृत्तिकासूनुं स्कन्दम् आवाहयाम्यहम्॥
- ॐ भूर्भुवः स्वः स्कन्द इहागच्छ। इहतिष्ठ स्कन्दाय नमः। स्कन्दम् आवाहयामि, स्थापयामि, पूजयामि।

४. विष्णुम् बुध के दायें

ॐ विष्णो रराट मसि विष्णोः श्नप् त्रेस्थो विष्णोः
स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा॥

- **ॐ देवदेवं जगन्नाथं भक्तानुग्रह कारकम्।**
चतुर्भुजं रमानाथं विष्णुम् आवाहयाम्यहम्॥
- ॐ भूर्भुवः स्वः विष्णो इहागच्छ। इहतिष्ठ विष्णवे नमः। विष्णुम् आवाहयामि, स्थापयामि, पूजयामि।

५. ब्रह्माणम् गुरु के दायें

ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेनऽआवः।
सबुध्न्या उपमा ऽ अस्य विष्ठाः सतश्च योनिमसश्च विवः॥

- **ॐ कृष्णाजिनाम्बरधरं पद्मसंस्थं चतुर्मुखम् ।**
  वेदाधारं निरालम्बं विधिम् आवाहयाम्यहम् ॥
- ॐ भूर्भुवः स्वः ब्रह्मन इहागच्छ । इहतिष्ठ ब्रह्मणे नमः । ब्रह्माणम् आवाहयामि, स्थापयामि, पूजयामि ।

६. इन्द्रम् — शुक्र के दायें

ॐ सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्राहा शूर विद्वान् ।
जहि शत्रु२ रप मृधो नुदस्वाथा भयं कृणुहि विश्वतो नः ॥
- **ॐ देवराजं गजारुढं शुनासीरं शतक्रतुम् ।**
  वज्रहस्तं महाबाहुमिन्द्रम् आवाहयाम्यहम् ॥
- ॐ भूर्भुवः स्वः इन्द्रे इहागच्छ । इहतिष्ठ इन्द्राय नमः । इन्द्रम् आवाहयामि, स्थापयामि, पूजयामि ।

७. यमम् — शनि के दायें

ॐ यमाय त्वांगिरस्वते पितृमते स्वाहा ।
स्वाहा घर्माय स्वाहा घर्मः पित्रो ॥
- **ॐ धर्मराजं महावीर्यं दक्षिणादिक्पतिं प्रभुम् ।**
  रक्तेक्षणं महाबाहुं यमम् आवाहयाम्यहम् ॥
- ॐ भूर्भुवः स्वः यम इहागच्छ । इहतिष्ठ यमाय नमः । यमम् आवाहयामि, स्थापयामि, पूजयामि ।

८. कालम् — राहु के दायें

ॐ कार्षिरसि समुद्रस्य त्वा क्षित्या ऽ उन्नयामि ।
समापो ऽ अद्भिरग्मत समोषधी भिरोषधीः ॥
- **ॐ अनाकारमनन्ताख्यं वर्त्तमानं दिने दिने ।**
  कलाकाष्ठादि रुपेण कालम् आवाहयाम्यहम् ॥
- ॐ भूर्भुवः स्वः काले इहागच्छ । इहतिष्ठ कालाय नमः । कालम् आवाहयामि, स्थापयामि, पूजयामि ।

९. चित्रगुप्तम् — केतु के दायें

ॐ चित्रावसो स्वस्ति ते पारमशीय ॥
- **ॐ धर्मराज सभासंस्थं कृता कृत विवेकिनम् ।**
  आवाहयेच्चित्रगुप्तं लेखनी पत्र हस्तकम् ॥
- ॐ भूर्भुवः स्वः चित्रगुप्त इहागच्छ । इहतिष्ठ चित्रगुप्ताय नमः । चित्रगुप्तम् आवाहयामि, स्थापयामि, पूजयामि ।

॥ प्रत्यधि देवता स्थापनम् पूजनम् ॥

- नवग्रहों के बायीं ओर प्रत्यधि देवताओं का आवाहन स्थापन एवं पूजन करें।

१. अग्निम् सूर्य के बायें

**ॐ अग्निदूतं पुरो दधे हव्यवाहमु प ब्रुवे ।
देवाँ २ ऽआसादयादिह ॥**

- **ॐ रक्तमाल्याम्बरधरं रक्तपद्मासनस्थितम् ।
वरदाभयदं देवमग्निम् आवाहयाम्यहम् ॥**
- ॐ भूर्भुवः स्वः अग्ने इहागच्छ । इहतिष्ठ अग्नये नमः । अग्निम् आवाहयामि, स्थापयामि, पूजयामि ।

२. आपः चन्द्र के बायें

ॐ आपो हिष्ठा मयोभुवस्तानऽ ऊर्जे दधातन । महेरणाय चक्षसे यो वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः। तस्माऽ अरङ्गमामवो यस्य क्षयाय जिन्वथ आपो जनयथा च नः ॥

- **ॐ आदि देव समुद्भूता जगच्छूद्धिकराः शुभाः ।
औषध्याप्यायनकरा अपाम् आवाहयाम्यहम् ॥**
- ॐ भूर्भुवः स्वः अप इहागच्छ । इहतिष्ठ अद्भयो नमः । अप आवाहयामि, स्थापयामि, पूजयामि ।

३. पृथ्वीम् मंगल के बायें

**ॐ स्योना पृथिवी नो भवानृक्षरा निवेशनी ।
यच्छा नः शर्म स प्रथाः ॥**

- **ॐ शुक्लवर्णां विशालाक्षीं कूर्मपृष्ठोपरिस्थिताम् ।
सर्वशस्याश्रयां देवीं धराम् आवाहयाम्यहम् ॥**
- ॐ भूर्भुवः स्वः पृथिवि इहागच्छ । इहतिष्ठ पृथिव्यै नमः । पृथिवीम् आवाहयामि, स्थापयामि, पूजयामि ।

४. विष्णुम् बुध के बायें

**ॐ इदं विष्णुर्वि चक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पा ७ सुरे स्वाहा ॥**

- **ॐ शंख चक्र गदा पद्म हस्तं गरुडवाहनम् ।
किरीट कुण्डलधरं विष्णुम् आवाहयाम्यहम् ॥**
- ॐ भूर्भुवः स्वः विष्णो इहागच्छ । इहतिष्ठ विष्णवे नमः । विष्णुम् आवाहयामि, स्थापयामि, पूजयामि ।

५. इन्द्रम् गुरु के बायें

**ॐ त्रातारमिन्द्र मवितार मिन्द्र ७ हवे हवे सुहव ७ शूरमिन्द्रम् ।
ह्वायामि शक्रम्पुरुहूतमिन्द्र ७ स्वस्ति नो मघवा धात्विन्द्रः ॥**

- **ॐ एरावद गजारुढं सहस्त्राक्षं शचीमतिम् ।**
  वज्रहस्तं सुराधीशमिन्द्रम् आवाहयाम्यहम् ॥
- ॐ भूर्भुवः स्वः इन्द्र इहागच्छ । इहतिष्ठ इन्द्राय नमः । इन्द्रम् आवाहयामि, स्थापयामि, पूजयामि ।

६. इन्द्राणीम् शुक्र के बायें

ॐ अदित्यै रास्ना सीन्द्राण्या ऽउष्णीषः ।
पूषाऽसि घर्माय दीष्व ॥

- **ॐ प्रसन्न वदनां दवीं देवराजस्य वल्लभाम् ।**
  नानालंकार संयुक्तां शचीम् आवाहयाम्यहम् ॥
- ॐ भूर्भुवः स्वः इन्द्राणि इहागच्छ । इहतिष्ठ इन्द्राण्यै नमः । इन्द्राणीम् आवाहयामि, स्थापयामि, पूजयामि ।

७. प्रजापतिम् शनि के बायें

ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव ।
यत्कामास्ते जुहुमस्तन्नो ऽअस्तु वय ७ स्याम पतयो रयीणाम् ॥

- **ॐ आवाहयाम्यहं देव देवेशं च प्रजापतिम् ।**
  अनेक व्रत कर्तारं सर्वेषां च पितामहम् ॥
- ॐ भूर्भुवः स्वः प्रजापते इहागच्छ । इहतिष्ठ प्रजापतये नमः । प्रजापतिम् आवाहयामि, स्थापयामि, पूजयामि ।

८. सर्प राहु के बायें

ॐ नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु ।
येऽ अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥

- **ॐ अनन्ताद्यान् महाकायान् नानामणि विराजितान् ।**
  आवाहयाम्यहं सर्पान् फणासप्तकमण्डितान् ॥
- ॐ भूर्भुवः स्वः सर्पा इहागच्छ । इहतिष्ठ सर्पेभ्यो नमः । सर्पम् आवाहयामि, स्थापयामि, पूजयामि ।

९. ब्रह्मा केतु के बायें

ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद् विसीमतः सुरुचो वेनऽ आवः ।
सबुध्न्याऽ उपमाऽ अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥

- **ॐ हंसपृष्ठ समारुढं देवता गण पूजितम् ।**
  आवाहयाम्यहं देवं ब्रह्माणं कमलासनम् ॥
- ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छ । इहतिष्ठ ब्रह्मणे नमः । ब्रह्माणम् आवाहयामि, स्थापयामि, पूजयामि ।

॥ पंच लोकपाल देवता पूजनम् ॥

- **गणेश अम्बिका वायु आकाश अश्विनौ तथा । ग्रहाणांमुत्तरे पंच लोकपालाः प्रकीर्तिताः ॥**

१. गणेश — राहु के उत्तर

ॐ गणानान्त्वा गणपति ७ हवामहे प्रियाणान्त्वां प्रियपति ७ हवामहे निधी नान्त्वा निधिपति ७ हवामहे व्वसो मम आहमजानि गर्भधमात्त्वमजासि गर्भधं ॥

- **ॐ लम्बोदरं महाकायं गजवक्त्रं चतुर्भुजम् । आवाहयाम्यहम् देवं गणेशं सिद्धिदायकम् ॥**
- ॐ भूर्भुवः स्वः गणपते इहागच्छ । इहतिष्ठ गणपतये नमः । गणपतिम् आवाहयामि, स्थापयामि, पूजयामि ।

२. दुर्गा — शनि के उत्तर

ॐ अम्बेऽ अम्बिकेऽ अम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पील वासिनीम् ॥

- **ॐ पत्तने नगरे ग्रामे विपिने पर्वते गृहे । नानाजाति कुलेशानीं दुर्गाम् आवाहयाम्यहम् ॥**
- ॐ भूर्भुवः स्वः दुर्गे इहागच्छ । इहतिष्ठ दुर्गायै नमः । दुर्गाम् आवाहयामि, स्थापयामि, पूजयामि ।

३. वायु — सूर्य के उत्तर

ॐ आ नो नियुद्भिःशतिनीभिरध्वर ७ सहश्रिणीभिरुपयाहि यज्ञम् । वायो अस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः ॥

- **ॐ आवाहयाम्यहं वायुं भूतानां देहधारिणम् । सर्वाधारं महावेगं मृगवाहनमीश्वरम् ॥**
- ॐ भूर्भुवः स्वः वायो इहागच्छ । इहतिष्ठ वायवे नमः । वायुम् आवाहयामि, स्थापयामि, पूजयामि ।

४. आकाश — शुक्र के पूर्व

ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा । दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा ॥

- **ॐ अनाकारं शब्दगुणां द्यावाभूम्यन्तरस्थितम् । आवाहयाम्यहं देवमाकाशं सर्वगं शुभम् ॥**
- ॐ भूर्भुवः स्वः आकाश इहागच्छ । इहतिष्ठ आकाशाय नमः । आकाशम् आवाहयामि, स्थापयामि, पूजयामि ।

५. अश्विनी — ग्रह के उत्तर

ॐ यावां कशा मधु मत्य अश्विना सूनृतावती । तया यज्ञं मिमिक्षत ॥

- **ॐ देवतानां च भैषज्ये सुकुमारौ भिषग्वरौ । आवाहयाम्यहं देवावश्विनौ पुष्टि वर्द्धनौ ॥**
- ॐ भूर्भुवः स्वः अश्विनौ इहागच्छ । इहतिष्ठ अश्विभ्याम् नमः । अश्विनौ आवाहयामि, स्थापयामि, पूजयामि ।

॥ वास्तष्पतेः क्षेत्राधिपतेर्दशदिक्पालानाम् च पूजनम् ॥

- नवग्रह मण्डल के बाहर दशदिक्पाल का आवाहन करें।

  - **रुद्रा वह्निः पितृपति नैऋतो वरुणे मरुत्।**
    कुबेर ईशो ब्रह्मा च ह्यनन्तो दश दिक्पतिः॥

- **वास्तोष्पतिम् गुरत्तरे**

  ॐ वास्तोष्पते प्रति जानीह्यस्मान् स्वावेशो अनमीवा भवो नः।
  यत्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे॥
  - **वास्तोष्पतिं विदिक् कार्यं भूशय्या भिरतं प्रभुम्।**
    आवाहयाम्यहं देवं सर्व कर्म फल प्रदम्॥
  - ॐ भूर्भुवः स्वः वास्तोष्पते इहागच्छ। इहतिष्ठ वास्तोष्पतये नमः। वास्तोष्पतिम् आवाहयामि, स्थापयामि, पूजयामि।

- **क्षेत्राधिपतिम् गुरत्तरे**

  ॐ नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात् पुर एतारमग्नेः।
  एमेनमवृधन्नमृता अमर्त्यं वैश्वानरं क्षैत्रजित्याय देवाः॥
  - **ॐ भूतप्रेत पिशाचाद्यैरावृतं शूल पाणिनम्।**
    आवाहये क्षेत्रपालं कर्मण्यस्मिन् सुखाय नः॥
  - ॐ भूर्भुवः स्वः क्षैत्राधिपते इहागच्छ। इहतिष्ठ क्षेत्राधिपतये नमः। क्षेत्राधिपतिम् आवाहयामि, स्थापयामि, पूजयामि।

१. इन्द्र पूर्व

ॐ त्रातार मिन्द्र मवितार मिन्द्र ७ हवे हवे सुहव ७ शूरमिन्द्रम्।
ह्वयामि शक्रम् पुरुहूतमिन्द्र ७ स्वस्ति नो मघवा धात्विन्द्रः॥
- **ॐ इन्द्रम् सुरपतिश्रेष्ठं वज्रहस्तं महाबलम्।**
  आवाहये यज्ञसिद्धयै शत यज्ञाधिपं प्रभुम्॥
- ॐ भूर्भुवः स्वः इन्द्र इहागच्छ। इहतिष्ठ इन्द्राय नमः। इन्द्रम् आवाहयामि, स्थापयामि, पूजयामि।

२. अग्नि अग्नि

ॐ त्वन्नोऽ अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य।
त्राता तोकस्य तनये गवामस्य निमेष ७ रक्षमाणस्तव व्रते॥
- **ॐ त्रिपादं सप्तहस्तं च द्विमूर्द्धानं द्विनासिकम्।**
  षण्नेत्रं च चतुः श्रोत्रमग्निम् आवाहयाम्यहम्॥
- ॐ भूर्भुवः स्वः अग्ने इहागच्छ। इहतिष्ठ अग्नये नमः। अग्निम् आवाहयामि, स्थापयामि, पूजयामि।

३. यम	दक्षिण	**ॐ यमाय त्वांगिरस्वते पितृमते स्वाहा । स्वाहा घर्माय स्वाहा घर्म पित्रे ॥**

- **ॐ महा महिष मारुढं दण्ड हस्तं महाबलम् । यज्ञसंरक्षणार्थाय यमम् आवाहयाम्यहम् ॥**
- ॐ भूर्भुवः स्वः यम इहागच्छ । इहतिष्ठ यमाय नमः । यमम् आवाहयामि, स्थापयामि, पूजयामि ।

४. नैऋत्य	नैर्ऋत्य	**ॐ असुन्नवन्तमयजमानमिच्छ स्तेन- स्येत्यामन्विहितस्करस्य । अन्यमस्मदिच्छ- सात ऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥**

- **ॐ सर्वप्रेताधिपं देवं निर्ऋतिं नील विग्रहम् । आवाहये यज्ञ सिद्धयै नरारुढं वरप्रदम् ॥**
- ॐ भूर्भुवः स्वः निर्ऋते इहागच्छ । इहतिष्ठ निर्ऋतये नमः । निर्ऋतिम् आवाहयामि, स्थापयामि, पूजयामि ।

५. वरुण	पश्चिम	**ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोध्युरूश ७ समानऽ आयुः प्रमोषीः ॥**

- **ॐ शुद्धस्फटिक संकाशं जलेशं यादसां पतिम् । आवाहये प्रतीचीशं वरुणं सर्वकामदम् ॥**
- ॐ भूर्भुवः स्वः वरुण इहागच्छ । इहतिष्ठ वरुणाय नमः । वरुणम् आवाहयामि, स्थापयामि, पूजयामि ।

६. वायु	वायव्य	**ॐ आ नो नियुद्भिः शतिनीभिरध्वर ७ सहस्त्रिणी भिरुपया हियज्ञम् । वायोऽ अस्मिन्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥**

- **ॐ मनोजवं महातेजं सर्वतश्चरिणं शुभम् । यज्ञ संरक्षणार्थाय वायुम् आवाहयाम्यहम् ॥**
- ॐ भूर्भुवः स्वः वायो इहागच्छ । इहतिष्ठ वायवे नमः । वायुम् आवाहयामि, स्थापयामि, पूजयामि ।

७. सोम	उत्तर	**ॐ वय ७ सोमव्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥**

- **ॐ आनाहयामि देवेशं धनदं यक्ष पूजितम् । महाबलं दिव्य देहं नरयानगतिं विभम् ॥**
- ॐ भूर्भुवः स्वः सोम इहागच्छ । इहतिष्ठ सोमाय नमः । सोमम् आवाहयामि, स्थापयामि, पूजयामि ।

८. ईशान ईशान

ॐ तमीशानं जगतस् तस्थु षस्पतिं धियं जिन्वम वसे हूमहे वयम् ।
पूषा नो यथा वेद सामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥

- **ॐ सर्वाधिपं महादेवं भूतानां पतिमव्ययम् ।**
  आवाहये तमीशानं लोकानामभय प्रदम् ॥
- ॐ भूर्भुवः स्वः ईशान इहागच्छ । इहतिष्ठ ईशानाय नमः । ईशानम् आवाहयामि, स्थापयामि, पूजयामि ।

९. ब्रह्मा पूर्व-ईशान

ॐ अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।
यश ७ सते स्तुवते धायि वज्रऽ इन्द्र ज्येष्ठाऽ अस्माँऽ अवन्तु देवाः ॥

- **ॐ पद्मयोनिं चतुर्मूर्तिं वेदगर्भं पितामहम् ।**
  आवाहयामि ब्रह्माणां यज्ञ संसिद्धिहेतवे ॥
- ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छ । इहतिष्ठ ब्रह्मणे नमः । ब्रह्माणम् आवाहयामि, स्थापयामि, पूजयामि ।

१०.अनन्त नैर्ऋत्य-पश्चिम

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी ।
यच्छा नः शर्म सप्रथाः ॥

- **ॐ अनन्तं सर्वनागानामधिपं विश्व रुपिणाम् ।**
  जगतां शान्तिकर्तारं मण्डले स्थापयाम्यहम् ॥
- ॐ भूर्भुवः स्वः अनन्त इहागच्छ । इहतिष्ठ अनन्ताय नमः । अनन्तम् आवाहयामि, स्थापयामि, पूजयामि ।

- हस्ते अक्षतानादाय मनोजूतिरीति मन्त्रेण नवग्रह अधिदेवता, प्रत्यधिदेवता, विनायकादि पंचलोकपाल वास्तोष्पति क्षेत्राधिपती इन्द्रादि दशदिक्पाल सहितः सुप्रतिष्ठिता वरदाः भवन्तु ।
- इति प्रतिष्ठाप्य नाममन्त्रैः पुरुषुक्तेन वा षोडषोपचारैः सम्पूजयेत् ।

- पुष्पांजलि

आदित्यचन्द्रौ कुजसौम्यजीव-श्रीशुक्रसूर्यात्मजराहुकेतून् ।
नमामि नित्यं शुभदायकास्ते भवन्तु मे प्रीतिकराश्च सर्वे ॥

- **सूर्यः शौर्य मथेन्दु रूच्च पदवीं सन्मङ्गलं मङ्गलः ।**
  सद्बुद्धिञ्च बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः ॥
- **राहु र्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं ।**
  नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहा : ॥
- **आयुश्च वित्तञ्च तथा सुखं च धर्मार्थलाभौ बहुपुत्रतां च । शत्रुक्षयं राजसु पूज्यतां च तुष्टा ग्रहाः क्षेमकरा भवन्तु ॥**

- अनेन नवग्रह मण्डलस्थ सूर्यादि देवानां पूजनेन ग्रहमण्डलस्थाः सर्वे सूर्यादि देवताः प्रीयन्तां न मम ।

॥ इति आवाहित सूर्याद्यनन्तान्त देवानाम् आवाहनम् स्थापनम् पूजनम् समाप्तम् ॥

- **प्रकारान्तरम्**
  वृतमण्डलमादित्यं चतुरस्त्रं निशाकरम् । त्रिकोणं मंगलं चैव बुधं वै बाण सन्निभम् ॥
  गुरवे पट्टिशाकारं पचंकाणं भृगुं तथा । मन्दे च धनुषाकारं सुर्पाकारं तु राहवे ॥
  केतवे च ध्वजाकारं मण्डलानि क्रमेण तु । शुक्रार्कौ प्राङ्मुखो ज्ञेयौ गुरु सौम्यावुदंमुखो ॥
  प्रत्यङ्मुखो शनि सोमो शेषा दक्षिणतो मुखाः । मध्ये तु भास्करं दिन्द्याच्छाशिनं पूर्वदक्षिणे ॥
  दक्षिणे लोहितं विन्द्याद् बुधं पूर्वोत्तरेण तु । उत्तरेण गुरुं विन्द्यात् पूर्वेणैव तु भार्गवम् ॥
  पश्चिमे तु शनिं विन्द्याद्राहुं दक्षिण पश्चिमे । पश्चिमोत्तरतः केतुं इत्येषा ग्रहसंस्थितिः ॥
  आदित्याभिमुखाः सर्वे साधिप्रत्यधिदेवताः । अधिदेवता दक्षिणे वामे प्रत्यधिदेवताः ॥
  अरुणौ सूर्य भौमो च श्वेतौ शुक्रनिशाकरौ । हरितवर्णो बुधश्चैव पीतवर्णो गुरुस्तथा ॥
  कृष्णवर्णाः शनि राहु केतवस्तु तथैव च ।

॥ सूर्य ग्रह मंत्र, जप, कवच, स्तोत्र ॥

अनुक्रमाणिका

1. सूर्य मन्त्र 02
2. सूर्य प्रार्थना, व्रत, स्नान, दान 03
3. सूर्य वैदिक मन्त्र न्यासादि प्रयोग 04
4. सूर्य कवचम् 05
5. सूर्य कवचम् (रुद्रयामल) 06
6. आदित्य हृदय स्तोत्रम् 09
7. सूर्य स्तोत्रम् - १ 12
8. सूर्य स्तोत्रम् - २ 14
9. सूर्य स्तोत्रम् (याज्ञवल्क्य कृतं) 15
10. सूर्य मण्डल स्तोत्रम् / गायत्री स्तवन 16
11. सूर्य द्वादश नाम स्तोत्रम् 17
12. सूर्य एहेतुंशति (२१) नाम स्तोत्रम् 17
13. सूर्याष्टकम् 18
14. चाक्षुषोपनिषद् 19
15. सूर्य अष्टोत्तरशत नामावली 20
16. सूर्य चालीसा 21
17. सूर्य देव की आरती 23
18.

सूर्य यन्त्रम्

रसेन्दुनागा नगवाणरामा
युग्मांकवेदा नवकोष्ठमध्ये ।
विलिख्य धार्यं गदनाशनाय
वदन्ति गर्गामहामुनीन्द्राः ॥

६	१	८
७	५	३
२	९	४

॥ सूर्य देव ग्रह ॥

सूर्य कलिंग देश में उद्भव। कश्यप गोत्र। जाति क्षत्रिय। माता अदिति। जन्म नाम मार्तण्ड। प्रथम पत्नी संज्ञा जिससे वैवस्वत मनु, यम, यमी उत्पन्न हुए। दूसरी पत्नी छाया जिससे सावर्णिकी मनु, शनि, ताप्ती, अश्विनी

- **शुभाशुभत्व** — **क्रूर ग्रह**
- **भोग काल** — **30 दिन (एक मास)**
- **बीज मंत्र** — **ॐ घृणि: सूर्याय नम:।**
  - **ॐ ह्रीं ह्रौं सूर्याय नम:।**
  - **ॐ सूर्याय नम:।**
- **तांत्रिक मंत्र** — **ॐ ह्राँ ह्रीं ह्रौं स: सूर्याय नम:।**
  - **ह्रिं ह्यूं।** द्व्यक्षर मन्त्र मार्त्तण्ड भैरव
  - **ॐ ह्सौ: श्रीं आं ग्रहाधिराजाय आदित्याय स्वाहा।** विश्वनाथसारोद्धारे
- **वैदिक मंत्र** — **ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।**
  हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥
- **पुराणोक्त मंत्र** — **ॐ जपाकुसुम संकाशं काश्यपेयं महाद्युतिम्।**
  तमोरिं सर्व पापघ्नं प्रणतोऽस्मि दिवाकरम्॥
- **अधिदेवता-ईश्वरम्** — **ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।**
  उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात्॥
- **प्रत्यधिदेवता-अग्निम्** — **ॐ अग्निं दूतं पुरो दधे हव्यवाहमुपहब्रुवे। देवाँ ऽआसादयादिह।**
- **सूर्य गायत्री मंत्र** — **ॐ आदित्याय विद्महे प्रभाकराय धीमहि तन्नो सूर्य: प्रचोदयात्॥**
- **जप संख्या** — **7,000 कलयुगे चतुर्थगुणो अर्थात 28,000**
  + दशांश हवन 2,800
  + दशांश तर्पण 280
  + दशांश मार्जन 28 = 31,108
- **जप समय** — **सूर्योदय काल**
- **हवनवस्तु** — **अर्क, मदार**
- **रत्न** — **मीणिक या विद्रुम - 6.5 रत्ती, रविवार, पूर्व दिशा, प्रात:काल, अनामिका**

- **सूर्य प्रार्थना**

पद्मासनः पद्मकरो द्विबाहुः, पद्मद्युतिः सप्ततुरङ्गवाहः।
दिवाकरो लोकगुरुः किरीटी, मयि प्रसादं विदधातु देव॥

- हे सूर्यदेव! आप रक्तकमल के आसनपर विराजमान रहते हैं, आपके दो हाथ हैं तथा आप दोनों हाथों में रक्तकमल लिये रहते हैं। रक्तकमल के समान आपकी आभा है। आपके वाहन - रथ में सात घोड़े हैं, आप दिन में प्रकाश फैलाने वाले हैं, लोकों के गुरु हैं तथा मुकुट धारण किये हुए हैं, आप प्रसन्न होकर मुझपर अनुग्रह करें।

- **सूर्य का व्रत**

एक वर्ष या ३० रविवारों तक अथवा १२ रविवारों तक करना चाहिये। व्रत के दिन लाल रंग का वस्त्र धारण करके '**ॐ ह्रां ह्रीं ह्रौं सः सूर्याय नमः** इस मन्त्र का १२ या ५ अथवा ३ माला जप करे जप के बाद शुद्ध जल, रक्त चन्दन, अक्षत, लाल पुष्प और दूर्वा से सूर्य को अर्घ्य दे। भोजन में गेहूँ की रोटी, दलिया, दूध, दही, घी और चीनी खाये। नमक नहीं खाये। इस व्रत के प्रभाव से सूर्य का अशुभ फल शुभ फल में परिणत हो जाता है। तेजस्विता बढ़ती है। शारीरिक रोग शान्त होते हैं। आरोग्यता प्राप्त होती है।

- **अनिष्टे सूर्ये शान्ति स्नानम्**

- **काश्मीरयष्टीमधुपद्मकैला, मनःशिलोशीरवसन्तदूतिभिः।**
  सदारुभिः स्यादहिते खरांशौ, निमज्जनं नुः किल कर्मसिद्ध्यै॥
- सूर्य की अनिष्ट-शान्ति के लिये केशर, जेठीमधु, कमलगट्टा, इलायची, मन:शिल, खस, देवदारु और पाटला से स्नान करना चाहिये।

- **सूर्य दान**

कौसुम्भवस्त्रं गुडहेमताम्रं, माणिक्यगोधूमसुवर्णपद्म्।
सवत्सगोदानमिति प्रणीतं, दुष्टाय सूर्याय मसूरिकाश्च॥ ज्योतिःसार

- **माणिक्य गोधूम सवत्स धेनुः कोसुंभवासो गुडहेमताम्रम्।**
  आरक्तकं चन्दनमंबुजं च वदंति दानं रविनन्दनाय॥
- सूर्य हेतु लाल-पीले रंग से मिश्रित वर्ण का वस्त्र, गुड़, स्वर्ण, ताम्र, माणिक्य, गेहूँ, लाल कमल, सवत्सा गौ तथा मसूर की दाल का दान करना चाहिये।
- सूर्य प्रतिकूल स्थिति में हो तो ' धेनु' का दान करना चाहिये।
- 'संहिता प्रदीप' ग्रन्थ के अनुसार सूर्य हेतु ' ताम्बूल' का दान करना चाहिये।
- रविवार के दिन यथाशक्ति दक्षिणा के साथ देना चाहिए।

॥ सूर्य वैदिक मन्त्रन्यासादि प्रयोगः ॥

किसी की जन्म कुण्डली में सूर्य शनि या सुर्य राहु साथ हो या आमने सामने हो तो व्यक्ति जीवन में दुःखी रहता है। सूर्य से चौथे, आठवें, बाहरवें, शनि या राहु केतु होवे तो भी व्यक्ति को सामाजिक, आर्थिक कठिनाइयों का सामना करना पड़ता है। नेत्र पीड़ा, चर्मरोग कुछरोग अकस्मात् धोखा, घात योग भी व्यक्ति को प्राप्त होते हैं। अत: व्यक्ति को सूर्योपासना करती चाहियें।

- **वैदिक मंत्र** **ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥**
- **विनियोगः** आकृष्णेनेत्यस्य हिरण्यस्तूप ऋषिः। अनुष्टप् छंदः। सविता देवता। रजसेति बीजम्। वर्त्तमान इति शक्तिः। सूर्यप्रीत्यर्थे जपे विनियोगः॥
- **ऋष्यादि न्यासः** ॐ हिरण्यस्तूपत्ऋषये नमः, शिरसि। ॐ त्रिष्टुप् छन्दसे नमः, मुखे। ॐ सवितृदेवतायै नमः, हृदये। ॐ रजसा बीजाय नमः, गुह्ये। ॐ वर्त्तमानशक्तये नमः, पादयोः॥
- **करन्यासः-** ॐ आकृष्णेनेत्यंगुष्ठाभ्यां नमः। ॐ रजसेति तर्जनीभ्यां नमः। ॐ वर्त्तमान इति मध्यमाभ्यां नमः। ॐ निवेशयन्नमृतम्मर्त्यंचेत्यनामिकाभ्यां नमः। ॐ हिरण्ययेन सविता रथेनेति कनिष्ठिकाभ्यां नमः। ॐ आदेवो भुवनानि पश्यन्निति करतलकर पृष्ठाभ्यां नमः॥
- **हृदयादिन्यासः-** ॐ आकृष्णेनेति हृदयाय नमः। ॐ रजसेति शिरसे स्वाहा। ॐ वर्तमान इति शिखायै वषट्। ॐ निवेशयन्नमृतम्मत्यं चेति कवचाय हुं। ॐ हिरण्ययेन सविता रथेनेति नेत्रत्रयाय वौषट्। ॐ आदेवोयाति भुवनानि पश्यन्नित्यस्त्राय फट्॥
- **मन्त्रन्यासः-** ॐ आकृष्णेनेति शिरसि। ॐ रजसेति ललाटे। ॐ वर्त्तमान इति मुखे। ॐ निवेशयन्निति हृदये। ॐ अमृतं चैति नाभौ। ॐ मर्त्यंचेति कट्याम्। ॐ हिरण्ययेनेत्यूर्वोः। ॐ सवितेति जानुनोः। ॐ रथेनेति जंघयोः। ॐ आदे वो याति गुल्फयोः। ॐ भुवनानीति पादयोः। ॐ पश्यन्निति सर्वांगेषु न्यसेत्॥

॥ सूर्य कवचम् ॥

- **विनियोग** अस्य श्री सुर्य कवच स्तोत्रस्य । ब्रह्मा ऋषि: । अनुष्टुप छंद: । सूर्यो देवता । सूर्य प्रीत्यर्थे जपे विनियोग: ॥

- **याज्ञवल्क्य उवाच**

  - **श्रणुष्व मुनिशार्दूल सूर्यस्य कवचं शुभम् ।**
    शरीरारोग्दं दिव्यं सव सौभाग्य दायकम् ॥ ॥१॥

  - **देदीप्यमान मुकुटं स्फुरन्मकर कुण्डलम ।**
    ध्यात्वा सहस्त्रं किरणं स्तोत्र मेततु दीरयेत् ॥ ॥२॥

  - **शिरों में भास्कर: पातु ललाट मेडमित दुति: ।**
    नेत्रे दिनमणि: पातु श्रवणे वासरेश्वर: ॥ ॥३॥

  - **ध्राणं धर्मं धृणि: पातु वदनं वेद वाहन: ।**
    जिव्हां में मानद: पातु कण्ठं में सुर वन्दित: ॥ ॥४॥

  - **रक्षात्मकं स्तोत्रं लिखित्वा भूर्ज पत्रके ।**
    दधाति य: करे तस्य वशगा: सर्व सिद्धय: ॥ ॥५॥

  - **सुस्नातो यो जपेत् सम्यग्योधिते स्वस्थ: मानस: ।**
    सरोग मुक्तो दीर्घायु सुखं पुष्टिं च विदंति ॥ ॥६॥

॥ इति श्री सूर्य कवच सम्पूर्णम् ॥

॥ सूर्य कवचम् ॥

- **श्रीभैरव उवाच**

यो देवदेवो भगवान् भास्करो महसां निधिः ।
गयत्रीनायको भास्वान् सवितेति प्रगीयते ॥ ॥ १ ॥

- तस्याहं कवचं दिव्यं वज्रपञ्जरकाभिधम् ।
सर्वमन्त्रमयं गुह्यं मूल-विद्या-रहस्यकम् ॥ ॥ २ ॥
- सर्वपापापहं देवि दुःखदारिद्र्यनाशनम् ।
महाकुष्ठहरं पुण्यं सर्वरोग निवर्हणम् ॥ ॥३ ॥
- सर्वशत्रुसमूहघ्नं सम्ग्रामे विजयप्रदम् ।
सर्वतेजोमयं सर्व देव-दानव पूजितम् ॥ ॥ ४ ॥
- रणे राजभये घोरे सर्वोपद्रव नाशनम् ।
मातृकावेष्टितं वर्म भैरवाननिर्गतम् ॥ ॥ ५ ॥
- ग्रहपीडा हरं देवि सर्वसङ्कटनाशनम् ।
धारणादस्य देवेशि ब्रह्मा लोकपितामहः ॥ ॥ ६ ॥
- विल्णुर्नारायणो देवि रणे दैत्याञ्जिओष्यति ।
शङ्करः सर्वलोकेशो वासवोऽपि दिवस्पतिः ॥ ॥ ७ ॥
- ओषधीशः शशी देवि शिवोऽहं भैरवेश्वरः ।
मन्त्रात्मकं परं वर्म सवितुः सारमुत्तमम् ॥ ॥ ८ ॥
- यो धारयेद् भुजे मूर्ध्नि रविवारे महेश्वरि ।
स राजवल्लभो लोके तेजस्वी वैरिमर्दनः ॥ ॥ ९ ॥
- बहुनोक्तेन किं देवि कवचस्यास्य धारणात् ।
इह लक्ष्मीधनारोग्यस्वृद्धिर्भवति नान्यथा ॥ ॥१०॥
- परत्र परमा मुक्तिर्देवानाअमपि दुर्लभा ।
कवचस्यास्य देवेशि मूलविद्यामयस्य च ॥ ॥११॥
- वज्रपञ्जरकाख्यस्य मुनिर्ब्रह्मा समीरितः
गायत्र्यं छन्द इत्युक्तं देवता सविता स्मृतः ॥ ॥१२॥
- माया बीजं शरत् शक्तिर्नमः कीलकमीश्वरि ।
सर्वार्थसाधने देवि विनियोगः प्रकीर्तितः ॥ ॥१३॥

- **सूर्य कवचं**

ओं अं आं इं ई शिरः पातु ओं सूर्यो मन्त्रविग्रहः ।
उं ऊं ऋ ॠ ललाटं मे ह्रां रविः पातु चिन्मयः ॥ ॥१४॥

- लृं लॄ एं ऐं पातु नेत्रे ह्रीं ममारुणसारथिः ।
ओं ओं अं अः श्रुती पातु सः सर्वजगदीश्वरः ॥ ॥१५॥
- कं खं गं घं पातु गण्डौ सूं सूरः सुरपूजितः ।
चं छं जं झं च नासां मे पातु यार्म् अर्यमा प्रभुः ॥ ॥१६॥

- टं ठं डं ढं मुखं पायाद् यं योगीश्वर पूजितः।
  तं थं दं धं गलं पातु नं नारायण वल्लभः॥ ॥१७॥
- पं फं बं भं मम स्कन्धौ पातु मं महसां निधिः।
  यं रं लं वं भुजौ पातु मूलं सकनायकः॥ ॥१८॥
- शं षं सं हं पातु वक्षो मूलमन्त्रमयोइ ध्रुवः।
  ळं क्षः कुक्षिसं सदा पातु ग्रहाथो दिनेश्वरः॥ ॥१९॥
- ङं ञं णं नं मं मे पातु पृष्ठं दिवस नायकः।
  अं आं इं ईं उं ऊं ऋं ॠं नाभिं पातु तमोपहः॥ ॥२० ॥
- ऌं ॡं एं ऐं ओं औं अं अः लिङ्गं मेडव्याद् ग्रहेश्वरः।
  कं खं गं घं चं छं जं झं कटिं भानुर्ममावतु॥ ॥२१॥
- टं ठं डं ढं तं थं दं धं जानू भास्वान् ममावतु।
  पं फं बं भं यं रं लं वं जंघे मेऽ अव्याद् विभाकरः॥ ॥२२॥
- शं षं सं हं ळं क्षः पातु मूलं पादौ त्रयितनुः।
  ङं ञं णं नं मं मे पातु सविता सकलं वपुः॥ ॥२३॥
- सोमः पूर्वे च मां पातु भौमोऽग्नौ मां सदावतु।
  बुधो मां दक्षिणे पातु नैऋत्या गुरेव माम्॥ ॥२४ ॥
- पश्चिमे मां सितः पातु वायव्यां मां शनैश्चरः।
  उत्तरे मां तमः पायादैशान्यां मां शिखी तथा॥ ॥२५॥
- ऊर्ध्वं मां पातु मिहिरो मामधस्ताञ्जगत्पतिः।
  प्रभाते भास्करः पातु मध्याह्ने मां दिनेश्वरः॥ ॥२६॥
- सायं वेदप्रियः पातु निशीथे विस्फुरापतिः।
  सर्वत्र सर्वदा सूर्यः पातु मां चक्रनायकः॥ ॥२७॥
- रणे राजकुले द्यूते विदादे शत्रुसङ्घटे।
  सङ्गामे च ज्वरे रोगे पातु मां सविता प्रभुः॥ ॥२८॥
- ॐ ॐ ॐ उत ॐ उ ॐ ह स म यः सूरोऽ वतान्मां भयाद्।
  ह्रां ह्रीं ह्रुं हहहा हसौः हसहसौः हंसोऽ वतात् सर्वतः।
  सः सः सः ससंसा नृपाद्वनचराच्चौराद्रणात् संकटात्।
  पायान्मां कुलनायकोऽपि सविता ओं ह्रीं ह सौः सर्वदा॥ ॥२९॥
- द्रां द्रीं द्रूं दधनं तथा च तरणिर्भाभैर्भयाद् भास्करो
  रां रीं रूं रुरुरूं रविर्ज्वरभयात् कुष्ठाच्च शूलामयात्।
  अं अं आं विविवीं महामयभयं मां पातु मार्तण्डको
  मूलव्याप्ततनुः सदावतु परं हंसः सहस्रांशुमान्॥ ॥३०॥

- **फलश्रुतिः**

इति श्रीकवच्चं दिव्यं वज्रपञ्जरकाभिधम् ।
सर्वदेवरहस्यं च मातृकामन्त्रवेष्टितम् ॥ ॥३१॥

- **महारोगभयघ्नं च पापघ्नं मन्मुखोदितम् ।**
गुह्यं यशस्करं पुण्यं सर्वश्रेयस्करं शिवे ॥ ॥३२॥
- **लिखित्वा रविवारे तु तिष्ये वा जन्मभे प्रिये ।**
अल्टगन्धेन दिव्येन सुधाक्षीरेण पार्वति ॥ ॥३३॥
- **अर्कक्षीरेण पुण्येन भूर्जत्वचि महेश्वरि ।**
कनकीकाष्ठलेखन्या कवचं भास्करोदये॥ ॥३४॥
- **श्वेत सूत्रेण रक्तेन श्यामेनावेष्टयेद् गुटीम् ।**
सौवर्णेनाथ संवेष्ठ्य धारयेन्मूर्ध्नि वा भुजे ॥ ॥३५॥
- **रणे रिपूञ्जयेद् देवि वादे सदसि जेष्यति ।**
राजमान्यो भवेन्नित्यं सर्वतेजोमयो भवेत् ॥ ॥३६॥
- **कण्ठस्था पुत्रदा देवि कुक्षिस्था रोगनाशिनी ।**
शिरःस्था गुटिका दिव्या राकलोकव शङ्करी ॥ ॥३७॥
- **भुजस्था धनदा नित्यं तेजोबुद्धिविवर्धिनी ।**
वन्ध्या वा काकवन्ध्या वा मृतवत्सा च याङ्गना ॥ ॥३८॥
- **कण्ठे सा धारयेन्नित्यं बहुपुत्रा प्रजायये ।**
यस्य देहे भवेन्नित्यं गुटिकैषा महेश्वरि ॥ ॥३९॥
- **महास्त्राणीन्द्रमुक्तानि ब्रह्मास्त्रादीनि पार्वति ।**
तद्देहं प्राप्य व्यर्थानि भविष्यन्ति न संशयः ॥ ॥४०॥
- **त्रिकालं यः पठेन्नित्यं कवचं वज्रपञ्जरम् ।**
तस्य सद्यो महादेवि सविता वरदो भवेत् ॥ ॥४१॥
- **अज्ञात्वा कवचं देवि पूजयेद् यस्त्रयीतनुम् ।**
तस्य पूजार्जितं पुण्यं जन्मकोटिषु निष्फलम् ॥ ॥४२॥
- **शतावर्तं पठेद्वर्म सप्तम्यां रविवासरे ।**
महाकुष्ठार्दितो देवि मुच्यते नात्र संशयः ॥ ॥४३॥
- **निरोगो यः पठेद्वर्म दरिद्रो वज्रपञ्जरम् ।**
लक्ष्मीवाञ्जायते देवि सद्यः सूर्यप्रसादतः ॥ ॥४४॥
- **भक्त्या यः प्रपठेद् देवि कवचं प्रत्यहं प्रिये ।**
इह लोके श्रियं भुक्त्वा देहान्ते मुक्तिमाप्नुयात् ॥ ॥४५॥

॥ इति श्रीरुद्रयामले तन्त्रे श्री देवि-रहस्ये वज्र-पञ्जराख्य सूर्य कवच निरूपणम् त्रयस्त्रिंशः पटलः ॥

॥ आदित्य हृदय स्तोत्रम् ॥

- **विनियोग** ॐ अस्य आदित्य-हृदय-स्तोत्रस्य। अगस्त्य ऋषि। अनुष्टप् छन्द। आदित्य-हृदय-भूतो। भगवान् ब्रह्मा देवता। निरस्ताशेषविघ्नतया। ब्रह्मविद्यासिद्धौ सर्वत्र जयसिद्धौ च विनियोग:।

- **ऋष्यादिन्यास** ॐ अगस्त्यऋषये नमः, शिरसि। अनुष्टप् छन्दसे नमः, मुखे। आदित्य-हृदय-भूत-ब्रह्म देवतायै नमः, हृदि। ॐ बीजाय नमः, गुह्ये। रश्मिमते शक्तये नमः, पादयोः। ॐ तत्सवितुरित्यादि गायत्री कीलकाय नमः, नाभौ।

- **करन्यास** ॐ रश्मिमते अङ्गुष्ठाभ्यां नमः। ॐ समुद्यते तर्जनीभ्यां नमः। ॐ देवासुर-नमस्कृताय मध्यमाभ्यां नमः। ॐ विवस्वते अनामिकाभ्यां नमः। ॐ भास्कराय कनिष्ठिकाभ्यां नमः। ॐ भुवनेश्वराय कर-तल-कर पृष्ठाभ्यां नमः।

- **हृदयादि न्यास** ॐ रश्मिमते हृदयाय नमः। ॐ समुद्यते शिरसे स्वाहा। ॐ देवासुर नमस्कृताय शिखायै वषट्। ॐ विवस्वते कवचाय हुम्। ॐ भास्कराय नेत्रत्रयाय वौषट्। ॐ भवनेश्वराय अस्त्राय फट्।

- **ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम्।**
  रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम्॥ ॥ १ ॥
- **दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम्।**
  उपगम्याब्रवीद्राममगस्त्यो भगवांस्तदा॥ ॥ २ ॥
- **राम राम महाबाहो श्रृणु गुह्यं सनातनम्।**
  येन सर्वानरीन् वत्स समरे विजयिष्यसे॥ ॥ ३ ॥
- **आदित्य हृदयं पुण्यं सर्व शत्रु विनाशनम्।**
  जयावहं जपं नित्यमक्षयं परमं शिवम्॥ ॥ ४ ॥
- **सर्वमङ्गल माङ्गल्यं सर्व-पाप-प्रणाशनम्।**
  चिन्ता-शोक-प्रशमनमायुर्वर्धनमुत्तमम्॥ ॥ ५ ॥
- **रश्मिमन्तं समुद्यन्तं देवासुर नमस्कृतम्।**
  पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम्॥ ॥ ६ ॥
- **सर्वदेवात्मको ह्येष तेजस्वी रश्मि-भावनः।**
  एष देवासुरगणाँल्लोकान् पाति गभस्तिभिः॥ ॥ ७ ॥

- एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः ।
  महेन्द्रो धनदः कालो यमः सोमो ह्यपाम्पतिः ॥ ॥ ८ ॥
- पितरो वसवः साध्या अश्विनौ मरुतो मनुः ।
  वायुर्वह्निः प्रजाः प्राण ऋतुकर्ता प्रभाकरः ॥ ॥ ९ ॥
- आदित्यः सविता सूर्यः खगः पूषा गर्भस्तिमान् ।
  सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः ॥ ॥१०॥
- हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ।
  तिमिरोन्मथनः शम्भुस्त्वष्टा मार्तण्डकोंऽशुमान् ॥ ॥११॥
- हिरण्यगर्भः शिशिरस्तपनोऽहस्करो रविः ।
  अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः ॥ ॥१२॥
- व्योमनाथस्तमोभेदी ऋग्यजुः सामपारगः ।
  घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवङ्गमः ॥ ॥१३॥
- आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ।
  कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ॥ ॥१४॥
- नक्षत्रग्रहताराणामधिपो विश्वभावनः ।
  तेजसामपि तेजस्वी द्वादशात्मन् नमोऽस्तु ते ॥ ॥१५॥
- नमः पूर्वाय गिरये पश्चिमायाद्रये नमः ।
  ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥ ॥१६॥
- जयाय जयभद्राय हर्यश्वाय नमो नमः ।
  नमो नमः सहस्रांशो आदित्याय नमो नमः ॥ ॥१७॥
- नम उग्राय वीराय सारङ्गाय नमो नमः ।
  नमः पद्म-प्रबोधाय प्रचण्डाय नमोऽस्तु ते ॥ ॥१८॥
- ब्रह्मेशानाच्युतेशाय सूरायादित्यवर्चसे ।
  भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥ ॥१९॥
- तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।
  कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥ ॥२०॥
- तप्तचामीकराभाय हरये विश्वकर्मणे ।
  नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे ॥ ॥२१॥

- नाशयत्येष वै भूतं तमेव सृजति प्रभुः ।
  पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥ ॥२२॥
- एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।
  एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ॥ ॥२३॥
- देवाश्च क्रतवश्चैव क्रतूनां फलमेव च ।
  यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः ॥ ॥२४॥
- एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।
  कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव ॥ ॥२५॥
- पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ।
  एतत्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥ ॥२६॥
- अस्मिन् क्षणे महाबाहो रावणं त्वं जहिष्यसि ।
  एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम् ॥ ॥२७॥
- एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत् तदा ।
  धारयामास सुप्रीतो राघवः प्रयतात्मवानन् ॥ ॥२८॥
- आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवानन् ।
  त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवानन् ॥ ॥२९॥
- रावणं प्रेक्ष्य हृष्टात्मा जयार्थं समुपागमतत् ।
  सर्वयत्नेन महता वृतस्तस्य वधेऽभवत् ॥ ॥३०॥
- अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः ।
  निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ॥३१॥

॥ श्रीवाल्मीकीय रामायणे युद्धकाण्डे, अगस्त्यप्रोक्तमादित्यहृदयस्तोत्रं सम्पूर्णम् ॥

॥ सूर्य स्तोत्रम् - १ ॥

- नवग्रहाणां सर्वेषां सूर्यादीनां पृथक् पृथक्।
  पीड़ा च दु:सहा राजंजायते सततं नृणाम् ॥ ॥ १ ॥
- पीडानाशाय राजेन्द्र नामानि श्रृणु भास्वत:।
  सूर्यादीनां च सर्वेषां पीड़ा नश्यति श्रृण्वत: ॥ ॥ २ ॥
- आदित्य: सविता सूर्य: पूषाऽर्क: शीघ्रगो रवि:।
  भगस्त्वष्टाऽर्यमा हंसो हंलिस्तेजोनिधिर्हरि: ॥ ॥ ३ ॥
- दिननाथो दिनकर: सत्पसप्ति: प्रभाकर:।
  विभावसुर्वेदकर्ता वेदांगो वेदवाहन: ॥ ॥ ४ ॥
- हरिदश्व: कालवक्त्र: कर्मसाक्षी जगत्पति:।
  पद्मिनीबोधको भानुर्भास्कर: करूणाकर: ॥ ॥ ५ ॥
- द्वादशात्मा विश्वकर्मा लोहितांगस्तमोनुद:।
  जगन्नाथोऽरविन्दाक्ष: कालात्मा कश्यपात्मज: ॥ ॥ ६ ॥
- भूताक्षयो ग्रहपति: सर्वलोकनमस्कृत:।
  जपाकुसुमसंकाशो भास्वानदितिनन्दन: ॥ ॥ ७ ॥
- ध्वान्तेभसिंह सर्वात्मा लोकनेत्रो विकर्तन:।
  मार्तण्डो मिहिर: सूरस्तपनो लोकतापन: ॥ ॥ ८ ॥
- जगत्कर्ता जगत्साक्षी शनैश्चरपिता जय:।
  सहस्त्ररश्मिस्तरणिर्भगवान्भक्तवत्सल: ॥ ॥ ९ ॥
- विवस्वानादिदेवश्च देवदेवा दिवाकर:।
  धन्वन्तरिव्र्याधिहर्ता दद्रुकुष्ठविनाशक: ॥ ॥१०॥
- चराचरात्मा मैत्रेयोऽमितो विष्णुर्विकर्तन:।
  लोकशोकापहर्ता च कमलाकर आत्मभू: ॥ ॥११॥
- नारायणो महादेवो रूद्र: पुरूष ईश्वर:।
  जीवात्मा परमात्मा च सूक्ष्मात्मा सर्वतोमुख: ॥ ॥१२॥
- इन्द्रोऽनलो यमश्चैव नैर्ऋतो वरूणोऽनिल:।
  श्रीद ईशान इन्दुश्च भौम: सोम्यो गुरू: कवि: ॥ ॥१३॥

- शौरिर्विधुन्तुदः केतुः कालः कालात्मको विभुः।
  सर्वदेवमयो देवः कृष्णः कामप्रदायकः ॥ ॥१४॥
- य एतैर्नामभिर्मर्त्यो भक्त्या स्तौति दिवाकरम्।
  सर्वापापविनिर्मुक्तः सर्वरोगविवर्जितः ॥ ॥१५॥
- पुत्रवान् धनवान् श्रीमांजायते स न संशयः।
  रविवारे पठेद्यस्तु नामान्येतानि भास्वतः ॥ ॥१६॥
- पीड़ाशान्तिर्भवेत्तस्य ग्रहाणां च विशेषतः।
  सद्यः सुखमवाप्नोति चायुर्दीर्घं च नीयजम् ॥ ॥१७॥

॥ इति श्री भविष्य पुराणे आदित्य स्तोत्रम् सम्पूर्णम् ॥

॥ श्री सूर्य स्तोत्रम् - २ ॥

- **विनियोग** — अस्य श्रीभगवत्सूर्यस्तोत्रमहामन्त्रस्य अगस्त्य ऋषिः । अनुष्टुप्छन्दः । श्रीसूर्यनारायणो देवता । सूं बीजम् । रिं शक्तिः । यं कीलकम् । सूर्यप्रसादसिद्ध्यर्थे जपे विनियोगः ।
- **करन्यास** — आदित्याय अङ्गुष्ठाभ्यां नमः । अर्काय तर्जनीभ्यां नमः । दिवाकराय मध्यमाभ्यां नमः । प्रभाकराय अनामिकाभ्यां नमः । सहस्रकिरणाय कनिष्ठिकाभ्यां नमः । मार्ताण्डाय करतलकरपृष्ठाभ्यां नमः ।
- **हृदयादि न्यास** — आदित्याय हृदयाय नमः । अर्काय शिरसे स्वाहा । दिवाकराय शिखायै वषट् । प्रभाकराय कवचाय हुम् । सहस्रकिरणाय नेत्रत्रयाय वौषट् । मार्ताण्डाय अस्त्राय फट् । भूर्भुवः सुवरोमिति दिग्बन्धः ॥
- **ध्यानम्** — **ध्यायेत् सूर्यमनन्त कोटि-किरणं तेजोमयं भास्करं ।
भक्तानामभयप्रदं दिनकरं ज्योतिर्मयं शङ्करम् ॥**

- **आदित्यं जगदीशमच्युतमजं त्रैलोक्यचूडामणिं ।
भक्ताभीष्टवरप्रदं दिनमणिं मार्ताण्डमाद्यं शुभम् ॥** ॥ १ ॥
- **कालात्मा सर्वभूतात्मा वेदात्मा विश्वतोमुखः ।
जन्म-मृत्यु-जरा-व्याधि-संसार-भय-नाशनः ॥** ॥ २ ॥
- **ब्रह्मस्वरूप उदये मध्याह्ने तु महेश्वरः ।
अस्तकाले स्वयं विष्णुः त्रयीमूर्तिर्दिवाकरः ॥** ॥ ३ ॥
- **एकचक्र रथो यस्य दिव्यः कनक-भूषितः ।
सोऽयं भवतु नः प्रीतः पद्महस्तो दिवाकरः ॥** ॥ ४ ॥
- **पद्महस्तः परञ्ज्योतिः परेशाय नमो नमः ।
अण्डयोने महासाक्षिन् आदित्याय नमो नमः ॥** ॥ ५ ॥
- **कमलासन देवेश भानु मूर्ते नमो नमः ।
धर्ममूर्ते दयामूर्ते तत्त्वमूर्ते नमो नमः ॥** ॥ ६ ॥
- **सकलेशाय सूर्याय छायेशाय नमो नमः ।
क्षयापस्मारगुल्मादिदुर्धोषव्याधि नाशनम् ॥** ॥ ७ ॥
- **सर्वज्वरहरं चैव सर्वरोग निवारणम् ।
एतत् स्तोत्रम् शिव प्रोक्तं सर्वसिद्धि करं परम् ॥** ॥ ८ ॥
- **सर्वसम्पत्करं चैव सर्वाभीष्ट प्रदायकम् ॥** ॥ ९ ॥

॥ इति श्री सूर्य स्तोत्रं सम्पूर्णम् ॥

॥ सूर्य स्तोत्रम (श्री याज्ञवल्क्य कृतम्) ॥

- ॐ नमो भगवते आदित्यायाखिल जगतां आत्मस्वरूपेण कालस्वरूपेण चतुर्विधभूत-निकायानां ब्रह्मादिस्तम्भ-पर्यन्तानां अन्तर्हृदयेषु बहिरपि चाकाश इव उपाधिनाऽव्यवधीयमानो भवानेक एव क्षणलव-निमेषावयवोपचित-संवत्सरगणेन अपा-मादान-विसर्गाभ्यां इमां लोकयात्रां अनुवहति ॥ ॥ १ ॥

- यदुह वाव विबुधर्षभ सवितरदस्तपत्यनुसवनं अहरहः आम्नायविधिना उपतिष्ठमानानां अखिल-दुरित-वृजिनबीजावभर्जन भगवतः समभिधीमहि तपनमण्डलम् ॥ ॥ २ ॥

- य इह वाव स्थिरचरनिकराणां निजनिकेतनानां मन-इन्द्रियासुगणान् अनात्मनः स्वयमात्मा अन्तर्यामी प्रचोदयति ॥ ॥ ३ ॥

- य एवेमं लोकं अतिकराल-वदनान्धकार-संज्ञा-जगरग्रह-गिलितं मृतकमिव विचेतनं अवलोक्य अनुकम्पया परमकारुणिकः ईक्षयैव उत्थाप्य अहरहरनुसवनं श्रेयसि स्वधर्माख्यात्मावस्थाने प्रवर्तयति अवनिपतिरिव असाधूनां भयमुदीरयन्नटति ॥ ॥ ४ ॥

- परित आशापालैः तत्र तत्र कमलकोशाञ्जलिभिः उपहृतार्हणः ॥ ॥ ५ ॥

- अथह भगवन् तव चरणनलिनयुगलं त्रिभुवनगुरुभिर्वन्दितं अहं अयातयामयजुः कामः उपसरामीति ॥ ॥ ६ ॥

- एवं स्तुतः स भगवान् वाजिरूपधरो हरिः । यजूंष्ययातयामानि मुनयेऽदात् प्रसादितः ॥ ॥ ७ ॥

॥ इति श्रीमद्भागवते द्वादशस्कन्धे श्री याज्ञवल्क्य कृतं श्री सूर्यस्तोत्रं सम्पूर्णम् ॥

॥ सूर्य मण्डल स्तोत्रम् अथवा गायत्री स्तवन ॥

यन्मण्डलं दीप्तिकरं विशालम्
रत्नप्रभं तीव्रमनादिरूपम्।
दारिद्र्य-दुःखक्षयकारणं च
पुनातु मां तत्सवितुर्वरेण्यम्॥ ॥१॥

यन्मण्डलं देवगणैः सुपूजितम्
विप्रैः स्तुतं मानवमुक्तिकोविदम्।
तं देवदेवं प्रणमामि भर्गं
पुनातु मां तत्सवितुर्वरेण्यम्॥ ॥२॥

यन्मण्डलं ज्ञानघनं त्वगम्यं
त्रैलोक्यपूज्यं त्रिगुणात्मरूपम्।
समस्त-तेजोमय-दिव्यरूपं
पुनातु मां तत्सवितुर्वरेण्यम्॥ ॥३॥

यन्मण्डलं गूढमतिप्रबोधं
धर्मस्य वृद्धिं कुरुते जनानाम्।
यत् सर्वपापक्षयकारणं च
पुनातु मां तत्सवितुर्वरेण्यम्॥ ॥४॥

यन्मण्डलं व्याधिविनाशदक्षं
यदृग्-यजुः सामसु सम्प्रगीतम्।
प्रकाशितं येन च भूर्भुवः स्वः
पुनातु मां तत्सवितुर्वरेण्यम्॥ ॥५॥

यन्मण्डलं वेदविदो वदन्ति
गायन्ति यच्चारण- सिद्धसङ्घाः।
यद्योगिनो योगजुषां च सङ्घाः
पुनातु मां तत्सवितुर्वरेण्यम्॥ ॥६॥

यन्मण्डलं सर्वजनेषु पूजितं
ज्योतिश्च कुर्यादिह मर्त्यलोके।
यत्काल-कालादिमनादिरूपम्
पुनातु मां तत्सवितुर्वरेण्यम्॥ ॥७॥

यन्मण्डलं विष्णुचर्तुमुखास्यं
यदक्षरं पापहरं जनानाम्।
यत्कालकल्पक्षयकारणं च
पुनातु मां तत्सवितुर्वरेण्यम्॥ ॥८॥

यन्मण्डलं विश्वसृजां प्रसिद्धं
उत्पत्ति-रक्षा प्रलयप्रगल्भम्।
यस्मिन् जगत्संहरतेऽखिलं च
पुनातु मां तत्सवितुर्वरेण्यम्॥ ॥९॥

यन्मण्डलं सर्वगतस्य विष्णोः
आत्मा परंधाम विशुद्धतत्त्वम्।
सूक्ष्मान्तरैर्योगपथानुगम्यं
पुनातु मां तत्सवितुर्वरेण्यम्॥ ॥१०॥

यन्मण्डलं ब्रह्मविदो वदन्ति
गायन्ति यच्चारण-सिद्धसंघाः।
यन्मण्डलं वेदविदः स्मरन्ति
पुनातु मां तत्सवितुर्वरेण्यम्॥ ॥११॥

यन्मण्डलं वेद- विदोपगीतं
यद्योगिनां योगपथानुगम्यम्।
तत्सर्ववेदं प्रणमामि दिव्यं
पुनातु मां तत्सवितुर्वरेण्यम्॥ ॥१२॥

॥ दुःस्वप्न नाशन सूर्य स्तुतिः / द्वादश नाम स्तोत्रम् ॥

इस मन्त्र में सूर्य के १२ नामों का वर्णन है। प्रातःकाल पाठ करने से दुष्ट (बुरे) स्वप्न, दरिद्रता एवं सर्व दुखों का नास होता है। सुख, शांति आरोग्य मोक्ष की प्राप्ति होती है।

- आदित्यः प्रथमं नाम द्वितीयं तु दिवाकरः।
  तृतीयं भास्करः प्रोक्तं चतुर्थं तु प्रभाकरः॥ ॥ १ ॥
- पञ्चमं च सहस्रांशुः षष्ठं त्रैलोक्य लोचनः।
  सप्तमं हरिदश्वश्च अष्टमं च विभावसुः॥ ॥ २ ॥
- नवमं दिनकरः प्रोक्तो दशमं द्वादशात्मकः।
  एकादशं त्रयोमूर्तिः द्वादशं सूर्य एव च॥ ॥ ३ ॥
- द्वादशैतानि नामानि प्रातःकाले पठेन्नरः।
  दुःस्वप्ननाशनं सद्यः सर्वसिद्धिः प्रजायते॥ ॥ ४ ॥

॥ सूर्य के पवित्र, शुभ एवं गोपनीय २१ नाम ॥

- विकर्तनो विवस्वांश्च मार्तण्डो भास्करो रविः।
  लोक प्रकाशकः श्री माँल्लोक चक्षुर्मुहेश्वरः॥ ॥ १ ॥
- लोकसाक्षी त्रिलोकेशः कर्ता हर्ता तमिस्रहा।
  तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः॥ ॥ २ ॥
- गभस्तिहस्तो ब्रह्मा च सर्वदेवनमस्कृतः।
  एकविंशतिरित्येष स्तव इष्टः सदा रवेः॥ ॥ ३ ॥

१. विकर्तन
२. विवस्वान
३. मार्तण्ड
४. भास्कर
५. रवि
६. लोकप्रकाशक
७. श्रीमान
८. लोकचक्षु
९. महेश्वर
१०. लोकसाक्षी
११. त्रिलोकेश
१२. कर्ता
१३. हर्त्ता
१४. तमिस्राहा
१५. तपन
१६. तापन
१७. शुचि
१८. सप्ताश्ववाहन
१९. गभस्तिहस्त
२०. ब्रह्मा
२१. सर्वदेवनमस्कृत

॥ सूर्याष्टकम् ॥

- **साम्ब उवाच**

आदिदेवं नमस्तुभ्यं प्रसीद मम भास्कर ।
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तुते ॥ ॥ १ ॥

- सप्ताश्वरथमारूढं प्रचण्डं कश्यपात्मजम् ।
श्वेतपद्मधरं देवं तं सूर्यं प्रणमाम्यहम् ॥ ॥ २ ॥

- लोहितं रथमारूढं सर्वलोकपितामहम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥ ॥ ३ ॥

- त्रैगुण्यं च महाशूरं ब्रह्माविष्णुमहेश्वरम् ।
महापापहरं देवं तं सूर्य प्रणमाम्यहम् ॥ ॥ ४ ॥

- बृंहितं तेजःपुंजं च वायुमाकाशमेव च ।
प्रभुं च सर्वलोकानां तं सूर्य प्रणमाम्यहम् ॥ ॥ ५ ॥

- बन्धूकपुष्पसंकाशं हारकुंडलभूषितम् ।
एकचक्रधरं देवं तं सूर्य प्रणमाम्यहम् ॥ ॥ ६ ॥

- तं सूर्यं जगत्कर्तारं महातेज प्रदीपनम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥ ॥ ७ ॥

- तं सूर्यं जगतां नाथं ज्ञानविज्ञानमोक्षदम् ।
महापापहर देवं तं सूर्यं प्रणमाम्यहम् ॥ ॥ ८ ॥

- सूर्याष्टकं पठेन्नित्यं ग्रहपीडाप्रणाशनम् ।
अपुत्रो लभते पुत्र दरिद्रो धनवान्भवेत् ॥ ॥ ९ ॥

- आमिशं मधुपानं च यः करोति रवेर्दिने ।
सप्तजन्म भवेद्रोगी प्रतिजन्म दरिद्रता ॥ ॥१०॥

- स्त्रीतैलमधुमांसानि यस्त्यजेत्तु रवेर्दिने ।
न व्याधिः शोकदारिद्रयं सूर्यलोकं स गच्छति ॥ ॥११॥

॥ इति श्री शिवप्रोक्तं सूर्याष्टक स्तोत्रम् संपूर्णम् ॥

॥ चाक्षुषोपनिषद् (चाक्षुषी विद्या) ॥

इस चाक्षुषी विद्या को श्रद्धा विश्वास पुर्वक पाठ करने से नेत्र के समस्त रोग दूर हो जाते हैं। आँख की ज्योति स्थिर रहती है। इसका पाठ नित्य करने वाले के कुल में कोई अन्धा नहीं होता। पाठ के अन्त में गन्धादि युक्त जल से सुर्य को अर्घ्य देकर नमस्कार करना चाहिये।

- **विनियोग** ॐ अस्याश्चाक्षुषीविद्याया अहिर्बुध्न्य ऋषिर्गायत्री छन्दः। सूर्यो देवता चक्षूरोग निवृत्तये विनियोगः।

ॐ चक्षुः चक्षुः चक्षुः तेजः स्थिरो भव। मां पाहि पाहि। त्वरितं चक्षूरोगान् शमय शमय। मम जातरूपं तेजो दर्शय दर्शय। यथा अहम् अन्धो न स्यां तथा कल्पय कल्पय। कल्याणं कुरु कुरु। यानि मम पूर्वजन्मोपार्जितानि चक्षुः प्रतिरोधक दुष्कृतानि सर्वाणि निर्मूलय निर्मूलय।

ॐ नमः चक्षुस्तेजोदात्रे दिव्याय भास्कराय। ॐ नमः करुणाकरायामृताय। ॐ नमः सूर्याय। ॐ नमो भगवते सूर्यायाक्षितेजसे नमः। खेचराय नमः। महते नमः। रजसे नमः। तमसे नमः। असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्मा अमृतं गमय। उष्णो भगवाञ्छुचिरूपः। हंसो भगवान् शुचिरप्रतिरूपः।

य इमां चाक्षुष्पती विद्यां ब्राह्मणो नित्यमधीते न तस्याक्षिरोगो भवति। न तस्य कुले अन्धो भवति। अष्टौ ब्राह्मणान् सम्यग् ग्राहयित्वा विद्या-सिद्धिर्भवति। ॐ नमो भगवते आदित्याय अहोवाहिनी अहोवाहिनी स्वाहा।

॥ श्रीकृष्णयजुर्वेदीया चाक्षुषी विद्या सम्पूर्णा ॥

॥ श्री सूर्य अष्टोत्तरशत नामावली ॥

1. ॐ अरुणाय नमः।
2. ॐ शरण्याय नमः।
3. ॐ करुणारससिन्धवे नमः।
4. ॐ असमानबलाय नमः।
5. ॐ आर्तरक्षकाय नमः।
6. ॐ आदित्याय नमः।
7. ॐ आदिभूताय नमः।
8. ॐ अखिलागमवेदिने नमः।
9. ॐ अच्युताय नमः।
10. ॐ अखिलज्ञाय नमः।
11. ॐ अनन्ताय नमः।
12. ॐ इनाय नमः।
13. ॐ विश्वरूपाय नमः।
14. ॐ इज्याय नमः।
15. ॐ इन्द्राय नमः।
16. ॐ भानवे नमः।
17. ॐ इन्दिरामन्दिराप्ताय नमः।
18. ॐ वन्दनीयाय नमः।
19. ॐ ईशाय नमः।
20. ॐ सुप्रसन्नाय नमः।
21. ॐ सुशीलाय नमः।
22. ॐ सुवर्चसे नमः।
23. ॐ वसुप्रदाय नमः।
24. ॐ वसवे नमः।
25. ॐ वासुदेवाय नमः।
26. ॐ उज्ज्वल नमः।
27. ॐ उग्ररूपाय नमः।
28. ॐ ऊर्ध्वगाय नमः।
29. ॐ विवस्वते नमः।
30. ॐ उद्यत्किरणजालाय नमः।
31. ॐ हृषीकेशाय नमः।
32. ॐ ऊर्जस्वलाय नमः।
33. ॐ वीराय नमः।
34. ॐ निर्जराय नमः।
35. ॐ जयाय नमः।
36. ॐ ऊरुद्वयाभावरूप युक्तसारथये नमः।
37. ॐ ऋषिवन्द्याय नमः।
38. ॐ रुग्घन्त्रे नमः।
39. ॐ ऋक्षचक्रचराय नमः।
40. ॐ ऋजुस्वभावचित्ताय नमः।
41. ॐ नित्यस्तुत्याय नमः।
42. ॐ ऋकारमातृकावर्णरूपाय नमः।
43. ॐ उज्ज्वलतेजसे नमः।
44. ॐ ऋक्षाधिनाथमित्राय नमः।
45. ॐ पुष्कराक्षाय नमः।
46. ॐ लुप्तदन्ताय नमः।
47. ॐ शान्ताय नमः।
48. ॐ कान्तिदाय नमः।
49. ॐ घनाय नमः।
50. ॐ कनत्कनकभूषाय नमः।
51. ॐ खद्योताय नमः।
52. ॐ लूनिताखिलदैत्याय नमः।
53. ॐ सत्यानन्दस्वरूपिणे नमः।
54. ॐ अपवर्गप्रदाय नमः।
55. ॐ आर्तशरण्याय नमः।
56. ॐ एकाकिने नमः।
57. ॐ भगवते नमः।
58. ॐ सृष्टिस्थित्यन्तकारिणे नमः।
59. ॐ गुणात्मने नमः।
60. ॐ घृणिभृते नमः।
61. ॐ बृहते नमः।
62. ॐ ब्रह्मणे नमः।
63. ॐ ऐश्वर्यदाय नमः।
64. ॐ शर्वाय नमः।
65. ॐ हरिदश्वाय नमः।
66. ॐ शौरये नमः।
67. ॐ दशदिक्संप्रकाशाय नमः।
68. ॐ भक्तवश्याय नमः।
69. ॐ ओजस्कराय नमः।
70. ॐ जयिने नमः।
71. ॐ जगदानन्दहेतवे नमः।
72. ॐ जन्ममृत्युजराव्याधि वर्जिताय नमः।
73. ॐ उच्चस्थान समारूढरथस्थाय नमः।
74. ॐ असुरारये नमः।
75. ॐ कमनीयकराय नमः।
76. ॐ अब्जवल्लभाय नमः।
77. ॐ अन्तर्बहिः प्रकाशाय नमः।
78. ॐ अचिन्त्याय नमः।
79. ॐ आत्मरूपिणे नमः।
80. ॐ अच्युताय नमः।
81. ॐ अमरेशाय नमः।
82. ॐ परस्मै ज्योतिषे नमः।
83. ॐ अहस्कराय नमः।
84. ॐ रवये नमः।
85. ॐ हरये नमः।
86. ॐ परमात्मने नमः।
87. ॐ तरुणाय नमः।
88. ॐ वरेण्याय नमः।
89. ॐ ग्रहाणांपतये नमः।
90. ॐ भास्कराय नमः।
91. ॐ आदिमध्यान्तरहिताय नमः।
92. ॐ सौख्यप्रदाय नमः।
93. ॐ सकलजगतांपतये नमः।
94. ॐ सूर्याय नमः।
95. ॐ कवये नमः।
96. ॐ नारायणाय नमः।
97. ॐ परेशाय नमः।
98. ॐ तेजोरूपाय नमः।
99. ॐ हिरण्यगर्भाय नमः।
100. ॐ सम्पत्कराय नमः।
101. ॐ ऐं इष्टार्थदाय नमः।
102. ॐ अं सुप्रसन्नाय नमः।
103. ॐ श्रीमते नमः।
104. ॐ श्रेयसे नमः।
105. ॐ सौख्यदायिने नमः।
106. ॐ दीप्तमूर्तये नमः।
107. ॐ निखिलागमवेद्याय नमः।
108. ॐ नित्यानन्दाय नमः।

॥ इति श्री सूर्य अष्टोत्तरशत नामावली सम्पूर्णम ॥

॥ श्री सूर्य चालीसा ॥

- **दोहा**

कनक बदन कुण्डल मकर, मुक्ता माला अङ्ग।
पद्मासन स्थित ध्याइए, शंख चक्र के सङ्ग॥

- **चौपाई**

जय सविता जय जयति दिवाकर! । सहस्रांशु! सप्ताश्व तिमिरहर॥ ॥ १ ॥
- भानु! पतंग! मरीची! भास्कर! । सविता हंस! सुनूर विभाकर॥ ॥ २ ॥
- विवस्वान! आदित्य! विकर्तन । मार्तण्ड हरिरूप विरोचन॥ ॥ ३ ॥
- अम्बरमणि! खग! रवि कहलाते । वेद हिरण्यगर्भ कह गाते॥ ॥ ४ ॥
- सहस्रांशु प्रद्योतन, कहिकहि । मुनिगन होत प्रसन्न मोदलहि॥ ॥ ५ ॥
- अरुण सदृश सारथी मनोहर । हांकत हय साता चढ़ि रथ पर॥ ॥ ६ ॥
- मंडल की महिमा अति न्यारी । तेज रूप केरी बलिहारी॥ ॥ ७ ॥
- उच्चै:श्रवा सदृश हय जोते । देखि पुरन्दर लज्जित होते॥ ॥ ८ ॥
- मित्र मरीचि भानु अरुण भास्क र। सविता सूर्य अर्क खग कलिकर॥ ॥ ९ ॥
- पूषा रवि आदित्य नाम लै । हिरण्यगर्भाय नमः कहिकै॥ ॥१०॥
- द्वादस नाम प्रेम सों गावैं । मस्तक बारह बार नवावैं॥ ॥११॥
- चार पदारथ जन सो पावै । दु:ख दारिद्र अघ पुंज नसावै॥ ॥१२॥
- नमस्कार को चमत्कार यह । विधि हरिहर को कृपासार यह॥ ॥१३॥
- सेवै भानु तुमहिं मन लाई । अष्टसिद्धि नवनिधि तेहिं पाई॥ ॥१४॥
- बारह नाम उच्चारन करते । सहस जनम के पातक टरते॥ ॥१५॥
- उपाख्यान जो करते तवजन । रिपु सों जमलहते सोतेहि छन॥ ॥१६॥
- धन सुत जुत परिवार बढ़तु है । प्रबल मोह को फंद कटतु है॥ ॥१७॥
- अर्क शीश को रक्षा करते । रवि ललाट पर नित्य बिहरते॥ ॥१८॥
- सूर्य नेत्र पर नित्य विराजत । कर्ण देस पर दिनकर छाजत॥ ॥१९॥
- भानु नासिका वासकरहुनित । भास्कर करत सदा मुखको हित॥ ॥२०॥
- ओंठ रहैं पर्जन्य हमारे । रसना बीच तीक्ष्ण बस प्यारे॥ ॥२१॥
- कंठ सुवर्ण रेत की शोभा । तिग्म तेजसः कांधे लोभा॥ ॥२२॥
- पूषां बाहू मित्र पीठहिं पर । त्वष्टा वरुण रहत सुउष्णकर॥ ॥२३॥
- युगल हाथ पर रक्षा कारन । भानुमान उरसर्म सुउदरचन॥ ॥२४॥
- बसत नाभि आदित्य मनोहर । कटिमंह, रहत मन मुदभर॥ ॥२५॥
- जंघा गोपति सविता बासा । गुप्त दिवाकर करत हुलासा॥ ॥२६॥
- विवस्वान पद की रखवारी । बाहर बसते नित तम हारी॥ ॥२७॥
- सहस्रांशु सर्वांग सम्हारै । रक्षा कवच विचित्र विचारे॥ ॥२८॥

- अस जोजन अपने मन माहीं । भय जगबीच करहुं तेहि नाहीं ॥ ॥२९॥
- दद्रु कुष्ठ तेहिं कबहु न व्यापै । जोजन याको मन मंह जापै ॥ ॥३०॥
- अंधकार जग का जो हरता । नव प्रकाश से आनन्द भरता ॥ ॥३१॥
- ग्रह गन ग्रसि न मिटावत जाही । कोटि बार मैं प्रनवौं ताही ॥ ॥३२॥
- मंद सदृश सुत जग में जाके । धर्मराज सम अद्भुत बांके ॥ ॥३३॥
- धन्य-धन्य तुम दिनमनि देवा । किया करत सुरमुनि नर सेवा ॥ ॥३४॥
- भक्ति भावयुत पूर्ण नियम सों । दूर हटतसो भवके भ्रम सों ॥ ॥३५॥
- परम धन्य सों नर तनधारी । हैं प्रसन्न जेहि पर तम हारी ॥ ॥३६॥
- अरुण माघ महं सूर्य फाल्गुन । मधु वेदांग नाम रवि उदयन ॥ ॥३७॥
- भानु उदय बैसाख गिनावै । ज्येष्ठ इन्द्र आषाढ़ रवि गावै ॥ ॥३८॥
- यम भादों आश्विन हिमरेता । कातिक होत दिवाकर नेता॥ ॥३९॥
- अगहन भिन्न विष्णु हैं पूसहिं । पुरुष नाम रवि हैं मलमासहिं ॥ ॥४०॥

- **दोहा** भानु चालीसा प्रेम युत, गावहिं जे नर नित्य ।
सुख सम्पत्ति लहि बिबिध, होंहिं सदा कृतकृत्य ॥

॥ इति सूर्य चालीसा सम्पूर्णम ॥

॥ श्री सूर्यदेव की आरती ॥

- ॐ जय सूर्य भगवान, जय हो दिनकर भगवान ।
  जगत् के नेत्रस्वरूपा, तुम हो त्रिगुण स्वरूपा ।
  धरत सब ही तव ध्यान, ॐ जय सूर्य भगवान ॥ ॐ जय सूर्य भगवान .. ।
- सारथी अरुण हैं प्रभु तुम, श्वेत कमलधारी । तुम चार भुजाधारी ॥
  अश्व हैं सात तुम्हारे, कोटि किरण पसारे । तुम हो देव महान ॥ ॐ जय सूर्य भगवान .. ।
- ऊषाकाल में जब तुम, उदयाचल आते। सब तब दर्शन पाते ॥
  फैलाते उजियारा, जागता तब जग सारा। करे सब तब गुणगान ॥ ॐ जय सूर्य भगवान .. ।
- संध्या में भुवनेश्वर अस्ताचल जाते। गोधन तब घर आते ॥
  गोधूलि बेला में, हर घर हर आंगन में। हो तव महिमा गान ॥ ॐ जय सूर्य भगवान .. ।
- देव-दनुज नर-नारी, ऋषि-मुनिवर भजते। आदित्य हृदय जपते ॥
  स्तोत्र ये मंगलकारी, इसकी है रचना न्यारी । दे नव जीवनदान ॥ ॐ जय सूर्य भगवान .. ।
- तुम हो त्रिकाल रचयिता, तुम जग के आधार। महिमा तब अपरम्पार ॥
  प्राणों का सिंचन करके भक्तों को अपने देते। बल, बुद्धि और ज्ञान॥ ॐ जय सूर्य भगवान .. ।
- भूचर जलचर खेचर, सबके हों प्राण तुम्हीं। सब जीवों के प्राण तुम्हीं ॥
  वेद-पुराण बखाने, धर्म सभी तुम्हें माने। तुम ही सर्वशक्तिमान ॥ ॐ जय सूर्य भगवान .. ।
- पूजन करतीं दिशाएं, पूजे दश दिक्पाल। तुम भुवनों के प्रतिपाल ॥
  ऋतुएं तुम्हारी दासी, तुम शाश्वत अविनाशी। शुभकारी अंशुमान ॥ ॐ जय सूर्य भगवान .. ।
- ॐ जय सूर्य भगवान, जय हो दिनकर भगवान ।
  जगत् के नेत्रस्वरूपा, तुम हो त्रिगुण स्वरूपा।स्वरूपा ॥
  धरत सब ही तव ध्यान, ॐ जय सूर्य भगवान ॥ ॐ जय सूर्य भगवान .. ।

॥ चन्द्र ग्रह मंत्र, जप, कवच, स्तोत्र ॥

अनुक्रमाणिका

1. चन्द्र देव मन्त्र 02
2. चन्द्र प्रार्थना, व्रत, स्नान, दान 03
3. चन्द्र वैदिक मन्त्र प्रयोग: 04
4. चन्द्र कवचम् 05
5. चन्द्र स्तोत्रम् 06
6. चन्द्र अष्टाविंशति नाम स्तोत्रम् 07
7. चन्द्र अष्टोत्तरशत नामावली 08
8.

चन्द्र यन्त्रम्

नागद्विनन्दा गजषट् समुद्रा
शिवाक्षिदिग्वाणविलिख्य कोष्ठे ।
चन्द्रकृतारिष्ट विनाशनाय
धार्यं मनुष्यैः शशियन्त्रमीरितम् ॥

७	२	९
६	६	४
३	१०	५

॥ चन्द्र देव ग्रह ॥

चन्द्रमा यमुना नदी से उद्भव। आत्रि गोत्र। जाति वैश्य। शुक्ल वर्ण। दक्ष प्रजापति की 27 कन्याओं से विवाह। 27 कन्यायें 27 नक्षत्रों के नाम से जानी जाती है।

- **शुभाशुभत्व** — **शुभ ग्रह**
- **भोग काल** — **2.25 दिन (सवा दो दिन)**
- **बीज मंत्र** — **ॐ सों सोमाय नम:।**
  - **ॐ ऐं क्लीं सोमाय नम:।**
  - **ॐ चन्द्राय नम:।**
- **तांत्रिक मंत्र** — **ॐ श्राँ श्रीं श्रौं स: चंद्राय नम:।**
  - **सौं।** — एकाक्षर मन्त्र
  - **वं सं वं** — त्र्यक्षर मन्त्र
- **कालीपटले** — **ॐ श्रीं क्रीं ह्रां चं चन्द्राय नम:।**
- **वैदिक मंत्र** — **ॐ इमं देवा असपत्न ७ सुवध्वं महते क्षत्राय महते ज्यैष्ठयाय महते जानराज्यायेन्द्रस्येन्द्रियाय। इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणाना ७ राजा॥**
- **पुराणोक्त मंत्र** — **ॐ दधि शंख तुषाराभं क्षीरोदार्णव सम्भवम। नमामि शशिनं सोमं शंभोर्मुकुट भूषणं॥**
- **अधिदेवता-उमाम्** — **ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम ईष्णन्नीषाण मुम्मीषाण सर्वलोकम्मीषाण॥**
- **प्रत्यधिदेवता-आप:** — **ॐ आपोहिष्ठा मयोभुवस्ता न ऽ ऊर्जे दधातन। महेरणाय चक्षसे।**
- **जप संख्या** — **11,000 कलयुगे चतुर्थगुणो अर्थात 44,000**

+ दशांश हवन	4,400		
+ दशांश तर्पण	440		
+ दशांश मार्जन	44	=	48,884

- **जप समय** — **संध्याकाल**
- **हवनवस्तु** — **पलाश**
- **रत्न** — **मोती - 10 रत्ती, सोमवार, आग्नेय दिशा, चंद्रोदित रात्रि, कनिष्ठिका**

- **चन्द्रमा प्रार्थना** **ॐ श्वेताम्बरः श्वेतविभूषणश्च, श्वेतद्युतिर्दण्डधरो द्विबाहुः ।**
चन्द्रोऽमृतात्मा वरदः किरीटी, श्रेयांसि मह्यं विदधातु देव ॥
  - हे चन्द्रदेव! आप श्वेत वस्त्र तथा श्वेत आभूषण धारण करने वाले हैं। आपके शरीर की कान्ति श्वेत है। आप दण्ड धारण करते हैं, आपके दो हाथ हैं, आप अमृतात्मा हैं, वरदान देने वाले हैं तथा मुकुट धारण करते हैं, आप मुझे कल्याण प्रदान करें।

- **चन्द्रमा का व्रत** ५४ सोमवारों तक या १० सोमवारों तक करना चहिये। व्रत के दिन श्वेत वस्त्र धारण कर **'ॐ श्रां श्रीं श्रौं सः चन्द्राय नमः'** इस मन्त्र का ११, ५ अथवा ३ माला जप करे। भोजन में बिना नमक के दही, दूध, चावल, चीनी और घी से बनी चीजें ही खाये। इस व्रत को करने से व्यापार में लाभ होता है। मानसिक कष्टों की शान्ति होती है। विशेष कार्य सिद्धि में यह व्रत पूर्ण लाभ दायक होता है।

- **अनिष्टे चन्द्रे शान्ति स्नानम्**
  - **सपञ्चगव्यैः स्फटिकेभदान, त्रिपत्रमुक्ताम्बुजशुक्तिशङ्खैः ।**
तुषारभास्याप्लवनं नृपाणा, मुक्तं हि तुष्टयै विषमे ग्रहज्ञैः ॥
  - चन्द्रमा की अनिष्ट-शान्ति के लिये पंचगव्य, स्फटिक, गजमद, बिल्व, मुक्ता, कमल, मोती की सीप और शंख से स्नान करना चाहिये।

- **चन्द्रमा दान** **घृत कलशं सितवस्त्रं दधिशङ्कं मौक्तिकं सुवर्णं च ।**
रजतं च प्रदद्याच्चन्द्रारिष्टोपशान्तये त्वरितम् ॥
  - **ॐ सद्वंशपात्र स्थिततण्डुलांश्च कर्पूरमुक्ताफलशुभ्र वस्त्रम् ।**
युगापयुक्तं वृषभं च रौप्यं चन्द्राय दद्याद् घृतपूर्णकुंभम् ॥
  - चन्द्रमा की प्रीति के लिये घृत कलश, श्वेत वस्त्र, दही, शंख, मोती, स्वर्ण तथा चाँदी का दान करना चाहिये।
  - चन्द्रमा की अनुकूलता के लिये श्री खण्ड चन्दन का दान करना चाहिये।
  - चावल, कपुर, चाँदी शंख, सफेद पुष्प, सफेद वस्त्र, सफेद बैल

॥ चन्द्र वैदिक मन्त्र न्यासादि प्रयोग: ॥

- **वैदिक मंत्र**
  ॐ इमं देवा असपत्न ७ सुवध्वं महते क्षत्राय महते ज्यैष्ठयाय महते जानराज्यायेन्द्रस्येन्द्रियाय। इममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणाना ७ राजा॥

- **विनियोग:**
  ॐ इमं देवा इति मन्त्रस्य गौतम ऋषिः। द्विपदाविराट् छन्दः। सोमो देवता। असपत्नमिति बीजम्। सोमप्रीत्यर्थे जपे विनियोग:॥

- **ऋष्यादि न्यास**
  ॐ गौतम ऋषये नमः शिरसि। ॐ द्विपदा विराट् छन्दसे नमः मुखे। ॐ सोमदेवतायै नमः हृदि। ॐ असपत्न बीजाय नमः गुह्ये। ॐ सोम प्रीत्यर्थे जपे विनियोगाय नम: सर्वाङ्गे॥

- **करन्यास**
  ॐ इमं देवाऽ असपत्न ७ सुवध्वमित्यङ्गुष्ठाभ्यां नमः। ॐ महतेक्षत्रायेति तर्जनीभ्यां नमः। ॐ महतेज्यैष्ठयायेति मध्यमाभ्यां नमः। ॐ महते जानराज्यायेन्द्रियायेत्यनामिकाभ्यां नमः। ॐ इममुष्यपुत्रममुष्यै इति कनिष्ठिकाभ्यां नमः। ॐ पुत्रमस्यै व्विशऽएषवो मीराजासोमोऽस्माकं ब्राह्मणाना ७ राजेति करतलकर पृष्ठाभ्यां नमः॥

- **हृदयादिन्यास**
  ॐ इमन्देवाऽअसपत्न ७ सुवध्वमिति हृदयाय नमः। ॐ महते क्षत्रायेति शिरसे स्वाहा। ॐ महतेज्ज्यैष्ठयायेति शिखायै वषट्। ॐ महते जानराज्यायेंद्रस्येंद्रियायेति कवचायहुम्। ॐ इममुष्यपुत्र ममुष्यै इति नेत्रत्रयाय वौषट्। ॐ पुत्रमस्यै व्विशऽएष वोमीराजा सोमोऽस्माकं ब्राह्मणाना ७ राजा इत्यस्त्राय फट्॥

- **मन्त्रन्यास:**
  ॐ इमं देवा इति शिरसि। ॐ असपत्नमिति ललाटे। ॐ सुवध्वमिति नासिकायाम्। ॐ महते क्षत्रायेति मुखे। ॐ महते ज्न्यैष्टयायेति कंठे। ॐ महतजानराज्यायेंद्रस्येद्रि यायेति हृदये। इममुष्येति नाभौ। ॐ पुत्रममुष्यै कट्याम्। ॐ पुत्रमस्यै इति जंघयोः। ॐ विशऽएषवोमीरा जासोमंस्माकंब्राह्मणाना ७ राजेति पादयो:॥

॥ चन्द्र कवचम् ॥

- **विनियोग** अस्य श्री चंद्र कवच स्तोत्र महा मंत्रस्य । गौतम ऋषि: । अनुष्टुप छंद: । श्री चंद्रो देवता । चंद्र: प्रीत्यर्थे जपे विनियोग: ॥

- **समं चतुर्भुजं वंदे केयूर मकुटोज्वलम् ।**
  वासुदेवस्य नयनं शंकरस्य च भूषणम् ॥ ॥ १ ॥

- **एवं ध्यात्वा जपेन्नित्यं शशिन: कवचं शुभम् ।**
  शशि: पातु शिरो देशं भालं पातु कलानिधि ॥ ॥ २ ॥

- **चक्षुषी: चंद्रमा: पातु श्रुती पातु निशापति: ।**
  प्राणं कृपाकर: पातु मुखं कुमुदबांधव: ॥ ॥ ३ ॥

- **पातु कण्ठं च मे सोम: स्कंधौ जैवा तृकस्तथा ।**
  करौ सुधाकर: पातु वक्ष: पातु निशाकर: ॥ ॥ ४ ॥

- **हृदयं पातु मे चंद्रो नाभिं शंकरभूषण: ।**
  मध्यं पातु सुरश्रेष्ठ: कटिं पातु सुधाकर: ॥ ॥ ५ ॥

- **ऊरू तारापति: पातु मृगांको जानुनी सदा ।**
  अब्दिज: पातु मे जंघे पातु पादौ विधु: सदा ॥ ॥ ६ ॥

- **सर्वाण्यन्यानि चांगानि पातु चंद्रोऽखिलं वपु: ।**
  ऐतद्धि कवचं दिव्यं भुक्ति मुक्ति प्रदायकम् ।
  य: पठेत च्छृणुयाद्वापि सर्वत्र विजयी भवेत ॥ ॥ ७ ॥

॥ इती श्री चन्द्र कवचम् सम्पूर्णम् ॥

॥ चन्द्र स्तोत्रम् ॥

- **श्वेताम्बर: श्वेतवपु: किरीटी, श्वेतद्युतिर्दण्डधरो द्विबाहु: ।**
  चन्द्रो मृतात्मा वरद: शशांक:, श्रेयांसि मह्यं प्रददातु देव: ॥ १ ॥

- **दधिशंखतुषाराभं क्षीरोदार्णवसम्भवम ।**
  नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम ॥ ॥ २ ॥

- **क्षीरसिन्धुसमुत्पन्नो रोहिणी सहित: प्रभु: ।**
  हरस्य मुकुटावास: बालचन्द्र नमोऽस्तु ते ॥ ॥ ३ ॥

- **सुधायया यत्किरणा: पोषयन्त्योषधीवनम ।**
  सर्वान्नरसहेतुं तं नमामि सिन्धुनन्दनम ॥ ॥ ४ ॥

- **राकेशं तारकेशं च रोहिणीप्रियसुन्दरम ।**
  ध्यायतां सर्वदोषघ्नं नमामीन्दुं मुहुर्मुहु: ॥ ॥ ५ ॥

॥ इति मन्त्र महार्णवे चन्द्रमस: स्तोत्रम् सम्पूर्णम् ॥

॥ चन्द्र अष्टाविंशति नाम स्तोत्रम् ॥

- **विनियोग** अस्य श्री चंद्र स्याष्टाविंशति नाम स्तोत्रस्य । गौतम ऋषि: । विराट् छंद: । श्री चन्द्रो देवता । चंद्रस्य प्रीत्यर्थे पाठे विनियोग: ॥

- **ऋष्यादि न्यास** शिरसि श्री गौतम ऋषये नम: । मुखे विराट् छंदसे नम: । हृदि श्री चन्द्रे देवतायै नमः । सर्वांगे श्री चन्द्र प्रीत्यर्थे पाठे विनियोगाय नम: ॥

- **चन्द्रस्य शृणु नामानि शुभदानि महीपते ।**
  यानि श्रुत्वा नरो दु:खान्मुच्यते नात्र संशय: ॥ ॥ १ ॥

- **सुधाकरश्च सोमश्च ग्लौरब्ज: कुमुदप्रिय: ।**
  लोकप्रिय: शुभ्रभानुश्चन्द्रमा रोहिणीपति ॥ ॥ २ ॥

- **शशी हिमकरो राजा द्विजराजो निशाकर: ।**
  आत्रेय इन्दु: शीतांशुरोषधीश: कलानिधि: ॥ ॥ ३ ॥

- **जैवातृको रमाभ्राता क्षीरोदार्णव संभव: ।**
  नक्षत्रनायक: शंभु: शिरश्चूडामणिर्विभु: ॥ ॥ ४ ॥

- **तापहर्ता नभोदीपो नामान्येतानि य: पठेत् ।**
  प्रत्यहं भक्तिसंयुक्तस्तस्य पीडा विनश्यति ॥ ॥ ५ ॥

- **तद्दिने च पठेद्यस्तु लभेत् सर्वं समीहितम् ।**
  ग्रहादीनां च सर्वेषां भवेच्चन्द्रबलं सदा ॥ ॥ ६ ॥

॥ इति श्री चंद्राष्टाविंशतिनाम स्तोत्रम् संपूर्णम् ॥

॥ श्री चन्द्र अष्टोत्तरशत नामावली ॥

1. ॐ श्रीमते नमः।
2. ॐ शशधराय नमः।
3. ॐ चन्द्राय नमः।
4. ॐ ताराधीशाय नमः।
5. ॐ निशाकराय नमः।
6. ॐ सुधानिधये नमः।
7. ॐ सदाराध्याय नमः।
8. ॐ सत्पतये नमः।
9. ॐ साधुपूजिताय नमः।
10. ॐ जितेन्द्रियाय नमः।
11. ॐ जयोद्योगाय नमः।
12. ॐ ज्योतिश्चक्रप्रवर्तकाय नमः।
13. ॐ विकर्तनानुजाय नमः।
14. ॐ वीराय नमः।
15. ॐ विश्वेशाय नमः।
16. ॐ विदुषां पतये नमः।
17. ॐ दोषाकराय नमः।
18. ॐ दुष्टदूराय नमः।
19. ॐ पुष्टिमते नमः।
20. ॐ शिष्टपालकाय नमः।
21. ॐ अष्टमूर्तिप्रियाय नमः।
22. ॐ अनन्ताय नमः।
23. ॐ कष्टदारुकुठारकाय नमः।
24. ॐ स्वप्रकाशाय नमः।
25. ॐ प्रकाशात्मने नमः।
26. ॐ द्युचराय नमः।
27. ॐ देवभोजनाय नमः।
28. ॐ कलाधराय नमः।
29. ॐ कालहेतवे नमः।
30. ॐ कामकृते नमः।
31. ॐ कामदायकाय नमः।
32. ॐ मृत्युसंहारकाय नमः।
33. ॐ अमर्त्याय नमः।
34. ॐ नित्यानुष्ठानदाय नमः।
35. ॐ क्षपाकराय नमः।
36. ॐ क्षीणपापाय नमः।
37. ॐ क्षयवृद्धिसमन्विताय नमः।
38. ॐ जैवातृकाय नमः।
39. ॐ शुचये नमः।
40. ॐ शुभ्राय नमः।
41. ॐ जयिने नमः।
42. ॐ जयफलप्रदाय नमः।
43. ॐ सुधामयाय नमः।
44. ॐ सुरस्वामिने नमः।
45. ॐ भक्तानामिष्टदायकाय नमः।
46. ॐ भुक्तिदाय नमः।
47. ॐ मुक्तिदाय नमः।
48. ॐ भद्राय नमः।
49. ॐ भक्तदारिद्र्यभञ्जनाय नमः।
50. ॐ सामगानप्रियाय नमः।
51. ॐ सर्वरक्षकाय नमः।
52. ॐ सागरोद्भवाय नमः।
53. ॐ भयान्तकृते नमः।
54. ॐ भक्तिगम्याय नमः।
55. ॐ भवबन्धविमोचकाय नमः।
56. ॐ जगत्प्रकाशकिरणाय नमः।
57. ॐ जगदानन्दकारणाय नमः।
58. ॐ निस्सपत्नाय नमः।
59. ॐ निराहाराय नमः।
60. ॐ निर्विकाराय नमः।
61. ॐ निरामयाय नमः।
62. ॐ भूच्छायाच्छादिताय नमः।
63. ॐ भव्याय नमः।
64. ॐ भुवनप्रतिपालकाय नमः।
65. ॐ सकलार्तिहराय नमः।
66. ॐ सौम्यजनकाय नमः।
67. ॐ साधुवन्दिताय नमः।
68. ॐ सर्वागमज्ञाय नमः।
69. ॐ सर्वज्ञाय नमः।
70. ॐ सनकादिमुनिस्तुताय नमः।
71. ॐ सितच्छत्रध्वजोपेताय नमः।
72. ॐ सिताङ्गाय नमः।
73. ॐ सितभूषणाय नमः।
74. ॐ श्वेतमाल्याम्बरधराय नमः।
75. ॐ श्वेतगन्धानुलेपनाय नमः।
76. ॐ दशाश्वरथसंरूढाय नमः।
77. ॐ दण्डपाणये नमः।
78. ॐ धनुर्धराय नमः।
79. ॐ कुन्दपुष्पोज्ज्वलाकाराय नमः।
80. ॐ नयनाब्जसमुद्भवाय नमः।
81. ॐ आत्रेयगोत्रजाय नमः।
82. ॐ अत्यन्तविनयाय नमः।
83. ॐ प्रियदायकाय नमः।
84. ॐ करुणारससम्पूर्णाय नमः।
85. ॐ कर्कटप्रभवे नमः।
86. ॐ अव्ययाय नमः।
87. ॐ चतुरश्रासनारूढाय नमः।
88. ॐ चतुराय नमः।
89. ॐ दिव्यवाहनाय नमः।
90. ॐ विवस्वन्मण्डलाज्ञेयवासाय नमः।
91. ॐ वसुसमृद्धिदाय नमः।
92. ॐ महेश्वरप्रियाय नमः।
93. ॐ दान्ताय नमः।
94. ॐ मेरुगोत्रप्रदक्षिणाय नमः।
95. ॐ ग्रहमण्डलमध्यस्थाय नमः।
96. ॐ ग्रसितार्काय नमः।
97. ॐ ग्रहाधिपाय नमः।
98. ॐ द्विजराजाय नमः।
99. ॐ द्युतिलकाय नमः।
100. ॐ द्विभुजाय नमः।
101. ॐ द्विजपूजिताय नमः।
102. ॐ औदुम्बरनगावासाय नमः।
103. ॐ उदाराय नमः।
104. ॐ रोहिणीपतये नमः।
105. ॐ नित्योदयाय नमः।
106. ॐ मुनिस्तुत्याय नमः।
107. ॐ नित्यानन्दफलप्रदाय नमः।
108. ॐ सकलाह्लादनकराय नमः।
109. ॐ पलाशसमिधप्रियाय नमः।
110. ॐ चन्द्रमसे नमः।

॥ इति श्री चन्द्र अष्टोत्तरशत नामावली सम्पूर्णम ॥

॥ मंगल ग्रह मंत्र, जप, कवच, स्तोत्र ॥

अनुक्रमाणिका

1. मंगल मन्त्र 02
2. मंगल प्रार्थना, व्रत, स्नान, दान 03
3. मंगल वैदिक मन्त्र न्यास प्रयोग: 04
4. मंगल कवचम् 05
5. मंगल (अंगारक) स्तोत्रम् 06
6. ऋणमोचन मंगल स्तोत्रम् 07
7. मंगल अष्टोत्तरशत नामावली 08
8.

मंगल यन्त्रम्

गजाग्निदिश्याथनवाद्रिवाणा
पातालरुद्रारससंविलिख्य ।
भौमस्य यन्त्रं क्रमशो विधार्य
मनिष्टनाशं प्रवदन्ति गर्गाः ॥

८	३	१०
९	७	५
४	११	६

॥ मंगल ग्रह ॥

मंगल अवन्ति देश में उत्पत्ति। भारद्वाज गोत्र। जाति क्षत्रिय। रक्त वर्ण।

- **शुभाशुभत्व** — पाप ग्रह
- **भोग काल** — 40 दिन (डेढ मास)
- **बीज मंत्र** — ॐ अं अंगारकाय नमः।
  - ॐ हूँ श्रीं भौमाय नमः।
  - ॐ भौमाय नमः।
- **तांत्रिक मंत्र** — ॐ क्राँ क्रीं क्रौं सः भौमाय नमः।
  - ऐं ह्सौः श्रीं द्रां कं ग्रहाधिपतये भौमाय स्वाहा॥ शारदाटीकायाम्
- **वैदिक मंत्र** — ॐ अग्निमूर्धा दिवः ककुत्पतिः पृथिव्या अयम्।
  अपा ७ रेता ७ सि जिन्वति॥
- **पुराणोक्त मंत्र** — ॐ धरणी गर्भ संभूतं विद्युत्कान्ति समप्रभम।
  कुमारं शक्ति हस्तञ्च मंगलं प्रणमाम्यहम॥
- अधिदेवता-**स्कन्दम्** — ॐ यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात्।
  श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन्॥
- प्रत्यधिदेवता-**पृथिवीम्** — ॐ स्योना पृथवी नो भवानृक्षरा निवेशनि। यच्छा नः शर्म सप्रथः॥
- **जप संख्या** — 10,000 कलयुगे चतुर्थगुणो अर्थात 40,000
  + दशांश हवन 4,000
  + दशांश तर्पण 400
  + दशांश मार्जन 40 = 44,440
- **जप समय** — दिन का प्रथम प्रहर
- **हवनवस्तु** — खदिर (खैर)
- **रत्न** — मुंगा - 12.5 रत्ती, मंगलवार, दक्षिण दिशा, संध्या वेला, अनामिका

- **मंगल प्रार्थना**

  रक्ताम्बरो रक्तवपुः किरीटी, चतुर्भुजो मेषगमो गदाभृत्।
  धरासुतः शक्तिधरश्च शूली, सदा मम स्याद्वरदः प्रशान्तः॥

  - जो रक्त वस्त्र धारण करने वाले, रक्त विग्रह वाले, मुकुट धारण करने वाले, चार भुजा वाले, मेष वाहन, गदा धारण करने वाले, पृथ्वी के पुत्र, शक्ति तथा शूल धारण करने वाले हैं, वे मंगल मेरे लिये सदा वरदायी और शान्त हों।

- **मंगल का व्रत**

  ४५ या २१ मंगलवारों तक करना चाहिये। यह व्रत अधिक दिन भी किया जा सकता है। लाल वस्त्र धारण करके **'ॐ क्रां क्रीं क्रौं सः भौमाय नमः '** इस मन्त्र की ७, ५ या ३ माला जपे। भोजन में गुड़ से बना हलवा या लड्डू इत्यादि खाये। नमक नहीं खाये। इस व्रत के करने से ऋण से छुटकारा मिलता है। संतान सुख प्राप्त होता है।

- **अनिष्टे भौमे शान्ति स्नानम्**

  - **स्याच्चन्दनश्रीफलहिङ्गुली, श्यामाबलामांस्यरुणप्रसूनैः।**
    ह्रीबेरचाम्पेयजपांकुराढयैः, स्नानं कुदायादकृताशिवघ्नम्॥
  - मंगल की अनिष्टशान्ति के लिये चन्दन, बिल्व, बैंगनमूल, प्रियंगु, बरियारा के बीज (खरेटी), जटामासी, लाल पुष्प, सुगन्धबाला, नागकेशर और जपापुष्प से स्नान करना चाहिये।

- **मंगल दान**

  प्रवालगोधूममसूरिकाश्च, वृषं सताम्रं करवीरपुष्पम्।
  आरक्त वस्त्रं गुड-हेम-ताम्रं दुष्टाय भौमाय च रक्त चन्दनम्॥

  - मूँगा, गेहूँ, मसूर की दाल, लाल वर्ण का बैल, कनेर पुष्प, लाल वस्त्र, गुड़, स्वर्ण, ताम्र एवं रक्त-चन्दन का दान करने से मंगल का दोष नष्ट होता है।
  - मंगल ग्रह की शान्ति के लिये लाल पुष्प एवं ब्राह्मण को भोजन दान देना चाहिये।

॥ भौम वैदिक मंत्र न्यासादि प्रयोग: ॥

- **वैदिक मंत्र** — **ॐ अग्निमूर्धा दिव: ककुत्पति: पृथिव्या अयम्।
अपा ७ रेता ७ सि जिन्वति ॥**

- **विनियोग** — ॐ अग्निर्मूर्द्धेति मंत्रस्य विरूपाक्ष ऋषिः। गायत्री छंद:। भौमो देवता। ककुद्वीजम्। भौम प्रीत्यर्थे जपे विनियोग: ॥

- **ऋष्यादि न्यास** — ॐ विरूपाक्ष ऋषये नमः शिरसि। ॐ गायत्री छंदसे नमः मुखे। ॐ भौमदेवतायै नमः हृदि। ॐ ककुद्वीजाय नमः गुह्ये। ॐ भौमप्रीतये जपे विनियोगाय नमः सर्वांगे ॥

- **करन्यास** — ॐ अग्निर्मूद्धेत्यंगुष्ठाभ्यां नमः। ॐ दिवः ककुदिति तर्जनीभ्यां नमः। पतिः पृथिव्याऽअयमिति मध्यमाभ्यां नमः। ॐ अपामित्य अनामिकाभ्यां नमः। ॐ रेता ७ सीति कनिष्ठिकाभ्यं नमः। ॐ जिन्वतीति करतलकर पृष्ठाभ्यां नमः।

- **हृदयादिन्यास** — अग्निर्मूद्धेति हृदयाय नमः। ॐ दिवः ककुदिति शिरसे स्वाहा। ॐ पतिः पृथिव्याऽअयमिति शिखायै वषट्। ॐ अपां कवचाय हुं। ॐ रेता ७ सीति नेत्रत्रयाय वौषट्। ॐ जिन्वतीत्यस्त्राय फट् ॥

- **मन्त्रन्यास** — ॐ अग्निरिति शिरसि। ॐ मर्धा ललाट। ॐ दिवो मुखे। ॐ ककुदिति हृदये। ॐ पतिर् नाभौ। ॐ पृथिव्याः कट्याम्। ॐ अयमूर्वोः। ॐ अपां जानुनाः। ॐ रेता ७ सि गुल्फयोः। ॐ जिन्वति पादयोः।

॥ मंगल कवचम् ॥

- **विनियोग** अस्य श्री अंगारक कवच स्तोत्र मंत्रस्य । कश्यप ऋषिः । अनुष्टुप् छन्दः । अङ्गारको देवता भौम पीडा परिहारार्थं पाठे विनियोगः ॥

- **रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाभृत् ।**
  धरासुतः शक्तिधरश्च शूली सदा ममस्याद्वरदः प्रशांतः ॥ ॥ १ ॥

- **अंगारकः शिरो रक्षेन्मुखं वै धरणीसुतः ।**
  श्रवौ रक्तांबरः पातु नेत्रे मे रक्तलोचनः ॥ ॥ २ ॥

- **नासां शक्तिधरः पातु मुखं मे रक्तलोचनः ।**
  भुजौ मे रक्तमाली च हस्तौ शक्तिधरस्तथा ॥ ॥ ३ ॥

- **वक्षः पातु वरांगश्च हृदयं पातु लोहितः ।**
  कटिं मे ग्रहराजश्च मुखं चैव धरासुतः ॥ ॥ ४ ॥

- **जानु जंघे कुजः पातु पादौ भक्तप्रियः सदा ।**
  सर्वण्यन्यानि चांगानि रक्षेन्मे मेषवाहनः ॥ ॥ ५ ॥

- **या इदं कवचं दिव्यं सर्वशत्रु निवारणम् ।**
  भूतप्रेतपिशाचानां नाशनं सर्व सिद्धिदम् ॥ ॥ ६ ॥

- **सर्वरोगहरं चैव सर्वसंपत्प्रदं शुभम् ।**
  भुक्तिमुक्तिप्रदं नृणां सर्वसौभाग्यवर्धनम् ।
  रोगबन्ध विमोक्षं च सत्यमेतन्न संशयः ॥ ॥ ७ ॥

॥ इति श्री मार्कण्डेय पुराणे मंगल कवचम् सम्पूर्णम् ॥

॥ अंगारक स्तोत्रम् ॥

- **विनियोग** अस्य श्री अंगारक स्तोत्रस्य मंत्रस्य। विरुपांगिरस ऋषिः। अग्नि देवता। गायत्री छन्दः। भौम प्रीत्यर्थे पाठे विनियोगः॥

- **अंगारकः शक्तिधरो लोहिताङ्गो धरासुतः।**
  कुमारो मङ्गलो भौमो महाकायो धनप्रदः॥ ॥ १ ॥

- **ऋणहर्ता दृष्टिकर्ता रोगकृद्रोगनाशनः।**
  विद्युत्प्रभो व्रणकरः कामदो धनहृत् कुजः॥ ॥ २ ॥

- **सामगानप्रियो रक्तवस्त्रो रक्तायतेक्षणः।**
  लोहितो रक्तवर्णश्च सर्वकर्मावबोधकः॥ ॥ ३ ॥

- **रक्तमाल्यधरो हेमकुण्डली ग्रहनायकः।**
  नामान्येतानि भौमस्य यः पठेत्सततं नरः॥ ॥ ४ ॥

- **ऋणं तस्य च दौर्भाग्यं दारिद्र्यं च विनश्यति।**
  धनं प्राप्नोति विपुलं स्त्रियं चैव मनोरमाम्।
  वंशोद्द्योतकरं पुत्रं लभते नात्र संशयः॥ ॥ ५ ॥

- **योऽर्चयेदह्नि भौमस्य मङ्गलं बहुपुष्पकैः।**
  सर्वा नश्यति पीडा च तस्य ग्रहकृता ध्रुवम्॥ ॥ ६ ॥

॥ इति श्री स्कान्दपुराणे श्री अङ्गारक स्तोत्रम् सम्पूर्णम्॥

॥ ऋणमोचक मंगल स्तोत्रम् ॥

- **विनियोग** अस्य श्री भौम स्तोत्रस्य। गर्ग ऋषिः। मंगलो देवता। त्रिष्टुप छन्दः। ऋणाप हरणे पाठे विनियोगः॥

- **मंगलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः।**
  स्थिरामनो महाकायः सर्व-कर्म विरोधकः॥ ॥ १ ॥
- **लोहितो लोहिताक्षश्च सामगानां कृपाकरं।**
  धरात्मजः कुजौ भौमो भूतिदो भूमिनन्दनः॥ ॥ २ ॥
- **अंगारको यमश्चैव सर्वरोगापहारकः।**
  वृष्टेः कर्ताऽपहर्ता च सर्व-काम फलप्रदः॥ ॥ ३ ॥
- **एतानि कुजनामानि नित्यं यः श्रद्धया पठेत्।**
  ऋणं न जायते तस्य धनं शीघ्रमवाप्नुयात्॥ ॥ ४ ॥
- **धरणी गर्भ संभूतं विद्युत्कान्तिसमप्रभम्।**
  कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहम्॥ ॥ ५ ॥
- **स्तोत्रमंगारकस्यैतत्पठनीयं सदा नृभिः।**
  न तेषां भौमजा पीडा स्वल्पाऽपि भवति क्वचित् ॥ ६ ॥
- **अंगारको महाभाग भगवन्भक्तवत्सल।**
  त्वां नमामि ममाशेष मृणमाशु विनाशयः॥ ॥ ७ ॥
- **ऋणरोगादिदारिद्रयं ये चान्ये ह्यपमृत्यवः।**
  भयक्लेश मनस्तापाः नश्यन्तु मम सर्वदा॥ ॥ ८ ॥
- **अतिवक्र दुराराध्य भोग-मुक्त जितात्मनः।**
  तुष्टो ददासि साम्राज्यं रुष्टो हरसि तत्क्षणात्॥ ॥ ९ ॥
- **विरञ्चि शक्रादि विष्णूनां मनुष्याणां तु का कथा।**
  तेन त्वं सर्वसत्वेन ग्रहराजो महाबलः॥ ॥१०॥
- **पुत्रान्देहि धनं देहि त्वामस्मि शरणं गतः।**
  ऋणदारिद्रय दुःखेन शत्रुणां च भयात्ततः॥ ॥११॥
- **एभिर्द्वादशभिः श्लोकैर्यः स्तौति च धरासुतम्।**
  महतीं श्रियमाप्नोति ह्यपरो धनदो युवाः॥ ॥१२॥

॥ इति श्री स्कन्दपुराणे भार्गवप्रोक्त ऋणमोचन मंगल स्तोत्रम् सम्पूर्णम्॥

॥ श्री मंगल अष्टोत्तरशत नामावली ॥

1. ॐ महीसुताय नमः।
2. ॐ महाभागाय नमः।
3. ॐ मङ्गलाय नमः।
4. ॐ मङ्गलप्रदाय नमः।
5. ॐ महावीराय नमः।
6. ॐ महाशूराय नमः।
7. ॐ महाबलपराक्रमाय नमः।
8. ॐ महारौद्राय नमः।
9. ॐ महाभद्राय नमः।
10. ॐ माननीयाय नमः।
11. ॐ दयाकराय नमः।
12. ॐ मानदाय नमः।
13. ॐ अपर्वणाय नमः।
14. ॐ क्रूराय नमः।
15. ॐ तापत्रयविवर्जिताय नमः।
16. ॐ सुप्रतीपाय नमः।
17. ॐ सुताम्राक्षाय नमः।
18. ॐ सुब्रह्मण्याय नमः।
19. ॐ सुखप्रदाय नमः।
20. ॐ वक्रस्तम्भादिगमनाय नमः।
21. ॐ वरेण्याय नमः।
22. ॐ वरदाय नमः।
23. ॐ सुखिने नमः।
24. ॐ वीरभद्राय नमः।
25. ॐ विरूपाक्षाय नमः।
26. ॐ विदूरस्थाय नमः।
27. ॐ विभावसवे नमः।
28. ॐ नक्षत्रचक्रसञ्चारिणे नमः।
29. ॐ क्षत्रपाय नमः।
30. ॐ क्षात्रवर्जिताय नमः।
31. ॐ क्षयवृद्धिविनिर्मुक्ताय नमः।
32. ॐ क्षमायुक्ताय नमः।
33. ॐ विचक्षणाय नमः।
34. ॐ अक्षीणफलदाय नमः।
35. ॐ चतुर्वर्गफलप्रदाय नमः।
36. ॐ वीतरागाय नमः।
37. ॐ वीतभयाय नमः।
38. ॐ विज्वराय नमः।
39. ॐ विश्वकारणाय नमः।
40. ॐ नक्षत्रराशिसञ्चाराय नमः।
41. ॐ नानाभयनिकृन्तनाय नमः।
42. ॐ वन्दारुजनमन्दाराय नमः।
43. ॐ वक्रकुञ्चितमूर्धजाय नमः।
44. ॐ कमनीयाय नमः।
45. ॐ दयासाराय नमः।
46. ॐ कनत्कनकभूषणाय नमः।
47. ॐ भयघ्नाय नमः।
48. ॐ भव्यफलदाय नमः।
49. ॐ भक्ताभयवरप्रदाय नमः।
50. ॐ शत्रुहन्त्रे नमः।
51. ॐ शमोपेताय नमः।
52. ॐ शरणागतपोषनाय नमः।
53. ॐ साहसिने नमः।
54. ॐ सद्गुणाध्यक्षाय नमः।
55. ॐ साधवे नमः।
56. ॐ समरदुर्जयाय नमः।
57. ॐ दुष्टदूराय नमः।
58. ॐ शिष्टपूज्याय नमः।
59. ॐ सर्वकष्टनिवारकाय नमः।
60. ॐ दुश्चेष्टवारकाय नमः।
61. ॐ दुःखभञ्जनाय नमः।
62. ॐ दुर्धराय नमः।
63. ॐ हरये नमः।
64. ॐ दुःस्वप्नहन्त्रे नमः।
65. ॐ दुर्धर्षाय नमः।
66. ॐ दुष्टगर्वविमोचनाय नमः।
67. ॐ भरद्वाजकुलोद्भूताय नमः।
68. ॐ भूसुताय नमः।
69. ॐ भव्यभूषणाय नमः।
70. ॐ रक्ताम्बराय नमः।
71. ॐ रक्तवपुषे नमः।
72. ॐ भक्तपालनतत्पराय नमः।
73. ॐ चतुर्भुजाय नमः।
74. ॐ गदाधारिणे नमः।
75. ॐ मेषवाहाय नमः।
76. ॐ मिताशनाय नमः।
77. ॐ शक्तिशूलधराय नमः।
78. ॐ शाक्ताय नमः।
79. ॐ शस्त्रविद्याविशारदाय नमः।
80. ॐ तार्किकाय नमः।
81. ॐ तामसाधाराय नमः।
82. ॐ तपस्विने नमः।
83. ॐ ताम्रलोचनाय नमः।
84. ॐ तप्तकाञ्चनसङ्काशाय नमः।
85. ॐ रक्तकिञ्जल्कसन्निभाय नमः।
86. ॐ गोत्राधिदेवाय नमः।
87. ॐ गोमध्यचराय नमः।
88. ॐ गुणविभूषणाय नमः।
89. ॐ असृजे नमः।
90. ॐ अङ्गारकाय नमः।
91. ॐ अवन्तीदेशाधीशाय नमः।
92. ॐ जनार्दनाय नमः।
93. ॐ सूर्ययाम्यप्रदेशस्थाय नमः।
94. ॐ घुने नमः।
95. ॐ यौवनाय नमः।
96. ॐ याम्यहरिन्मुखाय नमः।
97. ॐ याम्यदिङ्मुखाय नमः।
98. ॐ त्रिकोणमण्डलगताय नमः।
99. ॐ त्रिदशाधिपसन्नुताय नमः।
100. ॐ शुचये नमः।
101. ॐ शुचिकराय नमः।
102. ॐ शूराय नमः।
103. ॐ शुचिवश्याय नमः।
104. ॐ शुभावहाय नमः।
105. ॐ मेषवृश्चिकराशीशाय नमः।
106. ॐ मेधाविने नमः।
107. ॐ मितभाषणाय नमः।
108. ॐ सुखप्रदाय नमः।
109. ॐ सुरूपाक्षाय नमः।
110. ॐ सर्वाभीष्टफलप्रदाय नमः।

॥ इति श्री मंगल अष्टोत्तरशत नामावली सम्पूर्णम ॥

॥ बुध ग्रह मंत्र, जप, कवच, स्तोत्र ॥

अनुक्रमाणिका

1. बुध देव मन्त्र 02
2. बुध प्रार्थना, व्रत, स्नान, दान 03
3. बुध कवचम् 04
4. बुध स्तोत्रम् - १ 05
5. बुध स्तोत्रम् - २ 06
6. बुध पंचविंशति नाम स्तोत्रम् 07
7. बुध अष्टोत्तरशत नामावली 08
8.

बुध यन्त्रम्

नवाब्धिरुद्रा दिंनागषष्ठा
वाणार्कसप्ता नवकोष्ठयन्त्रे ।
विलिख्य धार्यं गदनाशहेतवे
वदन्ति यन्त्रं शशिजस्य धीराः ॥

९	४	११
१०	८	६
५	१२	७

॥ बुध देव ग्रह ॥

बुध मगध देश में उत्पत्ति। अत्री गोत्र। जाति वैश्य। पिता चंद्रमा।

- **शुभाशुभत्व** — **शुभ ग्रह**
- **भोग काल** — **30 दिन (एक मास)**
- **बीज मंत्र** — **ॐ बुं बुधाय नमः।** सप्ताक्षर मन्त्र
  - **ॐ बं बुधाय नमः।** मन्त्र कोष
  - **ॐ बुधाय नमः**
- **तांत्रिक मंत्र** — **ॐ ब्राँ ब्रीं ब्रौं सः बुधाय नमः।** दसाक्षर मन्त्र
  - **ॐ ब्रां ब्रीं ब्रुं सं बुधाय नमः।** मन्त्र कोष
  - **ॐ ऐं स्त्रीं श्रीं बुधाय नमः।**
  - **ॐ स्त्रीं स्त्रीं बुधाय नमः।**
  - **ॐ ह्रां क्रीं टं ग्रहनाथाय बुधाय स्वाहा॥** स्वतन्त्रे
- **वैदिक मंत्र** — **ॐ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते स ७ सृजेथामयञ्च।**
  अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यशमानश्च सीदत॥
- **पुराणोक्त मंत्र** — **ॐ प्रियंगुकलिकाश्यामं रूपेणाप्रतिमं बुधम।**
  सौम्यं सौम्य गुणोपेतं तं बुधं प्रणमाम्यहम॥
- अधिदेवता-विष्णुम् — **ॐ विष्णो रराट मसि विष्णो : श्रप्त्रोस्थो विष्णोः**
  स्यूरसि विष्णोर्ध्रुवोसी। वैष्णवमसि विष्णवेत्वा।
- प्रत्यधिदेवता-विष्णुम् — **ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।**
  समूढ़मस्य पा ७ सुरे स्वाहा॥
- **जप संख्या** — **9,000 कलयुगे चतुर्थगुणो अर्थात 36,000**
  + दशांश हवन 3,600
  + दशांश तर्पण 360
  + दशांश मार्जन 36 = 17,776
- **जप समय** — **मध्याह्न काल**
- **हवनवस्तु** — **अपामार्ग, चिचिडा**
- **रत्न** — **पन्ना - 6 रत्ती, बुधवार, ईशान दिशा, प्रातः काल, कनिष्ठिका**

- **बुध प्रार्थना**

पीताम्बरः पीतवपुः किरीटी, चतुर्भुजो दण्डधरश्च हारी।
चर्मासिधृक् सोमसुतः सदा मे, सिंहाधिरूढो वरदो बुधश्च ॥

- जो पीत वस्त्र धारण करने वाले, पीत विग्रह वाले, मुकुट धारण करने वाले, चार भुजा वाले, दण्ड धारण करने वाले, माला धारण करने वाले, ढाल तथा तलवार धारण करने वाले और सिंहासन पर विराजमान रहने वाले हैं, वे चन्द्रमा के पुत्र बुध मेरे लिये सदा वरदायी हों।

- **बुध का व्रत**

४५, २१ या १७ बुधवारों तक करना चाहिये। हरे रंग का वस्त्र धारण करके **'ॐ ब्रां ब्रीं ब्रौं सः बुधाय नमः'** इस मन्त्र का १७, ५ या ३ माला जप करे। भोजन में नमक रहित मूँग से बनी चीजें खानी चाहिये। जैसे मूँग का हलवा, मूँग की पंजीरी, मूँग के लड्डू इत्यादि। भोजन से पहले तीन तुलसी के पत्ते चरणामृत या गंगाजल के साथ खाकर तब भोजन करे। इस व्रत के करने से विद्या और धन का लाभ होता है। व्यापार में उन्नति होती है और शरीर स्वस्थ रहता है।

- **अनिष्टे बुधे शान्ति स्नानम्**

- **सहेममूलाक्षतशौक्तिकेयै, गोरोचनक्षौद्रफलैः सगव्यैः।**
हिताय साद्भिर्विषमे नराणां, निमज्जनं चान्द्रमसायने स्यात् ॥
- बुध की अनिष्ट-शान्ति के लिये नागकेशर पोहकरमूल, अक्षत, मुक्ताफल, गोरोचन, मधु, मैनफल और पंचगव्य से स्नान करना चाहिये।

- **बुध दान**

नीलं वस्त्रं मुद्गहैमं बुधाय, रत्नं पाचिं दासिकां हेमसर्पिः।
कांस्यं दन्तं कुञ्जरस्याथ मेषो, रौप्यं सस्यं पुष्पजात्यादिकं च ॥

- बुध की प्रीति के लिये नीला वस्त्र, मूँग, स्वर्ण, पन्ना, दासी, स्वर्णयुक्त घी, कांस्य (कांसा धातु), हाथी दाँत, भेड़, धन, धान्य, पुष्प, फल, लता का दान करना चाहिये। कस्तूरी, पंचरत्न,
- जन्मकुण्डली में यदि बुध की स्थिति ठीक नहीं हो तो स्वर्ण एवं पुष्पदान करना चाहिये।

॥ बुध कवचम् ॥

- **विनियोग** अस्य श्री बुधकवच स्तोत्र मन्त्रस्य । कश्यप ऋषिः । अनुष्टुप् छन्दः । बुधो देवता बुधप्रीत्यर्थे जपे विनियोगः ।

- **बुधस्तु पुस्तकधरः कुंकुमस्य समद्युतिः ।**
पीताम्बरधरः पातु पीतमाल्यानुलेपनः ॥ ॥ १ ॥

- **कटिं च पातु मे सौम्यः शिरोदेशं बुधस्तथा ।**
नेत्रे ज्ञानमयः पातु श्रोत्रे पातु निशाप्रियः ॥ ॥ २ ॥

- **घ्राणं गन्धप्रियः पातु जिह्वां विद्याप्रदो मम ।**
कण्ठं पातु विधोः पुत्रो भुजौ पुस्तकभूषणः ॥ ॥ ३ ॥

- **वक्षः पातु वरांगश्च हृदयं रोहिणीसुतः ।**
नाभिं पातु सुराराध्यो मध्यं पातु खगेश्वरः ॥ ॥ ४ ॥

- **जानुनी रौहिणेयश्च पातु जंघेऽखिलप्रदः ।**
पादौ मे बोधनः पातु पातु सौम्योऽखिलं वपुः ॥ ॥ ५ ॥

- **एतद्धि कवचं दिव्यं सर्वपापप्रणाशनम् ।**
सर्वरोगप्रशमनं सर्व दुःख निवारणम् ॥ ॥ ६ ॥

- **आयुरारोग्यशुभदं पुत्रपौत्रप्रवर्द्धनम् ।**
यः पठेच्छृणुयाद्वापि सर्वत्र विजयी भवेत् ॥ ॥ ७ ॥

॥ इति श्री ब्रह्मवैवर्त पुराणे बुध कवचम् सम्पूर्णम् ॥

॥ बुध स्तोत्रम् - १ ॥

- **पीताम्बर: पीतवपु किरीटी, चतुर्भुजो देवदु:खापहर्ता।
धर्मस्य धृक सोमसुत: सदा मे, सिंहाधिरुढ़ो वरदो बुधश्च॥ ॥ १ ॥**
- **प्रियंगुकनकश्यामं रूपेणाप्रतिमं बुधम।
सौम्यं सौम्यगुणोपेतं नमामि शशिनन्दनम॥ ॥ २ ॥**
- **सोमसुनुर्बुधश्चैव सौम्य: सौम्यगुणान्वित:।
सदा शान्त: सदा क्षेमो नमामि शशिनन्दनम॥ ॥ ३ ॥**
- **उत्पातरूपी जगतां चन्द्रपुत्रो महाद्युति:।
सूर्यप्रियकरोविद्वान पीडां हरतु मे बुधं॥ ॥ ४ ॥**
- **शिरीषपुष्पसंकाशं कपिलीशो युवा पुन:।
सोमपुत्रो बुधश्चैव सदा शान्तिं प्रयच्छतु॥ ॥ ५ ॥**
- **श्याम: शिरालश्चकलाविधिज्ञ:, कौतूहली कोमलवाग्विलासी।
रजोधिको मध्यमरूपधृक स्या-दाताम्रनेत्रो द्विजराजपुत्र:॥ ॥ ६ ॥**
- **अहो चन्द्रासुत श्रीमन मागधर्मासमुदभव:।
अत्रिगोत्रश्चतुर्बाहु: खड्गखेटकधारक:॥ ॥ ७ ॥**
- **गदाधरो नृसिंहस्थ: स्वर्णनाभसमन्वित:।
केतकीद्रुमपत्राभ: इन्द्रविष्णुप्रपूजित:॥ ॥ ८ ॥**
- **ज्ञेयो बुध: पण्डितश्च रोहिणेयश्च सोमज:।
कुमारो राजपुत्रश्च शैशवे शशिनन्दन:॥ ॥ ९ ॥**
- **गुरुपुत्रश्च तारेयो विबुधो बोधनस्तथा।
सौम्य: सौम्यगुणोपेतो रत्नदानफलप्रद:॥ ॥१०॥**
- **एतानि बुधनामानि प्रात: काले पठेन्नर:।
बुद्धिर्विवृद्धितां याति बुधपीडा न जायते॥ ॥११॥**

॥ इति मंत्र महार्णवे बुध स्तोत्रम् संपूर्णम्॥

॥ बुध स्तोत्रम् - २ ॥

- **विनियोग** अस्य श्रीबुधस्तोत्रमहामन्त्रस्य वसिष्ठ ऋषिः । अनुष्टुप्छन्दः । बुधो देवता ।
बुधप्रीत्यर्थे जपे विनियोगः ।

- **ध्यानम्** **भुजैश्चतुर्भिर्वरदाभयासिगदं वहन्तं सुमुखं प्रशान्तम् ।
पीतप्रभं चन्द्रसुतं सुरेढ्यं सिम्हे निषण्णं बुधमाश्रयामि ॥**

- **पीताम्बरः पीतवपुः पीतध्वजरथस्थितः ।
पीयूषरश्मितनयः पातु मां सर्वदा बुधः ॥** ॥ १ ॥

- **सिंहवाहं सिद्धनुतं सौम्यं सौम्यगुणान्वितम् ।
सोमसूनुं सुराराध्यं सर्वदं सौम्यमाश्रये ॥** ॥ २ ॥

- **बुधं बुद्धिप्रदातारं बाणबाणासनोज्ज्वलम् ।
भद्रप्रदं भीतिहरं भक्तपालनमाश्रये ॥** ॥ ३ ॥

- **आत्रेयगोत्रसञ्जातमाश्रितार्तिनिवारणम् ।
आदितेयकुलाराध्यमाशुसिद्धिदमाश्रये ॥** ॥ ४ ॥

- **कलानिधितनूजातं करुणारसवारिधिम् ।
कल्याणदायिनं नित्यं कन्याराश्यधिपं भजे ॥** ॥ ५ ॥

- **मन्दस्मितमुखाम्भोजं मन्मथायुतसुन्दरम् ।
मिथुनाधीशमनघं मृगाङ्कतनयं भजे ॥** ॥ ६ ॥

- **चतुर्भुजं चारुरूपं चराचरजगत्प्रभुम् ।
चर्मखड्गधरं वन्दे चन्द्रग्रहतनूभवम् ॥** ॥ ७ ॥

- **पञ्चास्यवाहनगतं पञ्चपातकनाशनम् ।
पीतगन्धं पीतमाल्यं बुधं बुधनुतं भजे ॥** ॥ ८ ॥

- **बुधस्तोत्रमिदं गुह्यं वसिष्ठेनोदितं पुरा ।
यः पठेच्छृणूयाद्वापि सर्वाभीष्टमवाप्नुयात् ॥** ॥ ९ ॥

॥ इति श्री बुध स्तोत्रम् सम्पूर्णम् ॥

॥ बुध पंचविंशति नाम स्तोत्रम् ॥

- **विनियोग** अस्य श्री बुध पञ्चविंशतिनाम स्तोत्रस्य प्रजापति ऋषिः। त्रिष्टुप् छन्दः। बुधो देवता। बुधप्रीत्यर्थे पाठे विनियोगः॥

- **बुधो बुद्धिमतां श्रेष्ठो बुद्धिदाता धनप्रदः।**
  प्रियङ्गु कलिका श्यामः कञ्जनेत्रो मनोहरः॥ ॥ १ ॥

- **ग्रहपमो रौहिणेयो नक्षत्रेशो दयाकरः।**
  विरुद्धकार्यहन्ता च सौम्यौ बुद्धि विवर्धनः॥ ॥ २ ॥

- **चन्द्रात्मजो विष्णुरूपी ज्ञानी ज्ञो ज्ञानिनायकः।**
  ग्रहपीडाहरो दारपुत्रधान्यपशुप्रदः॥ ॥ ३ ॥

- **लोकप्रियः सौम्यमूर्ति गुणदो गुणिवत्सलः।**
  पञ्चविंशति नामानि बुधस्यैतानि यः पठेत्॥ ॥ ४ ॥

- **स्मृत्वा बुधं सदा तस्य पीडा सर्वा विनश्यति।**
  तद्दिने वा पठेद्यस्तु लभते स मनोगतम्॥ ॥ ५ ॥

॥ इति श्री पद्मपुराणे बुध पञ्च विंशति नाम स्तोत्रम् सम्पूर्णम् ॥

॥ श्री बुध अष्टोत्तरशत नामावली ॥

1. ॐ बुधाय नमः।
2. ॐ बुधार्चिताय नमः।
3. ॐ सौम्याय नमः।
4. ॐ सौम्यचित्ताय नमः।
5. ॐ शुभप्रदाय नमः।
6. ॐ दृढव्रताय नमः।
7. ॐ दृढफलाय नमः।
8. ॐ श्रुतिजालप्रबोधकाय नमः।
9. ॐ सत्यवासाय नमः।
10. ॐ सत्यवचसे नमः।
11. ॐ श्रेयसां पतये नमः।
12. ॐ अव्ययाय नमः।
13. ॐ सोमजाय नमः।
14. ॐ सुखदाय नमः।
15. ॐ श्रीमते नमः।
16. ॐ सोमवंशप्रदीपकाय नमः।
17. ॐ वेदविदे नमः।
18. ॐ वेदतत्त्वाशाय नमः।
19. ॐ वेदान्तज्ञानभास्कराय नमः।
20. ॐ विद्याविचक्षणाय नमः।
21. ॐ विदुषे नमः।
22. ॐ विद्वत्प्रीतिकराय नमः।
23. ॐ ऋजवे नमः।
24. ॐ विश्वानुकूलसञ्चाराय नमः।
25. ॐ विशेषविनयान्विताय नमः।
26. ॐ विविधागमसारज्ञाय नमः।
27. ॐ वीर्यवते नमः।
28. ॐ विगतज्वराय नमः।
29. ॐ त्रिवर्गफलदाय नमः।
30. ॐ अनन्ताय नमः।
31. ॐ त्रिदशाधिपपूजिताय नमः।
32. ॐ बुद्धिमते नमः।
33. ॐ बहुशास्त्रज्ञाय नमः।
34. ॐ बलिने नमः।
35. ॐ बन्धविमोचकाय नमः।
36. ॐ वक्रातिवक्रगमनाय नमः।
37. ॐ वासवाय नमः।
38. ॐ वसुधाधिपाय नमः।
39. ॐ प्रसन्नवदनाय नमः।
40. ॐ वन्द्याय नमः।
41. ॐ वरेण्याय नमः।
42. ॐ वाग्विलक्षणाय नमः।
43. ॐ सत्यवते नमः।
44. ॐ सत्यसङ्कल्पाय नमः।
45. ॐ सत्यबन्धवे नमः।
46. ॐ सदादराय नमः।
47. ॐ सर्वरोगप्रशमनाय नमः।
48. ॐ सर्वमृत्युनिवारकाय नमः।
49. ॐ वाणिज्यनिपुणाय नमः।
50. ॐ वश्याय नमः।
51. ॐ वाताङ्गाय नमः।
52. ॐ वातरोगहृते नमः।
53. ॐ स्थूलाय नमः।
54. ॐ स्थैर्यगुणाध्यक्षाय नमः।
55. ॐ स्थूलसूक्ष्मादिकारणाय नमः।
56. ॐ अप्रकाशाय नमः।
57. ॐ प्रकाशात्मने नमः।
58. ॐ घनाय नमः।
59. ॐ गगनभूषणाय नमः।
60. ॐ विधिस्तुत्याय नमः।
61. ॐ विशालाक्षाय नमः।
62. ॐ विद्वज्जनमनोहराय नमः।
63. ॐ चारुशीलाय नमः।
64. ॐ स्वप्रकाशाय नमः।
65. ॐ चपलाय नमः।
66. ॐ जितेन्द्रियाय नमः।
67. ॐ उदङ्मुखाय नमः।
68. ॐ मखासक्ताय नमः।
69. ॐ मगधाधिपतये नमः।
70. ॐ हरये नमः।
71. ॐ सौम्यवत्सरसञ्जाताय नमः।
72. ॐ सोमप्रियकराय नमः।
73. ॐ महते नमः।
74. ॐ सिंहाधिरूढाय नमः।
75. ॐ सर्वज्ञाय नमः।
76. ॐ शिखिवर्णाय नमः।
77. ॐ शिवङ्कराय नमः।
78. ॐ पीताम्बराय नमः।
79. ॐ पीतवपुषे नमः।
80. ॐ पीतच्छत्रध्वजाङ्किताय नमः।
81. ॐ खड्गचर्मधराय नमः।
82. ॐ कार्यकर्त्रे नमः।
83. ॐ कलुषहारकाय नमः।
84. ॐ आत्रेयगोत्रजाय नमः।
85. ॐ अत्यन्तविनयाय नमः।
86. ॐ विश्वपवनाय नमः।
87. ॐ चाम्पेयपुष्पसङ्काशाय नमः।
88. ॐ चारणाय नमः।
89. ॐ चारुभूषणाय नमः।
90. ॐ वीतरागाय नमः।
91. ॐ वीतभयाय नमः।
92. ॐ विशुद्धकनकप्रभाय नमः।
93. ॐ बन्धुप्रियाय नमः।
94. ॐ बन्धमुक्ताय नमः।
95. ॐ बाणमण्डलसंश्रिताय नमः।
96. ॐ अर्केशाननिवासस्थाय नमः।
97. ॐ तर्कशास्त्रविशारदाय नमः।
98. ॐ प्रशान्ताय नमः।
99. ॐ प्रीतिसंयुक्ताय नमः।
100. ॐ प्रियकृते नमः।
101. ॐ प्रियभूषणाय नमः।
102. ॐ मेधाविने नमः।
103. ॐ माधवसक्ताय नमः।
104. ॐ मिथुनाधिपतये नमः।
105. ॐ सुधिये नमः।
106. ॐ कन्याराशिप्रियाय नमः।
107. ॐ कामप्रदाय नमः।
108. ॐ घनफलाश्रयाय नमः।

॥ इति श्री बुध अष्टोत्तरशत नामावली सम्पूर्णम ॥

॥ बृहस्पति (गुरु) ग्रह मंत्र, जप, कवच, स्तोत्र ॥

अनुक्रमाणिका

1. गुरु देव मन्त्र 02
2. बृहस्पति प्रार्थना, व्रत, स्नान, दान 03
3. बृहस्पति वैदिक मन्त्र न्यासादि प्रयोगः 04
4. बृहस्पति कवचम् (ब्रह्मयामलोक्तम्) 05
5. बृहस्पति कवचम् (मन्त्र महार्णवे) 06
6. बृहस्पति स्तोत्रम् 07
7. गुरु स्तोत्रम् 08
8. बृहस्पति अष्टोत्तरशत नामावली 09
9.

गुरु यन्त्रम्

दिग्वाण सूर्या शिवनन्दसप्ता
षड्विश्वनागाक्रमतोऽकंकोष्ठे ।
विलिख्य धार्यं गुरु यन्त्र मीरितं
रुजाविनाशाय वदन्ति तद् बुधाः ॥

१०	५	१२
११	९	७
६	१३	८

॥ बृहस्पति देव ग्रह ॥

गुरु सिन्धु देश में उत्पत्ति । अंगिरस गोत्र । जाति ब्राह्मण । पीता अंगिरस । पुत्र कच । पीत वर्ण । उत्तर दिशा ।

- **शुभाशुभत्व** — **शुभ ग्रह**
- **भोग काल** — **365 दिन (एक वर्ष)**
- **बीज मंत्र** — **ॐ बृं बृहस्पतये नमः ।** नवाक्षर मन्त्र - मन्त्र महौदधौ ।
  - **ॐ ब्रृं बृहस्पतये नमः ।** अष्टाक्षर मन्त्र - रत्नमंजूषायाम्
  - **ॐ ह्रीं क्लीं हूँ बृहस्पतये नमः ।**
  - **ॐ गुरवे नमः ।**
- **तांत्रिक मंत्र** — **ॐ ग्राँ ग्रीं ग्रौं स: गुरवे नमः ।** दशाक्षर मन्त्र
  - **ॐ जां जीं जूं सं बृहस्पतये स्वाहा ।** द्वादशाक्षर मन्त्र
  - **त्रिपुरातिलके** — **ॐ ह्रीं श्रीं ख्रीं ऐं ग्लौं ग्रहाधिपतये बृहस्पतये ब्रींठः ऐंठः श्रींठः स्वाहा ॥**
- **वैदिक मंत्र** — **ॐ बृहस्पते अति यदर्यो अर्हाद्युम द्विभाति क्रतुमज्जनेषु ।**
  यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥
- **पुराणोक्त मंत्र** — **ॐ देवानां च ऋषीणां च गुरुं काचन सन्निभम ।**
  बुध्दि भूतं त्रिलोकेशं तं नमामि बृहस्पितम ॥
- अधिदेवता-**ब्रह्माणम्** — ॐ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे । राजन्यः शूरऽइषव्योऽतिव्याधी
  महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू
  रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः
  पर्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥
- प्रत्यधिदेवता- **इन्द्रम्** — **ॐ इन्द्र आसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।**
  देवसेना नामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥
- **जप संख्या** — **19,000 कलयुगे चतुर्थगुणो अर्थात 76,000**
  + दशांश हवन 7,600
  + दशांश तर्पण 760
  + दशांश मार्जन 76 = 84,436
- **जप समय** — **प्रातः काल (सूर्योदय के समय)**
- **हवनवस्तु** — **पीपल**
- **रत्न** — **पुखराज - 6.5 रत्ती, गुरुवार, उत्तर दिशा, दोपहर वेला, तर्जनी**

- **बृहस्पति प्रार्थना** **पीताम्बरः पीतवपुः किरीटी, चतुर्भुजो देवगुरुः प्रशान्तः ।**
  दधाति दण्डञ्च कमण्डलुञ्च, तथाक्षसूत्रं वरदोऽस्तु मह्यम् ॥
  - जो पीला वस्त्र धारण करने वाले, पीत विग्रह वाले, मुकुट धारण करने वाले, चार भुजा वाले, अत्यन्त शान्त स्वभाव वाले हैं तथा जो दण्ड, कमण्डलु एवं अक्षमाला धारण करते हैं. वे देव गुरु बृहस्पति मेरे लिये वर प्रदान करने वाले हों ।

- **बृहस्पति का व्रत** ३ वर्ष, १वर्ष अथवा १६ बृहस्पति वारों तक करना चाहिये । पीले रंग के वस्त्र धारण कर '**ॐ ग्रां ग्रीं ग्रौं सः गुरवे नमः**' इस मन्त्र की १६, ५ या ३ माला जपे । भोजन में चने के बेसन, घी और चीनी से बनी मिठाई लड्डू ही खाये । यह व्रत विद्यार्थियों के लिये बुद्धि और विद्याप्रद है । इस व्रत से धन की स्थिरता और यशकी वृद्धि होती है । अविवाहितों को यह व्रत विवाह में सहायक होता है ।

- **अनिष्टे गुरौ शान्ति स्नानम्**
  - **सिद्धार्थयष्टीमधुनीरमालती, प्रसूनयूथीप्रसवैः सपल्लवैः ।**
    रिष्टं यदीज्याद्विषमस्थितादितं, शिवाय यैस्तेष्वरुहं निमजनम् ॥
  - बृहस्पति की अनिष्ट-शान्ति के लिये पीली सरसों, जेटीमधु, सुगन्धबाला, मालतीपुष्प, जूही के फूल और पत्ते से स्नान करना चाहिये ।

- **गुरु दान** **अश्वः सुवर्ण मधुपीतवस्त्रं, सपीतधान्यं लवणं सपुष्पम् ।**
  सशर्करं तद्रजनी प्रयुक्तं, दुष्टाय शान्त्यै गुरवे प्रणीतम् ॥
  - **शर्करा च रजनी तुरंगमः पीतधान्यमपि पीताम्बरम् ।**
    पुष्पराज लवणे च कांचनं प्रीतये सुरगुरोः पर्दीयताम् ॥
  - गुरु ग्रह की शान्ति के लिये अश्व, स्वर्ण, मधु (शहद), पीला वस्त्र, पीला धान्य जैसे- धान, चने की दाल इत्यादि, नमक, पुष्प (पीला), शर्करा तथा हल्दी [पुस्तक, पुखराज रत्न, भूमि एवं छत्र]-का दान करना चाहिये । कांस्य

॥ बृहस्पति वैदिक मन्त्र न्यासादि प्रयोग: ॥

- **वैदिक मंत्र** — **ॐ बृहस्पते अति यदर्यो अर्हाद्युम द्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥**

- **विनियोग** — ॐ बृहस्पते इति मन्त्रस्य गृत्समद ऋषि:। त्रिष्टप् छन्दः। बुस्पतिर्देवता। बृहस्पति प्रीत्यर्थे जपे विनियोग: ॥

- **ऋष्यादि न्यास** — ॐ गृत्समद ऋषये नमः शिरसि। ॐ त्रिष्टुप् छन्दसे नमः मुखे। ॐ बृहस्पति देवतायै नमः हृदये। विनियोगाय नमः सर्वाङ्गे।

- **करन्यास** — ॐ बृहस्पतेऽअति यदर्य्यो इत्यंगुष्ठाभ्यां नमः। ॐ अर्हाद्युमदिति तर्जनीभ्यां नमः। ॐ विभाति क्रतुमदिति मध्यमाभ्यां: नमः। ॐ जनेषु अनामिकाभ्यां नमः। ॐ यद्दीदयच्छ नमः। वसऽऋतप्प्रजाततदस्मासु कनिष्ठिकाभ्यां नमः। ॐ द्रविणंधेहि चित्रमिति करतलकर पृष्ठाभ्यां नमः।

- **हृदयादिन्यास** — ॐ बहस्पतेऽअतियदर्य्यो हृदयाय नमः। ॐ अर्हाद्युमदिति शिरसे स्वाहा। ॐ विभाति क्रतुमदिति शिखायै वषट्। ॐ जनेष कवचाय हूं। ॐ यद्दीदयच्छवस ऽऋतप्प्रजा ततदस्मासु नेत्रत्रयाय वौषट्। ॐ द्रविणंधेहिचित्रमित्यस्त्राय फट्।

- **मंत्रन्यास** — ॐ बृहस्पते इति शिरसि। ॐ अतियदर्यो ललाटे। ॐ अर्हाद्युमन्मुखे। ॐ विभाति क्रतुमज्जनेषु नाभौ। ॐ यद्दीदयत्कट्याम। ॐ शवसऽऋतप्रजा ऊर्वो:। ॐ ततदस्मासुद्रविणं जानुनोः। ॐ धेहि चित्रं पावयो।

॥ बृहस्पति कवचम् (ब्रह्मयामलोक्तम्) ॥

- **विनियोग** अस्य श्री बृहस्पति कवच महामन्त्रस्य । ईश्वर ऋषि: । अनुष्टुप छन्द: । बृहस्पति देवता । गं बीजं । श्रीं शक्ति: । क्लीं कीलकम् । बृहस्पति प्रीत्यर्थे पाठे विनियोग: ।
- **ऋष्यादिन्यास** शिरसि ईश्वर ऋषये नमः । मुखे अनुष्टप छन्दसे नमः । हृदि श्री बृहस्पति देवतायै नमः । गुह्ये गं बीजाय नमः । पादयोः श्रीं शक्त्ये नमः । नाभौ क्लीं कीलकाय नमः । सर्वांगे बृहस्पति पीड़ा शमनार्थे पाठे विनियोगाय नमः ।
- करन्यास गाँ अंगुष्ठाभ्यां नमः । गीं तर्जनीभ्यां नमः । गूँ मध्यमाभ्यां नमः । गैं अनामिकाभ्यां नमः । गौं कनिष्ठिकाभ्यां नमः । गः करतल करपृष्ठाभ्यां नमः ।
- अगन्यास गाँ हृदयाय नमः । गीं शिरसे स्वाहा । गूँ शिखायै वषट् । गैं कवचाय हुं । गौं नेत्रत्रयाय वौषट् । गः अस्त्राय फट् ।

- **अभीष्ट फलदं देवं सर्वज्ञं सु रपूजितम् ।**
  अक्षमालाधरं शान्तं प्रणमामि बृहस्पतिम् ॥ ॥ १ ॥
- **बृहस्पति: शिर: पातु ललाटं पातु में गुरु: ।**
  कर्णौ सुरुगुरु: पातु नेत्रे मेंऽभीष्टदायक: ॥ ॥ २ ॥
- **जिह्वां पातु सुराचायो नासां में वेदपारग: ।**
  मुखं मे पातु सर्वज्ञो कण्ठं मे देवता शुभप्रद: ॥ ॥ ३ ॥
- **भुजौ आङ्गिरस: पातु करौ पातु शुभप्रद: ।**
  स्तनौ मे पातु वागीश: कुक्षिं मे शुभलक्षण: ॥ ॥ ४ ॥
- **नाभिं देवगुरु: पातु मध्यं पातु सुखप्रद: ।**
  कटिं पातु जगदवन्द्य: ऊरू मे पातु वाक्पति: ॥ ॥ ५ ॥
- **जानु जङ्गे सुराचायो पादौ विश्वात्मकस्तथा ।**
  अन्यानि यानि चाङ्गानि रक्षेन् मे सर्वतो गुरु: ॥ ॥ ६ ॥
- **इत्येतत् कवचं दिव्यं त्रिसन्ध्यं य: पठेन्नर: ।**
  सर्वान् कामानवाप्नोति सर्वत्र विजयी भवेत् ॥ ॥ ७ ॥

॥ इति श्री ब्रह्मयामलोक्तम् बृहस्पति कवचम् सम्पूर्णम् ॥

॥ बृहस्पति कवचम् (मन्त्र महार्णवे) ॥

- पीताम्बर: पीतवपु: किरीटी,
  चतुर्भुजो देवगुरु: प्रशान्त: ।
  दधाति दण्डं च कमण्डलुं च,
  तथाक्षसूत्रं वरदोऽस्तु मह्यम् ॥ ॥ १ ॥

- नम: सुरेन्द्रवन्द्याय देवाचार्याय ते नम: ।
  नमस्त्वनन्तसामर्थ्यं देवासिद्धान्तपारग: ॥ ॥ २ ॥

- सदानन्द नमस्तेऽस्तु नम: पीडाहराय च ।
  नमो वाचस्पते तुभ्यं नमस्ते पीतवाससे ॥ ॥ ३ ॥

- नमोऽद्वितीयरूपाय लम्बकूर्चाय ते नम: ।
  नम: प्रहृष्टनेत्राय विप्राणां पतये नम: ॥ ॥ ४ ॥

- नमो भार्गवशिष्याय विपन्नहितकारक: ।
  नमस्ते सुरसैन्याय विपन्नत्राणहेतवे ॥ ॥ ५ ॥

- विषमस्थस्तथा नृणां सर्वकष्टप्रणाशनम् ।
  प्रत्यहं तु पठेद्यो वै तस्य कामफलप्रदम् ॥ ॥ ६ ॥

॥ इति मन्त्र-महार्णवे बृहस्पति स्तोत्रम् सम्पूर्णम् ॥

॥ बृहस्पति स्तोत्रम् ॥

- **विनियोग** अस्य श्री बृहस्पति स्तोत्रस्य । गृत्समद ऋषि: । अनुष्टुप् छन्द: । बृहस्पति देवता । बृहस्पति प्रीत्यर्थं जपे विनियोग: ।
- **ऋष्यादि न्यास** शिरसि गृत्समद ऋषये नम: । मुखे अनुष्टुप् छन्द: । श्री बृहस्पति देवता । श्री बृहस्पति प्रीत्यर्थे पाठे विनियोग: ।

- **गुरुर्बृहस्पतिर्जीव: सुराचार्यो विदां वर: ।**
  वागीशो धिषणो दीर्घश्मश्रु: पीताम्बरो युवा ॥ ॥ १ ॥
- **सुधादृष्टिर्ग्रहाधीशो ग्रहपीडा-पहारक: ।**
  दयाकर: सौम्यमूर्ति: सुरार्च्य: कुड्कुमद्युति: ॥ ॥ २ ॥
- **लोकपूज्यो लोकगुरु: र्नीतिज्ञो नीतिकारक: ।**
  तारापतिश्चाङ्गिरसो वेदवेद्य: पितामह: ॥ ॥ ३ ॥
- **भक्त्या बृहस्पतिं स्मृत्वा नामान्येतानि य: पठेत् ।**
  अरोगी बलवान् श्रीमान् पुत्रवान् स भवेन्नर: ॥ ॥ ४ ॥
- **जीवेत् वर्षशतं मर्त्यो पापं नश्यति नश्यति ।**
  य: पूजयेद् गुरुदिने पीतगन्धाक्षताम्बरै: ॥ ॥ ५ ॥
- **पुष्पदीपो पहारैश्च पूजयित्वा बृहस्पतिम् ।**
  ब्रह्मणान् भोजयित्वा च पीडाशान्तिर्भवेत् गुरो: ॥ ॥ ६ ॥

॥ इति श्री स्कन्द-पुराणे बृहस्पति स्तोत्रम् सम्पूर्णम् ॥

॥ गुरु स्तोत्रम् ॥

- बृहस्पतिः सुराचार्यो दयावान् शुभलक्षणः ।
  लोकत्रयगुरुः श्रीमान्सर्वज्ञः सर्वकोविदः ॥ ॥ १ ॥

- सर्वेशः सर्वदाऽभीष्टः सर्वजित्सर्वपूजितः ।
  अक्रोधनो मुनिश्रेष्ठो नीतिकर्ता गुरुः पिता ॥ ॥ २ ॥

- विश्वात्मा विश्वकर्ता च विश्वयोनिरयोनिजः ।
  भूर्भुवःसुवरों चैव भर्ता चैव महाबलः ॥ ॥ ३ ॥

- पञ्चविंशतिनामानि पुण्यानि नियतात्मना ।
  वसता नन्दभवने विष्णुना कीर्तितानि वै ॥ ॥ ४ ॥

- यः पठेत् प्रातरुत्थाय प्रयतः सुसमाहितः ।
  विपरीतोऽपि भगवान्प्रीतो भवति वै गुरुः ॥ ॥ ५ ॥

- यश्छृणोति गुरुस्तोत्रं चिरं जीवेन्न संशयः ।
  बृहस्पतिकृता पीडा न कदाचिद्भविष्यति ॥ ॥ ६ ॥

॥ इति श्री गुरु स्तोत्रम् सम्पूर्णम् ॥

॥ श्री गुरु अष्टोत्तरशत नामावली ॥

1. ॐ गुरवे नमः।
2. ॐ गुणाकराय नमः।
3. ॐ गोप्त्रे नमः।
4. ॐ गोचराय नमः।
5. ॐ गोपतिप्रियाय नमः।
6. ॐ गुणिने नमः।
7. ॐ गुणवतां श्रेष्ठाय नमः।
8. ॐ गुरूणां गुरवे नमः।
9. ॐ अव्ययाय नमः।
10. ॐ जेत्रे नमः।
11. ॐ जयन्ताय नमः।
12. ॐ जयदाय नमः।
13. ॐ जीवाय नमः।
14. ॐ अनन्ताय नमः।
15. ॐ जयावहाय नमः।
16. ॐ आङ्गिरसाय नमः।
17. ॐ अध्वरासक्ताय नमः।
18. ॐ विविक्ताय नमः।
19. ॐ अध्वरकृत्पराय नमः।
20. ॐ वाचस्पतये नमः।
21. ॐ वशिने नमः।
22. ॐ वश्याय नमः।
23. ॐ वरिष्ठाय नमः।
24. ॐ वाग्विचक्षणाय नमः।
25. ॐ चित्तशुद्धिकराय नमः।
26. ॐ श्रीमते नमः।
27. ॐ चैत्राय नमः।
28. ॐ चित्रशिखण्डिजाय नमः।
29. ॐ बृहद्रथाय नमः।
30. ॐ बृहद्भानवे नमः।
31. ॐ बृहस्पतये नमः।
32. ॐ अभीष्टदाय नमः।
33. ॐ सुराचार्याय नमः।
34. ॐ सुराराध्याय नमः।
35. ॐ सुरकार्यकृतोद्यमाय नमः।
36. ॐ गीर्वाणपोषकाय नमः।
37. ॐ धन्याय नमः।
38. ॐ गीष्पतये नमः।
39. ॐ गिरीशाय नमः।
40. ॐ अनघाय नमः।
41. ॐ धीवराय नमः।
42. ॐ धिषणाय नमः।
43. ॐ दिव्यभूषणाय नमः।
44. ॐ देवपूजिताय नमः।
45. ॐ धनुर्धराय नमः।
46. ॐ दैत्यहन्त्रे नमः।
47. ॐ दयासाराय नमः।
48. ॐ दयाकराय नमः।
49. ॐ दारिद्र्यनाशनाय नमः।
50. ॐ धन्याय नमः।
51. ॐ दक्षिणायनसम्भवाय नमः।
52. ॐ धनुर्मीनाधिपाय नमः।
53. ॐ देवाय नमः।
54. ॐ धनुर्बाणधराय नमः।
55. ॐ हरये नमः।
56. ॐ अङ्गिरोवर्षसञ्जताय नमः।
57. ॐ अङ्गिरःकुलसम्भवाय नमः।
58. ॐ सिन्धुदेशाधिपाय नमः।
59. ॐ धीमते नमः।
60. ॐ स्वर्णकायाय नमः।
61. ॐ चतुर्भुजाय नमः।
62. ॐ हेमाङ्गदाय नमः।
63. ॐ हेमवपुषे नमः।
64. ॐ हेमभूषणभूषिताय नमः।
65. ॐ पुष्यनाथाय नमः।
66. ॐ पुष्य रागमणि मण्डल मण्डिताय नमः।
67. ॐ काशपुष्पसमानाभाय नमः।
68. ॐ इन्द्राद्यमरसङ्घपाय नमः।
69. ॐ असमानबलाय नमः।
70. ॐ सत्त्वगुणसम्पद्विभावसवे नमः।
71. ॐ भूसुराभीष्टदाय नमः।
72. ॐ भूरियशसे नमः।
73. ॐ पुण्यविवर्धनाय नमः।
74. ॐ धर्मरूपाय नमः।
75. ॐ धनाध्यक्षाय नमः।
76. ॐ धनदाय नमः।
77. ॐ धर्मपालनाय नमः।
78. ॐ सर्ववेदार्थतत्त्वज्ञाय नमः।
79. ॐ सर्वापद्विनिवारकाय नमः।
80. ॐ सर्वपापप्रशमनाय नमः।
81. ॐ स्वमतानुगतामराय नमः।
82. ॐ ऋग्वेदपारगाय नमः।
83. ॐ ऋक्षराशिमार्गप्रचारवते नमः।
84. ॐ सदानन्दाय नमः।
85. ॐ सत्यसन्धाय नमः।
86. ॐ सत्यसङ्कल्पमानसाय नमः।
87. ॐ सर्वागमज्ञाय नमः।
88. ॐ सर्वज्ञाय नमः।
89. ॐ सर्ववेदान्तविदे नमः।
90. ॐ ब्रह्मपुत्राय नमः।
91. ॐ ब्राह्मणेशाय नमः।
92. ॐ ब्रह्मविद्याविशारदाय नमः।
93. ॐ समानाधिकनिर्मुक्ताय नमः।
94. ॐ सर्वलोकवशंवदाय नमः।
95. ॐ ससुरासुरगन्धर्ववन्दिताय नमः।
96. ॐ सत्यभाषणाय नमः।
97. ॐ बृहस्पतये नमः।
98. ॐ सुराचार्याय नमः।
99. ॐ दयावते नमः।
100. ॐ शुभलक्षणाय नमः।
101. ॐ लोकत्रयगुरवे नमः।
102. ॐ श्रीमते नमः।
103. ॐ सर्वगाय नमः।
104. ॐ सर्वतो विभवे नमः।
105. ॐ सर्वेशाय नमः।
106. ॐ सर्वदातुष्टाय नमः।
107. ॐ सर्वदाय नमः।
108. ॐ सर्वपूजिताय नमः।

॥ इति श्री गुरु अष्टोत्तरशत नामावली सम्पूर्णम ॥

॥ शुक्र ग्रह मंत्र, जप, कवच, स्तोत्र ॥

अनुक्रमाणिका

1. शुक्र देव मन्त्र 02
2. शुक्र प्रार्थना, व्रत, स्नान, दान 03
3. शुक्र वैदिक मन्त्र न्यासादि प्रयोग 04
4. शुक्र कवचम् 05
5. शुक्र स्तोत्रम् - १ 06
6. शुक्र स्तोत्रम् - २ 07
7. शुक्र स्तोत्रम् - ३ 08
8. शुक्र अष्टोत्तरशत नामावली 09
9.

शुक्र यन्त्रम्

रुद्रांग विश्वा रविदिग्गजाख्या
नगामनुश्चांकक्रमाद्विलेख्याः ।
भृगोः कृतारिष्ट विनाशनाय
धार्यं हि यन्त्रं मुनिना प्रकीर्तितम् ॥

११	६	१३
१२	१०	८
७	१४	९

॥ शुक्र देव ग्रह ॥

शुक्र भोजकर्कट देश में उत्पत्ति। भार्गव गोत्र। जाति ब्राह्मण। दैत्य गुरु। संजीवनी विद्या ज्ञाता। इन्हीं के वंश में जामदग्नेय पुत्र परशुराम का अवतार हुआ था।

- **शुभाशुभत्व** — **शुभ ग्रह**
- **भोग काल** — **30 दिन (एक मास)**
- **बीज मंत्र** — **ॐ शुं शुक्राय नमः।** सप्ताक्षरी मन्त्र
  - **ॐ शुं शुक्राय नमः स्वाहा।** नवाक्षरी मन्त्र
  - **ॐ ह्रीं श्रीं शुक्राय नमः।**
  - **ॐ शुक्राय नमः।**
- **तांत्रिक मंत्र** — **ॐ द्राँ द्रीं द्रौं सः शुक्राय नमः।**
  - **ॐ ऐं जं गे ग्रहेश्वराय शुक्राय नमः।** आगमशिरोमणौ
- **वैदिक मंत्र** — **ॐ अन्नात्परिस्त्रुतो रसं ब्रम्हणा व्यपिवत्क्षत्रं पयः सोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियँ विपानऽ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु॥**
- **पुराणोक्त मंत्र** — **ॐ हिमकुन्द मृणालाभं दैत्यानां परमं गुरुम। सर्वशास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहम॥**
- अधिदेवता- इन्द्रम् — **ॐ सयोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्राहा शूर विद्वान्। जहिशत्रूं रप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः॥**
- प्रत्यधिदेवता-इन्द्राणीम् — **ॐ अदित्यै रास्नासीन्द्राण्याऽ उष्णीषः। पूषासि धर्माय दीष्वः॥**
- **जप संख्या** — **16,000 कलयुगे चतुर्थगुणो अर्थात 64,000**
  - **+ दशांश हवन 6,400**
  - **+ दशांश तर्पण 640**
  - **+ दशांश मार्जन 64 = 71,104**
- **जप समय** — **ब्रह्मवेला (सुर्योदय)**
- **हवनवस्तु** — **गूलर**
- **रत्न** — **हीरा - 1 रत्ती, शुक्रवार, पूर्व दिशा, प्रातःकाल, तर्जनी**

- **शुक्र प्रार्थना**

  श्वेताम्बरः श्वेतवपुः किरीटी, चतुर्भुजो दैत्यगुरुः प्रशान्तः।
  तथाक्षसूत्रञ्च कमण्डलुञ्च, दण्डञ्च विभ्रद्वरदोऽस्तु मह्यम्॥

  - जो श्वेत वस्त्र धारण करने वाले, श्वेत विग्रह वाले, मुकुट धारण करने वाले, चार भुजा वाले, शान्त स्वरूप, अक्षसूत्र, कमण्डलु तथा जयमुद्रा धारण करनेवाले हैं, वे दैत्यगुरु शुक्राचार्य मेरे लिये वरदायी हों।

- **शुक्र का व्रत**

  ३१ या २१ शुक्रवारों तक करना चाहिये। श्वेत वस्त्र धारण करके **'ॐ द्रां द्रीं द्रौं सः। शुक्राय नमः '** इस मन्त्र का २१, ११ या ५ माला जप करे। भोजन में चावल, चीनी, दूध, दही और घी से बने पदार्थ भोजन करे। इस व्रत के करने से सुख-सौभाग्य और ऐश्वर्य की वृद्धि होती है।

- **अनिष्टे शुक्रे शान्ति स्नानम्**

  - **नाशष्बरैलाफलमूलकुंकुमैः, सपुण्डरीकैः शिलया समन्वितैः।**
    कवीरितानिष्ट विधात हेतवे, स्नायादनब्जैरिति कश्चिदाह वा॥
  - शुक्र की अनिष्ट-शान्ति के लिये श्वेत कमल, मनः शिल, सुगन्धबाला, इलायची, पोहकरमूल और केशर से स्नान करना चाहिये।

- **शुक्र दान**

  चित्रवस्त्रमपि दानवार्चिते, दुष्टगे मुनिवरैः प्रणोदितम्।
  तण्डुलं घृतसुवर्णरूप्यकं, वज्रकं परिमलो धवला गौः॥

  - **चित्राम्बरं शुभ्रतुरंगमश्च धेनुश्च वज्रं रजतं सुवर्णम्।**
    सुतंडुलानुत्तमगंधयुक्तान् वदंति दानं भृगुनन्दनाय॥
  - चित्रित सुन्दर वस्त्र, चावल, घी, स्वर्ण, धन, हीरा, सुगन्धित दिव्य पदार्थ तथा श्रृंगार-सामग्री एवं सवत्सा श्वेत गौ [स्फटिक, कपूर, शर्करा, मिश्री एवं दही इत्यादि]-का दान करना चाहिये। चाँदी, नमक, सफेद पुष्प,
  - शुक्र ग्रह का दोष निवारण करने हेतु श्वेत अश्व एवं श्वेत वस्त्र का दान करना चाहिये।

॥ शुक्र वैदिक मंत्र न्यासादि प्रयोगः ॥

- **वैदिक मंत्र** — **ॐ अन्नात्परिस्त्रुतो रसं ब्रम्हणा व्यपिवत्क्षत्रं पयः सोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियँ विपानऽ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु॥**

- **विनियोग** — ॐ अन्नात्परिस्त्रुत इति मन्त्रस्य पराशर ऋषिः। शक्वरी छन्दः। शुक्रो देवता। रसं ब्रह्मणा इति बीजम्। शुक्र प्रीत्यर्थे जपे विनियोगः:।

- **ऋष्यादि न्यास** — ॐ पराशर ऋषये नमः शिरसि। ॐ शक्वरी छन्दसे नमः मुखे। ॐ शुक्र देवतायै नमः हृदये। ॐ रसं ब्रह्मणा इति बीजाय नमः गुह्ये। विनियोगाय नमः सर्वाङ्गे॥

- **करन्यासः-** — ॐ अन्नात्परिस्त्रुत इत्यङ्गुष्ठाभ्यां नमः। ॐ रसं ब्रह्मण व्यपिबत् इति तर्जनीभ्यां नमः। ॐ क्षत्रंपय इति मध्यमाभ्यां नमः। ॐ सोमं प्रजापतिरित्यनामिकाभ्यां नमः। ॐ ऋतेनसत्यमिंद्रियंव्विपानठ. शुक्रमंधसः कनिष्ठिकाभ्यां नमः। ॐ इंद्रस्येंद्रियमिदंपयोमृतंमधु इति करतलकर पृष्ठाभ्यां नमः॥

- **हृदयादि न्यास** — ॐ अन्नात्परिस्त्रुतो हृदयाय नमः। ॐ रसं ब्रह्मणा व्यपिबत् शिरसे स्वाहा। ॐ क्षत्रंपयः शिखायै वषट्। ॐ सोमं प्रजापतिरिति कवचाय हुं। ॐ ऋतेनसत्यमिंद्रियंव्विपानठ. शुक्रमंधसो नेत्रत्रयाय वौषट्। ॐ इन्द्रस्येंद्रियमिदंपयोमृतम्मधु इत्यस्त्राय फट॥

- **मन्त्रन्यास** — ॐ अन्नात्परिस्त्रुत इति शिरसि। ॐ रसं ब्रह्मणा ललाटे। ॐ व्यपिबत्क्षत्रं मुखे। ॐ पयः सोमं हृदये। ॐ प्रजापतिर्नाभौ। ॐ ऋतेनसत्यं कट्याम्। ॐ इंद्रियंविपानम् गुदे। ॐ शुक्रं वृषणयोः। ॐ अन्धस ऊर्वोः। ॐ इन्द्रस्येंद्रियमिदम्पयो जानुनोः। ॐ अमृतं पादयोः। ॐ मधु सर्वशरीरे च।

॥ शुक्र कवचम् ॥

- **विनियोग** अस्य श्री शुक्र कवच स्तोत्र मन्त्रस्य । भारद्वाज ऋषि: । अनुष्टुप छन्द: । शुक्रो देवता । शुक्रप्रीत्यर्थे पाठे विनियोगः ।

- **ऋष्यादिन्यास:** शिरसि भारद्वाज ऋषये नम: । मुखे अनुष्टुप छन्दसे नम: । हृदि श्री शुक्र देवतायै नमः । सर्वांग श्री शुक्र प्रीत्यर्थे पाठे विनियोगः ।

- **मृणालकुन्देन्दुपयोजसुप्रभं पीताम्बरं प्रभृतमक्षमालिनम् ।**
  समस्तशास्त्रार्थनिधिं महांतं ध्यायेत्कविं वान्छितमर्थसिद्धये ॥ ॥ १ ॥

- **ॐ शिरो मे भार्गव: पातु भालं पातु ग्रहाधिप: ।**
  नेत्रे दैत्यबृहस्पति: पातु श्रोतो मे चन्दनद्युति: ॥ ॥ २ ॥

- **पातु मे नासिकां काव्यो वदनं दैत्यवन्दित: ।**
  वचनं चोशना: पातु कण्ठं श्रीकण्ठभक्तिमान् ॥ ॥ ३ ॥

- **भुजौ तेजोनिधि: पातु कुक्षिं पातु मनोव्रज: ।**
  नाभिं भृगुसुत: पातु मध्यं पातु महीप्रिय: ॥ ॥ ४ ॥

- **कटिं मे पातु विश्वात्मा उरू मे सुरपूजित: ।**
  जानु जाड्यहर: पातु जंघे ज्ञानवतां वर: ॥ ॥ ५ ॥

- **गुल्फो गुणनिधि: पातु पादौ वराम्बर: ।**
  सर्वाण्यंगानि मे पातु स्वर्णमालापरिष्कृत: ॥ ॥ ६ ॥

- **य इदं कवचं दिव्यं पठति श्रद्धयान्वित: ।**
  न तस्य जायते पीड़ा भार्गवस्य प्रसादत: ॥ ॥ ७ ॥

॥ इति श्रीब्रह्माण्डपुराणे श्री शुक्र कवच स्तोत्रम् सम्पूर्णम् ॥

॥ शुक्र स्तोत्रम् - १ ॥

- नमस्ते भार्गव श्रेष्ठ देव दानव पूजितः ।
  वृष्टिरोधप्रकर्त्रे च वृष्टिकर्त्रे नमो नमः ॥ ॥ १ ॥
- देवयानीपितस्तुभ्यं वेदवेदांगपारगः ।
  परेण तपसा शुद्धः शंकरो लोकशंकरः ॥ ॥ २ ॥
- प्राप्तो विद्यां जीवनाख्यां तस्मै शुक्रात्मने नमः ।
  नमस्तस्मै भगवते भृगुपुत्राय वेधसे ॥ ॥ ३ ॥
- तारामण्डलमध्यस्थ स्वभासा भासिताम्बरः ।
  यस्योदये जगत्सर्वं मंगलार्हं भवेदिह ॥ ॥ ४ ॥
- अस्तं याते ह्यरिष्टं स्यात्तस्मै मंगलरूपिणे ।
  त्रिपुरावासिनो दैत्यान् शिवबाणप्रपीडितान् ॥ ॥ ५ ॥
- विद्यया जीवयच्छुक्रो नमस्ते भृगुनन्दन ।
  ययातिगुरवे तुभ्यं नमस्ते कविनन्दन ॥ ॥ ६ ॥
- बलिराज्यप्रदो जीवस्तस्मै जीवात्मने नमः ।
  भार्गवाय नमस्तुभ्यं पूर्वं गीर्वाणवन्दितम् ॥ ॥ ७ ॥
- जीवपुत्राय यो विद्यां प्रादात्तस्मै नमोनमः ।
  नमः शुक्राय काव्याय भृगुपुत्राय धीमहि ॥ ॥ ८ ॥
- नमः कारणरूपाय नमस्ते कारणात्मने ।
  स्तवराजमिदं पुण्य़ं भार्गवस्य महात्मनः ॥ ॥ ९ ॥
- यः पठेच्छुणुयाद्वापि लभते वाँछितफलम् ।
  पुत्रकामो लभेत्पुत्रान् श्रीकामो लभते श्रियम् ॥ ॥१०॥
- राज्यकामो लभेद्राज्यं स्त्रीकामः स्त्रियमुत्तमाम् ।
  भृगुवारे प्रयत्नेन पठितव्यं सुसमाहितैः ॥ ॥११॥
- अन्यवारे तु होरायां पूजयेद्भृगुनन्दनम् ।
  रोगार्तो मुच्यते रोगात् भयार्तो मुच्यते भयात् ॥ ॥१२॥
- यद्यत्प्रार्थयते वस्तु तत्तत्प्राप्नोति सर्वदा ।
  प्रातः काले प्रकर्तव्या भृगुपूजा प्रयत्नतः ॥ ॥१३॥
- सर्वपापविनिर्मुक्तः प्राप्नुयाच्छिवसन्निधिः ॥ ॥१४॥

॥ इति श्री स्कन्दपुराणे शुक्र स्तोत्रम् सम्पूर्णम् ॥

॥ शुक्र स्तोत्रम् - २ ॥

- **विनियोग** अस्य श्री शुक्र स्तोत्र मन्त्रस्य । भारद्वाज ऋषि: । गायत्री छन्द: । शुक्रो देवता । श्री शुक्र पीडा परिहारार्थे पाठे विनियोगः ।

- **ऋष्यादिन्यास** शिरसि भारद्वाज ऋषये नम: । मुखे गायत्री छन्दसे नम: । हृदि शुक्र देवतायै नमः । सर्वांगे श्री शुक्र पीडा परिहारार्थे विनियोगाय नमः ।

- **शुक्रः काव्यः शुक्र रेताः शुक्लाम्बरधरः सुधीः।**
  हिमाभः कुन्दधवलः शुभ्रांशुः शुक्लभूषणः ॥ ॥ १ ॥

- **नीतिज्ञो नीतिकृन्नीतिमार्गगामी ग्रहाधिपः।**
  उशना वेदवेदांगपारगः कविरात्मवित् ॥ ॥ २ ॥

- **भार्गवः करुणासिन्धुः ज्ञानगम्यः सुतप्रदः।**
  शुक्रस्यैतानि नामानि शुक्रं स्मृत्वा तु यः पठेत् ॥ ॥ ३ ॥

- **आयुर्धनं सुखं पुत्रान् लक्ष्मीं वसतिमुत्तमाम् ।**
  विद्यां चैव स्वयं तस्मै शुक्रस्तुष्टो ददाति हि ॥ ॥ ४ ॥

॥ इति श्री स्कन्द पुराणे शुक्र स्तोत्रम् सम्पूर्णम् ॥

॥ शुक्र स्तोत्रम् - ३ ॥

- शृण्वन्तु मुनयः सर्वे शुक्रस्तोत्रमिदं शुभम् ।
  रहस्यं सर्वभूतानां शुक्रप्रीतिकरं शुभम् ॥ ॥ १ ॥

- येषां सङ्कीर्तनान्नित्यं सर्वान् कामानवाप्नुयात् ।
  तानि शुक्रस्य नामानि कथयामि शुभानि च ॥ ॥ २ ॥

- शुक्रः शुभग्रहः श्रीमान् वर्षकृद्वर्षविघ्नकृत् ।
  तेजोनिधिर्ज्ञानदाता योगी योगविदां वरः ॥ ॥ ३ ॥

- दैत्यसञ्जीवनो धीरो दैत्यनेतोशना कविः ।
  नीतिकर्ता ग्रहाधीशो विश्वात्मा लोकपूजितः ॥ ॥ ४ ॥

- शुक्लमाल्याम्बरधरः श्रीचन्दनसमप्रभः ।
  अक्षमालाधरः काव्यः तपोमूर्तिर्धनप्रदः ॥ ॥ ५ ॥

- चतुर्विंशतिनामानि अष्टोत्तरशतं यथा ।
  देवस्याग्रे विशेषेण पूजां कृत्वा विधानतः ॥ ॥ ६ ॥

- य इदं पठति स्तोत्रं भार्गवस्य महात्मनः ।
  विषमस्थोऽपि भगवान् तुष्टः स्यान्नात्र संशयः ॥ ॥ ७ ॥

- स्तोत्रं भृगोरिदमनन्तगुणप्रदं यो
  भक्त्या पठेच्च मनुजो नियतः शुचिः सन् ।
  प्राप्नोति नित्यमतुलां श्रियमीप्सितार्थान्
  राज्यं समस्तधनधान्ययुतां समृद्धिम् ॥ ॥ ८ ॥

॥ इति श्री शुक्र स्तोत्रम् सम्पूर्णम् ॥

॥ श्री शुक्र अष्टोत्तरशत नामावली ॥

1. ॐ शुक्राय नमः।
2. ॐ शुचये नमः।
3. ॐ शुभगुणाय नमः।
4. ॐ शुभदाय नमः।
5. ॐ शुभलक्षणाय नमः।
6. ॐ शोभनाक्षाय नमः।
7. ॐ शुभ्रवाहाय नमः।
8. ॐ शुद्धस्फटिकभास्वराय नमः।
9. ॐ दीनार्तिहरकाय नमः।
10. ॐ दैत्यगुरवे नमः।
11. ॐ देवाभिवन्दिताय नमः।
12. ॐ काव्यासक्ताय नमः।
13. ॐ कामपालाय नमः।
14. ॐ कवये नमः।
15. ॐ कल्याणदायकाय नमः।
16. ॐ भद्रमूर्तये नमः।
17. ॐ भद्रगुणाय नमः।
18. ॐ भार्गवाय नमः।
19. ॐ भक्तपालनाय नमः।
20. ॐ भोगदाय नमः।
21. ॐ भुवनाध्यक्षाय नमः।
22. ॐ भुक्तिमुक्तिफलप्रदाय नमः।
23. ॐ चारुशीलाय नमः।
24. ॐ चारुरूपाय नमः।
25. ॐ चारुचन्द्रनिभाननाय नमः।
26. ॐ निधये नमः।
27. ॐ निखिलशास्त्रज्ञाय नमः।
28. ॐ नीतिविद्याधुरन्धराय नमः।
29. ॐ सर्वलक्षणसम्पन्नाय नमः।
30. ॐ सर्वापद्गुणवर्जिताय नमः।
31. ॐ समानाधिकनिर्मुक्ताय नमः।
32. ॐ सकलागमपारगाय नमः।
33. ॐ भृगवे नमः।
34. ॐ भोगकराय नमः।
35. ॐ भूमिसुरपालनतत्पराय नमः।
36. ॐ मनस्विने नमः।
37. ॐ मानदाय नमः।
38. ॐ मान्याय नमः।
39. ॐ मायातीताय नमः।
40. ॐ महायशसे नमः।
41. ॐ बलिप्रसन्नाय नमः।
42. ॐ अभयदाय नमः।
43. ॐ बलिने नमः।
44. ॐ सत्यपराक्रमाय नमः।
45. ॐ भवपाशपरित्यागाय नमः।
46. ॐ बलिबन्धविमोचकाय नमः।
47. ॐ घनाशयाय नमः।
48. ॐ घनाध्यक्षाय नमः।
49. ॐ कम्बुग्रीवाय नमः।
50. ॐ कलाधराय नमः।
51. ॐ कारुण्यरससम्पूर्णाय नमः।
52. ॐ कल्याणगुणवर्धनाय नमः।
53. ॐ श्वेताम्बराय नमः।
54. ॐ श्वेतवपुषे नमः।
55. ॐ चतुर्भुजसमन्विताय नमः।
56. ॐ अक्षमालाधराय नमः।
57. ॐ अचिन्त्याय नमः।
58. ॐ अक्षीणगुणभासुराय नमः।
59. ॐ नक्षत्रगणसञ्चाराय नमः।
60. ॐ नयदाय नमः।
61. ॐ नीतिमार्गदाय नमः।
62. ॐ वर्षप्रदाय नमः।
63. ॐ हृषीकेशाय नमः।
64. ॐ क्लेशनाशकराय नमः।
65. ॐ कवये नमः।
66. ॐ चिन्तितार्थप्रदाय नमः।
67. ॐ शान्तमतये नमः।
68. ॐ चित्तसमाधिकृते नमः।
69. ॐ आधिव्याधिहराय नमः।
70. ॐ भूरिविक्रमाय नमः।
71. ॐ पुण्यदायकाय नमः।
72. ॐ पुराणपुरुषाय नमः।
73. ॐ पूज्याय नमः।
74. ॐ पुरुहूतादिसन्नुताय नमः।
75. ॐ अजेयाय नमः।
76. ॐ विजितारातये नमः।
77. ॐ विविधाभरणोज्ज्वलाय नमः।
78. ॐ कुन्दपुष्पप्रतीकाशाय नमः।
79. ॐ मन्दहासाय नमः।
80. ॐ महामतये नमः।
81. ॐ मुक्ताफलसमानाभाय नमः।
82. ॐ मुक्तिदाय नमः।
83. ॐ मुनिसन्नुताय नमः।
84. ॐ रत्नसिंहासनारूढाय नमः।
85. ॐ रथस्थाय नमः।
86. ॐ रजतप्रभाय नमः।
87. ॐ सूर्यप्राग्देशसञ्चाराय नमः।
88. ॐ सुरशत्रुसुहृदे नमः।
89. ॐ कवये नमः।
90. ॐ तुलावृषभराशीशाय नमः।
91. ॐ दुर्धराय नमः।
92. ॐ धर्मपालकाय नमः।
93. ॐ भाग्यदाय नमः।
94. ॐ भव्यचारित्राय नमः।
95. ॐ भवपाशविमोचकाय नमः।
96. ॐ गौडदेशेश्वराय नमः।
97. ॐ गोप्त्रे नमः।
98. ॐ गुणिने नमः।
99. ॐ गुणविभूषणाय नमः।
100. ॐ ज्येष्ठानक्षत्रसम्भूताय नमः।
101. ॐ ज्येष्ठाय नमः।
102. ॐ श्रेष्ठाय नमः।
103. ॐ शुचिस्मिताय नमः।
104. ॐ अपवर्गप्रदाय नमः।
105. ॐ अनन्ताय नमः।
106. ॐ सन्तानफलदायकाय नमः।
107. ॐ सर्वैश्वर्यप्रदाय नमः।
108. ॐ सर्वगीर्वाणगणसन्नुताय नमः।

॥ इति श्री शुक्र अष्टोत्तरशत नामावली सम्पूर्णम ॥

॥ शनि ग्रह मंत्र, जप, कवच, स्तोत्र ॥

अनुक्रमाणिका

1. शनि देव मन्त्र 02
2. शनि प्रार्थना, व्रत, स्नान, दान 03
3. शनि वैदिक मन्त्र न्यासादि प्रयोग 04
4. शनि वज्र पंजर कवचम् 05
5. शनि स्तोत्रम् 06
6. शनि स्तोत्रम् (दशरथ कृत) 07
7. शनि अष्टोत्तरशत नामावली 08
8. शनि चालीसा 09
9. शनि आरती 11

शनि यन्त्रम्

अर्काद्रिमन्वा स्मर रुद्र अंका
नागाख्यातिथ्यादश मंद यन्त्रम् ।
विलिख्य भूर्जोपरिधार्यमेत
च्छनेः कृतारिष्ट निवारणाय ॥

१२	७	१४
१३	११	९
८	१५	१०

॥ शनि ग्रह ॥

शनि सौराष्ट्र देश में उद्भव। कश्यप गोत्र। जाति असुर। माता छाया। कृष्ण वर्ण। पश्चिम दिशा।

- **शुभाशुभत्व** — **पाप ग्रह**
- **भोग काल** — **912.5 दिन (ढाई वर्ष)**
- **बीज मंत्र** — **ॐ शनैश्चराय नमः।** — अष्टाक्षर मन्त्र
  - **ॐ शं शनैश्चराय नमः।** — नवाक्षर मन्त्र
  - **ॐ ऐं ह्रीं श्रीं शनैश्चराय नमः।**
  - **ॐ शनये नमः।**
- **तांत्रिक मंत्र** — **ॐ प्राँ प्रीं प्रौं स: शनये नमः।** — दशाक्षर मन्त्र
  - **ॐ प्राँ प्रीं प्रौं स: शनैश्चराय नमः।** — द्वादशाक्षर मन्त्र
  - **ॐ ह्रीं श्रीं ग्रहचक्रवर्तिने शनैश्चराय क्लीं ऐंसः स्वाहा।** — आगमलहर्याम्
- **वैदिक मंत्र** — **ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शँयो रभिस्त्रवन्तु नः॥**
- **पुराणोक्त मंत्र** — **ॐ नीलांजन समाभासं रविपुत्रं यमाग्रजम।**
  छायामार्तण्ड संभूतं तं नमामि शनैश्चरम॥
- **अधिदेवता-यमम्** — **ॐ यमाय त्वांगिरस्वते पितृमते स्वाहा।**
  स्वाहा धर्माय स्वाहा धर्मः पित्रे॥
- **प्रत्यधिदेवता-प्रजापतिम्** — **ॐ प्रजापते न त्वदेता अन्यन्यो विश्वा रुपाणि परिता बभूव।**
  यत्कामास्ते जुहुमस्तन्नों अस्तु वयं ७ स्याम पतयो रयीणाम्॥
- **शनि ग्रायत्री** — **ॐ भूर्भुवः स्वः शन्नो देवीरभिष्टये विद्महे नीलांजनाय धीमहि तन्नो शनिः प्रचोदयात्**
- **जप संख्या** — **23,000 कलयुगे चतुर्थगुणो अर्थात 92,000**
  + दशांश हवन 9,200
  + दशांश तर्पण 920
  + दशांश मार्जन 92 = 1,02,212
- **जप समय** — **मध्याह्नकाल**
- **हवनवस्तु** — **शमी**
- **रत्न** — **नीलम - 5 से 7.5 रत्ती, शनिवार, पश्चिम दिशा, रात्री 10 बजे, मध्यमा**

- **शनि प्रार्थना**

नीलद्युतिः शूलधरः किरीटी, गृध्रस्थितस्त्राणकरो धनुष्मान् ।
चतुर्भुजः सूर्यसुतः प्रशान्तो, वरप्रदो मेऽस्तु स मन्दगामी ॥

- जो नीली आभा वाले, शूल धारण करने वाले, मुकुट धारण करने वाले, गृध्र पर विराजमान, रक्षा करने वाले, धनुष को धारण करने वाले, चार भुजा वाले, शान्त स्वभाव, एवं मन्द गतिवाले हैं, वे सूर्य पुत्र शनि मेरे लिये वर देनेवाले हों।

- **शनिश्चर का व्रत**

५१ या १९ शनिवारों तक करना चाहिये। काला वस्त्र धारण करके **'ॐ प्रां प्रीं प्रौं सः शनये नमः'** इस मन्त्र की १९, ११ या ५ माला जपे। जप करते समय एक पात्र में शुद्ध जल, काला तिल, दूध, चीनी और गंगाजल अपने पास रख ले। जप के बाद इसको पीपल वृक्ष की जड़ में पश्चिम मुख होकर चढ़ा दे। भोजन में उड़द (कलाई) के आटे से बनी चीजें पंजीरी, पकौड़ी, चीला और बड़ा इत्यादि खाये। कुछ तेल में बनी चीजें अवश्य खाये। फल में केला खाये। इस व्रत के करने से सब प्रकार की सांसारिक झंझटें दूर होती हैं। झगड़े में विजय प्राप्त होती है। लोहे, मशीनरी, कारखाने वालों के लिये यह व्रत व्यापार में उन्नति और लाभदायक होता है।

- **अनिष्टे शनौ शान्ति स्नानम्**

  - **बलाञ्जनश्यामतिलैः सलाजैः, सरोध्रजीमूतशतप्रसूनैः ।**
  - **यमानुजादाप्तमनिष्टमुग्रं, विलीयते मजनतोऽप्यशेषम् ॥**
  - शनिश्चर की अनिष्ट-शान्ति के लिये बरियारा के बीज (खरेटी), काला सुरमा, काले तिल, धान का लावा, लोध, मोथा और सौंफ से स्नान करना चाहिये।

- **शनि दान**

नीलकं महिषं वस्त्रं कृष्णं लौहं सदक्षिणम् ।
विश्वामित्रप्रियं दद्याच्छनिदुष्टप्रशान्तये ॥

  - **माषांश्च तैलं विमलेन्द्रनीलं तिलाः कुलित्था महिषी च लोहम् ।**
    कृष्णा च धेनुः प्रवदन्ति नूनं दुष्टाय दानं रविनंदनाय ॥
  - शनि दोष की शान्ति हेतु नीलम, भैंसा, काला वस्त्र, लोहा तथा जटा नारियल [उड़द, तिल, छाता, जूता एवं कम्बल] का दान दक्षिणा के साथ करना चाहिये। सुवर्ण, कृष्णपुष्प
  - जन्मपत्रिका में यदि शनि की स्थिति शुभफल दात्री न हो तो काले वर्ण की गाय एवं तैल का दान करना चाहिये।

॥ शनैश्चर वैदिक मन्त्र न्यासादि प्रयोग: ॥

- **वैदिक मंत्र**
  ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये।
  शँयो रभिस्त्रवन्तु नः ॥

- **विनियोग:-**
  ॐ शन्नोदेवीरिति मंत्रस्य दध्यङ्डाथर्वण ऋषिः। गायत्री छन्दः। शनिर्देवता।
  आपो बीजम्। वर्तमान इति शक्तिः। शनैश्चर प्रीत्यर्थे जपे विनियोगः॥

- **ऋष्यादि न्यास**
  ॐ दध्यङ्डाथर्वणऋषये नमः शिरसि। ॐ गायत्री छंदसे नमः मुखे।
  ॐ शनैश्चर देवतायै नमः हृदये। ॐ आपोबीजाय नमः गुह्ये।
  ॐ वर्त्तमानशक्तये नमः पादयोः। विनियोगाय नमः सर्वाङ्गे॥

- **करन्यास**
  ॐ शन्नोदेवीरित्यङ्गष्टाभ्यां नमः। ॐ अभिष्टये तर्जनीभ्यां नमः।
  ॐ आपोभवंतु मध्यमाभ्यां नमः। ॐ पतिय अनामिकाभ्यां नमः।
  ॐ शंय्योरिति कनिष्ठिकाभ्यां नमः। ॐ अभिस्त्रवंतुनः करतलकर पृष्ठाभ्यां नमः॥

- **हृदयादि न्यास:-**
  ॐ शन्नोदेवीरिति हृदयाय नमः। ॐ अभिष्टये शिरसे स्वाहा।
  ॐ आपो भवंतु शिखायै वषट्। ॐ पीतये कवचाय हुं।
  ॐ शंय्योरिति नेत्रत्रयाय वौषट्। ॐ अभिस्त्रवंतुनः अस्त्राय फट्॥

- **मंत्रन्यास:-**
  ॐ शन्न इति शिरसि। ॐ देवीरिति ललाटे। ॐ अभिष्टये मुखे।
  ॐ आपो हृदये। ॐ भवन्तु नाभौ। ॐ पीतये कट्याम्। ॐ शंय्योरूर्वोः।
  ॐ अभिस्त्रवन्तु जानुनोः। ॐ नः पादयोः॥

॥ शनि वज्र पंजर कवचम् ॥

- **विनियोग** अस्य श्री शनैश्चर कवच स्तोत्र मन्त्रस्य । कश्यप ऋषिः । अनुष्टुप् छन्द । शनैश्चरो देवता । श्री शक्तिः । शूं कीलकम् । शनैश्चर प्रीत्यर्थे पाठे विनियोगः ।

- **ध्यानम्** **नीलाम्बरो नीलवपुः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् ।**
चतुर्भुजः सूर्यसुतः प्रसन्नः सदा मम स्याद्वरदः प्रशान्तः ॥ १ ॥

- **ब्रह्मोवाच** **श्रृणुध्वमृषयः सर्वे शनिपीडाहरं महत् ।**
कवचं शनिराजस्य सौरेरिदमनुत्तमम् ॥ ॥ २ ॥

- **कवचं देवतावासं वज्रपंजरसंज्ञकम् ।**
शनैश्चरप्रीतिकरं सर्वसौभाग्यदायकम् ॥ ॥ ३ ॥
- **ॐ श्रीशनैश्चरः पातु भालं मे सूर्यनंदनः ।**
नेत्रे छायात्मजः पातु कर्णौ यमानुजः ॥ ॥ ४ ॥
- **नासां वैवस्वतः पातु मुखं मे भास्करः सदा ।**
स्निग्धकण्ठश्च मे कण्ठ भुजौ पातु महाभुजः ॥ ॥ ५ ॥
- **स्कन्धौ पातु शनिश्चैव करौ पातु शुभप्रदः ।**
वक्षः पातु यमभ्राता कुक्षिं पात्वसितस्थता ॥ ॥ ६ ॥
- **नाभिं गृहपतिः पातु मन्दः पातु कटिं तथा ।**
ऊरू ममाSन्तकः पातु यमो जानुयुगं तथा ॥ ॥ ७ ॥
- **पदौ मन्दगतिः पातु सर्वांग पातु पिप्पलः ।**
अंगोपांगानि सर्वाणि रक्षेन् मे सूर्यनन्दनः ॥ ॥ ८ ॥
- **इत्येतत् कवचं दिव्यं पठेत् सूर्यसुतस्य यः ।**
न तस्य जायते पीडा प्रीतो भवन्ति सूर्यजः ॥ ॥ ९ ॥
- **व्ययजन्मद्वितीयस्थो मृत्युस्थानगतोSपि वा ।**
कलत्रस्थो गतोवाSपि सुप्रीतस्तु सदा शनिः ॥ ॥१०॥
- **अष्टमस्थे सूर्यसुते व्यये जन्मद्वितीयगे ।**
कवचं पठते नित्यं न पीडा जायते क्वचित् ॥ ॥११॥
- **इत्येतत् कवचं दिव्यं सौर्येयन्निर्मितं पुरा ।**
जन्मलग्नस्थितान्दोषान् सर्वान्नाशयते प्रभुः ॥ ॥१२॥

॥ श्री ब्रह्माण्डपुराणे ब्रह्म-नारद संवादे शनैश्चर कवचम् सम्पूर्णम् ॥

॥ शनि स्तोत्रम् - १ ॥

- नम: कृष्णाय नीलाय शितिकण्ठ निभाय च ।
  नम: कालाग्निरूपाय कृतान्ताय च वै नम: ॥ ॥ १ ॥
- नमो निर्मांस देहाय दीर्घश्मश्रुजटाय च ।
  नमो विशालनेत्रय शुष्कोदर भयाकृते ॥ ॥ २ ॥
- नम: पुष्कलगात्रय स्थूलरोम्णेऽथ वै नम: ।
  नमो दीर्घायशुष्काय कालदष्ट्र नमोऽस्तुते ॥ ॥ ३ ॥
- नमस्ते कोटराक्षाय दुर्निरीक्ष्याय वै नम: ।
  नमो घोराय रौद्राय भीषणाय कपालिने ॥ ॥ ४ ॥
- नमस्ते सर्वभक्षाय वलीमुखायनमोऽस्तुते ।
  सूर्यपुत्र नमस्तेऽस्तु भास्करे भयदाय च ॥ ॥ ५ ॥
- अधोदृष्टे: नमस्तेऽस्तु संवर्तक नमोऽस्तुते ।
  नमो मन्दगते तुभ्यं निरिस्त्रणाय नमोऽस्तुते ॥ ॥ ६ ॥
- तपसा दग्धदेहाय नित्यं योगरताय च ।
  नमो नित्यं क्षुधार्ताय अतृप्ताय च वै नम: ॥ ॥ ७ ॥
- ज्ञानचक्षुर्नमस्तेऽस्तु कश्यपात्मज सूनवे ।
  तुष्टो ददासि वै राज्यं रुष्टो हरसि तत्क्षणात् ॥ ॥ ८ ॥
- देवासुरमनुष्याश्च सिद्धि विद्याधरोरगा: ।
  त्वया विलोकिता: सर्वे नाशंयान्ति समूलत: ॥ ॥ ९ ॥
- प्रसाद कुरु मे देव वाराहोऽहमुपागत ।
  एवं स्तुतस्तदा सौरिर्ग्रहराजो महाबल: ॥ ॥१०॥

॥ शनि स्तोत्रम् (दशरथ कृत) ॥

- **विनियोग** अस्य श्री शनैश्चर स्तोत्रं । दशरथः ऋषि । शनैश्चरो देवता । त्रिष्टुप् छंद । शनैश्चर प्रीत्यर्थे जपे विनियोगः ॥

- **दशरथ उवाच**
  - कोणोऽन्तको रौद्रयमोऽथ बभ्रुःकृष्णः शनि पिंगलमन्दसौरिः ।
    नित्यं स्मृतो यो हरते पीड़ां तस्मै नमः श्रीरविनन्दाय ॥ ॥ १ ॥
  - सुरासुराः किंपुरुषोरगेन्द्रा गन्धर्व-विद्याधरपन्नगाश्च ।
    पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्री रविनन्दनाय ॥ ॥ २ ॥
  - नराः नरेन्द्राः पशवो मृगेन्द्रा वन्याश्च ये कीटपतंगभृंगा।
    पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्री रविनन्दनाय ॥ ॥ ३ ॥
  - देशाश्च दुर्गाणि वनानि यत्र सेना निवेशः पुरपत्तनानि ।
    पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्री रविनन्दनाय ॥ ॥ ४ ॥
  - तिलैर्यवैर्माषगुडान्नदानै लोहेन नीलाम्बर-दानतो वा ।
    प्रीणाति मन्त्रैर्निजिवासरे च तस्मै नमः श्री रविनन्दनाय ॥ ॥ ५ ॥
  - प्रयाग कूले यमुनातटे च सरस्वती पुण्यजले गुहायाम् ।
    यो योगिनां ध्यानगतोऽपि सूक्ष्मस्तस्मै नमः श्री रविनन्दनाय ॥ ॥ ६ ॥
  - अन्यप्रदेशात्स्वःगृहं प्रविष्टस्तदीयवारे स नरः सुखी स्यात ।
    गहाद्गतो यो न पुनः प्रयाति तस्मै नमः श्री रविनन्दनाय ॥ ॥ ७ ॥
  - स्त्रष्टा स्वयं भूर्भुवनत्रयस्य त्रोता हरीशो हरते पिनाकीः ।
    एक स्त्रिधा ऋग्यजुःसाममूर्तिस्तस्मै नमः श्री रविनन्दनाय ॥ ॥ ८ ॥
  - शन्यष्टकं यः प्रयतः प्रयाते नित्यं सुपुत्रैः पशुबान्धवैश्च ।
    पठेतु सौख्यं भुवि भोगयुक्तः प्राप्नोति निर्वाण पदं तदन्ते ॥ ॥ ९ ॥
  - कोणस्थः पिंगलो बभ्रूः कृष्णो रौद्रान्तको यमः।
    सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः ॥ ॥१०॥
  - एतानि दश नामानि प्रतारुत्थाय यः पठेत् ।
    शनैश्चकृता पीड़ा न कदाचिद् भविष्यति ॥ ॥११॥

॥ इति श्री दशरथ कृत शनि स्तोत्रम् सम्पूर्णम् ॥

॥ श्री शनि अष्टोत्तरशत नामावली ॥

1. ॐ श्री शनैश्चराय नमः।
2. ॐ शान्ताय नमः।
3. ॐ सर्वाभीष्टप्रदायिने नमः।
4. ॐ शरण्याय नमः।
5. ॐ वरेण्याय नमः।
6. ॐ सर्वेशाय नमः।
7. ॐ सौम्याय नमः।
8. ॐ सुरवन्द्याय नमः।
9. ॐ सुरलोकविहारिणे नमः।
10. ॐ सुखासनोपविष्टाय नमः।
11. ॐ सुन्दराय नमः।
12. ॐ घनाय नमः।
13. ॐ घनरूपाय नमः।
14. ॐ घनाभरणधारिणे नमः।
15. ॐ घनसारविलेपाय नमः।
16. ॐ खद्योताय नमः।
17. ॐ मन्दाय नमः।
18. ॐ मन्दचेष्टाय नमः।
19. ॐ महनीयगुणात्मने नमः।
20. ॐ मर्त्यपावनपदाय नमः।
21. ॐ महेशाय नमः।
22. ॐ छायापुत्राय नमः।
23. ॐ शर्वाय नमः।
24. ॐ शततूणीरधारिणे नमः।
25. ॐ चरस्थिरस्वभावाय नमः।
26. ॐ अचञ्चलाय नमः।
27. ॐ नीलवर्णाय नमः।
28. ॐ नित्याय नमः।
29. ॐ नीलाञ्जननिभाय नमः।
30. ॐ नीलाम्बरविभूशणाय नमः।
31. ॐ निश्चलाय नमः।
32. ॐ वेद्याय नमः।
33. ॐ विधिरूपाय नमः।
34. ॐ विरोधाधारभूमये नमः।
35. ॐ भेदास्पदस्वभावाय नमः।
36. ॐ वज्रदेहाय नमः।
37. ॐ वैराग्यदाय नमः।
38. ॐ वीराय नमः।
39. ॐ वीतरोगभयाय नमः।
40. ॐ विपत्परम्परेशाय नमः।
41. ॐ विश्ववन्द्याय नमः।
42. ॐ गृध्नवाहाय नमः।
43. ॐ गूढाय नमः।
44. ॐ कूर्माङ्गाय नमः।
45. ॐ कुरूपिणे नमः।
46. ॐ कुत्सिताय नमः।
47. ॐ गुणाढ्याय नमः।
48. ॐ गोचराय नमः।
49. ॐ अविद्यामूलनाशाय नमः।
50. ॐ विद्याविद्यास्वरूपिणे नमः।
51. ॐ आयुष्यकारणाय नमः।
52. ॐ आपदुद्धर्त्रे नमः।
53. ॐ विष्णुभक्ताय नमः।
54. ॐ वशिने नमः।
55. ॐ विविधागमवेदिने नमः।
56. ॐ विधिस्तुत्याय नमः।
57. ॐ वन्द्याय नमः।
58. ॐ विरूपाक्षाय नमः।
59. ॐ वरिष्ठाय नमः।
60. ॐ गरिष्ठाय नमः।
61. ॐ वज्राङ्कुशधराय नमः।
62. ॐ वरदाभयहस्ताय नमः।
63. ॐ वामनाय नमः।
64. ॐ ज्येष्ठापत्नीसमेताय नमः।
65. ॐ श्रेष्ठाय नमः।
66. ॐ मितभाषिणे नमः।
67. ॐ कष्टौघनाशकर्त्रे नमः।
68. ॐ पुष्टिदाय नमः।
69. ॐ स्तुत्याय नमः।
70. ॐ स्तोत्रगम्याय नमः।
71. ॐ भक्तिवश्याय नमः।
72. ॐ भानवे नमः।
73. ॐ भानुपुत्राय नमः।
74. ॐ भव्याय नमः।
75. ॐ पावनाय नमः।
76. ॐ धनुर्मण्डलसंस्थाय नमः।
77. ॐ धनदाय नमः।
78. ॐ धनुष्मते नमः।
79. ॐ तनुप्रकाशदेहाय नमः।
80. ॐ तामसाय नमः।
81. ॐ अशेषजनवन्द्याय नमः।
82. ॐ विशेषफलदायिने नमः।
83. ॐ वशीकृतजनेशाय नमः।
84. ॐ पशूनां पतये नमः।
85. ॐ खेचराय नमः।
86. ॐ खगेशाय नमः।
87. ॐ घननीलाम्बराय नमः।
88. ॐ काठिन्यमानसाय नमः।
89. ॐ आर्यगणस्तुत्याय नमः।
90. ॐ नीलच्छत्राय नमः।
91. ॐ नित्याय नमः।
92. ॐ निर्गुणाय नमः।
93. ॐ गुणात्मने नमः।
94. ॐ निरामयाय नमः।
95. ॐ निन्द्याय नमः।
96. ॐ वन्दनीयाय नमः।
97. ॐ धीराय नमः।
98. ॐ दिव्यदेहाय नमः।
99. ॐ दीनार्तिहरणाय नमः।
100. ॐ दैन्यनाशकराय नमः।
101. ॐ आर्यजनगण्याय नमः।
102. ॐ क्रूराय नमः।
103. ॐ क्रूरचेष्टाय नमः।
104. ॐ कामक्रोधकराय नमः।
105. ॐ कलत्रपुत्रशत्रुत्वकारणाय नमः।
106. ॐ परिपोषितभक्ताय नमः।
107. ॐ परभीतिहराय नमः।
108. ॐ भक्तसंघमनोऽभीष्टफलदाय नमः।

॥ इति श्री शनि अष्टोत्तरशत नामावली सम्पूर्णम ॥

॥ श्री शनि चालीसा ॥

- **दोहा**

जय गणेश गिरिजा सुवन, मंगल करण कृपाल।
दीनन के दुःख दूर करि, कीजै नाथ निहाल॥
जय जय श्री शनिदेव प्रभु, सुनहु विनय महाराज।
करहु कृपा हे रवि तनय, राखहु जन की लाज॥

- **चौपाई**

जयति जयति शनिदेव दयाला। करत सदा भक्तन प्रतिपाला ॥ ॥ १ ॥
- चारि भुजा, तनु श्याम विराजै। माथे रतन मुकुट छवि छाजै॥ ॥ २ ॥
- परम विशाल मनोहर भाला। टेढ़ी दृष्टि भृकुटि विकराला॥ ॥ ३ ॥
- कुण्डल श्रवण चमाचम चमके। हिये माल मुक्तन मणि दमके॥ ॥ ४ ॥
- कर में गदा त्रिशूल कुठारा। पल बिच करैं अरिहिं संहारा॥ ॥ ५ ॥
- पिंगल, कृष्णों, छाया, नन्दन। यम, कोणस्थ, रौद्र, दुःख भंजन॥ ॥ ६ ॥
- सौरी, मन्द, शनि, दशनामा। भानु पुत्र पूजहिं सब कामा॥ ॥ ७ ॥
- जा पर प्रभु प्रसन्न है जाहीं। रंकहुं राव करैं क्षण माहीं॥ ॥ ८ ॥
- पर्वतहू तृण होई निहारत। तृणहू को पर्वत करि डारत॥ ॥ ९ ॥
- राज मिलत वन रामहिं दीन्हो। कैकेइहुं की मति हरि लीन्हो॥ ॥१०॥
- बनहूं में मृग कपट दिखाई। मातु जानकी गई चतुराई॥ ॥११॥
- लखनहिं शक्ति विकल करिडारा। मचिगा दल में हाहाकारा॥ ॥१२॥
- रावण की गति मति बौराई। रामचन्द्र सों बैर बढ़ा ई॥ ॥१३॥
- दियो कीट करि कंचन लंका। बजि बजरंग बीर की डंका॥ ॥१४॥
- नृप विक्रम पर तुहि पगु धारा। चित्र मयूर निगलि गै हारा॥ ॥१५॥
- हार नौलाखा लाग्यो चोरी। हाथ पैर डरवायो तोरी॥ ॥१६॥
- भारी दशा निकृष्ट दिखायो। तेलिहिं घर कोल्हू चलवायो॥ ॥१७॥
- विनय राग दीपक महँ कीन्हों। तब प्रसन्न प्रभु ह्वै सुख दीन्हों॥ ॥१८॥
- हरिश्चन्द्र नृप नारि बिकानी। आपहुं भरे डोम घर पानी॥ ॥१९॥
- तैसे नल पर दशा सिरानी। भूंजी-मीन कूद गई पानी॥ ॥२०॥
- श्री शंकरहि गहयो जब जाई। पार्वती को सती कराई॥ ॥२१॥
- तनिक विलोकत ही करि रीसा। नभ उड़ि गयो गौरिसुत सीसा॥ ॥२२॥
- पाण्डव पर भै दशा तुम्हारी। बची द्रोपदी होति उधारी॥ ॥२३॥
- कौरव के भी गति मति मारयो। युद्ध महाभारत करि डारयो॥ ॥२४॥
- रवि कहं मुख महं धरि तत्काला। लेकर कूदि परयो पाताला॥ ॥२५॥
- शेष देव-लखि विनती लाई। रवि को मुख ते दियो छुड़ई॥ ॥२६॥
- वाहन प्रभु के सात सुजाना। जग दिग्ज गर्दभ मृग स्वाना॥ ॥२७॥

- जम्बुक सिंह आदि नख धारी। सो फल ज्योतिष कहत पुकारी॥ ॥२८॥
- गज वाहन लक्ष्मी गृह आवैं। हय ते सुख सम्पत्ति उपजावै॥ ॥२९॥
- गर्दभ हानि करै बहु काजा। गर्दभ सिंद्धकर राज समाजा॥ ॥३०॥
- जम्बुक बुद्धि नष्ट कर डारै। मृग दे कष्ट प्राण संहारै॥ ॥३१॥
- जब आवहिं प्रभु स्वान सवारी। चोरी आदि होय डर भारी॥ ॥३२॥
- तैसहि चारि चरण यह नामा। स्वर्ण लौह चाँजी अरु तामा॥ ॥३३॥
- लौह चरण पर जब प्रभु आवैं। धन जन सम्पत्ति नष्ट करावै॥ ॥३४॥
- समता ताम्र रजत शुभकारी। स्वर्ण सर्वसुख मंगल कारी॥ ॥३५॥
- जो यह शनि चरित्र नित गावै। कबहुं न दशा निकृष्ट सतावै॥ ॥३६॥
- अदभुत नाथ दिखावैं लीला। करैं शत्रु के नशि बलि ढीला॥ ॥३७॥
- जो पण्डित सुयोग्य बुलवाई। विधिवत शनि ग्रह शांति कराई॥ ॥३८॥
- पीपल जल शनि दिवस चढ़ाव त। दीप दान दै बहु सुख पावत॥ ॥३९॥
- कहत राम सुन्दर प्रभु दासा। शनि सुमिरत सुख होत प्रकाशा॥ ॥४०॥

- **दोहा** पाठ शनिश्चर देव को, की हों विमल तैयार।
  करत पाठ चालीस दिन, हो भवसागर पार॥

॥ इति शनि चालीसा सम्पूर्णम॥

॥ शनि देव जी की आरती ॥

- जय जय श्री शनिदेव भक्तन हितकारी ।
  सूर्य पुत्र प्रभु छाया महतारी ॥ जय जय श्री शनि देव ... ।

- श्याम अंग वक्र-दृष्टि चतुर्भुजा धारी ।
  नीलाम्बर धार नाथ गज की असवारी ॥ जय जय श्री शनि देव ... ।

- क्रीट मुकुट शीश सहज दिपत है लिलारी ।
  मुक्तन की माला गले शोभित बलिहारी ॥ जय जय श्री शनि देव ... ।

- मोदक मिष्ठान पान चढ़त हैं सुपारी ।
  लोहा तिल तेल उड़द महिषी अति प्यारी ॥ जय जय श्री शनि देव ... ।

- देव दनुज ऋषि मुनि सुमिरत नर नारी ।
  विश्वनाथ धरत ध्यान शरण हैं तुम्हारी ॥ जय जय श्री शनि देव ... ।

॥ राहु ग्रह मंत्र, जप, कवच, स्तोत्र ॥

अनुक्रमाणिका

1. राहु देव मन्त्र 02
2. राहु प्रार्थना, व्रत, स्नान, दान 03
3. राहु वैदिक मन्त्र न्यासादि प्रयोग 04
4. राहु कवचम् 05
5. राहु स्तोत्रम् - १ 06
6. राहु स्तोत्रम् - २ 07
7. राहु अष्टोत्तरशत नामावली 08
8.

राहु यन्त्रम्

विश्वाष्टतिथ्यामनुसूर्यदिश्या
खगामहीन्द्रैकदशांशकोष्ठे ।
विलिख्य यन्त्रं सततं विधार्यं
राहोः कृतारिष्ट निवारणाय ॥

१३	८	१५
१३	८	१५
९	१६	११

॥ राहु देव ग्रह ॥

राहु राठिनापुर देश में उद्भव। पैठिनस गोत्र। जाति असुर। माता सिहिंका। निल वर्ण। नैऋत्य दिशा।

- **शुभाशुभत्व** — **क्रूर ग्रह**
- **भोग काल** — **547.5 दिन (डेढ वर्ष)**
- **बीज मंत्र** — **रां राहवे नमः।** षडक्षर मन्त्र (ऋषि-ब्रह्मा, छन्द-गायत्री, देवता-राहु)
    - **ॐ रां राहवे नमः।** सप्ताक्षर मन्त्र (ऋषि-ब्रह्मा, छन्द-पंक्ति, देवता-राहु)
    - **ॐ ऐं ह्रीं राहवे नमः।**
    - **ॐ राहवे नमः।**
- **तांत्रिक मंत्र** — **ॐ भ्राँ भ्रीं भ्रौं स: राहवे नमः।**
    - **ॐ सां सीं सौं रां राहवे स्वाहा।** दशाक्षर मन्त्र
    - **ॐ क्रीं क्रीं हूँ हूँ टं टंकधारिणे राहवे रं ह्रीं श्रीं भैं स्वाहा।** आगमलहर्याम्
- **वैदिक मंत्र** — **ॐ कया नश्चित्र आ भुवदूती सदावृधः सखा।**
  कया शचिष्ठया वृता॥
- **पुराणोक्त मंत्र** — **ॐ अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम।**
  सिंहिकागर्भ संभूतं तं राहुं प्रणमाम्यहम॥
- **अधिदेवता-कालम्** — **ॐ कार्षिरसि समुद्द्रस्य त्वा क्षित्या ऽउन्नयामि।**
  समापो ऽअद्भिरग्मत समोषधीभिरोषधी :॥
- **प्रत्यधिदेवता-सर्प** — **ॐ नमोस्तु सर्पेभ्यो ये के च प्रथिवी मनु।**
  ये अंतिरिक्षे ये दिवि तेभ्यो : सर्पेभ्यो नमः॥
- **जप संख्या** — **18,000 कलयुगे चतुर्थगुणो अर्थात 72,000**
  + दशांश हवन 7,200
  + दशांश तर्पण 720
  + दशांश मार्जन 72 = 79,992
- **जप समय** — **रात्रीकाल 12 बजे**
- **हवनवस्तु** — **दूर्वा**
- **रत्न** — **गोमेद - 6.5 रत्ती, शनिवार, नैऋत्य दिशा, संध्या वेला, मध्यमा**

- **राहु प्रार्थना**

नीलाम्बरो नीलवपुः किरीटी, करालवक्त्रः करवालशूली ।
चतुर्भुजश्चर्मधरश्च राहुः, सिंहासनस्थो वरदोऽस्तु महायम् ॥

- नीला वस्त्र धारण करने वाले, नीले विग्रह वाले, मुकुटधारी, विकराल मुख वाले, हाथ में ढाल-तलवार तथा शूल धारण करने वाले एवं सिंहासन पर विराजमान राहु मेरे लिये वरदायी हों ।

- **राहु का व्रत**

१८ शनिवारों तक करना चाहिये । काले रंग का वस्त्र धारण करके राहु के व्रत में **ॐ भ्रां भ्रीं भ्रौं सः राहवे नमः'** इस मन्त्र की १८, ११ या ५ माला जप करे । जप के समय एक पात्र में जल, दूर्वा और कुशा अपने पास रख ले । जप के बाद इनको पीपल की जड़ में चढ़ा दे । भोजन में मीठा चूरमा, मीठी रोटी, समयानुसार रेवड़ी, भूजा और काले तिल से बने पदार्थ खाये । रात में घी का दीपक पीपल वृक्ष की जड़ में रख दिया करे । इस व्रत के करने से शत्रु का भय दूर होता है, राजपक्ष से (मुकदमे में) विजय मिलती है, सम्मान बढ़ता है ।

- **अनिष्टे राहौ शान्ति स्नानम्**

- **सलोध्रगर्भेणमदेभदानै, रणोऽम्बुद श्रीफलपर्णवर्णैः ।**
  हरेदभद्रं विषमागुजातं, शरीरिणामाप्लवनं सदूर्वैः ॥
- राहु की अनिष्ट-शान्ति के लिये सुगन्धबाला, मोथा, बिल्वपत्र, लाल चन्दन, लोध, कस्तूरी, गजमद और दूर्वा से स्नान करना चाहिये ।

- **राहु दान**

राहोर्दानं कृष्णमेषो गोमेदो लौहकम्बलौ ।
सौवर्ण नागरूपं च सतिलं ताम्रभाजनम् ॥

- **गोमेदरत्नं च तुरंगमश्च सुनीलचैलामलकंबलं च ।**
  तिलाश्च तैलं खलु लोहमिश्रं स्वर्भानवे दानमिदं वदंति ॥
- काली भेड, गोमेद, लोहा, कम्बल, सोने का नाग, तिल पूर्ण ताम्र पात्र का दान करने से राहु जनित दोष शान्त होते हैं ।
- राहु ग्रह के दोष निवारण हेतु बहुमूल्य खड्ग (तलवार) का दान करना चाहिये।
- शीसा, तेल, घोडा, गेहुँ, कृष्ण पुष्प, नील वस्त्र, अर्भक

॥ राहु वैदिक मन्त्र न्यासादि प्रयोगः ॥

- **वैदिक मंत्र** — **ॐ कया नश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता ॥**

- **विनियोग** — ॐ कयान इति मन्त्रस्य वामदेव ऋषिः। गायत्री छन्दः। राहुर्देवता। कयान इति बीजम्। शचिरिति शक्तिः। राहु प्रीत्यर्थे जपे विनियोगः ॥

- **ऋष्यादि न्यास** — ॐ वामदेव ऋषये नमः शिरसि। ॐ गायत्री छन्दसे नमः मुखे। ॐ राहु देवतायै नमः हृदये। ॐ कयान इति बीजाय नमः गुह्ये। ॐ शचिरिति शक्तये नमः पादयोः। विनियोगाय नमः सर्वाङ्गे।

- **करन्यास** — ॐ कयान इत्यङ्गुष्ठाभ्यां नमः। ॐ चित्र इति तर्जनीभ्यां नमः। ॐ आभुव इति मध्यमाभ्यां नमः। ॐ दूतीसदावृध इत्यिनामिकाभ्यां नमः। ॐ सखाकया इति कनिष्ठिकाभ्यां नमः। ॐ शचिष्ठयावृता इति करतलकर पृष्ठाभ्यां नमः ॥

- **हृदयादि न्यास** — ॐ कयान इति हृदयाय नमः। ॐ चित्र इति शिरसे स्वाहा। ॐ आभुव इति शिखायै वषट्। ॐ दूतीसदावृध इति कवचाय हुं। ॐ सखाकया इति नेत्रत्रयाय वौषट्। ॐ शचिष्ठयावृता इत्यस्त्राय फट ॥

- **मंत्रन्यास** — ॐ कया शिरसि। ॐ न इति ललाटे। ॐ चित्र मुखे। ॐ आभुव दूरती नाभी। ॐ सदावृधः कट्याम्। ॐ सखा ऊर्वोः। ॐ कया जानुनोः। ॐ शचिष्ठया गुल्फयोः। ॐ वृता पादयोः ॥

॥ राहु कवचम् ॥

- **विनियोग** अस्य श्रीराहु कवचस्य । चन्द्रमा ऋषिः । अनुष्टुप छन्दः । श्री राहूर्देवता । राँ बीजं । नभ: शक्तिः । स्वाहा कीलकम् । राहु कृत पीडा निवारणार्थे, धन-धान्य, आयु-आरोग्य आदि समृद्धि प्राप्तयर्थे पाठे विनियोगः ।
- **ऋष्यादिन्यास** शिरसि चन्द्रमा ऋषये नमः । मुखे अनुष्टप छन्दसे नमः । हृदि राहू देवतायै नमः । गुह्ये राँ बीजाय नमः । पादयोः शक्तये नमः । नाभौ स्वाहा कीलकाय नमः । सर्वांगे श्री राहु प्रीत्यर्थे पाठे विनियोगाय नमः ।
- **करन्यास** राँ अङ्गुष्ठाभ्यां नमः । रीं तर्जनीभ्यां नमः । रुँ मध्यमाभ्यां नमः । रैं अनामिकाभ्यां नमः । रौं कनिष्ठिकाभ्यां नमः । रः कर-तल-कर पृष्ठाभ्यां नमः ।
- **हृदयादि अङ्गन्यास** राँ हृदयाय नमः। रीं शिरसे स्वाहा । रुँ शिखायै वषट् । रैं कवचाय हुम् । रौं नेत्रत्रयाय वौषट् । रः अस्त्राय फट् ।

- **प्रणमामि सदा राहुं शूर्पाकारं किरीटिनम् ।**
  सैन्हिकेयं करालास्यं लोकानां भयप्रदम् ॥ ॥ १ ॥
- **नीलाम्बर: शिरः पातु ललाटं लोकवन्दितः ।**
  चक्षुषी पातु मे राहुः श्रोत्रे त्वर्धशरीरवान् ॥ ॥ २ ॥
- **नासिकां मे धूम्रवर्णः शूलपाणिर्मुखं मम ।**
  जिव्हां मे सिंहिकासूनुः कंठं मे कठिनांघ्रिकः ॥ ॥ ३ ॥
- **भुजङ्गेशो भुजौ पातु निलमाल्याम्बरः करौ ।**
  पातु वक्षःस्थलं मन्त्री पातु कुक्षिं विधुन्तुदः ॥ ॥ ४ ॥
- **कटिं मे विकटः पातु ऊरु मे सुरपूजितः ।**
  स्वर्भानुर्जानुनी पातु जंघे मे पातु जाड्यहा ॥ ॥ ५ ॥
- **गुल्फ़ौ ग्रहपतिः पातु पादौ मे भीषणाकृतिः ।**
  सर्वाणि अंगानि मे पातु निलचन्दनभूषणः ॥ ॥ ६ ॥
- **राहोरिदं कवचमृद्धिदवस्तुदं यो ।**
  भक्त्या पठत्यनुदिनं नियतः शुचिः सन् ॥ ॥ ७ ॥
- **प्राप्नोति कीर्तिमतुलां श्रियमृद्धिमायुरारोग्यम् ।**
  आत्मविजयं च हि तत्प्रसादात् ॥ ॥ ८ ॥

॥ इति श्रीमहाभारते धृतराष्ट्र-संजय सम्वादे द्रोणपर्वणि राहु कवचम् सम्पूर्णम् ॥

॥ राहु स्तोत्रम् - १ ॥

- **विनियोग** अस्य श्री राहु पंजविंशन्नाम स्तोत्रस्य । वामदेव ऋषिः । गायत्री छन्दः । राहुर्देवता । राहुप्रीत्यर्थे पाठे विनियोगः ॥

- **विनियोग** शिरसि वामदेव ऋषये नमः । मुखे गायत्री छन्दसे नमः । हृदि श्री राहु देवतायै नमः । सर्वांगे श्री राहु प्रीत्यर्थे पाठे विनियोगाय नमः ॥

- **राहुर्दानव मन्त्री च सिंहिकाचित्तनन्दनः ।**
  अर्धकायः सदा क्रोधी चन्द्रादित्यविमर्दनः ॥ ॥ १ ॥

- **रौद्रो रुद्रप्रियो दैत्यः स्वर्भानुर्भानुभीतिदः ।**
  ग्रहराजः सुधापायी राकातिथ्यभिलाषकः ॥ ॥ २ ॥

- **कालदृष्टिः कालरुपः श्रीकण्टहृदयाश्रयः ।**
  विधुंतुदः सैहिकेयो घोररुपो महाबलः ॥ ॥ ३ ॥

- **ग्रहपीडाकरो द्रंष्टी रक्तनेत्रो महोदरः ।**
  पञ्चविंशति नामानि स्मृत्वा राहुं सदा नरः ॥ ॥ ४ ॥

- **यः पठेन् महती पीडा तस्य नश्यति केवलम् ।**
  आरोग्यं पुत्रमतुलां श्रियं धान्यं पशूंस्तथा ॥ ॥ ५ ॥

- **ददाति राहुस्तस्मै यः पठते स्तोत्र मुत्तमम् ।**
  सततं पठते यस्तु जीवेद् वर्षशतं नरः ॥ ॥ ६ ॥

॥ इति श्रीस्कन्द-पुराणे राहु स्तोत्रम् सम्पूर्णम् ॥

॥ राहु स्तोत्रम् - २ ॥

- **विनियोग** ॐ अस्य श्री राहुस्तोत्रमहामन्त्रस्य वामदेव ऋषिः । अनुष्टुप्च्छन्दः । राहुर्देवता । राहु प्रसा दसिद्ध्यर्थे जपे विनियोगः ।

- **काश्यप उवाच** शृण्वन्तु मुनयः सर्वे राहुप्रीतिकरं स्तवम् ।
  सर्वरोगप्रशमनं विषभीतिहरं परम् ॥ ॥ १॥
- सर्वसम्पत्करं चैव गुह्यमेतदनुत्तमम् ।
  आदरेण प्रवक्ष्यामि श्रूयतामवधानतः ॥ ॥ २॥
- राहुः सूर्यरिपुश्चैव विषज्वाली भयाननः ।
  सुधांशुवैरिः श्यामात्मा विष्णुचक्राहितो बली ॥ ॥ ३॥
- भुजगेशस्तीक्ष्णदंष्ट्रः क्रूरकर्मा ग्रहाधिपः ।
  द्वादशैतानि नामानि नित्यं यो नियतः पठेत् ॥ ॥ ४॥
- जप्त्वा तु प्रतिमां रंयां सीसजां माषसुस्थिताम् ।
  नीलैर्गन्धाक्षतैः पुष्पैः भक्त्या सम्पूज्य यत्नतः ॥ ॥ ५॥
- विधिना वह्निमादाय दूर्वान्नाज्याहुतीः क्रमात्।
  तन्मन्त्रेणैव जुहुयाद्यावदष्टोत्तरं शतम् ॥ ॥ ६॥
- हुत्वैवं भक्तिमान् राहुं प्रार्थयेद्ग्रहनायकम् ।
  सर्वापद्विनिवृत्यर्थं प्राञ्जलिः प्रणतो नरः ॥ ॥ ७ ॥
- राहो कराळवदन रविचन्द्रभयङ्कर ।
  तमोरूप नमस्तुभ्यं प्रसादं कुरु सर्वदा ॥ ॥८॥
- सिम्हिकासुत सूर्यारे सिद्धगन्धर्वपूजित ।
  सिंहवाह नमस्तुभ्यं सर्वान्रोगान् निवारय ॥ ॥ ९॥
- कृपाणफलकाहस्त त्रिशूलिन् वरदायक ।
  गरळातिगराळास्य गदान्मे नाशयाखिलान् ॥ ॥ १०॥
- स्वर्भानो सर्पवदन सुधाकरविमर्दन ।
  सुरासुरवरस्तुत्य सर्वदा त्वं प्रसीद मे ॥ ॥११॥
- इति सम्प्रार्थितो राहुः दुष्टस्थानगतोऽपि वा ।
  सुप्रीतो जायते तस्य सर्वान् रोगान् विनाशयेत्॥ ॥१२॥
- विषान्न जायते भीतिः महारोगस्य का कथा ।
  सर्वान् कामानवाप्नोति नष्टं राज्यमवाप्नुयात् ॥ ॥१३॥
- एवं पठेदनुदिनं स्तवराजमेतं मर्त्यः प्रसन्न हृदयो विजितेन्द्रियो यः ।
  आरोग्यमायुरतुलं लभते सुपुत्रान्सर्वे ग्रहा विषमगाः सुरतिप्रसन्नाः ॥ ॥१४॥

॥ इति श्री राहु स्तोत्रम् सम्पूर्णम् ॥

॥ श्री राहु अष्टोत्तरशत नामावली ॥

1. ॐ राहवे नमः।
2. ॐ सैंहिकेयाय नमः।
3. ॐ विधुन्तुदाय नमः।
4. ॐ सुरशत्रवे नमः।
5. ॐ तमसे नमः।
6. ॐ फणिने नमः।
7. ॐ गार्ग्यनयाय नमः।
8. ॐ सुरापिने नमः।
9. ॐ नीलजीमूतसङ्काशाय नमः।
10. ॐ चतुर्भुजाय नमः।
11. ॐ खड्गखेटकधारिणे नमः।
12. ॐ वरदायकहस्तकाय नमः।
13. ॐ शूलायुधाय नमः।
14. ॐ मेघवर्णाय नमः।
15. ॐ कृष्णध्वजपताकावते नमः।
16. ॐ दक्षिणाशामुखरथाय नमः।
17. ॐ तीक्ष्णदंष्ट्रकरालकाय नमः।
18. ॐ शूर्पाकारसंस्थाय नमः।
19. ॐ गोमेदाभरणप्रियाय नमः।
20. ॐ माषप्रियाय नमः।
21. ॐ कश्यपर्षिनन्दनाय नमः।
22. ॐ भुजगेश्वराय नमः।
23. ॐ उल्कापातयित्रे नमः।
24. ॐ शूलिने नमः।
25. ॐ निधिपाय नमः।
26. ॐ कृष्णसर्पराजे नमः।
27. ॐ विषज्वला वृतास्याय अर्धशरीराय नमः।
28. ॐ शात्रवप्रदाय नमः।
29. ॐ रवीन्दुभीकराय नमः।
30. ॐ छायास्वरूपिणे नमः।
31. ॐ कठिनाङ्गकाय नमः।
32. ॐ द्विषच्चक्रच्छेदकाय नमः।
33. ॐ करालास्याय नमः।
34. ॐ भयङ्कराय नमः।
35. ॐ क्रूरकर्मणे नमः।
36. ॐ तमोरूपाय नमः।
37. ॐ श्यामात्मने नमः।
38. ॐ नीललोहिताय नमः।
39. ॐ किरीटिणे नमः।
40. ॐ नीलवसनाय नमः।
41. ॐ शनिसमान्तवर्त्मगाय नमः।
42. ॐ चाण्डालवर्णाय नमः।
43. ॐ अश्वयर्क्षभवाय नमः।
44. ॐ मेषभवाय नमः।
45. ॐ शनिवत्फलदाय नमः।
46. ॐ शूराय नमः।
47. ॐ अपसव्यगतये नमः।
48. ॐ उपरागकराय नमः।
49. ॐ सोमसूर्यच्छविविमर्दकाय नमः।
50. ॐ नीलपुष्पविहाराय नमः।
51. ॐ ग्रहश्रेष्ठाय नमः।
52. ॐ अष्टमग्रहाय नमः।
53. ॐ कबन्धमात्रदेहाय नमः।
54. ॐ यातुधानकुलोद्भवाय नमः।
55. ॐ गोविन्दवरपात्राय नमः।
56. ॐ देवजातिप्रविष्टकाय नमः।
57. ॐ क्रूराय नमः।
58. ॐ घोराय नमः।
59. ॐ शनेर्मित्राय नमः।
60. ॐ शुक्रमित्राय नमः।
61. ॐ अगोचराय नमः।
62. ॐ माने गङ्गास्नानदात्रे नमः।
63. ॐ स्वगृहे प्रबलाढ्यदाय नमः।
64. ॐ सद्गृहेऽन्यबलधृते नमः।
65. ॐ चतुर्थे मातृनाशकाय नमः।
66. ॐ चन्द्रयुक्ते चण्डाल जन्मसूचकाय नमः।
67. ॐ सिंहजन्मने नमः।
68. ॐ राज्यदात्रे नमः।
69. ॐ महाकायाय नमः।
70. ॐ जन्मकर्त्रे नमः।
71. ॐ विधुरिपवे नमः।
72. ॐ मादकज्ञानदाय नमः।
73. ॐ जन्मकन्याराज्यदात्रे नमः।
74. ॐ जन्महानिदाय नमः।
75. ॐ नवमे पितृहन्त्रे नमः।
76. ॐ पञ्चमे शोकदायकाय नमः।
77. ॐ द्यूने कलत्रहन्त्रे नमः।
78. ॐ सप्तमे कलहप्रदाय नमः।
79. ॐ षष्ठे वित्तदात्रे नमः।
80. ॐ चतुर्थे वैरदायकाय नमः।
81. ॐ नवमे पापदात्रे नमः।
82. ॐ दशमे शोकदायकाय नमः।
83. ॐ आदौ यशः प्रदात्रे नमः।
84. ॐ अन्ते वैरप्रदायकाय नमः।
85. ॐ कालात्मने नमः।
86. ॐ गोचराचाराय नमः।
87. ॐ धने ककुत्प्रदाय नमः।
88. ॐ पञ्चमे धिशणाशृङ्गदाय नमः।
89. ॐ स्वर्भानवे नमः।
90. ॐ बलिने नमः।
91. ॐ महासौख्यप्रदायिने नमः।
92. ॐ चन्द्रवैरिणे नमः।
93. ॐ शाश्वताय नमः।
94. ॐ सुरशत्रवे नमः।
95. ॐ पापग्रहाय नमः।
96. ॐ शाम्भवाय नमः।
97. ॐ पूज्यकाय नमः।
98. ॐ पाटीरपूरणाय नमः।
99. ॐ पैठीनसकुलोद्भवाय नमः।
100. ॐ भक्तरक्षाय नमः।
101. ॐ राहुमूर्तये नमः।
102. ॐ सर्वाभीष्टफलप्रदाय नमः।
103. ॐ दीर्घाय नमः।
104. ॐ कृष्णाय नमः।
105. ॐ अतनवे नमः।
106. ॐ विष्णुनेत्रारये नमः।
107. ॐ देवाय नमः।
108. ॐ दानवाय नमः।

॥ इति श्री राहु अष्टोत्तरशत नामावली सम्पूर्णम ॥

॥ केतु ग्रह मंत्र, जप, कवच, स्तोत्र ॥

अनुक्रमाणिका

1. केतु देव मन्त्र 02
2. केतु प्रार्थना, व्रत, स्नान, दान 03
3. केतु वैदिक मन्त्र न्यासादि प्रयोगः 04
4. केतु कवचम् 05
5. केतु स्तोत्रम् 06
6. केतु पंचविंशति नाम स्तोत्रम् 07
7. केतु अष्टोत्तशत नामावली 08
8.

केतु यन्त्रम्

मनुखेचरभूपतिथिविश्व
शिवादिक् सप्तादश सूर्यमिता ।
क्रमशो विलिखेन्नव कोष्ठमिते
परिधार्य नरा दुःख नाशकराः ॥

१४	९	१६
१९	१३	११
१०	१७	१२

॥ केतु देव ग्रह ॥

केतु अंतर्वेदी देश में उत्पत्ति। जैमिनी गोत्र। जाति असुर। धूम्र वर्ण। वायव्य दिशा। छाया ग्रह।

- **शुभाशुभत्व** — **पाप ग्रह**
- **भोग काल** — **547.5 दिन (डेढ वर्ष)**
- **बीज मंत्र** — **कं केतवे नमः।** षडक्षर मन्त्र
  - **ॐ कं केतवे नमः।** सप्ताक्षर मन्त्र
  - **ॐ ह्रीं ऐं केतवे नमः।**
  - **ॐ केतवे नमः।**
- **तांत्रिक मंत्र** — **ॐ स्रां स्रीं स्रौं सः केतवे नमः।**
  - **ॐ प्रां प्रीं प्रौं कं केतवे स्वाहा।** दशाक्षर मन्त्र
  - **ॐ ह्रीं क्रूं क्रूर रूपिणे केतवे ऐं सौः स्वाहा।** मन्त्रमुक्तावल्याम्
- **वैदिक मंत्र** — **ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे।**
  समुषद्भिरजायथाः॥
- **पुराणोक्त मंत्र** — **ॐ पलाश पुष्प संकाशं तारका ग्रह मस्तकम।**
  रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम॥
- अधिदेवता-**चित्रगुप्तम्** — **चित्रावसो स्वस्ति ते पारमशीय।**
- प्रत्यधिदेवता-**ब्रह्मणम्** — **ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः।**
  स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥
- **जप संख्या** — **17,000 कलयुगे चतुर्थगुणो अर्थात 68,000**
  + दशांश हवन 6,800
  + दशांश तर्पण 680
  + दशांश मार्जन 68 = 75,548
- **जप समय** — **रात्रिकाल 12 बजे**
- **हवनवस्तु** — **कुशा**
- **रत्न** — **लहसुनीया (पोलाद) - 6.5 रत्ती, शनिवार, वायव्य दिशा, प्रातःकाल, मध्यमा**

- **केतु प्रार्थना**

धूम्रो द्विबाहुर्वरदो गदाभृत्, गृध्रासनस्थो विकृताननश्च।
किरीटकेयूरविभूषिताङ्गः, सदास्तु मे केतु गणः प्रशान्तः॥

  - धुएँ के समान आभा वाले, दो हाथ वाले, गदा धारण करने वाले, गृध्र के आसनपर स्थित रहने वाले, भयंकर मुख वाले, मुकुट एवं बाजूबन्द से सुशोभित अंगों वाले तथा शान्त स्वभाव वाले केतु गण मेरे लिये सदा वर प्रदान करने वाले हों।

- **केतु का व्रत**

१८ शनिवारों तक करना चाहिये। काले रंग का वस्त्र धारण करके केतु के व्रत में **'ॐ स्रां स्रीं स्रौं सः केतवे नमः '** इस मन्त्र की १८, ११ या ५ माला जप करे। जप के समय एक पात्र में जल, दूर्वा और कुशा अपने पास रख ले। जप के बाद इनको पीपल की जड़ में चढ़ा दे। भोजन में मीठा चूरमा, मीठी रोटी, समयानुसार रेवड़ी, भूजा और काले तिल से बने पदार्थ खाये। रातमें घी का दीपक पीपल वृक्ष की जड़ में रख दिया करे। इस व्रत के करने से शत्रु का भय दूर होता है, राजपक्ष से (मुकदमे में) विजय मिलती है, सम्मान बढ़ता है।

- **अनिष्टे केतौ शान्ति स्नानम्**

  - **शिखाभृदार्त्तिर्तिलपत्रिकाब्द, सारंगनाभीभमदाम्बुरोधैः।**
    निषेधतीहाविकमूत्रमिश्रैः, स्नानं नराढ्यैः करकामृताभ्याम्॥
  - केतु की अनिष्ट-शान्ति के लिये रक्तचन्दन, रतनजोत, मोथा, कस्तूरी, गजमद, सुगन्धबाला, लोध, भेड़ का मूत्र, दाडिम और गुडूची से स्नान करना चाहिये।

- **केतु दान**

केतोर्वैदूर्यममलं तैलं मृगमदं तथा।
ऊर्णास्तिलैस्तु संयुक्तां दद्यात्क्लेशानुपत्तये॥

  - **वैडूर्यरत्नं सतिलं च तैलं सुकंबलं चापि मदो मृगस्य।**
    शस्त्रं च केतोः परितोषहेतोश्छागस्य दानं कथितं मुनीन्द्रैः॥
  - केतु ग्रह की प्रीति के लिये स्वच्छ वैदूर्य (लहसुनिया), तैल, कस्तूरी, तिल युक्त ऊनी वस्त्र [कम्बल, लोहा, छाता एवं उड़द] का दान करना चाहिये। सुवर्ण, पोलाद, कृष्णवस्त्र, धूम्रपुष्प, शस्त्र
  - जन्मकुण्डली के अनुसार यदि केतु ग्रह दोष कारक हो तो छाग (बकरी) का दान करना चाहिये।

॥ केतु वैदिक मन्त्र न्यासादि प्रयोगः ॥

- **वैदिक मंत्र** — **ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे।
समुषभ्दिरजायथाः ॥**

- **विनियोग** — केतुं कृण्वन्निति मंत्रस्य मधुऋषिः। गायत्री छन्दः। केतुर्देवता।
अपेशसे इति बीजम्। मर्य्या शक्तिः। केतु प्रीत्यर्थे जपे विनियोगः।

- **ऋष्यादि न्यास** — ॐ मधु ऋषये नमः शिरसि। ॐ गायत्री छन्दसे नमः मुखे।
ॐ केतु देवतायै नमः हृदये। ॐ अपेशसे इति बीजाय नमः गुह्ये।
मर्य्याशक्तये नमः पादयोः। विनियोगाय नमः सर्वाङ्गे।

- **करन्यास** — ॐ केतुंकृण्वन् इत्यङ्गुष्ठाभ्यां नमः। ॐ अ केतवे इति तर्जनीभ्यां नमः।
ॐ पेशोमर्य्या इति मध्यमाभ्यां नमः। ॐ अपेशसे अनामिकाभ्यां नमः।
ॐ समुषद्भिः कनिष्ठिकाभ्यां नमः। ॐ अजायथा: करतलकर पृष्ठाभ्या नमः॥

- **हृदयादिन्यास** — ॐ केतुंकृण्वन्निति हृदयाय नमः। ॐ अकेतवे शिरसे स्वाहा।
ॐ पेशोमर्य्या शिखायै वषट्। ॐ अपेशसे कवचाय हूं।
ॐ समुषद्भि नेत्रत्रयाय वौषट्। ॐ अजायथ इत्यस्त्राय फट्॥

- **मंत्रन्यास** — ॐ केतुं शिरसि। ॐ कृण्वन् ललाटे। ॐ अकेतवे मुखे। ॐ पेशो हृदये।
ॐ मर्य्या नाभौ। ॐ अपेशसे कट्याम। ॐ समूर्वोः। ॐ उषद्भिर्जानुनोः।
ॐ अजायथा पादयोः॥

॥ केतु कवचम् ॥

- **विनियोग** अस्य श्रीकेतु कवच स्तोत्र मन्त्रस्य । त्रयम्बक ऋषिः । अनुष्टप् छन्दः । केतुर्देवता । कं बीजं । नमः शक्तिः । केतुरिति कीलकम् । केतु कृत पीडा निवारणार्थे, सर्वरोग निवारणार्थे, सर्वशत्रु विनाशनार्थे, सर्वकार्य सिद्ध्यर्थे, केतु प्रसाद सिद्ध्यर्थे पाठे विनियोगः ।

- **केतु करालवदनं चित्रवर्णं किरीटिनम् ।**
  प्रणमामि सदा केतुं ध्वजाकारं ग्रहेश्वरम् ॥ ॥ १ ॥

- **चित्रवर्णः शिरः पातु भालं धूम्रसमद्युतिः ।**
  पातु नेत्रे पिंगलाक्षः श्रुती मे रक्तलोचनः ॥ ॥ २ ॥

- **घ्राणं पातु सुवर्णाभश्चिबुकं सिंहिकासुतः ।**
  पातु कंठं च मे केतुः स्कन्धौ पातु ग्रहाधिपः ॥ ॥ ३ ॥

- **हस्तौ पातु श्रेष्ठः कुक्षिं पातु महाग्रहः ।**
  सिंहासनः कटिं पातु मध्यं पातु महासुरः ॥ ॥ ४ ॥

- **ऊरुं पातु महाशीर्षो जानुनी मेऽतिकोपनः ।**
  पातु पादौ च मे क्रूरः सर्वाङ्गं नरपिंगलः ॥ ॥ ५ ॥

- **य इदं कवचं दिव्यं सर्वरोगविनाशनम् ।**
  सर्वशत्रुविनाशं च धारणाद्विजयि भवेत् ॥ ॥ ६ ॥

॥ इति श्री ब्रह्माण्ड-पुराणे केतु कवचम् सम्पूर्णम् ॥

॥ केतु स्तोत्रम् ॥

- **विनियोग** ॐ अस्य श्री केतुस्तोत्रमहामन्त्रस्य वामदेव ऋषिः। अनुष्टुप्छन्दः। केतुर्देवता। केतुप्रसादसिद्ध्यर्थे जपे विनियोगः।

- **गौतम उवाच**
  मुनीन्द्र सूत तत्त्वज्ञ सर्वशास्त्रविशारद।
  सर्वरोगहरं ब्रूहि केतोः स्तोत्रमनुत्तमम् ॥ ॥ १ ॥

- **सूत उवाच**
  शृणु गौतम वक्ष्यामि स्तोत्रमेतदनुत्तमम्।
  गुह्याद्गुह्यतमं केतोः ब्रमणा कीर्तितं पुरा ॥ ॥ २ ॥
  - आद्यः कराळवदनो द्वितीयो रक्तलोचनः।
    तृतीयः पिङ्गळाक्षश्च चतुर्थो ज्ञानदायकः ॥ ॥ ३ ॥
  - पञ्चमः कपिलाक्षश्च षष्ठः कालाग्निसन्निभः।
    सप्तमो हिमगर्भश्च तूम्रवर्णोष्टमस्तथा ॥ ॥ ४ ॥
  - नवमः कृत्तकण्ठश्च दशमः नरपीठगः।
    एकादशस्तु श्रीकण्ठः द्वादशस्तु गदायुधः ॥ ॥ ५ ॥
  - द्वादशैते महाक्रूराः सर्वोपद्रवकारकाः।
    पर्वकाले पीडयन्ति दिवाकरनिशाकरौ ॥ ॥ ६ ॥
  - नामद्वादशकं स्तोत्रं केतोरेतन्महात्मनः।
    पठन्ति येऽन्वहं भक्त्या तेभ्यः केतुः प्रसीदति ॥ ॥ ७ ॥
  - कुळुक्थधान्ये विलिखेत् षट्कोणं मण्डलं शुभम्।
    पद्ममष्टदळं तत्र विलिखेच्च विधानतः ॥ ॥ ८ ॥
  - नीलं घटं च संस्थाप्य दिवाकरनिशाकरौ।
    केतुं च तत्र निक्षिप्य पूजयित्वा विधानतः ॥ ॥ ९ ॥
  - स्तोत्रमेतत्पठित्वा च ध्यायन् केतुं वरप्रदम्।
    ब्राह्मणं श्रोत्रियं शान्तं पूजयित्वा कुटुम्बिनम् ॥ ॥१०॥
  - केतोः कराळवक्त्रस्य प्रतिमां वस्त्रसंयुताम्।
    कुम्भादिभिश्च संयुक्तां चित्रातारे प्रदापयेत् ॥ ॥ ११॥
  - दानेनानेन सुप्रीतः केतुः स्यात्तस्य सौख्यदः।
    वत्सरं प्रयता भूत्वा पूजयित्वा विधानतः ॥ ॥१२॥
  - मूलमष्टोत्तरशतं ये जपन्ति नरोत्तमाः।
    तेषां केतुप्रसादेन न कदाचिद्भयं भवेत् ॥ ॥१३॥

॥ इति श्री केतु स्तोत्रम् सम्पूर्णम् ॥

॥ केतुर्पंचविंशति नाम स्तोत्रम् ॥

- **विनियोग** अस्य श्रीकेतु पंच विंशति नाम स्तोत्रस्य । मधुपछन्द: ऋषिः । गायत्री छन्दो: । केतुर्देवता । केतु प्रीत्यर्थे पाठे विनियोगः ।

- **केतु: काल: कलयिता धूम्रकेतुर्विवर्णक: ।**
  लोककेतुर्महाकेतु: सर्वकेतुर्भयप्रद: ॥ ॥ १ ॥

- **रौद्रो रूद्रप्रियो रूद्र: क्रूरकर्मा सुगन्धधृक् ।**
  पलास-धूम-संकाशश्चित्रयज्ञोपवीतधृक् ॥ ॥ २ ॥

- **तारागणविमर्दी च जैमिनेयो ग्रहाधिप: ।**
  पंचविंशति नामानि केतुर्य: सततं पठेत् ॥ ॥ ३ ॥

- **तस्य नश्यंति बाधाश्च सर्वा: केतु प्रसादत: ।**
  धन-धान्य पशूनां च भवेद् वृद्धिर्न संशय: ॥ ॥ ४ ॥

॥ इति श्री स्कन्द-पूराणे केतु पंचविंशति नाम स्तोत्रम् सम्पूर्णम् ॥

॥ श्री केतु अष्टोत्तरशत नामावली ॥

1. ॐ केतवे नमः।
2. ॐ स्थूलशिरसे नमः।
3. ॐ शिरोमात्राय नमः।
4. ॐ ध्वजाकृतये नमः।
5. ॐ नवग्रहयुताय नमः।
6. ॐ सिंहिकासुरीगर्भसम्भवाय नमः।
7. ॐ महाभीतिकराय नमः।
8. ॐ चित्रवर्णाय नमः।
9. ॐ श्रीपिङ्गलाक्षकाय नमः।
10. ॐ फुल्लधूम्रसङ्काषाय नमः।
11. ॐ तीक्ष्णदंष्ट्राय नमः।
12. ॐ महोदराय नमः।
13. ॐ रक्तनेत्राय नमः।
14. ॐ चित्रकारिणे नमः।
15. ॐ तीव्रकोपाय नमः।
16. ॐ महासुराय नमः।
17. ॐ क्रूरकण्ठाय नमः।
18. ॐ क्रोधनिधये नमः।
19. ॐ छायाग्रहविशेषकाय नमः।
20. ॐ अन्त्यग्रहाय नमः।
21. ॐ महाशीर्षाय नमः।
22. ॐ सूर्यारये नमः।
23. ॐ पुष्पवद्ग्राहिणे नमः।
24. ॐ वरहस्ताय नमः।
25. ॐ गदापाणये नमः।
26. ॐ चित्रवस्त्रधराय नमः।
27. ॐ चित्रध्वजपताकाय नमः।
28. ॐ घोराय नमः।
29. ॐ चित्ररथाय नमः।
30. ॐ शिखिने नमः।
31. ॐ कुलुत्थभक्षकाय नमः।
32. ॐ वैडूर्याभरणाय नमः।
33. ॐ उत्पातजनकाय नमः।
34. ॐ शुक्रमित्राय नमः।
35. ॐ मन्दसखाय नमः।
36. ॐ गदाधराय नमः।
37. ॐ नाकपतये नमः।
38. ॐ अन्तर्वेदीश्वराय नमः।
39. ॐ जैमिनिगोत्रजाय नमः।
40. ॐ चित्रगुप्तात्मने नमः।
41. ॐ दक्षिणामुखाय नमः।
42. ॐ मुकुन्दवरपात्राय नमः।
43. ॐ महासुरकुलोद्भवाय नमः।
44. ॐ घनवर्णाय नमः।
45. ॐ लम्बदेवाय नमः।
46. ॐ मृत्युपुत्राय नमः।
47. ॐ उत्पातरूपधारिणे नमः।
48. ॐ अदृश्याय नमः।
49. ॐ कालाग्निसन्निभाय नमः।
50. ॐ नृपीडाय नमः।
51. ॐ ग्रहकारिणे नमः।
52. ॐ सर्वोपद्रवकारकाय नमः।
53. ॐ चित्रप्रसूताय नमः।
54. ॐ अनलाय नमः।
55. ॐ सर्वव्याधिविनाशकाय नमः।
56. ॐ अपसव्यप्रचारिणे नमः।
57. ॐ नवमे पापदायकाय नमः।
58. ॐ पञ्चमे शोकदाय नमः।
59. ॐ उपरागखेचराय नमः।
60. ॐ अतिपुरुषकर्मणे नमः।
61. ॐ तुरीये सुखप्रदाय नमः।
62. ॐ तृतीये वैरदाय नमः।
63. ॐ पापग्रहाय नमः।
64. ॐ स्फोटककारकाय नमः।
65. ॐ प्राणनाथाय नमः।
66. ॐ पञ्चमे श्रमकारकाय नमः।
67. ॐ द्वितीयेऽस्फुटवग्दात्रे नमः।
68. ॐ विषाकुलितवक्त्रकाय नमः।
69. ॐ कामरूपिणे नमः।
70. ॐ सिंहदन्ताय नमः।
71. ॐ कुशेध्मप्रियाय नमः।
72. ॐ चतुर्थे मातृनाशाय नमः।
73. ॐ नवमे पितृनाशकाय नमः।
74. ॐ अन्त्ये वैरप्रदाय नमः।
75. ॐ सुतानन्दन्निधनकाय नमः।
76. ॐ सर्पाक्षिजाताय नमः।
77. ॐ अनङ्गाय नमः।
78. ॐ कर्मराश्युद्भवाय नमः।
79. ॐ उपान्ते कीर्तिदाय नमः।
80. ॐ सप्तमे कलहप्रदाय नमः।
81. ॐ अष्टमे व्याधिकर्त्रे नमः।
82. ॐ धने बहुसुखप्रदाय नमः।
83. ॐ जनने रोगदाय नमः।
84. ॐ ऊर्ध्वमूर्धजाय नमः।
85. ॐ ग्रहनायकाय नमः।
86. ॐ पापदृष्टये नमः।
87. ॐ खेचराय नमः।
88. ॐ शाम्भवाय नमः।
89. ॐ अशेषपूजिताय नमः।
90. ॐ शाश्वताय नमः।
91. ॐ नटाय नमः।
92. ॐ शुभाशुभफलप्रदाय नमः।
93. ॐ धूम्राय नमः।
94. ॐ सुधापायिने नमः।
95. ॐ अजिताय नमः।
96. ॐ भक्तवत्सलाय नमः।
97. ॐ सिंहासनाय नमः।
98. ॐ केतुमूर्तये नमः।
99. ॐ रवीन्दुद्युतिनाशकाय नमः।
100. ॐ अमराय नमः।
101. ॐ पीडकाय नमः।
102. ॐ अमर्त्याय नमः।
103. ॐ विष्णुदृष्टाय नमः।
104. ॐ असुरेश्वराय नमः।
105. ॐ भक्तरक्षाय नमः।
106. ॐ वैचित्र्यकपटस्यन्दनाय नमः।
107. ॐ विचित्रफलदायिने नमः।
108. ॐ भक्ताभीष्टफलप्रदाय नमः।

॥ इति श्री केतु अष्टोत्तरशत नामावली सम्पूर्णम ॥

॥ ग्रहशान्ति पद्धति ॥

॥ विषय अनुक्रमाणिका ॥

1. पवित्र - आचमन 02
2. स्वस्ति वाचन 02
3. संकल्प 04
4. गणेश अम्बिका पूजनम् 06
5. कलश स्थापनम् 06
6. पुण्याह वाचनम् 09
7. अविघ्न पूजनम् 17
8. मण्डप स्थामनम् 18
9. षोडश मातृका पूजनम् 21
10. सप्तघृत मातृका (वसोर्धारा) पूजनम् 25
11. आयुष्य मंत्र 26
12. नान्दीमुख श्राद्ध प्रयोगः 27
13. आचार्य वरण 31
14. पंचगव्य करणम् 32
15. सर्वतोभद्र मण्डल पूजनम् 33
16. लिंगतोभद्र मण्डल पूजनम् 34
17. नवग्रह स्थापनम् (अधिदेवता, प्रत्यधिदेवता, दशदिकपाल, पंचलोकपाल) 35
18. वास्तु पीठ पूजनम् 40
19. क्षेत्रपाल पूजनम् 41
20. असंख्याता रुद्र कलश स्थापनम् 42
21. अग्नि स्थापनम् 48
22. कुश कण्डिका 53
23. आहुति मंत्र 55
24. पुरुषुक्त आहुति 56
25. श्री सुक्त आहुति 56
26. बलिदान (दशदिक्पाल, गणेश, नवग्रह, क्षेत्रपाल) 57
27. पूर्णाहुतिः 62
28. वसोर्धारा 63
29. आरती 64
30. पूष्पांजलि 64
31. प्रदक्षिणा 64
32. आचार्य दक्षिणा 65
33. उत्तर पूजनम् 65
34. अभिषेक 66
35. घृत छायापात्र दानम् 67
36. विसर्जन 67
37. प्रार्थना 67
38. आशिर्वाद 67

॥ पूजन प्रारम्भ ॥

- **पवित्रकरणम्** — ॐ अपवित्र: पवित्रो वा सर्वावस्थां गतोपि वा।
  य: स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तर: शुचि: ॥
- **आचम्य** — ॐ केशवाय नम:, ॐ माधवाय नम:, ॐ नारायणाय नम: आचमन करें
  ॐ हृषीकेशाय नम: हाथ धो लें
- **आसन शुद्धि** — ॐ पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता ।
  त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥
- **पवित्री (पैंती) धारणम्** — ॐ पवित्रे स्त्थो वैष्णव्यौ सवितुर्व: प्रसवऽ उत्त्पुनाम्यच्छिद्रेण पवित्रेण
  सूर्यस्य रश्मिभि:। तस्य ते पवित्रपते पवित्र पूतस्य यत्त्काम: पूनेतच्छकेयम् ॥
- **यज्ञोपवित** — ॐ यज्ञोपवीतं परमं पवित्रं प्रजा पतेर्यत सहजं पुरुस्तात।
  आयुष्यं मग्रंय प्रतिमुन्च शुभ्रं यज्ञोपवितम बलमस्तु तेज: ॥
- **शिखाबन्धन** — ॐ चिद्रूपिणि महामाये दिव्यतेज: समन्विते ।
  तिष्ठ देवि शिखामध्ये तेजोवृद्धि कुरुव मे ॥
- **तिलक** — चन्दनस्य महत्पुण्यम् पवित्रं पापनाशनम् ।
  आपदां हरते नित्यम् लक्ष्मी तिष्ठ सर्वदा ॥
  - ॐ स्वस्तिस्तु याऽ विनशाख्या धर्म कल्याण वृद्धिदा ।
    विनायक प्रिया नित्यं तां स्वस्तिं भो ब्रवंतु न: ॥
- **रक्षाबन्धनम्** — येन बद्धो बलि राजा, दानवेन्द्रो महाबल: ।
  तेन त्वाम् प्रतिबद्धनामि रक्षे माचल माचल: ॥
  - ॐ व्रतेन दीक्षामाप्नोति, दीक्षयाऽऽप्नोति दक्षिणाम् ।
    दक्षिणा श्रद्धामाप्नोति, श्रद्धया सत्यमाप्यते ॥
- **स्वस्ति-वाचन** — ॐ आ नो भद्रा: क्रतवो यन्तु विश्वतोऽ दब्धासो अपरीतास उद्भिद: ।
  देवा नो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे ॥१॥
  - देवानां भद्रा सुमतिर्ऋ जूयतान्देवाना ७ राति रभिनो निवर्तताम् ।
    देवाना ७ सख्यमुपसेदिमा वयन्देवान आयु: प्रतिरन्तु जीवसे ॥२॥
  - तान्पूर्वया निविदा हूमहेवयम् भगम् मित्रमदितिन् दक्षमस्त्रिधम् ।
    अर्यमणं वरुण ७ सोम मश्विना सरस्वती न: सुभगा मयस्करत् ॥३॥

- तन्नो वातो मयो भुवातु भेषजन् तन्माता पृथिवी तत्पिता द्यौः।
  तद् ग्रावाणः सोमसुतो मयो भुवस्तदश्विना शृणुतन् धिष्ण्या युवम् ॥४॥
- तमीशानन् जगतस् तस्थुषस्पतिन् धियञ्जिन्वमवसे हूमहे वयम्।
  पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥५॥
- स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
  स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥६॥
- पृषदश्वा मरुतः पृश्निमातरः शुभं य्यावानो विदथेषु जग्मयः।
  अग्निजिह्वा मनवः सूरचक्षसो विश्वेनो देवा अवसा गमन्निह ॥७॥
- भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्ये माक्षभिर्यजत्राः।
  स्थिरै रङ्गैस्तुष्टुवा ꣳ सस्तनूभिर् व्यशेमहि देवहितं यदायुः॥८॥
- शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसन् तनूनाम्।
  पुत्रासो यत्र पितरो भवन्ति मानो मध्यारी रिषतायुर्गन्तोः ॥९॥
- अदितिर्द्यौ रदितिरन्त रिक्षमदितिर् माता सपिता सपुत्रः।
  विश्वे देवा अदितिः पञ्चजना अदितिर् जातमदितिर् जनित्वम् ॥१०॥
- द्यौः शान्तिरन्तरिक्ष ꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः
  शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्व ꣳ
  शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥११॥
- यतो यतः समीहसे ततो नो अभयं कुरु।
  शन्नः कुरु प्रजाभ्योऽभयन्नः पशुभ्यः ॥१२॥

1. ॐ श्रीमन महागणाधीपतये नमः।
2. इष्ट देवताभ्यो नमः।
3. कुल देवताभ्यो नमः।
4. ग्राम देवताभ्यो नमः।
5. स्थान देवताभ्यो नमः।
6. वास्तु देवताभ्यो नमः।
7. वाणी हिरण्यगर्भाभ्याम नमः।
8. लक्ष्मी नारायणाभ्याम नमः।
9. उमा महेश्वराभ्याम नमः।
10. शची पुरंदाराभ्याम नमः।
11. मातृ पितृ चरण कमलेभ्यो नमः।
12. सर्वेभ्यो देवेभ्यो नमः।
13. सर्वेभ्यो ब्राह्मणेभ्यो नमः।
14. एतत कर्म प्रधान देवताभ्यो नमः।

- सुमुखश्चै एकदंतश्च कपिलो गजकर्णकः।
  लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥१॥
- धुम्रकेतुर् गणाध्यक्षो भालचन्द्रो गजाननः।
  द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥२॥

- विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा।
  संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥३॥
- शुक्लाम्बरधरम देवं शशि वर्णं चतुर्भुजम।
  प्रसन्नवदनं ध्यायेत सर्व विघ्नोपशान्तये ॥४॥
- अभीप्सितार्थ सिद्ध्यर्थं पूजितो यः सुरासुरैः।
  सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥५॥
- सर्वमंगल मांगल्ये शिवे सर्वार्थ साधिके।
  शरण्ये त्र्यम्बके गौरी नारायणी नमोस्तु ते ॥६॥
- सर्वदा सर्व कार्येषु नास्ति तेषाममंगलम।
  येषां हृदयस्थो भगवान मंगलायतनो हरीः ॥७॥
- तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव।
  विद्याबलं दैवबलम तदेव लक्ष्मीपते तेन्ध्री युगं स्मरामि ॥८॥
- लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।
  येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः॥९॥
- यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
  तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मम ॥१०॥
- अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपास्ते।
  तेषां नित्याभि युक्तानां योगक्षेमं वहाम्यहम् ॥११॥
- स्मृतेः सकल कल्याणं भाजनं यत्र जायते।
  पुरूषं तमजं नित्यं ब्रजामि शरणं हरिम् ॥१२॥
- सर्वेष्वारम्भकार्येषु त्रयस्त्रि भुवनेश्वराः।
  देवा दिशन्तु नः सिद्धिं ब्रह्मेशान जनार्दनः ॥१३॥
- विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम्।
  वन्द काशीं गुहां गंगां भवनीं मणिकर्णिकाम् ॥१४॥
- वक्रतुण्ड महाकाय सूर्य कोटि सम प्रभ।
  निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥१५॥

- **संकल्प**

ॐ विष्णुर्विष्णुर्विष्णुः, ॐ श्रीमद् भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणोऽह्नि द्वितीये परार्धे श्री श्वेतवाराहकल्पे वैवस्वतमन्वन्तरे, अष्टाविंशतितमे युगे कलियुगे, कलिप्रथम चरणे भूर्लोके जम्बुद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तैकदेशे अमुकक्षेत्रे, अमुकदेशे, अमुकनाम्नि नगरे, विक्रमशके, बौद्धावतारे, अमुक नाम संवत्सरे, श्रीसूर्यं अमुकायने, अमुक ऋतौ, मासानां मासोत्तमे मासे अमुक मासे, अमुक पक्षे, अमुक तिथौ, अमुक वासरे, अमुक नक्षत्रे, अमुक योगे, अमुक

करणे, अमुक राशि स्थिते चन्द्रे, अमुक राशि स्थिते सूर्ये, अमुक राशि स्थिते देवगुरौ, शेषेषु ग्रहेषु यथा यथा राशि स्थान स्थितेषु सत्सु एवं ग्रह गुणगण विशेषण विशिष्टायां शुभ पुण्य तिथौ अमुक गोत्रः, अमुक शर्मा (वर्मा, गुप्तः, दासः), अहं मम आत्मनः श्रुति-स्मृति-पुराणोक्तफल प्राप्त्यर्थं कायिक, वाचिक, मानसिक सांसर्गिक चतुर्विध पातक दुरितक्षयार्थं, धर्म, अर्थ, काम, मोक्ष चतुर्विध पूरुषार्थ प्राप्त्यर्थं श्री परमेश्वर प्रीत्यर्थं च ग्रहशान्तिमहं (अमुक शान्ति वा) करिष्ये।

पुनर्जलं गृहीत्वा - तदंगत्वेन स्वस्ति-पूण्याहवाचनम्, मातृकापूजनम्, वसोर्द्धारापूजनम्, आयुष्यमन्त्र जपम्, सांकल्पिकेन विधिना नान्दीश्राद्धम्, आचार्यादिवरणानि च करिष्ये।

पुनर्जलं गृहीत्वा- तत्रादौ विर्विघ्नता सिद्ध्यर्थं गणेश, अम्बिकयोः पूजनं करिष्ये।

- **पृथ्वी ध्यानम्**

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥

- ॐ मही द्यौः पृथिवी च न इमं यज्ञ मिमिक्षताम्। पिपृतान्नो भरीमभिः॥

- **रक्षा विधानम्**

अप सर्पन्तु ते भूता ये भूता भूमि संस्थिताः।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥

- अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्।
सर्वेषाम विरोधेन पूजा कर्म समारभे॥
- यदत्र संस्थितं भूतं स्थान माश्रित्य सर्वतः।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॥
- भूत प्रेत पिशाचाद्या अपक्रामन्तु राक्षसाः।
स्थानादस्माद् व्रजन्त्यन्यत्स्वी करोमि भुवं त्विमाम्॥
- भूतानि राक्षसा वापि येत्र तिष्ठन्ति केचन।
ते सर्व प्यपगच्छन्तु देव पूजां करोम्यहम्॥

- **दिप स्थापनम्**

शुभं करोतु कल्याणं आरोग्यं सुख सम्पदाम्।
मम बुद्धि विकाशाय दीपज्योतिर्नमोस्तुते॥

- दीपज्योतिः परब्रह्मः दीपज्योतिः जनार्दनः।
दीपोहरतिमे पापं दीपज्योतिर् नामोस्तुते॥

- **सूर्य नमस्कार**

ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च।
हिरण्येन सविता रथेना देवो याति भुवनानि पश्यन्॥

- **शंख पूजनम्**

ॐ पांचजन्याय विद्महे पावमानाय धीमहि। तन्नो शंखः प्रचोदयात्॥

- **त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करें।**
निर्मितः सर्वदेवैश्च पाञ्चजन्य नमोस्तुते॥

- **घंटी पूजनम्**

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम्।
घण्टा नाद प्रकुर्वीत पश्चात् घण्टां प्रपूजयेत॥

॥ गणेश अम्बिका पूजनम् ॥

- **गणेश ध्यानम्**

ॐ गणानां त्वा गणपति ७ हवामहे, प्रियाणान्त्वा प्रियपति ७ हवामहे, निधीनान्त्वा निधिपति ७ हवामहे, वसोः मम आहमजानि गर्भधम् मात्वमजासि गर्भधम्॥

- **गजाननम्भूत गणादि सेवितं कपित्थ जम्बू फलचारु भक्षणम्।**
उमासुतं शोक विनाश कारकं नमामि विघ्नेश्वरपादपंकजम्॥

ॐ भूर्भुवः स्वः सिद्धि बुद्धि सहिताय गणपतये नमः। गणपतिम् आ. स्था. पूजयामि।

- **गौरी ध्यानम्**

ॐ हेमद्रितनायां देवीं वरदां शंकरप्रियाम्।
लम्बोदरस्य जननीं गौरीं आवाह्याम्यहम्॥

- **ॐ अम्बे अम्बिके अम्बालिके नमानयति कश्चन।**
ससत्स्यश्वकः सुभद्रिकां काम्पीलवासिनीम्॥

ॐ भूर्भुवः स्वः गौर्यै नमः। गौरीम् आवाहयामि स्थापयामि पूजयामि।

- निचे दिये हुए मंत्रो के द्वारा पंचोपचार या षोडशोपचार पूजन करें।

॥ कलश पूजनम् ॥

- **भूमि स्पर्श**

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री।
पृथिवीं यच्छ पृथिवीं दृ ७ ह पृथिवीं माहि ७ सीः॥

- **ॐ विश्वाधाराऽसि धरणी शेषनागोपरि स्थिता।**
उद्धृतासि वराहेण कृष्णेन शतबाहुना॥ (भूमि का स्पर्श करें)

- **धान्य प्रक्षेप**

ॐ ओषधयः समवदन्त, सोमेन सह राज्ञा।
यस्मै कृणोति ब्राह्मणस्त ७ राजन् पारयामसि॥ (भूमि पर सप्तधान्य रखें)

- **कलश स्थापयेत्**

ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः पुनरुर्जा निवर्त्तस्व सा नः।
सहस्रं धुक्क्ष्वोरु धारा पयस्वती पुनर्म्मा विशताद्रयिः॥

- हेमरुप्यादि सम्भूतं ताम्रजं सुदृढं नवम्।
कलशं धौतकल्माषं छिद्रवर्ण विवर्जितम्॥ (सप्तधान्य पर कलश रखें)

- **कलशे जलपूरणम्**

ॐ वरुणस्योत्तम्भन मसि वरुणस्य स्कम्भ सर्जनीस्थो वरुण्स्य ऽऋत
सदन्यसि वरुणस्य ऽऋत सदनमसि वरुणस्य ऽऋत सदन मासीद ॥

- जीवनं सर्व जीवानां पावनं पावनात्मकम्।
बीजं सर्वौषधीनां च तज्जलं पूरयाम्यहम्॥ (कलश में जल डाल दें)

- **कलशे कुश प्रक्षेप**

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य
रश्मिभिः। तस्य ते पवित्रपते पवित्र पूतस्य यत्कामः पुने तच्छकेयम्॥

- **कलशे गन्ध प्रक्षेप**

ॐ त्वां गन्धर्वा ऽअखनँस्त्वा मिन्द्रस्त्वाँ बृहस्पतिः।
त्वामोषधे सोमो राजा विद्वान्यक्ष्माद मुच्च्यत॥

- केशरागरु कंकोलघन सार समन्वितम्।
मृगनाभियुतं गन्धं कलशे प्रक्षिपाम्यहम्॥ (कलश में चन्दन छोडें)

- **कलशे धान्य प्रक्षेप**

ॐ धान्यमसि धिनुहि देवान् प्राणाय त्वो दानाय त्वा व्यानाय त्वा।
दीर्घामनु प्रसितिमायुषे धान्देवो वः सविता हिरण्यपाणिः
प्रति गृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोऽसि॥

- धान्योषधी मनुष्याणां जीवनं परमं स्मृतम्।
निर्मिता ब्रह्मणा पूर्वं कलशे प्रक्षिपाम्यहम्॥ (कलश में सप्तधान्य छोडें)

- **कलशे सर्वौषधी प्रक्षेप**

ॐ या औषधीः पूर्वा जाता देवेभ्यस्त्रियुगम्पुरा।
मनैनु बभ्रूणामह ७ शतं धामानि सप्त च॥

- औषधयः सर्ववृक्षाणां तृणगुल्मलतास्तु याः।
दुर्वासर्षप संयुक्ताः कलशे प्रक्षिपाम्यहम्॥ (कलश में सर्वोषधि डालें)

- **कलशे दूर्वा प्रक्षेप**

ॐ काण्डात् काण्डात् प्रोहन्ती परुषः परुषस्परि।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च॥

- दूर्वेह्यमृत सम्पन्ने शतमूले शतांकुरे।
शतं पातक संहन्त्री कलशे प्रक्षिपाम्यहम्॥ (कलश में दुर्वा छोडें)

- **कलशे आम्रपल्लव प्रक्षेप** ॐ अश्वत्थे वो निषदनं पर्णो वो वसतिष्कृता ।
  गोभाजऽ इत्किलासथ यत्सनवथ पूरुषम् ॥ (कलश में आम का पत्ता रखें)

- **कलशे सप्तमृत्तिका प्रक्षेप** ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ॥

- **कलशे पूगीफलं प्रक्षेप** ॐ या फलिनीर्या अफला अपुष्पा याश्च पुष्पिणी ।
  बृहस्पति प्रसूतास्ता नो मुञ्चन्त्व ७ हसः ॥ (कलश में सोपारी रखें)

- **कलशे पंचरत्न प्रक्षेप** ॐ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥

- **कलशे हिरण्य प्रक्षेप** ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक ऽआसीत ।
  स दाधार पृथ्वीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
  - हिरण्य गर्भ गर्भस्थं हेमबीजं विभावसोः ।
    अनन्त पुण्य फलदं कलशे प्रक्षिपाम्यहम् ॥ (कलश में दक्षिणा छोडें)

- **कलश में सूत्र लपेटे** ॐ सुजातो ज्योतिषा सह शर्म वरूथमा सदत्स्वः ।
  वासो अग्ने विश्वरूप ७ संव्ययस्व विभावसो ॥ (कलश में मौली लपेट दें)

- **कलश पर पूर्णपात्र रखें** ॐ पूर्णा दर्वि परापत सुपूर्णा पुनरापत ।
  वस्नेव विकृणावहा इषमूर्ज ७ शतक्रतो ॥ (कलश पर पूर्णपात्र रखें)

- **कलश पर नारीयल रखें** ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
  इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥ (पूर्णपात्र पर नारियल रखें)

- **कलश पर दीपक रखें** ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्योज्योतिर्ज्योतिः सूर्यः स्वाहा।
  अग्निवर्चो ज्योतिर्वर्चः स्वाहा सूर्योवर्चो ज्योतिर्वर्चः स्वाहा।
  ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥ (पूर्णपात्र के उपर दीपक रखें)
  - कहीं पर नारीयल की जगह दीपक रखा जाता है ।

- **कलश आवाहन** ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
  अहेडमानो वरुणेह बोध्युरुश ७ समा न आयुः प्र मोषीः॥
  - कलशस्य मुखे विष्णुः कंठे रुद्र समाश्रिताः ।
    मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृ गणाः स्मृताः ॥१॥
  - कुक्षौ तु सागरा सर्वे सप्तद्विपा वसुंधरा ।
    ऋग्वेदो यजुर्वेदः सामवेदो ह्यथर्वणाः ॥२॥

- **अंगैश्च सहिता सर्वे कलशन्तु समाश्रिता:।**
  अत्र गायत्री सावित्री शान्ति: पुष्टिकरी तथा ॥३॥
- **आयान्तु देवपूजार्थं दुरितक्षयकारका:, गंगे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धुकावेरि जलेऽस्मिन संनिधिं कुरु ॥४॥**
- अस्मिन कलशे वरुणं सांड्ग सपरिवारं सायुधं सशक्तिकमावाहयामि। ॐ भूभुर्व: स्व: भो वरुण ! इहागच्छ इह तिष्ठ स्थापयामि, पूजयामि मम पूजां गृहाण, ॐ अपां पतये वरुणाय नम:

- **कलश चतुर्दिक्षु चतुर्वेदान्पूजयेत्** (कलश के चारो तरफ कुंकुम एवं चावल लगा दें)

- **पूर्व** **ऋग्वेदाय नम: ।**
- **दक्षिण** **यजुर्वेदाय नम: ।**
- **पश्चिम** **सामवेदाय नम: ।**
- **उत्तर** **अथर्वेदाय नम: ।**
- **कलश के ऊपर** **ॐ अपाम्पतये वरुणाय नम: ।**

- निचे दिये हुए मंत्रो के द्वारा पंचोपचार या षोडशोपचार पूजन कर दें ।
- **अनया पूजया वरुणाद्यावाहित देवता: प्रीयन्तां न मम ।**

॥ पुण्याहवाचनम् ॥

- पुण्याहवाचन के लिए एक मिट्टी, ताँबे या चाँदी का कलश वरुण कलश के पास जल से भर कर स्थापित करे।
- वरुण कलश के पूजन के साथ इसका भी पूजन कर लेना चाहिए।

- **ब्राह्मण वरण**
  - **संकल्प** देशकालौ संकीर्त्य अमुक गोत्रो, अमुक शर्मा, अमुक कर्मणि सर्वाभ्युदय प्राप्तये एभिर्ब्राह्मणै: पुण्याहं वाचयिष्ये, तदंगतया ब्राह्मणानां पूजनं वरणं च करिष्ये।
    - **भुमि देवाग्र जन्मासि त्वं विप्र पुरुषोत्तम ।**
      प्रत्यक्षो यज्ञपुरुषो ह्यर्णोर्घोयं प्रतिगृह्यताम् ॥
  - **ब्राह्मण वरण** **ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।**
    ईश्वरीं सर्वभूतानां तामिहो पह्वये श्रियम् ॥
    - **नमोस्त्वनन्ताय सहस्त्र मूर्तये, सहस्त्रपादाक्षि शिरोरु बाहवे ।**
      सहस्त्र नाम्ने पुरुषाय शाश्वते, सहस्त्रकोटी युग धरिणे नम: ॥
  - **यजमान** एभिर्गन्धाक्षत पुष्प पूंगीफल द्रव्यै: अमुक कर्मणि सर्वाभ्युदय प्राप्तये पुण्याहवाचनार्थं ब्राह्मणं त्वामहं वृणे।

- **ब्राह्मण** — **वृतोस्मि**
- **ब्राह्मण ध्यान** — **ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विषीमतः सुरुचोव्वेन आवः।**
  स बुध्न्या उपमाऽ अस्य विष्ठाः शतश्च योनिम शतश्च व्विवः॥
- **वरुण प्रार्थना** — **ॐ पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक।**
  पुण्यावाचनं यावत् तावत् त्वं सुस्थिरो भव॥

▪ यजमान भूमि पर घुटना मोड कर कमल पुष्प के समान अपनी अञ्जलि में कलश को रखकर अपने सिर पर स्पर्श कर आशीर्वाद के लिए ब्राह्मणों से प्रार्थना करें।

- **यजमान** — **ॐ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च।**
  तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु॥ आशीर्वाद मांगे
- **ब्राह्मण** — **अस्तु दीर्घमायुः। अस्तु दीर्घमायुः। अस्तु दीर्घमायुः।**
- **यजमान** — **ॐ त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन्।**
  तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु इत भवन्तो ब्रुवन्तु॥
- **ब्राह्मण** — **पुण्यं पुण्याहं दीर्घमायुरस्तु।** दो बार सिर से कलश का स्पर्श कर रख दें
- **यजमान** — **ॐ अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम्।**
  ब्राह्मणानां करे न्यस्ताः शिवा आपो भवन्तु नः॥
  ॐ शिवा आपः सन्तु। (यजमान ब्राह्मणों के हाथों में जल दे।)
- **ब्राह्मण** — **सन्तु शिवा आपः।**
- **यजमान** — **लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे।**
  सा मे वसतु वै नित्यं सौमनस्यं सदास्तु मे॥
  सौमनस्यमस्तु। (ब्राह्मणों के हाथ में पुष्प दें।)
- **ब्राह्मण** — **अस्तु सौमनस्यम्।**
- **यजमान** — **अक्षतं चास्तु मे पुण्यं दीर्घमायुर्यशोबलम्।**
  यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम॥
  अक्षतं चारिष्टं चास्तु। (ब्राह्मणों के हाथ में चावल दें।)
- **ब्राह्मण** — **अस्त्वक्षतमरिष्टं चं।**
- **यजमान** — **गन्धाः पान्तु।** (ब्राह्मणों के हाथ में चन्दन दें।)
- **ब्राह्मण** — **सौमङ्गल्यं चास्तु।**

- **यजमान** **अक्षताः पान्तु ।** (ब्राह्मणों के हाथ में पुनः चावल दें ।)
- **ब्राह्मण** **आयुष्यमस्तु ।**

- **यजमान** **पुष्पाणि पान्तु ।** (ब्राह्मणों के हाथ में पुष्प दें ।)
- **ब्राह्मण** **सौश्रियमस्तु ।**

- **यजमान** **सफलताम्बूलानि पान्तु ।** (ब्राह्मणों के हाथ में सुपारी-पान दें ।)
- **ब्राह्मण** **ऐश्वर्यमस्तु ।**

- **यजमान** **दक्षिणाः पान्तु ।** **(ब्राह्मणों के हाथ में दक्षिणा दें ।)**
- **ब्राह्मण** **बहुदेयं चास्तु ।**

- **यजमान** **आपः पान्तु ।** (ब्राह्मणों के हाथ में पुनः जल दें ।)
- **ब्राह्मण** **स्वर्चितमस्तु ।**

- **यजमान** **दिर्घमायुः, शान्तिः, पुष्टिः, तुष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं बहुधनं चायुष्यं चास्तु ।** (हाथ जोड़कर)
- **ब्राह्मण** **अस्तु । ॐ दीर्घमायुः शान्तिः पुष्टिस्तुष्टिचास्तु ।**

- **यजमान** **यं कृत्वा सर्व वेद यज्ञ क्रिया करण कर्मारम्भाः शुभाः शोभनाः प्रवर्तन्ते, तमहमोङ्कारमादिं कृत्वा यजुराशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये । (अक्षत लेकर)**
- **ब्राह्मण** **वाच्यताम् ।**

▪ ऐसा कहकर निम्न मन्त्रोंका पाठ करे ....

- **ऋग्वेद मंत्रः** **ॐ द्रविणोदा द्रविण सस्तुरस्य द्रविणोदाः सनस्य प्रयंसत् ।**
द्रविणोदा वीरवती मिषन्नो द्रविणोदा रासते दीर्घमायुः ॥१॥

▪ **सविता पश्चातात् सविता पुरस्तात् सवितोत्तरात्तात सविता धरातात् ।**
सविता नः सुवतु सर्वतातिं सविता नां रासतान् दीर्घमायुः ॥२॥

▪ **नवो नवो भवति जायमानो ऽहान्कोतुरुषसामेत्यग्रम् ।**
भागं देवेभ्यो विद्धात्यायन्प्र चन्द्रमास्तिरते दीर्घमायुः ॥३॥

▪ **उच्चा दिवि दक्षिणावन्तो अस्तुर्ये अश्वदाः सह ते सूर्येण ।**
हिरण्यदा अमृतत्वं भजन्ते वासोदाः सोम प्रतिरन्त आयुः ॥४॥

- **यजुर्वेद मंत्रः**

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्ये माक्षभिर्यजत्राः ।
स्थिरै रङ्गैस्तुष्टुवा ७ सस्तनूभिर् व्यशेमहि देवहितं यदायुः॥८॥

- देवानां भद्रा सुमतिर्ऋ जूयतान्देवाना ७ राति रभिनो निवर्तताम् ।
देवाना ७ सख्यमुपसेदिमा वयन्देवान आयुः प्रतिरन्तु जीवसे ॥२॥
- दीर्घायुस्त ओषधे खनिता यस्मै च त्वा खनाम्यहम् ।
अथो त्वं दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥३॥

- **सामवेद मंत्रः**

ॐ देवो ३ वो द्रविणो दाः पूर्णा विवष्ट्वा सिचम् । ऊद्धा १ सिञ्चा २ । ध्वमुपवापृणध्वम् । आदिद्वोदे २ । व ऊहते । इडा २,३ भा ३,४,३ । ऊ २,३,४,५ इ । डा ॥१॥

- अद्यनो देव सवितः । ओ हो वा । इह श्रुधायि । प्रजावा २,३ त्सा । वीः सौभगाम् । परादू २,३ ष्वा ३ । हो वा ३ हा । प्रिय ७ सु २,३,४,५ वा ६,५,६ दक्षा ३ या २,३,४,५ ॥२॥

- **अथर्वेद मंत्रः**

धाता रातिः सवितेदं जुषन्तां प्रजापतिर् निधिपतिर्नोऽ अग्निः ।
त्वष्टा विष्णुः प्रजया संरराणो यजमानाय द्रविणं दधातु ॥१॥

- येन देवं सवितारं पति देवा अधारयन् ।
तेनेमम् ब्रह्मणस्पते परि राष्ट्राय धत्तन ॥२॥
- नवोनवो भवसि जयमानोऽ ह्वां केतुरुषसामेत्यग्रम् ।
भागं देवेभ्यो विदधात्यायन्प्र चन्द्रमास्तिरते दीर्घमायुः ॥३॥
- उच्चैर्घोषो दुन्दुभिः सन्त्वनायन् वानस्पत्यः सम्भृत उस्रियाभिः ।
वाचं क्षुणुवानो दमयन्तसपत्नान्त्सिंह इव जेष्यमभि षंस्तनीहि ॥४॥

- **विप्राः**

करोतु स्वस्ति ते ब्रह्मा स्वस्ति चाऽपि द्विजातयः ।
सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति सर्वदा ॥१॥

- ययातिर्नहुषश्चैव धुन्धुमारो भगीरथः ।
तुभ्यं राजर्षयः सर्वे स्वस्ति कुर्वन्तु ते सदा ॥२॥
- स्वस्ति तेऽस्तु द्विपादेभ्यश्चतुष्पादेभ्य एव च ।
स्वस्त्यस्त्वापादकेभ्यश्च सर्वेभ्यः स्वस्ति ते सदा ॥३॥
- स्वाहा स्वधा शची चैव स्वस्ति कुर्वंतु ते सदा ।
करोतु स्वस्ति वेदादिर्नित्यं तव महामखे ॥४॥
- लक्ष्मीररुन्धती चैव कुरुतां स्वस्ति तेऽनघ ।
असितो देवलश्चैव विश्वामित्र स्तथाङ्गिराः ॥५॥

- वसिष्ठः कश्यपश्चैव स्वस्ति कुर्वन्तु ते सदा।
  धाता विधाता लोकेशो दिशश्च सदिगीश्वराः ॥६॥
- स्वस्ति तेऽद्य प्रयच्छन्तु कार्तिकेयश्च षण्मुखः।
  विवस्वान् भगवान् स्वस्ति कतोतु तव सर्वदा ॥७॥
- दिग्गजाश्चैव चत्वारः क्षितिश्च गगनं ग्रहाः।
  अधस्ताद् धरणीं चाऽसौ नागो धारयते हि यः ॥
  शेषश्च पन्नग श्रेष्ठः स्वस्ति तुभ्यं प्रयच्छतु ॥८॥

- **यजमान** व्रत जप नियम तपः स्वाध्याय क्रतु शम दम दया दान विशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम्।
- **ब्राह्मण** समाहितमनसः स्मः।
- **यजमान** प्रसीदन्तु भवन्तः।
- **ब्राह्मण** प्रसन्नाः स्मः।

- इसके बाद यजमान पुण्याहवाचन वाले कलश को बायें हाथ में लेकर दाहिने हाथ से आम्र पल्लव या दूर्वा द्वारा प्रथम पात्र एवं द्वितीय पात्र में आगे के प्रत्येक मंत्र से जल छोडें। ब्राह्मण बोलते जाय।

- **प्रथम पात्र** ब्राह्मण हर वचन पर अस्तु कहता रेहे।

1. ॐ शान्तिरस्तु।
2. ॐ पुष्टिरस्तु।
3. ॐ तुष्टिरस्तु।
4. ॐ वृद्धिरस्तु।
5. ॐ अविघ्नमस्तु।
6. ॐ आयुष्यमस्तु।
7. ॐ आरोग्यमस्तु।
8. ॐ शिवमस्तु।
9. ॐ शिवं कर्मास्तु।
10. ॐ कर्म समृद्धिरस्तु।
11. ॐ धर्म समृद्धिरस्तु।
12. ॐ वेद समृद्धिरस्तु।
13. ॐ शास्त्र समृद्धिरस्तु।
14. ॐ धनधान्य समृद्धिरस्तु।
15. ॐ पुत्रपौत्र समृद्धिरस्तु।
16. ॐ इष्ट संपदस्तु

- **द्वितीय पात्र** ॐ अरिष्टनिरसनमस्तु। ॐ यत्पापं रोगोऽ शुभम कल्याणं तद् दूरे प्रतिहतमस्तु।

- **प्रथम पात्र**

1. ॐ यच्छ्रेयस्तदस्तु।
2. ॐ उत्तरे कर्मणि निर्विघ्नमस्तु।
3. ॐ उत्तरोत्तर महरहरभि वृद्धिरस्तु।
4. ॐ उत्तरोत्तराः क्रियाः शुभाः शोभनाः सम्पद्यन्ताम्।
5. ॐ तिथि करण मुहुर्त नक्षत्र ग्रह सम्पदस्तु।
6. ॐ तिथि करण मुहुर्त नक्षत्र ग्रह लग्नादि देवताः प्रीयन्ताम्।
7. ॐ तिथि करणे समुहुर्त सनक्षत्रे सग्रहे सलग्ने साधिदैवते प्रीयेताम्।

8. ॐ दुर्गा पांचाल्यौ प्रीयेताम्।
9. ॐ अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम्।
10. ॐ इंद्रपुरोगा मरुद्गणाः प्रीयन्ताम्।
11. ॐ वसिष्ठ पुरोगा ऋषिगणाः प्रीयन्ताम्।
12. ॐ माहेश्वरी पुरोगा उमा मातरः प्रीयन्ताम्।
13. ॐ अरुन्धति पुरोगा एकपत्न्यः प्रीयन्ताम्।
14. ॐ ब्रह्म पुरोगा सर्वे वेदाः प्रीयन्ताम्।
15. ॐ विष्णु पुरोगा सर्वे देवाः प्रीयन्ताम्।
16. ॐ ऋषय श्छंदास्याचार्या वेदा देवा यज्ञाश्च प्रीयन्ताम्।
17. ॐ ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम्।
18. ॐ श्रीसरस्वत्यौ प्रीयेताम्।
19. ॐ श्रद्धामेधे प्रीयेताम्।
20. ॐ भगवती कात्यायनी प्रीयेताम्।
21. ॐ भगवती माहेश्वरी प्रीयेताम्।
22. ॐ भगवती पुष्टिकरी प्रीयेताम्।
23. ॐ भगवती तुष्टिकरी प्रीयताम्।
24. ॐ भगवती ऋद्धिकरी प्रीयेताम्।
25. ॐ भगवती वृद्धिकरी प्रीयेताम्।
26. ॐ भगवन्तौ विघ्नविनायकौ प्रीयेताम्।
27. ॐ सर्वा:कुलदेवताः प्रीयन्ताम्।
28. ॐ सर्वा ग्रामदेवताः प्रीयन्ताम्।
29. ॐ सर्वा इष्टदेवताः प्रीयन्ताम् ।

- **द्वितीय पात्र**

1. ॐ हताश्च ब्रह्मद्विषः।
2. ॐ हताश्च परिपन्थिनः।
3. ॐ हताश्च विघ्नकर्तारः।
4. ॐ शत्रवः पराभवं यान्तु।
5. ॐ शाम्यन्तु घोराणि।
6. ॐ शाम्यन्तु पापानि।
7. ॐ शाम्यन्त्वीतयः।
8. ॐ शाम्यन्तूपद्रवाः।

- **प्रथम पात्र**

1. ॐ शुभानि वर्धन्ताम्।
2. ॐ शिवा आपः सन्तु।
3. ॐ शिवा ऋतवः सन्तु।
4. ॐ शिवा अग्नयः सन्तु।
5. ॐ शिवा आहुतयः संतु।
6. ॐ शिवा ओषधयः सन्तु।
7. ॐ शिवा वनस्पतयः संतु।
8. ॐ शिवा अतिथयः संतु।
9. ॐ अहोरात्रे शिवे स्त्याताम्।

- ॐ निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्॥

- **यजमान** ॐ शुक्रांगारक बुध बृहस्पति शनैश्चर राहु केतु सोम सहिता आदित्य पुरोगा सर्वे ग्रहाः प्रीयंताम्।

- ॐ भगवान् नारायणः प्रीयताम्।
- ॐ भगवान पर्जन्यः प्रीयताम्।
- ॐ भगवान स्वामी महासेनः प्रीयताम्।
- ॐ पुरोऽनुवाक्यया यत्पुण्यं तदस्तु।
- ॐ याज्यया यत्पुण्यं तदस्तु।
- ॐ वषट्कारेण यत्पुण्यं तदस्तु।
- ॐ प्रातः सूर्योदये यत्पुण्यं तदस्तु।

  - यजमान कलश को कलश के स्थान पर रखकर पहले पात्र में गिराये गये जल से मार्जन करे।
  - इसके बाद इस जलको घरमें चारों तरफ छिड़क दे।
  - द्वितीय पात्र में जो जल गिराया गया है, उसको घर से बाहर एकान्त स्थान में गिरा दे।
  - यजमान हाथ जोड़कर ब्राह्मणों से प्रार्थना करे –

- **यजमान** ॐ एतत् कल्याण युक्तं पुण्यं पुण्याहं वाचयिष्ये ।
- **ब्राह्मण** वाच्यताम् ।

- **यजमान** ॐ ब्राह्मं पुण्यमहर्यच्च सृष्ट्युत्पादनकारकम् ।
वेद वृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः ॥
भो ब्राह्मणाः । मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्य माणस्य
अमुक कर्मणः पुण्याहं भवन्तो ब्रुवन्तु ।
- **ब्राह्मण** ॐ पुण्याहम् । ॐ पुण्याहम् । ॐ पुण्याहम् ।
  - ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥

- **यजमान** ॐ पृथिव्या मुद्धृतायां तु यत्कल्याणं पुरा कृतम् ।
ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः ॥
भो ब्राह्मणाः । मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्य माणस्य
अमुक कर्मणः कल्याणं भवन्तो ब्रुवन्तु ।
- **ब्राह्मण** ॐ कल्याणम् । ॐ कल्याणम् । ॐ कल्याणम् ।
  - ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः । ब्रह्मराजन्याभ्या ᳪ
शूद्राय चार्याय च स्वाय चारणाय च । प्रियो देवानां दक्षिणायै दातुरिह
भूयासमयं मे कामः समृद्ध्यतामुप मादो नमतु ।

- **यजमान** ॐ सागरस्य तु या ऋद्धिर्महालक्ष्म्यादिभिः कृताः ।
सम्पूर्णा सुप्रभावा च तामृद्धिं प्रबुवन्तु नः ॥
भो ब्राह्मणाः । मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्य माणस्य
अमुक कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु ।
- **ब्राह्मण** ॐ कर्म ऋद्ध्यताम् । ॐ कर्म ऋद्ध्यताम् । ॐ कर्म ऋद्ध्यताम् ।
ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम ।
दिवं पृथिव्या अध्याऽरुहामाविदाम देवान्त्स्वर्ज्योतिः ॥

- **यजमान** ॐ स्वस्तिस्तु याऽविनाशाख्या पुण्य कल्याण वृद्धिदा ।
विनायक प्रिया नित्यं तां च स्वस्तिं ब्रुवन्तु नः ॥
भो ब्राह्मणाः । मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्य माणाय
अमुक कर्मणे स्वस्ति भवन्तो ब्रुवन्तु ।

- **ब्राह्मण** ॐ आयुष्मते स्वस्ति। ॐ आयुष्मते स्वस्ति। ॐ आयुष्मते स्वस्ति। ॐ स्वस्ति न इन्द्रो वृद्ध श्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥

- **यजमान** ॐ समुद्रमथनाज्जाता जगदानन्दकारिका।
हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः॥
भो ब्राह्मणाः। मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्य माणस्य अमुक कर्मणः श्रीरस्तु इति भवन्तो ब्रुवन्तु।

- **ब्राह्मण** ॐ अस्तु श्रीः। ॐ अस्तु श्रीः। ॐ अस्तु श्रीः।
  - ॐ श्रीश्चते लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणा मुम्मऽइषाण सर्वलोकं मऽइषाण॥

- **यजमान** ॐ मृकण्डु सूनोरायुर्यद् ध्रुवलोमशयोस्तथा।
आयुषा तेन संयुक्ता जीवेम शरदः शतम्॥

- **ब्राह्मण** ॐ शतं जीवन्तु भवन्तः। ॐ शतं जीवन्तु भवन्तः। ॐ शतं जीवन्तु भवन्तः।
  - ॐ शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसन् तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मानो मध्या री रिषतायुर्गन्तोः॥

- **यजमान** ॐ शिव गौरी विवाहे या या श्रीरामे नृपात्मजे।
धनदस्य गृहे या श्रीरस्माकं सास्तु सद्मनि॥

- **ब्राह्मण** ॐ अस्तु श्रीः। ॐ अस्तु श्रीः। ॐ अस्तु श्रीः।
  - ॐ मनसः काम माकूतिं वाचः सत्यमशीय।
पशूना ७ रूपमन्नस्य रसो यशः श्रीः श्रयताम् मयि स्वाहा॥

- **यजमान** प्रजापतिर्लोकपालो धाता ब्रह्मा च देवराट्।
भगवाञ्छाश्वतो नित्यं नो वै रक्षतु सर्वतः॥

- **ब्राह्मण** ॐ भगवान् प्रजापतिः प्रीयताम्। ॐ भगवान् प्रजापतिः प्रीयताम्। ॐ भगवान् प्रजापतिः प्रीयताम्।
  - ॐ प्रजापते न त्वदेतान्न्यन्यो विश्वा रूपाणि परिता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्त्वय ममुष्य पिता सावस्य पिता व्यय ७ स्याम पतयो रयीणाम् ७ स्वाहा॥

- **यजमान** — **आयुष्मते स्वस्तिमते यजमानाय दाशुषे ।**
  श्रिये दत्ताशिषः सन्तु ऋत्विग्भिर्वेदपारगैः ॥
  - **देवेन्द्रस्य यथा स्वस्ति यथा स्वस्तिगुरोर्गृहे ।**
    एकलिङ्गेः यथा स्वस्ति तथा स्वस्ति सदा मम ॥
- **ब्राह्मण** — **ॐ आयुष्मते स्वस्ति । ॐ आयुष्मते स्वस्ति । ॐ आयुष्मते स्वस्ति ।**
  - **ॐ प्रति पन्था मपद्महि स्वस्तिगामनेहसम् ।**
    येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥ ॐ पुण्याहवाचन समृद्धिरस्तु ॥
- **यजमान** — अस्मिन् पुण्याहवाचने न्यूनातिरिक्तो यो विधिरुप विष्ट ब्राह्मणानां वचनात् श्रीमहागणपति प्रसादाच्च परिपूर्णोऽस्तु ।
- **दक्षिणाका संकल्प** — कृतस्य पुण्याह वाचन कर्मणः समृद्ध्यर्थं पुण्याह वाचकेभ्यो ब्राह्मणेभ्य इमां दक्षिणां विभज्य दातु मह मुत्सृजे ।
- **ब्राह्मण** — **ॐ स्वस्ति ।**

॥ अविघ्न पूजन ॥

- **अविघ्नो मण्डपश्चैव मातृणां पूजनं सकृत् ।**
  वैश्वदेवं वसोर्द्धारा नान्दी श्राद्ध मतः परम् ॥

- अविघ्न (गणेश) पूजन तथा स्थापन – विवाह, यज्ञोपवीत, मुण्डन, और सीमन्त संस्कार में ही होता है ।
- एक मिट्टी के पियाले में चावल भर कर उसपर हल्दी से अष्टदल बनाकर उस पर एक सुपारी मौली से लपेटकर रखे और षड्विनायक का पंचोपचार या षोडशोपचार पूजन करें ।

- **आवाहन**

1.	ॐ मोदाय नमः	मोदम् आ. स्था. पू.	4.	ॐ दुर्मुखाय नमः	दुर्मुखम् आ. स्था. पू.
2.	ॐ प्रमोदाय नमः	प्रमोदम् आ. स्था. पू.	5.	ॐ अविघ्नाय नमः	अविघ्नम् आ. स्था. पू.
3.	ॐ सुमुखाय नमः	सुमुखम आ. स्था. पू.	6.	ॐ विघ्नहर्त्रे नमः	विघ्नहर्तारम आ. स्था. पू.

- **प्रार्थना** — **ॐ मोदश्च प्रमोदश्च सुमुखो दुर्मुखस्तथा ।**
  अविघ्नो विघ्न हर्ता च षडैते विघ्ननायकाः ॥
  अनया पूजया षड्विनायक प्रीयन्ताम् न मम् ।

॥ मण्डप पूजनम् ॥

- **संकल्प** अमुक याग कर्मणि मण्डपाधिष्ठातृ देवता स्थापनं पूजनं च करिष्ये ।
  - पंचोपचार स्तम्भ कि पूजा करें ।

1. **ब्रह्माणम्** मध्यवेदी इशान कोणे रक्त वर्ण स्तम्भे
   - **ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद् विसीमतः सुरुचोव्वेन आवः ।**
     स बुध्न्या उपमाऽ अस्य विष्ठाः सतश्च योनिम सतश्चव्विवः ॥
   - **हंसपृष्ठ समारुढ देवता गण सेवितः ।**
     आगच्छ भगवन् ब्रह्मन् प्रथम स्तम्भ संस्थितः ॥

2. **विष्णुम्** आग्नेय कोणे कृष्ण वर्ण स्तम्भे
   - **ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढ़मष्य पा ७ सुरे स्वाहा ॥**
   - **गरुडञ्च समारुढ लक्ष्मी गण समायुतम् ।**
     आगच्छ भगवन् विष्णो द्वितीय स्तम्भ संस्थितः ॥

3. **शंकरम्** नैर्ऋत्य कोणे श्वेत वर्ण स्तम्भे
   - **ॐ नमस्ते रुद्रमन्यव उतोत इषवे नमः बाहुभ्यामुतते नमः ॥**
   - **गंगाधर महादेव पार्वती प्राणवल्लभ ।**
     आगच्छ भगवन् इश तृतीय स्तम्भ संस्थितः ॥

4. **इन्द्रम्** वायव्य कोणे पीत वर्ण स्तम्भे
   - **ॐ त्रातारमिन्द्र मवितारमिन्द्र ७ हवे हवे सुहव ७ शूरमिन्द्रम् ।**
     ह्वयामि शक्रम्पुरुहूतमिन्द्र ७ स्वस्तिनो मघवा धात्विन्द्रः।
   - **शचीपते महाबाहो सर्वाभरण भूषित ।**
     आगच्छ भगवन् इन्द्र चतुर्थस्य स्तम्भ संस्थितः ॥

5. **सूर्यम्** बाह्य इशान कोणे रक्त वर्ण स्तम्भे
   - **ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मत्र्यं च ।**
     हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥
   - **सप्त हस्त महाबाहो सप्तश्वेता श्ववाहना ।**
     आगच्छ भगवन् भानो पंचम स्तम्भ संस्थितः ॥

6. **गणेशम्** इशान पूर्व मध्ये श्वेत वर्ण स्तम्भे

- ॐ गणानांत्वा गणपति ७ हवामहे, प्रियाणां त्वा प्रियपति ७ हवामहे, निधीनां त्वा निधिपति ७ हवामहे। वसो: मम आहमजानि गर्भधम् त्वमजासि गर्भधम्॥
- लम्बोदर महाकाय गजवक्त्र चतुर्भुज।
  आगच्छ गणनाथस्त्वं षष्ठ स्तम्भ समाश्रित:॥

7. **यमम्** पूर्व अग्नयोर्मध्ये कृष्ण वर्ण स्तम्भे

- ॐ यमायत्त्वांगिरस्वते पितृमते स्वाहा।
  स्वाहा धर्माय स्वाहा धर्म षित्रे॥
- चित्रगुप्तादि संयुक्त दण्ड मुद्गर धारम।
  आगच्छ भगवन् धर्म सप्त स्तम्भ संस्थित:॥

8. **नागराजम्** अग्नये कोण कृष्ण वर्ण स्तम्भे

- ॐ नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु।
  येऽ अन्तरिक्षे ये दिवि तेभ्य: सर्पेभ्यो नम:॥
- आशीविषसमोपेत नाग कन्या विराजित।
  आगच्छ नागराजेन्द्र अष्टम स्तम्भ संस्थित:॥

9. **स्कन्दम्** अग्नि दक्षिणयोर्मध्य श्वेत वर्ण स्तम्भे

- ॐ यदक्रन्द: प्रथमं जायमानऽ उद्यन्त्समुद्रादुत वा पुरीषात्।
  श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन्॥
- मयूर वाहनं शक्तिपाणिं वै ब्रह्म चारिणम्।
  आगच्छ भगवन् स्कन्द नवम स्तम्भ संस्थित:॥

10. **वायुम्** दक्षिण नैर्ऋत्ययोर्मध्य धुम्र वर्ण स्तम्भे

- ॐ वायो ये ते सहस्त्रिणो रथासस्तेभिरा गहि।
  नियुत्वान्त्सोमपीतये॥
- ध्वज हस्तं गन्धवहं त्रैलोक्यान्तर चारिणम्।
  आगच्छ भगवन् वायो दशम स्तम्भ संस्थित:॥

11. **सोमम्** नैर्ऋत्ये पीत वर्ण स्तम्भे

- ॐ आप्यायस्व समेतु ते विश्वत: सोम वृष्ण्यम्। भवा वाजस्य संगथे॥
- सुधाकरं द्विजाधीशं त्रैलोक्य प्रीतिकारम्।
  आगच्छ भगवन् सोम एकादश स्तम्भ संस्थित:॥

12. **वरुणम्** नैर्ऋत्य पश्चिमयोर्मध्ये श्वेत वर्ण स्तम्भे

- ॐ इमं मे वरुण श्श्रुधी हवमद्याचमृडय ।
  त्वामवस्युराचके ॥
- कुम्भीरथ समारुढ मणिरत्न समन्वितम् ।
  आगच्छ देव वरुण द्वादश स्तम्भ संस्थितः ॥

13. **अष्टवसून्** पश्चिम वायव्यान्तराले श्वेत वर्ण स्तम्भे

- ॐ वसुभ्यस्त्वा रुद्रेभ्यस्त्वा दित्येभ्यस्त्वा संजानाथाम् द्यावापृथिवी मित्रा वरुणो त्वा वृष्ट्यावताम् । व्यन्तु वयोक्त ७ रिहाणा मरुतां पृषतीर्ग्गच्छ वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावह । चक्षुष्पा अग्नेसि चक्षुर्मे पाहि ॥
- अश्वारुढान् दिव्यवस्त्रान् सर्वालंकार भूषितान ।
  वसवो ष्टावा गच्छन्तु त्रयोदश समाश्रिताः ॥

14. **धनदम्** वायव्ये पीत वर्ण स्तम्भे

- ॐ सोमो धेनु ७ सोमो अर्वन्तमाशु ७ सोमो वीरं कर्मण्य ददाति ।
  सादन्यं विदत्थ्यं ७ सभेयं पितृश्रवणं यो ददाशदस्मै ॥
- दिव्यमालाम्बर धरं गदाहस्तं महाभुजम् ।
  आगच्छ यक्षराज त्वं शक्र स्तम्भे समाश्रितः ॥

15. **गुरुम्** उत्तर वायव्ययोरन्तराले पीत वर्ण स्तम्भे

- ॐ बृहस्पतेऽ अति यदर्यो अर्हाद्युमद् विभाति क्रतुमज्जनेषु ।
  यद्दीदयच्छवस ऋतप्रजा त तदस्मासु द्रविणं धेहि चित्रम् ॥
- शंकु च कलशं चैव पाणिभ्यां हेमविभ्रमम् ।
  बृहस्पते समागच्छ स्तम्भेस्मिन् सन्निधो भव ॥

16. **विश्वकर्माणं** उत्तर ईशानयोर्मध्य रक्त वर्ण स्तम्भे

- ॐ विश्वकर्मन हविषा वर्द्धनेन, त्रातारमिन्द्रम कृणोरवद्धयम ।
  तस्मै विशः समनमन्त, पूर्वीरयमुग्रो विहव्यो यथासत् ॥
- त्रैलोक्य सूत्र कर्त्तारम् द्विभुजम् विश्वदर्शितम् ।
  आगच्छ विश्वकर्मस्त्वं स्तम्भेस्मिन् सन्निधो भव ॥

॥ षोडश मातृका पूजनम् ॥

ॐ आत्मनःकुल-देवतायै नमः १७	ॐ लोकमातृभ्यो नमः १३	ॐ देवसायै नमः ९	ॐ मेधायै नमः ५
ॐ तुष्ट्यै नमः १६	ॐ मातृभ्यो नमः १२	ॐ जयायै नमः ८	ॐ शच्यै नमः १२
ॐ पुष्ट्यै नमः १५	ॐ स्वाहायै नमः ११	ॐ विजयायै नमः ७	ॐ पद्मायै नमः ३
ॐ धृत्यै नमः १४	ॐ स्वधायै नमः ११	ॐ सावित्र्यै नमः ७	ॐ गौर्य्यै नमः २ ॐ गणेशाय नमः १

ॐ अम्बे अम्बिके अम्बालिके नमानयति कश्चन ।
ससत्स्यश्वकः सुभद्रिकां काम्पीलवासिनीं ॥
गौरी पद्मा शची मेधा, सावित्री विजया जया ।
देवसेना स्वधा स्वाहा, मातरो लोकमातरः ॥
धृतिः पुष्टिस्तथा तुष्टिः, आत्मनः कुलदेवता ।
गणेशेनाधिका ह्येता, वृद्धौ पूज्याश्च षोडश ॥

1. **गणेश गौरी**
2. **पद्मा**
3. **शची**
4. **मेधा**
5. **सावित्री**
6. **विजया**
7. **जया**
8. **देव सेना**
9. **स्वधा**
10. **स्वाहा**
11. **मातरः**
12. **लोकमातरः**
13. **धृतिः**
14. **पुष्टिः**
15. **तुष्टिः**
16. **आत्मनः कुलदेवता**

1. **गणेशम्**

ॐ गणानांत्वा गणपति ७ हवामहे, प्रियाणां त्वा प्रियपति ७ हवामहे, निधीनां त्वा निधिपति ७ हवामहे । वसोः मम आहमजानि गर्भधम् त्वमजासि गर्भधम् ॥

- **ॐ समिपेमातृवर्गस्य सर्वविघ्न हरंसदा ।**
  त्रैलोक्य पूजितं देवं गणेशं स्थापयाम्यहम् ॥

ॐ भुर्भुवः स्वः गणपतये नमः । गणपतिम् आवाह्यामि स्थापयामि ।

1. **गौरीम्**

ॐ आयं गौः पृश्नीरक्रमीदसदन् मातरं पुरः। पितरं च प्रयन्त्स्वः ॥

- **हिमाद्रि तनयां देविं वरदां दिव्य शंकरप्रियाम् ।**
  लंबोदरस्य जननीं गौरिं आवाहयाम्यहम् ॥

ॐ भुर्भुवः स्वः गोर्यै नमः । गौरीम् आवाह्यामि स्थापयामि ।

2. **पद्माम्**

ॐ हिरण्यरूपा उषसो विरोक उभाविन्द्रा उदिथः सूर्यश्च ।
अरोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिञ्च मित्रोसिवरुणोसि ॥

- **सुवर्णाभांपद्महस्तांविष्णो र्वक्षस्थल स्थितां ।**
  त्र्यैलोक्य पूजितां देंविं पद्मां आवाहयाम्यहम् ॥

ॐ भुर्भुवः स्वः पद्मायै नमः । पद्माम् आवाह्यामि स्थापयामि ।

3. **शचीम्**

ॐ निवेशनः संगमनो वसूनां विश्वा रुपाभिचष्टे शचीभिः ।
देव इव सविता सत्यधर्म्मेन्द्रो न तस्थौ समरे पथीनाम् ॥

- **दिव्यरुपां विशालाक्षीं शुचिं कुंडल धारिणीम् ।**
रक्त मुक्ता द्यलंकारां शचि मावाहयाम्यहम् ॥

ॐ भुर्भुवः स्वः शच्यै नमः । शचीम् आवाह्यामि स्थापयामि ।

4. **मेधाम्**

ॐ मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥

- **विश्वेस्मिन् भूरिवरदां जरां निर्जर सेविताम् ।**
बुध्दि प्रबोधिनीं सौम्यां मेधामावाहयाम्यहम् ॥

ॐ भुर्भुवः स्वः मेधायै नमः मेधाम् आवाह्यामि स्थापयामि ।

5. **सावित्रीम्**

ॐ सविता त्वा सवाना ७ सुवतामग्निर्गृहपतीना ७ सोमो वनस्पतीनाम् ।
बृहस्पतिर्वाच इन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम् ॥

- **जगत्सृष्टिकरीं धात्रीं देवीं प्रणव मातृकाम् ।**
वेदगर्भां यज्ञमयीं सावित्रिं स्थामयाम्यहम् ॥

ॐ भुर्भुवः स्वः सावित्र्यै नमः । सावित्रीम् आवाह्यामि स्थापयामि ।

6. **विजयाम्**

ॐ विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँ २ ऽउत ।
अनेशन्नस्य या ऽइषव ऽआभुरस्य निषङ्गधिः ॥

- **सर्वास्त्र धारिणीं देवीं सर्वाभरण भूषिताम् ।**
सर्वदेव स्तुतां वन्द्या विजयां स्थापयाम्यहम् ॥

ॐ भुर्भुवः स्वः विजयायै नमः । विजयाम् आवाह्यामि स्थापयामि ।

7. **जयाम्**

ॐ बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य ।
इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्टे निनद्धो जयति प्रसूतः ॥

- **सुरारिमथिनीम् देवीं देवानामभयप्रदां ।**
त्रैलोक्य वंदिता शुभ्रां जया मावाहयाम्यहम् ॥

ॐ भुर्भुवः स्वः जयायै नमः । जयाम् आवाह्यामि स्थापयामि ।

8. **देवसेनाम्**

ॐ इन्द्र आसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेना नामभि भञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥

- **मयूर वाहनां देवीं खड्ग शक्ति धनुर्धराम ।**
आवाहयेद् देवसेनां तारकासुरमर्दिनीम् ॥

ॐ भुर्भुवः स्वः देवसेनायै नमः । देवसेनाम् आवाह्यामि स्थापयामि।

9. **स्वधाम्**

ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः, पितामहेभ्यः स्वधायिभ्यः स्वधा नमः, प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः। अक्षन् पितरोऽ मीमदन्त, पितरोती तृपन्त पितरः, पितरः शुन्धध्वम् ॥

- **अग्रजा सर्वदेवानां कव्यार्थं प्रतिष्ठिता ।**
  पितृणां तृप्तिदां देवीं स्वधा मावाहयाम्यहम् ॥

ॐ भुर्भुवः स्वः स्वधायै नमः । स्वधाम् आवाह्यामि स्थापयामि ।

10. **स्वाहाम्**

ॐ स्वाहा प्राणेभ्यः साधिपतिकेभ्यः। पृथिव्यै स्वाहाग्नये स्वाहान्तरिक्षाय स्वाहा वायवे स्वाहा । दिवे स्वाहा सूर्याय स्वाहा ॥

- **हविर्गृहित्वा सततं देवेभ्यो या प्रयच्छति ।**
  तां दिव्यरुपां वरदां स्वाहा मावाहयाम्यहम् ॥

ॐ भुर्भुवः स्वः स्वाहायै नमः । स्वाहाम् आवाह्यामि स्थापयामि ।

11. **मातृ**

ॐ आपो अस्मान् मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ।
विश्व ७ हि रिप्रं प्रवहन्ति देवीरुदिदाब्भ्यः शुचिरा पूतएमि ।
दीक्षातपसोस्तनूरसि तां त्वा शिवा ७ शग्मां परिदधे भद्रं वर्णम पुष्यन ॥

- **आवाहयाम्यहं मातृः सकला लोक पूजिताः ।**
  सर्वकल्याण रूपिण्यो वरदा दिव्य भूषिताः ॥

ॐ भुर्भुवः स्वः मातृभ्यो नमः । मातृम् आवाह्यामि स्थापयामि ।

12. **लोकमातृ**

ॐ रयिश्चमे रायश्चमे पुष्टंचमे पुष्टिश्चमे विभुचमे प्रभुचमे पूर्णंचमे पूर्णतरंचमे कुयवंचमे क्षितंचमे न्नंचमे क्षुच्चमे यज्ञेनकल्पन्ताम् ॥

- **आवाहये ल्लोकमातृर्जयंतीप्रमुखाःशुभाः ।**
  नानाभीष्टप्रदाः शांता सर्वलोकहिता वहाः ॥

ॐ भुर्भुवः स्वः लोकमातृभ्यो नमः । लोकमातृम् आवाह्यामि स्थापयामि

13. **धृतिम्**

ॐ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्न ऋते किंचन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ॥

- **सर्व हर्ष करीं देवीं भक्तानामभयप्रदाम् ।**
  हर्षोत्फुल्लास्य कमलां धृतिमावाहयाम्यहं ॥

ॐ भुर्भुवः स्वः धृत्यै नमः । धृतिम् आवाह्यामि स्थापयामि ।

14. पुष्टिम्

ॐ अङ्गान्यात्मन् भिषजा तदश्विनात्मानमङ्गैः समधात् सरस्वती ।
इन्द्रस्य रूप ७ शतमानमायुश्चन्द्रेण ज्योतिरमृतं दधानाः ॥

- पोषयन्तीं जगत्सर्वं स्वदेह प्रभवैर्नवैः ।
  शाकैः फलैर्जलैरत्नैः पुष्टिम् आवाहयाम्यहम् ॥

ॐ भुर्भुवः स्वः पुष्ट्यै नमः । पुष्टिम् आवाह्यामि स्थापयामि ।

15. तुष्टिम्

ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
सनः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥

- देवैराराधितां देवीं सदा सन्तोष कारिणीम् ।
  प्रसाद सुमुखीं देवीं तुष्टिम् आवाहयाम्यहम् ॥

ॐ भुर्भुवः स्वः तुष्ट्यै नमः । तुष्टिम् आवाह्यामि स्थापयामि ।

16. आत्मनः कुलदेवताम्

ॐ प्राणाय स्वाहा अपानाय स्वाहा व्यानाय स्वाहा ।
चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ॥

- पत्तने नगरे ग्रामे विपिने पर्वते गृहे ।
  नानाजाति कुलेशानीं दुर्गाम् आवाहयाम्यहम् ॥

ॐ भुर्भुवः स्वः आत्मनः कुलदेवतायै नमः आत्मनः कुलदेवताम् आवाह्यामि स्थापयामि ।

- षोडश मातृका का निचे दिये हुए मंत्रो के द्वारा पंचोपचार या षोडशोपचार पूजन करें ।

- प्रार्थना

आयुरारोग्यमैश्वर्यं ददध्वं मातरो मम ।
निर्विघ्नं सर्वकार्येषु कुरुध्वं सगणाधिपाः ॥

॥ सप्तघृत मातृका (वसोर्धारा) पूजनम् ॥

श्रीर्लक्ष्मीर्धृतिर्मेधा स्वाहा प्रज्ञा सरस्वती ।
माग्ङल्येषु प्रपूज्यन्ते सप्तैता घृतमातरः ॥
यदंगत्वेन भो देव्यः पूजिता विधिमार्गतः ।
कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम् ॥

1. **श्रीयम्**

ॐ मनसः काममाकुतिं वाचः सत्यमशीमहि ।
पशूनां ७ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ॥

- **ॐ सुवर्णाभां पद्महस्तां विष्णोर्वक्षस्थल स्थितां ।**
त्र्यैलोक्यवल्लभां देवी श्रियमावा हयाम्यहं ॥

ॐ भुर्भुवः स्वः श्रियै नमः। श्रियम् आवाह्यामि, स्थापयामि ।

2. **लक्ष्मीम्**

ॐश्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम ।
ईष्णन्निषाण मुं मइषाण सर्वलोकम् मइषाण ॥

- **ॐ शुभ लक्षण संपन्नां क्षीरसागर संभवां ।**
चंद्रस्यभगिनींसौम्यां लक्ष्मीमावाहयाम्यहं ॥

ॐ भुर्भुवः स्वः लक्ष्म्यै नमः। लक्ष्मीम् आवाह्यामि स्थापयामि ।

3. **धृतिम्**

ॐ भद्रं कर्णेभिः श्रृणुयाम देवाः । भद्रं पश्येमाक्षभिर्य्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवां ७ सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥

- **ॐ संसारधारणपरां धैर्य लक्षण संयुताम् ।**
सर्वसिद्धि करीं देवीं धृति मावाहयाम्यहं ॥

ॐ भुर्भुवः स्वः धृत्यै नमः । धृतिम् आवाह्यामि स्थापयामि ।

4. **मेधाम्**

ॐ मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥

- **ॐ सदसत्कार्यकरणंक्षमाबुद्धिविलासिनी ।**
मम कार्ये शुभकरी मेधा मावाहयाम्यहं ॥

ॐ भुर्भुवः स्वः मेधायै नमः । मेधाम् आवाह्यामि स्थापयामि ।

5. **स्वाहाम्**

ॐ प्राणाय स्वाहा अपानाय स्वाहा व्यानाय स्वाहा ।
चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ॥

- **ॐ सौम्यरुपांसुवर्णाभां विद्युज्वलित कुंडलाम् ।**
  जननीं पुष्टि करीणीं पुष्टिं मावा हयाम्यहं ॥
  ॐ भुर्भुवः स्वः स्वाहायै नमः । स्वाहाम् आवाह्यामि स्थापयामि ।

6. **प्रज्ञाम्** **ॐ आयं गौः पृश्रीरक्रमीदसदन् मातरं पुरः। पितरं च प्रयन्त्स्वः ॥**

- **ॐ भूतग्राम मिदंसर्व मजेन श्रद्धयाकृतम् ।**
  श्रद्धयाप्राप्यते सत्यं श्रद्धा मावाहयाम्यहं ॥
  ॐ भुर्भुवः स्वः प्रज्ञायै नमः । प्रज्ञम् आवाह्यामि स्थापयामि ।

7. **सरस्वतीम्** **ॐ पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥**

- **ॐ प्रणवस्यैव जननीं रसना ग्रस्थिता सदा ।**
  प्रगल्भ दात्रि चपलां वाणीं मावाहयाम्यहं ॥
  ॐ भुर्भुवः स्वः सरस्वत्यै नमः । सरस्वतीम् आवाह्यामि स्थापयामि ।

- सप्तघृत मातृका का निचे दिये हुए मंत्रो के द्वारा षोडशोपचार पूजन कर दें ।
- अनया पूजया वसोर्द्धारा देवताः प्रीयन्ताम न मम ।

॥ आयुष्य मंत्र ॥

- **ॐ यदा युष्यं चिरं देवाःसप्त कल्पान्त जीविषु ।**
  ददुस्तेना युषा युक्ता जिवेम शरदः शतम् ॥ १ ॥
- **दीर्घानागा नगा नद्यो अनन्ताः सप्तार्णवा दिशः ।**
  अनन्ते ना युषा तेन जीवेमः शरदः शतम् ॥ २ ॥
- **सत्यानि पंचभूतानि विनाश रहितानि च ।**
  अविनाश्या युषा ताद्वज्जीवेम् शरदः शतम् ॥ ३ ॥
- **ॐ आयुष्यं वर्चस्य ७ रायस्पोषमौद्भिदम् ।**
  इद ७ हिरण्यं वर्चस्वज्जैत्राया विशता दुमाम् ॥ ४ ॥
- **नतद्रक्षा ७ सि न पिशाचा स्तरन्ति देवानामोजः ।**
  प्रथमज ७ ह्येतत् यो विभर्ति दाक्षायण ७ हिरण्य ७
  स देवेषु कृणुते दीर्घमायुः । स मनुष्येषु कृणुते दीर्घमायुः ॥ ५ ॥
- **यदाबध्नन्दाक्षायणा हिरण्य ७ शतानीकाय सुमनस्यमानाः ।**
  तन्म आबध्नामि शत शारदा यायुष्मान् जरदष्टिर्यथासम् ॥ ६ ॥
  आयुष्यम् । आयुष्यम् । आयुष्यम् । आयुष्यमाभिवृद्धिरस्तु ॥

॥ आभ्युदयिक नान्दीमुख श्राद्धम् ॥

न स्वधाशर्मवर्मेति पितृनाम च चोच्चरेत् ।
न कर्म पितृतीर्थेन न कुशा द्विगुणीकृताः ॥
न तिलैर्नापसव्येन पित्र्यमन्त्र विवर्जितम् ।
अस्मच्छब्दं न कुर्वीत श्राद्धे नान्दीमुखे क्वचित् ॥

आचम्य प्राणानायम्य पवित्र धारणं के उपरान्त आभ्युदयिक नान्दीमुख षोडशमातृका के समक्ष पूर्वाभिमुख सव्य रहकर ही पितरों की अर्चना करने का विधान है।

- **संकल्पः** **ॐ विष्णुर्विष्णुर्विष्णु, ॐ नमः परमात्मने श्री पुराण पुरुषोत्तमस्य श्री विष्णोराज्ञया प्रवर्तमानस्याद्य श्री ब्रह्मणो द्वितीय परार्धे श्री श्वेत वराह कल्पे वैवस्वत् मन्वन्तरे अष्टाविंशति तमे कलियुगे कलि प्रथम चरणे जम्बुद्वीपे भारतवर्षे भरत खण्डे आर्यावन्तार्गत ब्रह्मावर्तेक देशे पुण्यप्रदेशे वर्तमाने पराभव नाम संवत्सरे दक्षिणायने अमुक ऋतौ, महामांगल्यप्रदे मासानाम् मासोत्तमे अमुक मासे, अमुक पक्षे, अमुक तिथौ, अमुक वासरे, अमुक नक्षत्रे, अमुक राशि स्थिते चन्द्रे, अमुक राशि स्थिते सूर्ये, अमुक राशि स्थिते देवगुरौ, अमुक गौत्रोत्पन्न, अमुक शर्मा / वर्मा अहं अमुक गोत्राणां मातृ-पितामहि- प्रपितामहि नाम अमुक देवीनां गायत्री सावित्री सरस्वती स्वरुपाणां नान्दीमुखीनां तथा अमुक गोत्राणां पितृ-पितामह-प्रपितामहानाम् अमुक देवानां वसु रुद्र आदित्य स्वरुपाणां नान्दीमुखानां तथा अमुक गोत्राणां मातामह-प्रमातामह-वृद्धप्रमातामहानाम् अमुक देवानां सपत्नीकानां अग्नि वरुण प्रजापति स्वरुपाणां नान्दीमुखानां प्रीतये ग्रहशान्ति कर्मणी निमित्तकं सत्यवसु संज्ञक विश्वेदेव पूर्वकं संक्षिप्त संकल्प विधिना नान्दीमुख श्राद्धमहं करिष्ये।**

- **पादप्रक्षालनम्** पादप्रक्षालन हेतु आसन पर जल छोड़े।

1. **ॐ सत्यवसु संज्ञकाः विश्वेदेवाः नांदिमुखः।**
   - ॐ भूर्भुवः स्वः वः पाद्यं पादावनेजनं पाद प्रक्षालनं वृध्दिः।
2. **ॐ मातृ-पितामहि-प्रपितामह्यः नांदिमुख्यः।**
   - ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पाद प्रक्षालनं वृध्दिः।
3. **ॐ पितृ-पितामह-प्रपितामहाः नांदिमुखाः।**
   - ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पाद प्रक्षालनं वृध्दिः।
4. **ॐ मातामह-प्रमातामह-वृद्धप्रमातामहाः सपत्निकाः नांदिमुखाः।**
   - ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पाद प्रक्षालनं वृध्दिः।

- **आसनदानम्** विश्वेदेवा तथा सभी पृतों के लिए आसन दें।

1. **ॐ सत्यवसु सज्ञका विश्वेदेवानां नादिमुखिनां।**
   - ॐ भूर्भुव: स्व: इदं व: आसनं सुखासनं नांदिश्राद्धे क्षणो क्रियेतां तथा प्राप्नोति भवान् प्राप्नुवाव: ॥
2. **ॐ मातृ-पितामहि- प्रपितामहिनां नांदिमुखिनां।**
   - ॐ भूर्भुव: स्व: इदं व: आसनं सुखासनं नांदिश्राद्धे क्षणो क्रियेतां तथा प्राप्नोति भवान् प्राप्नुवाव: ॥
3. **ॐ पितृ-पितामह-प्रपितामहानां नांदिमुखानां।**
   - ॐ भूर्भुव: स्व: इदं व: आसनं सुखासनं नांदिश्राद्धे क्षणो क्रियेतां तथा प्राप्नोति भवान् प्राप्नुवाव: ॥
4. **ॐ मातामह-प्रमातामह-वृद्धप्रमातामहानां सपत्नीकानां नांदिमुखानां।**
   - ॐ भूर्भुव: स्व: इदं व: आसनं सुखासनं नांदिश्राद्धे क्षणो क्रियेतां तथा प्राप्नोति भवान् प्राप्नुवाव: ॥

- **गंधादि दानम्** विश्वेदेवा तथा सभी पृतों के आसन पर जल, वस्त्र, यज्ञोपवित, चन्दन, अक्षत, पुष्प, धूप, दीप, नैवेद्य, पान, सोपारी, आदि अर्पण करें।

1. **ॐ सत्यवसु संज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नांदिमुखेभ्य:।**
   - ॐ भूर्भुव:स्व: इदं गंधाद्यर्चन: स्वाहा संपद्यतां वृद्धि: ॥
2. **ॐ मातृ-पितामहि-प्रपितामह्य: नांदिमुख्य:।**
   - ॐ भूर्भुव:स्व: इदं गंधाद्यर्चन: स्वाहा संपद्यतां वृद्धि: ॥
3. **ॐ पितृ-पितामह-प्रपितामहेभ्य: सपत्निकेभ्यो नांदिमुखेभ्य:।**
   - ॐ भूर्भुव:स्व: इदं गंधाद्यर्चन: स्वाहा संपद्यतां वृद्धि: ॥
4. **ॐ मातामह-प्रमातामह-वृद्धप्रमातामहेभ्य: सपत्निकेभ्यो नांदिमुखेभ्य:।**
   - ॐ भूर्भुव:स्व: इदं गंधाद्यर्चन: स्वाहा संपद्यतां वृद्धि: ॥

- **भोजन निष्क्रय दानम्** भोजन निष्क्रय निमित्त दक्षिणा दें।

1. **ॐ सत्यवसु संज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नांदिमुखेभ्य:।**
   - ॐ भूर्भुव: स्व: दास्यमाण ब्राह्मण युग्म भोजन पर्याप्तमन्नं तन्निष्क्रभुतं किंचित् हिरण्यदत्तं अमृत रुपेनस्वाहा संपद्यतां वृद्धि: ॥
2. **ॐ मातृ-पितामहि-प्रपितामहिभ्य: नांदिमुखिभ्य:।**
   - ॐ भूर्भुव: स्व: दास्यमाण ब्राह्मण युग्म भोजन पर्याप्तमन्नं तन्निष्क्रभुतं किंचित् हिरण्यदत्तं अमृत रुपेनस्वाहा संपद्यतां वृद्धि: ॥

3. **ॐ पितृ - पितामह - प्रपितामहेभ्य नांदिमुखेभ्य: ।**
   - ॐ भूर्भुव: स्व: दास्यमाण ब्राह्मण युग्म भोजन पर्याप्तमन्नं तन्निष्क्रभुतं किंचित् हिरण्यदत्तं अमृत रुपेनस्वाहा संपद्यतां वृद्धि: ॥

4. **ॐ मातामह - प्रमातामह - वृद्ध प्रमातामहेभ्य: सपत्निकेभ्यो नांदिमुखेभ्य: ।**
   - ॐ भूर्भुव: स्व: दास्यमाण ब्राह्मण युग्म भोजन पर्याप्तमन्नं तन्निष्क्रभुतं किंचित् हिरण्यदत्तं अमृत रुपेनस्वाहा संपद्यतां वृद्धि: ॥

- **सक्षिर यव जलानि दद्यात** दुध, जव, जल मिलाकर अर्पण करें।

1. **ॐ सत्यवसु संज्ञका: विश्वेदेवा: नांदिमुखा: ।** ॐ भूर्भुव:स्व:प्रीयंताम् ॥
2. **ॐ मातृ-पितामहि-प्रपिताहिभ्य: नांदिमुखिभ्य: ।** ॐ भूर्भुव:स्व:प्रीयंताम् ॥
3. **ॐ पितृ-पितामह-प्रपितामहा: नांदिमुखा: ।** ॐ भूर्भुव:स्व:प्रीयंताम् ॥
4. **ॐ मातामह-प्रमातामह-वृद्ध प्रमातामहा: सपत्नीका: नांदिमुखा: ।** ॐ भूर्भुव:स्व:प्रीयंताम् ॥

- **जलाऽक्षत पुष्प प्रदानम्** जल, पुष्प, चावल सभी आसनों पर चढायें।
  - **शिवा आप: सन्तु इति जलम् ।**
  - **सौमनस्यमस्तु इति पुष्पम् ।**
  - **अक्षतं चाऽरिष्टं चाऽस्तु इति अक्षतन् ।**

- **जलधारा दानम्** पितरों के लिए अँगुठे की ओर से पूर्वाग्र जलधारा दें।
  - **ॐ अघोरा: पितर: सन्तु: । इति पूर्वाग्रां चलधारां दद्यात् ।**

- **आशिष ग्रहणम्** यजमान हाथ जोड़कर प्राथना करें। ब्राह्मण कहें।

गोत्रंन्नोभि वर्धंतां ।	**अभिवर्धंतांवो गोत्रम् ॥**
दातारोनोभि वर्धंतां ।	**अभिवर्धंतांवो दातार: ॥**
संततिर्नोभि वर्धंतां ।	**अभिवर्धंतांव:संतति: ॥**
श्रद्धाचनोमाव्यगमत ।	**माव्यगमत्श्रद्धा ॥**
अन्नचनोबहुभवेत् ।	**भवतुवोबह्वन्नम् ॥**
अतिथिंश्चलभेमहि ।	**लभतांवोतिथय: ॥**
वेदाश्चनोभि वर्धंतां ।	**अभिवर्धंतावो वेदा: ॥**
मायाचिष्मकंचन ।	**मायाचध्वं कंचन ॥**
एता:आशिष:सत्या:संन्तु ।	**सन्त्वेता: सत्या: आशिष: ॥**

- **दक्षिणा दानम्** मुन्नका, आँवला, यव, अदरक, मूल, तथा दक्षिणा लेकर।

1. **ॐ सत्यवसु संज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नांदिमुखेभ्य:।**
    - ॐ भूर्भुव: स्व: कृतस्य नांदिश्राद्धस्य फलप्रतिष्ठा सिध्यर्थं द्राक्षामलक यवमुल फल निष्क्रयिणिं दक्षिणां दातुमह मुत्सृजे॥
2. **ॐ मातृ-पितामहि-प्रपितामहिभ्य: नांदिमुखिभ्य:।**
    - ॐ भूर्भुव: स्व: कृतस्य नांदिश्राद्धस्य फलप्रतिष्ठा सिध्यर्थं द्राक्षामलक यवमुल फल निष्क्रयिणिं दक्षिणां दातुमह मुत्सृजे॥
3. **ॐ पितृ-पितामह-प्रपितामहेभ्य: नांदिमुखेभ्य:।**
    - ॐ भूर्भुव: स्व: कृतस्य नांदिश्राद्धस्य फलप्रतिष्ठा सिध्यर्थं द्राक्षामलक यवमुल फल निष्क्रयिणिं दक्षिणां दातुमह मुत्सृजे॥
4. **ॐ मातामह-प्रमातामह-वृद्ध प्रमातामहेभ्य: सपत्निकेभ्यो नांदिमुखेभ्य:।**
    - ॐ भूर्भुव: स्व: कृतस्य नांदिश्राद्धस्य फलप्रतिष्ठा सिध्यर्थं द्राक्षामलक यवमुल फल निष्क्रयिणिं दक्षिणां दातुमह मुत्सृजे॥

- **यजमान** **ॐ उपास्मै गायता नरः पवमानायेन्दवे। अभि देवाँ इयक्षते।**
    - **ॐ इडामग्ने पुरुद ७ स ७ सनिं गो: शश्वत्तम ७ हव मानाय साध।**
      स्यान्न: सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे॥
    - **अनेन नांदिश्राद्धं संपन्नं।**
- **ब्राह्मण** **सुसंपन्न।**
- **प्रार्थना** **अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः। ग्रहध्यानरता नित्यं प्रसन्नमनसः सदा॥१॥**
    - **अदुष्ट भाषणाः सन्तु मा सन्तु परनिंदकाः। ममापि नियमा ह्येते भवन्तु भवतामपि॥२॥**
    - **ऋत्विजश्च यथा पूर्वं शक्रादीनां मखेऽभवन्। यूयं तथा मे भवत ऋत्विजो द्विसत्तमाः॥३॥**
    - **अस्मिन् कर्मणि मे विप्राः वृता गुरुमुखादयः। सावधानाः प्रकुर्वन्तु स्वं कर्म यथोदितम्॥४॥**
    - **अस्य यागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया। सुप्रसादैः प्रकर्तव्यं कमदं विधिपूर्वकम्॥५॥**
- **विसर्जनम्** **ॐ वाजे वाजेऽवत वाजिनो नो धनेषु विप्राऽअमृता ऽ ऋतज्ञा:।**
  अस्य मद्धव: पिबत मादयद्धवं तृप्ता यात पथिभिर्देवयानै:॥१॥
    - **ॐ आमावाजस्य प्रसवो जगम्या देमे द्यावापृथिवी विश्वरूपे।**
      आमागन्तां पितरा मातरा चामा सोमोऽमृतत्वेन गम्यात्॥२॥
    - आस्मिन् नांदिश्राद्धे न्युनातिरिक्तं नांदिमुख प्रसादात्परिपुर्णोस्तु। अस्तु परिपुर्णतां॥
    - अनेन नांदिश्राद्धाख्येन कर्मण: नंदमुख नंदपितर: प्रियंतां वृद्धि:॥

॥ आचार्य ब्रह्मादि ऋत्विग् वरणम् ॥

- **संकल्प** अद्य विशेषण विशिष्टायां शुभ पुण्य तिथौ अमुक गोत्रः अमुक नामाहम् अस्मिन् ग्रहशान्त्याख्ये कर्मणि शुभता सिध्यर्थम् आचार्य कर्म कर्तृत्वेन एभिः वरण सामग्रीभिः अमुक गोत्रं अमुक शर्माणं त्वाम वृणे ।

- **प्रार्थना** **ॐ आचार्यस्तु यथा स्वर्गे शक्रा दीनां बृहस्पतिः ।**
तथा त्वं मम यज्ञेस्मिन् आचार्यो भव सुव्रत ॥१॥
  - **यथा चतुर्मुखो ब्रह्मा सर्वलोक पितामहः ।**
  तथा त्वं मम यज्ञेस्मिन् ब्रह्मा भव द्विजोत्तम् ॥२॥
  - **अक्रोधनाः शौचपराः सततं ब्रह्मचारिभिः ।**
  ग्रहध्यानरताः नित्यं प्रसन्न मनसः सदा ॥३॥
  - **अदुष्टभाषणाः सन्तु मा सन्तु पर निन्दकाः ।**
  ममापि नियमा ह्येते भवन्तु भवतामपि ॥४॥
  - **ऋत्विजश्च यथा पूर्वं शक्रादीनामखेभवन् ।**
  यूयं तथामे भवत ऋत्विजो द्विज सत्तमः ॥५॥
  - **अस्मिन् कर्मणि ये विप्राः वृता गुरुमुखादयाः ।**
  सावधानाः प्रकुर्वन्तु स्वं स्वं कर्म यथोदितम् ॥६॥
  - **अस्य यागस्य निष्पत्तौ भवन्तो भ्यर्थिता मया ।**
  सुप्रसन्नैः प्रकर्तव्यं कर्मेदं विधिपूर्वकम् ॥७॥

॥ इति आचार्यादि वरणं समाप्तम् ॥

॥ पंचगव्य करणम् ॥

- एक मिट्टी के पात्र में गोमूत्र, गोबर, दूध, दही, घी पाचों चीजें कुश के द्वारा मिला दें।

- **गोमूत्र** — **ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥**
- **गोबर** — **ॐ मानस्तोके तनये मानऽ आयुषि मानो गोषु मानोऽ अश्वेषु रीरिषः। मानो व्वीरान् रुद्रभामिनो व्वधीर्ह विष्मन्तः सदमित्त्वा हवामहे ॥**
- **दूध** — **ॐ आप्याय स्व समेतु ते विश्वतः सोम वृष्ण्यम् भवा वाजस्य संगथे ॥**
- **दधि** — **ॐ दधि क्राव्णो अकारिषं जिष्णो रश्वस्य वाजिनः। सुरभिनो मुखाकरत् प्रण आयु ७ षितारिषत् ॥**
- **घी** — **ॐ तेजोसि शुक्र मस्य मृतमसि धाम नामासि प्रियं। देवानां मना धृष्टन्देव यजन मसि ॥**
- **कुशोदक** — **ॐ देवस्त्वा सवितुः प्रसवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥**
- **मंत्र** — निम्न मंत्रो के द्वारा कुश से पूजा स्थल, सामग्री एवं अपने उपर पंचगव्य छिडके।
  - **ॐ आपो हिष्ठा मयो भुवस्तान ऊर्जे दधातन महेरणाय चक्षसे।**
  - **यो वः शिव तमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः।**
  - **तस्मा अरंग मामवो यस्य क्षयाय जिन्वथ आपो जनय था च नः ॥**
  - **ॐ गो शरीरात् समुद्भूतं पंचगव्यं सुपावनम्। प्रोक्षणम् मण्डपस्यैव करिष्यामि सुरार्थकम् ॥**
  - **ॐ मण्डपाभ्यन्तरे देवाः सदेव्यः सगणाधिपः। तस्मात् संप्रोक्षणार्थेन सन्तुष्टा वरदाः सदा ॥**
  - **ॐ गोमूत्रं गोमयं क्षीरं दधि सर्पिः समन्वितम्। सर्वपाप विशुद्ध्यर्थम् पञ्चगव्यं पुनातु माम् ॥**
- **प्रार्थना** — **ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्वेवेदाः। स्वस्ति नस्ताक्ष्यों अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥**
  - देवाः आयान्तु। यातुधाना अपायान्तु। विष्णवे नमः। विष्णोः इमं सत्रं रक्षस्व।

॥ इति पंचगव्य करणम् ॥

॥ सर्वतोभद्र मण्डल देवतानां पूजनम् ॥

ॐ इमं रक्तवर्णन्तु तथाहस्त सुविस्तृतम् ।
इद्रध्वजं चालभामि महेन्द्राय सुप्रीतये ॥
अमुमिन्द्रध्वजं चित्रं सर्व विघ्न विनाशकम् ।
अस्मिन् मण्डप पार्श्वे तु स्थापयामि सुरार्चने ॥

2. ॐ ब्रह्मणे नमः
3. सोमाय नमः
4. ईशानाय नमः
5. इन्द्राय नमः
6. अग्नये नमः
7. यमाय नमः
8. नैर्ऋतये नमः
9. वरुणाय नमः
10. वायवे नमः
11. अष्टवसुभ्यो नमः
12. एकादश रुद्रेभ्यो नमः
13. द्वादशादित्येभ्यो नमः
14. अश्विभ्यां नमः
15. सपैतृक-विश्वेदेव नमः
16. सप्तयक्षेभ्यो नमः
17. भूतनागेभ्यो नमः
18. गन्धर्वाप्सेरोभ्यो नमः
19. स्कंदाय नमः
20. नन्दीश्वराय नमः
21. शूलमहाकालाभ्यां नमः
22. दक्षादि सप्तगणेभ्यो नमः
23. दुर्गायै नमः
24. विष्णवे नमः
25. स्वधायै नमः
26. मृत्यु रोगाभ्यां नमः
27. गणपतये नमः
28. अद्भ्यो नमः
29. मरुदभ्यो नमः
30. पृथिव्यै नमः
31. गंगादि नंदीभ्यो नमः
32. सप्तसागरेभ्यो नमः
33. मेरवे नमः
34. गदायै नमः
35. त्रिशूलाय नमः
36. वज्राय नमः
37. शक्तये नमः
38. दण्डाय नमः
39. खड्गाय नमः
40. पाशाय नमः
41. अंकुशाय नमः
42. गौतमाय नमः
43. भरद्वाजाय नमः
44. विश्वामित्राय नमः
45. कश्यपाय नमः
46. जमदग्नये नमः
47. वसिष्ठाय नमः
48. अत्रये नमः
49. अरुन्धत्यै नमः
50. ऐन्द्रै नमः
51. कौमार्यै नमः
52. ब्राह्मयै नमः
53. वाराह्यै नमः
54. चामुण्डायै नमः
55. वैष्णव्यै नमः
56. माहेश्वर्यै नमः
57. वैनायक्यै नमः

- ॐ भूभुर्वः स्वः सर्वतोभद्र मण्डल देवताभ्यो नमः । सर्वतोभद्रम् आवाह्यामि स्थापयामि पूजयामि ।
- सर्वतोभद्र मण्डल हेतु निचे दिये हुए मंत्रो के द्वारा पंचोपचार या षोडशोपचार पूजन करें ।

॥ लिंगतोभद्र मण्डल देवतानां पूजनम् ॥

1. ॐ असितांग भैरवाय नमः ।
2. ॐ रूरू भैरवाय नमः ।
3. ॐ चंड भैरवाय नमः ।
4. ॐ क्रोध भैरवाय नमः ।
5. ॐ उन्मत्त भैरवाय नमः ।
6. ॐ कपाल भैरवाय नमः ।
7. ॐ भीषण भैरवाय नमः ।
8. ॐ संहार भैरवाय नमः ।
9. ॐ भवाय नमः ।
10. ॐ सर्वाय नमः ।
11. ॐ पशुपतये नमः ।
12. ॐ ईशानाय नमः ।
13. ॐ रुद्राय नमः ।
14. ॐ उग्राय नमः ।
15. ॐ भीमाय नमः ।
16. ॐ महते नमः ।
17. ॐ अनन्ताय नमः ।
18. ॐ वासुकये नमः ।
19. ॐ तक्षकाय नमः ।
20. ॐ कुलिशाय नमः ।
21. ॐ कर्कोटकाय नमः ।
22. ॐ शंखपालाय नमः ।
23. ॐ कम्बलाय नमः ।
24. ॐ अश्वतराय नमः ।
25. ॐ शूलाय नमः ।
26. ॐ चन्द्रमौलिने नमः ।
27. ॐ चन्द्रमसे नमः ।
28. ॐ वृषभध्वजाय नमः ।
29. ॐ त्रिलोचनाय नमः ।
30. ॐ शक्तिधराय नमः ।
31. ॐ महेश्वराय नमः ।
32. ॐ शुलपाणये नमः ।

- ॐ भूभुर्वः स्वः लिंगतोभद्र मण्डल देवताभ्यो नमः । लिंगतोभद्रम् आवाह्यामि स्थापयामि पूजयामि ।
- लिंगतोभद्र मण्डल हेतु निचे दिये हुए मंत्रो के द्वारा पंचोपचार या षोडशोपचार पूजन करें ।

॥ इति लिंगतोभद्र देवता स्थापनं पूजनं च समाप्तम् ॥

प्रधान कलश स्थापनम्

- सर्वतोभद्र मण्डल के मध्य भाग में तांबे का कलश स्थापन करें ।

- **ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् ।
पिष्टतान्नो भरीमभिः ॥**

॥ नवग्रह मंण्डल पूजनम् ॥

ब्रह्मा मुरारी त्रिपुरान्तकारी
भानु शशि भूमि-सुतो बुधश्च ।
गुरुश्च शुक्र शनि राहु केतवः
सर्वे ग्रहा शांति करा भवंतु ॥

- **स्थापनक्रम** ईशान मण्डलं कृत्वा ग्रहाणां स्थापनं ततः । वृत मण्डल आदित्यमर्धचन्द्रं विशाकरम् ॥
  त्रिकोणं मंगलं चैव बुधं च धनुषाकृतिम् । गुरुमष्टदलं प्रोक्तं चतुष्कोणं च भार्गवम् ॥
  नराकृतिं शनिं विन्द्याद्राहुं च मकराकृतिम् । केतुं खड्गसमं ज्ञेयं ग्रहमण्डलके शुभा ॥

- **प्रकारान्तरम्** वृतमण्डलमादित्यं चतुरस्त्रं निशाकरम् । त्रिकोणं मंगलं चैव बुधं वै बाण सन्निभम् ॥
  गुरवे पट्टिशाकारं पचंकाणं भृगुं तथा । मन्दे च धनुषाकारं सुर्पाकारं तु राहवे ॥

१. सूर्यम् मण्डल के मध्य में लकडी - मदार फल - द्राक्ष

- **ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मत्र्यं च ।**
  हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥
- **जपा कुसुम संकाशं काश्यपेयं महाद्युतिम् ।**
  तमोऽरिं सत्र पापघ्नं प्रणतोऽस्मि दिवाकरम् ॥

ॐ भूर्भुवः स्वः कलिंगदेशोद्भव काश्यपस गोत्र रक्त वर्ण भो सूर्य । इहागच्छ । इहतिष्ठ सूर्याय नमः । सूर्यम् आवाहयामि, स्थापयामि, पूजयामि ।

२. चन्द्रम् मण्डल के अग्निकोण में लकडी - पलास फल - गन्ना

- **ॐ इमं देवाऽअसपत्न ७ सुवध्वं महते क्षत्राय महते ज्यैष्ठयाय महते जानराज्या येन्द्रस्येन्द्रियाय । इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोमी राजा सोमोस्माकं ब्राह्मणाना ७ राजा ॥**
- **दधि शंख तुषाराभं क्षीरोदार्णव संभवम् ।**
  नमामि शशिनं सोम शम्भोर्मुकुटभूषणम् ॥

ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयस गोत्र शुक्ल वर्ण भो चन्द्र । इहागच्छ । इहतिष्ठ चन्द्रमसे नमः । चन्द्रमसम् आवाहयामि, स्थापयामि, पूजयामि ।

३. **भौमम्** मण्डल के दक्षिण में लकडी - खैर फल - सोपारी

- **ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।**
  अपा ७ रेता ७ सि जिन्वति ॥
- **धरणी गर्भसंभूतं विद्युत्कान्ति समप्रभम् ।**
  कुमारं शक्ति हस्तं च मंगलं प्रणमाम्यहम् ॥

ॐ भूर्भुवः स्वः अवन्तिकापुरोद्भव भरद्वाजस गोत्र रक्त वर्ण भो भौम । इहागच्छ । इहतिष्ठ भौमाय नमः । भौमम् आवाहयामि, स्थापयामि, पूजयामि ।

४. **बुधम्** मण्डल के ईशान कोण में लकडी - चिचडी फल - नारंगी

- **ॐ उद्बुध्य स्वाग्ने प्रति जागृहि त्वमिष्टा पूर्ते स ७ सृजेथा मयं च ।**
  अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत ॥
- **प्रियंगु कलिका श्यामं रुपेण प्रतिमं बुधम् ।**
  सौम्यं सौम्य गुणोपेतं तं बुधं प्रणमाम्यहम् ॥

ॐ भूर्भुवः स्वः मगधदेशोद्भव आत्रेयस गोत्र हरित वर्ण भो बुध । इहागच्छ । इहतिष्ठ बुधाय नमः । बुधम् आवाहयामि, स्थापयामि, पूजयामि ।

५. **बृहस्पतिम्** मण्डल के उत्तर में लकडी - पीपल फल - निम्बु

- **ॐ बृहस्पतेऽ अति यदर्यो अर्हाद्युमद् विभाति क्रतुमज्जनेषु ।**
  यद्दीदयच्छवस ऋतप्रजा त तदस्मासु द्रविणं धेहि चित्रम् ॥
- **देवानां च ऋषीणां च गुरुं कांचन सन्निभम् ।**
  बुद्धिभूतं त्रिलोकेशं तन्नमामि बृहस्पतिम् ॥

ॐ भूर्भुवः स्वः सिन्धुदेशोद्भव अंगिरस गोत्र पीत वर्ण भो बृहस्पते । इहागच्छ । इहतिष्ठ बृहस्पतये नमः । बृहस्मतिम् आवाहयामि, स्थापयामि, पूजयामि ।

६. **शुक्रम्** मण्डल के पूर्व में लकडी - गूलर फल - बीजोरु

- **ॐ अन्नात् परिस्त्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमम्प्रजापतिः ।**
  ऋतेन सत्य मिन्द्रियं विपान ७ शुक्र मन्धस इन्द्रस्येन्द्रिय मिदं पयोऽमृतं मधु ॥
- **हिम कुन्दमृणालाभं दैत्यानां परमं गुरुम् ।**
  सर्वशास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहम् ॥

ॐ भूर्भुवः स्वः भोजकटदेशोद्भव भार्गवस गोत्र शुक्ल वर्ण भो शुक्र । इहागच्छ । इहतिष्ठ शुक्राय नमः । शुक्रम् आवाहयामि, स्थापयामि, पूजयामि ।

७. शनिम् मण्डल के पश्चिम में लकडी - शमी फल - कमल गट्टा

- **ॐ शन्नो देवी रभिष्टय आपो भवन्तु पीतये। शंय्यो रभि स्त्रवन्तु नः॥**
- **नीलांजनसमाभासं रविपुत्रं यमाग्रजं।**
  छाया मार्तण्ड संभूतं तन्नमामि शनैश्चरम्॥
  ॐ भूर्भुवः स्वः सौराष्ट्र देशोद्भव काश्यपस गोत्र कृष्ण वर्ण भो शनैश्चर। इहागच्छ। इहतिष्ठ शनैश्चराय नमः। शनैश्चरम् आवाहयामि, स्थापयामि, पूजयामि।

८. राहुम् मण्डल के नैर्ऋत्य कोण में लकडी – दुब फल - नारियल

- **ॐ कयानश्चित्र ऽ आभुवदूती सदावृधः सखा। कया शचिष्ठया वृता॥**
- **अर्द्धकायं महावीर्यं चन्द्रादित्य विमर्दनम्।**
  सिंहिका गर्भ संभूतं तं राहुं प्रणमाम्यहम्॥
  ॐ भूर्भुवः स्वः राठिनापुरोद्भव पैठीनस गोत्र कृष्ण वर्ण भो राहो। इहागच्छ। इहतिष्ठ राहवे नमः। राहुम् आवाहयामि, स्थापयामि, पूजयामि।

९. केतुम् मण्डल के वायव्य कोण में लकडी - कुशा फल - दाडिम

- **ॐ केतुं कृण्वन्न केतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः॥**
- **पलाश पुष्प संकाशं तारका ग्रह मस्तकम्।**
  रौद्रं रौद्रत्मकं घोरं तं केतु प्रणमाम्यहम्॥
  ॐ भूर्भुवः स्वः अन्तर्वेदिसमुद्भव जैमिनिस गोत्र कृष्ण वर्ण भो केतु। इहागच्छ। इहतिष्ठ केतवे नमः। केतुम् आवाहयामि, स्थापयामि, पूजयामि।

अधिदेवता स्थापनम्

- विशेष पूजा, यज्ञ, अनुष्ठान, इत्यादि में नवग्रहों के दाहिनी ओर अधिदेवताओं का आवाहन स्थापन एवं पूजन करें।

१. ईश्वरम् (सूर्य के दायें) **ॐ त्रयम्बकं यजामहे सुगन्धिम् पुष्टिवर्द्धनम्।**
उर्वारुक मिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥

२. उमाम् (चंद्र के दायें) **ॐ श्रीश्चते लक्ष्मीश्च पत्न्या वहोरात्रो पार्श्व नक्षत्राणि रूपमश्विनौ व्यात्तम्।**
इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण॥

३. स्कन्दम् (मंगल के दायें) **ॐ यद क्रन्दः प्रथमं जायमानः उद्यन्तसमुद्रा दुत वा पुरीषात्।**
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महिजातंते अर्वन॥

४. विष्णुम् (बुध के दायें) **ॐ विष्णो रराट मसि विष्णोः श्नप् त्रेस्थो विष्णोः**
स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा॥

५. ब्रह्माणम् (गुरु के दायें) ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेनऽआवः।
सबुध्न्या उपमा ऽ अस्य विष्ठाः सतश्च योनिमसश्च विवः ॥

६. इन्द्रम् (शुक्र के दायें) ॐ सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्राहा शूर विद्वान्।
जहि शत्रु२रप मृधो नुदस्वाथा भयं कृणुहि विश्वतो नः ॥

७. यमम् (शनि के दायें) ॐ यमाय त्वांगिरस्वते पितृमते स्वाहा।
स्वाहा घर्माय स्वाहा घर्मः पित्रे ॥

८. कालम् (राहु के दायें) ॐ कार्षिरसि समुद्रस्य त्वाक्षित्या ऽ उन्नयामि।
समापो ऽ अद्भिरग्मत समोषधी भिरोषधीः ॥

९. चित्रगुप्तम् (केतु के दायें) ॐ चित्रावसो स्वस्ति ते पारमशीय ॥

प्रत्यधि देवता स्थामनम्

- नवग्रहों के बायीं ओर प्रत्यधि देवताओं का आवाहन स्थापन एवं पूजन करें।

१. अग्निम् (सूर्य के बायें) ॐ अग्निदूतं पुरो दधे हव्यवाहमु प ब्रुवे। देवाँ २ ऽआसादयादिह ॥

२. आपः (चन्द्र के बायें) ॐ आपो हिष्ठा मयोभुवस्तानऽ ऊर्जे दधातन। महेरणाय चक्षसे यो वः
शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः। तस्माऽ अरङ्गमामवो
यस्य क्षयाय जिन्वथ आपो जनयथा च नः ॥

३. पृथ्वीम् (मंगल के बायें) ॐ स्योना पृथिवी नो भवानृक्षरा निवेशनी। यच्छा नः शर्म स प्रथाः ॥

४. विष्णुम् (बुध के बायें) ॐ इदं विष्णुर्वि चक्रमे त्रेधा निदधे पदम्। समूढमस्य पा ६ सुरे स्वाहा ॥

५. इन्द्रम् (गुरु के बायें) ॐ त्रातारमिन्द्र मवितार मिन्द्र ६ हवे हवे सुहव ६ शूरमिन्द्रम्।
ह्वायामि शक्रम्पुरुहूतमिन्द्र ६ स्वस्ति नो मघवा धात्विन्द्रः ॥

६. इन्द्राणीम् (शुक्र के बायें) ॐ अदित्यै रास्ना सीन्द्राण्या ऽउष्णीषः। पूषाऽसि घर्माय दीष्व ॥

७. प्रजापतिम् (शनि के बायें) ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव।
यत्कामास्ते जुहुमस्तन्नोऽस्तु वय ६ स्याम पतयो रयीणाम् ॥

८. सर्प (राहु के बायें) ॐ नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु।
येऽ अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥

९. ब्रह्मा (केतु के बायें) ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद् विसीमतः सुरुचो वेनऽआवः।
सबुध्न्याऽ उपमाऽ अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥

पंच लोकपाल देवता पूजनम्

१. गणेश (राहु के उत्तर) ॐ गणानान्त्वा गणपतिᳬ हवामहे प्रियाणान्त्वां प्रियपतिᳬ हवामहे निधी नान्त्वा निधिपति ᳬहवामहे व्वसो मम आहमजानि गर्भधमात्त्वमजासि गर्भधं ॥

२. दुर्गा (शनि के उत्तर) ॐ अंबेऽ अंबिकेऽ अम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पील वासिनीम् ॥

३. वायु (सूर्य के उत्तर) ॐ आ नो नियुद्भिःशतिनीभिरध्वर ᳬ सहश्रिणीभिरुपयाहि यज्ञम् । वायो अस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः॥

४. आकाश (शुक्र के पूर्व) ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा । दिशः प्रदिश आदिशो विदिश उद्धिशो दिग्भ्यः स्वाहा ॥

५. अश्विनी (ग्रह के उत्तर) ॐ यावां कशा मधु मत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षत ॥

दशदिक्पाल पूजनम्

१. इन्द्र (मण्डल के पूर्व) ॐ त्रातार मिन्द्र मवितार मिन्द्र ᳬ हवे हवे सुहव ᳬशूरमिन्द्रम् । ह्वायामि शक्रम्पुरुहूतमिन्द्र ᳬ स्वस्ति नो मघवा धात्विन्द्रः ॥

२. अग्नि (मण्डल के अग्नि) ॐ त्वन्नोऽ अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च बन्ध । त्राता तोकस्य तनये गवामस्य निमेष ᳬ रक्षमाणस्तव व्रते ॥

३. यम (मण्डल के दक्षिण) ॐ यमाय त्वांगिरस्वते पितृमते स्वाहा । स्वाहा घर्माय स्वाहा घर्मः पित्रे ॥

४. नैऋत्य (मण्डल के नैर्ऋत्य) ॐ असुन्वन्तमयजमानमिच्छ स्तेन- स्येत्यामन्विहितस्करस्य । अन्यमस्मदिच्छ- सातऽइत्यानमो देवि निर्ऋते तुभ्यमस्तु ॥

५. वरुण (मण्डल के पश्चिम) ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणे हबोध्युरूश ᳬ समानऽआयुः प्रमोषीः ॥

६. वायु (मण्डल के वायव्य) ॐ आ नो नियुद्भिः शतिनीभिरध्वर ᳬ सहस्रिणी भिरुपया हियज्ञम् । वायोऽअस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः ॥

७. सोम (मण्डल के उत्तर) ॐ वय ᳬ सोमव्रते तव मनस्तनुषु बिभ्रतः । प्रजावन्तः सचेमहि ॥

८. ईशान (मण्डल के ईशान) ॐ तमीशानं जगतस् तस्थु षस्पतिं धियञ्जिन्वम से हूमहे वयं । पूषानो यथा वेद सामसद्वृधे रक्षिता पायुरदब्ध स्वस्तये ॥

- **मन्त्र** **ॐ रुपेण वो रुपमभ्यागां तुथो वो विश्ववेदा विभजतु।**
  ऋतस्य पथा प्रेत चन्द्र दक्षिणा विस्वः पश्श्य व्यन्तरिक्षं यतस्व सदस्यैः॥

- **संकल्प** देशकालौ संकीर्त्य, अमुकगोत्रः अमुक शर्मा (वर्मा, गुप्तः, दासो वा) अहं अवलोकितमिदमाज्यं कांस्यपात्रस्थतं स-सुवर्ण श्री मृत्युंजय देवता प्रीतये सर्वारिष्ट विनाशार्थं अमुक गोत्राय, अमुक शर्मणे सुपूजिताय ब्राह्मणाय तुभ्यमहं सम्प्रददे।

- **विसर्जन** **ॐ यान्तु देव गणः सर्वे, पूजामादाय मामकीम।**
  इष्ट-काम-समृद्धयर्थं, पुनरागमनाय च॥
  - **ॐ गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर।**
    यत्र ब्रम्हादयो देवाः तत्र गच्छ हुताशन॥

- **प्रार्थना** **प्रमादात् कुर्वतां कर्म प्रच्यवेता ध्वरेषु यत्।**
  स्मरणादेव तद्विष्णोः सम्पूर्ण स्यादिति श्रुतिः॥
  - **यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु।**
    न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥

- **आशिर्वाद** **श्री वर्चस्व मायुष्य मारोग्यं गावधात् पवमानं महीयते।**
  धन धान्यं पशुं बहुपुत्र लाभं शतसंवत्सरे दीर्घमायु।
  - **ॐ सफला सन्तु पूर्णा : सन्तु मनोरथा :।**
    शत्रूणां बुद्धि नाशोस्तु मित्राणां मुदयस्तव॥

॥ बलिदानम् ॥

● इन्द्रादिदशदिक्पाल देवता बलिदानम् (एकतंत्रेण)

बलिदान मंत्र ॐ प्राच्यै दिशे स्वाहा ऽर्वाच्यै दिशे स्वाहा, दक्षिणायै दिशे स्वाहा ऽर्वाच्यै दिशे स्वाहा, प्रतीच्यै दिशे स्वाहा ऽर्वाच्यै दिशे स्वाहा, दीच्यै दिशे स्वाहा ऽर्वाच्यै दिशे स्वाहो, ध्र्यायै दिशे स्वाहा ऽर्वाच्यै दिशे स्वाहा ॥

संकल्प इन्द्रादिदशदिक्पालान् सांगान् । सपरिवारान् । सायुधान् । सशक्तिकान् । एभिर्गंधाद्युपचारैः युष्मान् अहं पूजयामि ।

हस्ते जलमादाय इन्द्रादिदशदिक्पालान् सांगेभ्य । सपरिवारेभ्य । सायुधेभ्य । सशक्तिकेभ्य इमं सदीप माषभक्त बलिं समर्पयामि ॥

हाथ जोडकर रखें भो इन्द्रादिदशदिक्पाल देवाः दिशं रक्षत बलिं भक्षत मम सकुटुम्बस्य सपरिवारस्य अभ्युदयं कुरुत । आयुः कर्तारः क्षेमकर्तारः शांतिकर्तारः पुष्टिकर्तारः तुष्टिकर्तारः निर्विघ्नकर्तारः कल्याणकर्तारः वरदा भवत ।

हस्ते जलमादाय अनेन पूजन पूर्वक बलिदानेन इन्द्रादिदशदिक्पाल देवाः प्रीयन्ताम् ।

● दशदिक्पालादीनां बलिदानम्

1. इन्द्रम् (पूर्व) ॐ त्रातार-मिन्द्र मवितार-मिन्द्र Ủ हवे हवे सुहव Ủ शूर-मिन्द्रम् । ह्वयामि शक्क्रं पुरु-हूत मिन्द्र Ủ स्वस्ति नो मघवा धात्विन्द्रः ॥

हस्ते जलमादाय पूर्वे इन्द्राय सांगाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपं दधिमाष भक्त बलिं समर्पयामि ।

हाथ जोडकर रखें भो इन्द्र दिशंरक्ष बलिंभक्ष अस्य सकुटुम्बस्य : यजमानस्य : आयु : कर्ता क्षेमकर्ता शांतिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो भव ।

हस्ते जलमादाय अनेन पूजन पूर्वक बलिदानेन इन्द्र देवताः प्रीयतां न मम् ।

2. अग्निम् (अग्निकोण) ॐ त्वन्नोऽअग्ने तव देव पायुभिर्म्मघोनो रक्ष तन्वश्च वन्द्य । त्राता तोकस्य तनये गवामस्य निमेष Ủ रक्षमाणस्तवव्व्रते ॥

हस्ते जलमादाय अग्नये सांगाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपं दधि माष भक्त बलिं समर्पयामि ।

हाथ जोडकर रखें भौ अग्ने दिशंरक्ष बलिंभक्ष यजमानस्य सकुटुम्बस्य आयु : कर्त्ता क्षेमकर्ता शांतिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो भव ।

हस्ते जलमादाय अनेन पूजन पूर्वक बलिदानेन अग्नि देवताः प्रीयतां न मम् ।

3. **यमम्** (दक्षिण) — ॐ यमाय त्वांगिरस्वते पितृमते स्वाहा।
स्वाहा धर्माय स्वाहा धर्म्माय पित्रे॥

हस्ते जलमादाय — दक्षिणे यमाय सांगाय सपरिवाराय सासुधाय सशक्तिकाय एतं सदीपं दधिमाषभक्त बलिं समर्पयामि।

हाथ जोडकर रखें — भो यम दिशंरक्ष बलिंभक्ष यजमानस्य सकुटुम्बस्य आयु : कर्ता क्षेमकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो भव।

हस्ते जलमादाय — अनेन पूजन पूर्वक बलिदानेन यम देवताः प्रीयतां न मम्।

4. **निर्ऋतिम्**(नैर्ऋत्यकोण) — ॐ असुन्नवन्तमयजमानमिच्छस्तेन- स्येत्यामन्विहितस्करस्य।
अन्यमस्मदिच्छ मा तऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु॥

हस्ते जलमादाय — निऋतये सांगांय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपं दधिमाषभक्त बलिं समर्पयामि।

हाथ जोडकर रखें — भो निऋते दिशं रक्ष बलिंभक्ष अस्य यजमानस्य सकुटुम्बस्य आयु : कर्ता क्षेमकर्ता शांतिकर्ता तुष्टिकर्ता पुष्टि वरदोभव।

हस्ते जलमादाय — अनेन पूजन पूर्वक बलिदानेन नैऋतये देवताः प्रीयतां न मम्।

5. **वरुणम्** (पश्चिम) — ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः।
अहेणमानो वरुणेह बोध्युरूश Ủ समानऽआयुः प्रमोषीः॥

हस्ते जलमादाय — पश्चिमायां वरुणाय सांगाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपं दधिमाषभक्त बलिं समर्पयामि।

हाथ जोडकर रखें — भो वरुण दिशंरक्ष बलिंभक्ष अस्य यजमानस्य सकुटुम्बस्य आयु : कर्ता क्षेमकर्ता शांतिकर्ता तुष्टिकर्ता वरदो भव॥५॥

हस्ते जलमादाय — अनेन पूजन पूर्वक बलिदानेन वरुण देवताः प्रीयतां न मम्।

6. **वायुम्** (वायव्यकोण) — ॐ आ नो नियुद्भिः शतिनीभिरद्धव Ủ सहस्रिणीभिरुपयाहि यज्ञम्।
वायोऽअस्मिन्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः।

हस्ते जलमादाय — वायव्यां , वायवे सांगाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपं दधिमाष भक्त बलिं समर्पयामि।

हाथ जोडकर रखें — भो वायो दिशंरक्ष बलिंभक्ष अस्य यजमानस्य सकुटुम्बस्य आयु : कर्त्ता क्षेमकर्ता शांतिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो भव।

हस्ते जलमादाय — अनेन पूजन पूर्वक बलिदानेन वायु देवताः प्रीयतां न मम्।

7. कुबेरम् (उत्तर) ॐ वय Ủ सोमव्रते तव मनस्तनूषु बिभ्रतः। प्रजावन्तः सचेमहि ॥

हस्ते जलमादाय उत्तरस्यां कुबेराय सांगाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपं दधिमाषभक्तबलिं समर्पयामि।

हाथ जोडकर रखें भो : कुबेर दिशं रक्ष बलिं भक्ष अस्य यजमानस्य सकुटुम्बस्य आयु : कर्ता क्षेमकर्ता शांतिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो भव।

हस्ते जलमादाय अनेन पूजन पूर्वक बलिदानेन कुबेर देवताः प्रीयतां न मम्।

8. ईशानम् (ऐशान्यकोण) ॐ तमीशानञ्जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयं।
पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्ध स्वस्तये ॥

हस्ते जलमादाय ऐशान्यामीशानाय सांगाय सपरिवाराय सशक्तिकाय एतं सदीपं दधिमाषभक्तबलिं समर्पयामि।

हाथ जोडकर रखें भो ईशान दिशं रक्ष बलिं भक्ष अस्य यजमानस्य सकुटुम्बस्य आयुकर्ता क्षेमकर्ता शांतिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो भव।

हस्ते जलमादाय अनेन पूजन पूर्वक बलिदानेन ईशान देवताः प्रीयतां न मम्।

9. ब्रह्माणम् (मध्य) ॐ अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषः।
यःश Ủ सते स्तुवते धायि पज्रऽइन्द्र ज्येष्ठाऽअस्माँऽअवन्तु देवाः ॥

हस्ते जलमादाय ईशान पूर्वयोर्मध्ये ब्रह्मणे सांगाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपं दक्षिमाषभक्त बलिं समर्पयामि

हाथ जोडकर रखें भो ब्रह्मन दिशं रक्ष बलिं भक्ष अस्य यजमानस्य सकुटुम्बस्य आयुकर्ता क्षेमकर्ता शांतिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो भव।

हस्ते जलमादाय अनेन पूजन पूर्वक बलिदानेन ब्रह्मन देवताः प्रीयतां न मम्।

10. अनन्तम् (नैर्ऋत्य पश्चिम के मध्य) ॐ स्योना पृथिवि नो भवानृक्षरानिवेशनी यच्छा नः सर्मसप्रथाः ॥

हस्ते जलमादाय निऋति पश्चिमयोर्मध्ये , अंतताय सांगाय सपरिवाराय सायुधाय सशक्तिकाय एतं संदीपं दधिमाष भक्त बलिं समर्पयामि।

हाथ जोडकर रखें भो अनंत दिशं रक्ष बलिं भक्ष अस्य यजमानस्य सकुटुम्बस्य आयु : कर्त्ता क्षेमकर्ता शांतिकर्ता तुष्टिकर्ता वरदो भव।

हस्ते जलमादाय अनेन पूजन पूर्वक बलिदानेन इन्द्र देवताः प्रीयतां न मम्।

● गणपति बलिदानम् .....

बलिदान मंत्र	ॐ गणानान्त्वा गणपति Ủ हवामहे प्रियाणान्त्वां प्रियपति Ủ हवामहे निधीनान्त्वा निधिपति Ủ हवामहे व्वसो मम। आहमजानि गर्भधमात्त्वमजासि गर्भधं॥
संकल्प	ॐ भूर्भुवः स्वः गणपतिं सांगं। सपरिवारं। सायुधं। सशक्तिकम्। एभिर्गंधाद्युपचारैः त्वाम अहं पूजयामि।
हस्ते जलमादाय	गणपतये सांगाय। सपरिवाराय। सायुधाय। सशक्तिकाय इमं सदीपं आसादित बलिं समर्पयामि॥
हाथ जोडकर रखें	भो गणपतये इमं बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य अभ्युदयं कुरु। मम गृहे आयुः कर्ता। क्षेमकर्ता। शांतिकर्ता। पुष्टिकर्ता। तुष्टिकर्ता। निर्विघ्नकर्ता। कल्याणकर्ता वरदो भव।
हस्ते जलमादाय	अनेन पूजन पूर्वक बलिदानेन गणपतिः प्रीयतां न मम्।

● मातृका बलिदानम् .....

बलिदान मंत्र	ॐ अम्बे अम्बिके अम्बालिके नमा नयति कश्चन। सस्त्यश्वकः सुभद्रिकां काम्पील वासिनीम्॥
संकल्प	ॐ भूर्भुवः स्वः सगणशगौर्याद्यावाहित मातृ सांगाः। सपरिवाराः। सायुधाः। सशक्तिकाः। एभिर्गंधाद्युपचारैः त्वाम अहं पूजयामि।
हस्ते जलमादाय	सगणशगौर्याद्यावाहित मातृभ्य सांगाभ्य। सपरिवाराभ्य। सायुधाभ्य। सशक्तिकाभ्य इमं सदीपं आसादितं बलिं समर्पयामि॥
हाथ जोडकर रखें	भो भो सगणशगौर्याद्यावाहित मातरः इमं बलिं गृहाणीत मम सकुटुम्बस्य सपरिवारस्य अभ्युदयं कुरुत। मम आयुः कर्त्यः। क्षेमकर्त्यः। शांतिकर्त्यः। पुष्टिकर्त्यः। तुष्टिकर्त्यः। निर्विघ्नकर्त्यः। कल्याणकर्त्यः वरदा भवत।
हस्ते जलमादाय	अनेन पूजन पूर्वक बलिदानेन सगणशगौर्याद्यावाहित मातरः प्रीयतां न मम्।

● वास्तोष्पति बलिदानम् .....

बलिदान मंत्र	ॐ वास्तोष्पते प्रतिजानीहि अस्मान् स्वावेशो अनमीवो भवा नः। यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे॥
संकल्प	ॐ भूर्भुवः स्वः शिख्यादि (ब्रह्मादि) वास्तुमंडल देवता सहितं वास्तुपुरुषं पूजयामि।
हस्ते जलमादाय	मंडल देवता सहिताय वास्तुपुरुषाय सांगाय। सपरिवाराय। सायुधाय। सशक्तिकाय इमं सदीपं आसादित बलिं समर्पयामि॥
हाथ जोडकर रखें	भो भो मंडल देवता सहित वास्तुपुरुष इमं बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य अभ्युदयं कुरु। मम गृहे आयुः कर्ता। क्षेमकर्ता। शांतिकर्ता। पुष्टिकर्ता। तुष्टिकर्ता। निर्विघ्नकर्ता। कल्याणकर्ता वरदो भव।
हस्ते जलमादाय	अनेन पूजन पूर्वक बलिदानेन मंडल देवता सहित वास्तुपुरुषः प्रीयतां न मम्।

• योगिनी बलिदानम् .....

मंत्र　ॐ योगेयोगे तवस्तरं व्वाजेवाजे हवामहे। सखाय ऽइन्द्रमूतये॥

संकल्प　श्रीमहाकाली-महालक्ष्मी-महासरस्वती सहिता गजाननादि (विश्वदुर्गादि) चतु:षष्टियोगिनी: अहं पूजयामि।

हस्ते जलमादाय　श्रीमहाकाली-महालक्ष्मी-महासरस्वती सहिता गजाननादि (विश्वदुर्गादि) चतु:षष्टियोगिनी: सांगेभ्य। सपरिवारेभ्य। सायुधेभ्य। सशक्तिकेभ्य इमं सदीप माषभक्त बलिं समर्पयामि॥

हाथ जोडकर रखें　भो भो श्रीमहाकाली-महालक्ष्मी-महासरस्वती सहिता गजाननादि (विश्वदुर्गादि) चतु:षष्टियोगिनी: इमं बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य अभ्युदयं कुरु। मम आयु: कर्त्य:। क्षेमकर्त्य:। शांतिकर्त्य:। पुष्टिकर्त्य:। तुष्टिकर्त्य:। निर्विघ्नकर्त्य:। कल्याणकर्त्य: वरदा भवत।

हस्ते जलमादाय　अनेन पूजन पूर्वक बलिदानेन श्रीमहाकाली-महालक्ष्मी-महासरस्वती सहिता गजाननादि (विश्वदुर्गादि) चतु:षष्टियोगिनी: प्रीयतां न मम्।

• प्रधान देवता बलिदानम् .....

बलिदान मंत्र　ॐ इमं रक्तवर्णन्तु तथाहस्त सुविस्तृतम्।
इद्रध्वजं चालभामि महेन्द्राय सुप्रीतये॥
अमुमिन्द्रध्वजं चित्रं सर्व विघ्न विनाशकम्।
अस्मिन् मण्डप पार्श्वे तु स्थापयामि सुरार्चने॥

संकल्प　ब्रह्मादि सर्वतो भद्रमण्डल देवता समन्वितां अमुक देवतां (महाकाली-महालक्ष्मी-महासरस्वती स्वरुपिणीं त्रिगुणात्मिकां जगदम्बिकां राजसाजेश्वरी) सांगां। सपरिवारां। सायुधां। सशक्तिकां एभि: गंधाद्युपचारै: त्वां अहं पूजयामि।

हस्ते जलमादाय　ब्रह्मादि सर्वतो भद्रमण्डल देवता समन्वितां अमुक देवतां (महाकाली-महालक्ष्मी -महासरस्वती स्वरुपिणीं त्रिगुणात्मिकां जगदम्बिकां राजसाजेश्वरी) सांगायै। सपरिवारायै। सायुधायै। सशक्तिकायै इमं सदीपं आसादित बलिं समर्पयामि॥

हाथ जोडकर रखें　भो भो ब्रह्मादि सर्वतो भद्रमण्डल देवता समन्वितां अमुक देवतां (महाकाली-महालक्ष्मी-महासरस्वती स्वरुपिणीं त्रिगुणात्मिकां जगदम्बिकां राजसाजेश्वरी देवते) इमं बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य अभ्युदयं कुरु। मम आयु: कर्त्री। क्षेमकर्त्री। शांतिकर्त्री। पुष्टिकर्त्री। तुष्टिकर्त्री। निर्विघ्नकर्त्री। कल्याणकर्त्री वरदा भवत।

हस्ते जलमादाय　अनेन पूजन पूर्वक बलिदानेन ब्रह्मादि सर्वतो भद्रमण्डल देवता समन्वितां अमुक देवतां (महाकाली-महालक्ष्मी-महासरस्वती स्वरुपिणीं त्रिगुणात्मिकां जगदम्बिकां राजसाजेश्वरी) प्रीयतां न मम्।

● नवग्रह बलिदानम् .....

बलिदान मंत्र	ॐ ग्रहाऽऊर्जा हुतयो व्यन्तो विप्राय मतिम्। तेषां विशिप्रियाणां वोऽहमिषमूर्ज Ủ समग्रभ मुपयाम गृहीतो ऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम ॥
संकल्प	सूर्यादि नवग्रह मंडल देवान् सांगान्। सपरिवारान्। सायुधान्। सशक्तिकान्। एभि: गंधाद्युपचारै: व: अहं पूजयामि।
हस्ते जलमादाय	सूर्यादि नवग्रह मंडल देवेभ्य सांगेभ्य। सपरिवारेभ्य। सायुधेभ्य। सशक्तिकेभ्य इमं सदीपं आसादित बलिं समर्पयामि ॥
हाथ जोडकर रखें	भो भो सूर्यादि नवग्रह मंडल देवा: इमं बलिं गृहणीत मम सकुटुम्बस्य सपरिवारस्य अभ्युदयं कुरुत। मम गृहे आयु: कर्तार:। क्षेमकर्तार:। शांतिकर्तार:। पुष्टिकर्तार:। तुष्टिकर्तार:। निर्विघ्नकर्तार:। कल्याणकर्तार: वरदा भवत।
हस्ते जलमादाय	अनेन पूजन पूर्वक बलिदानेन सूर्यादि नवग्रह मंडल देवा: प्रीयतां न मम्।

● क्षेत्रपाल बलिदानम् .....

बलिदान मंत्र	ॐ नमामि क्षेत्रपाल त्वां भूतप्रेतगणाधिप। पूजां बलिं गृहाणेमं सौम्यो भवतु सर्वदा ॥ आयु आरोग्यं मे देहि निर्विघ्नं कुरु सर्वदा। मा विघ्नं मास्तु मे पापं मा सन्तु परिपन्थिन: ॥ मा विघ्नं मास्तु मे पापं मा सन्तु परिपंथिन:। सौम्या भवन्तु तृप्ताश्च भूतप्रेता: सुखावहा: ॥
संकल्प	ॐ अद्येत्यादि मम सकलारिष्ट शान्ति पूर्वकं प्रारब्ध कर्मणा: सांगता सिद्ध्यर्थञ्च क्षेत्रपाल पूजनं बलिदानञ्च करिष्ये।
हस्ते जलमादाय	ॐ क्षेत्रपालाय डाकिनी-शाकिनी-भूत-प्रेत-बैताल-पिशाच सहिताय इमं सदीपं आसादित बलिं समर्पयामि ॥
हाथ जोडकर रखें	भो भो क्षेत्रपाल दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य अभ्युदयं कुरुत। मम गृहे आयु: कर्ता। क्षेमकर्ता। शांतिकर्ता। पुष्टिकर्ता। तुष्टिकर्ता। निर्विघ्नकर्ता। कल्याणकर्ता वरदा भव।
हस्ते जलमादाय	अनेन पूजन पूर्वक बलिदानेन क्षेत्रपाल देवता: प्रीयतां न मम्।
पीली सरसौ छिडके	ॐ भूताय त्वा नारातये स्वरभि विख्येषं दृ Ủ हन्तां दुर्या: पृथिव्या मुर्वन्तरिक्ष मन्वेमि। पृथिव्यास्त्वा नाभौ सादयाम्य दित्या ऽउपस्थेऽग्ने हव्य Ủ रक्ष ॥

।। नवग्रह मंत्र, जप, कवच, स्तोत्र ।।

॥ सूर्य ग्रह ॥

सूर्य कलिंग देश में उद्भव। कश्यप गोत्र। जाति क्षत्रिय। माता अदिति। जन्म समय नाम मार्तण्ड। प्रथम पत्नी संज्ञा जिससे वैवस्वत मनु, यम, यमी उत्पन्न हुए। दूसरी पत्नी छाया जिससे सावर्णिकी मनु, शनि, ताप्ती, अश्विनी

- **शुभाशुभत्व - क्रूर ग्रह**
- **भोग काल - एक मास - 30 दिन**
- **बीज मंत्र - ॐ घृणि: सूर्याय नम: / ॐ ह्रीं ह्रौं सूर्याय नम: / ॐ सूर्याय नम:**
- **तांत्रिक मंत्र - ॐ ह्राँ ह्रीं ह्रौं स: सूर्याय नम:**
- **वैदिक मंत्र - ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥**
- **पुराणोक्त मंत्र - ॐ जपाकुसुम संकाशं काश्यपेयं महाद्युतिम्।
तमोरिं सर्व पापघ्नं प्रणतोऽस्मि दिवाकरम्॥**
- **जप संख्या - 7000 कलयुगे चतुर्थगुणो अर्थात 28000 + दशांश हवन - 2800 + दशांश तर्पण - 280 + दशांश मार्जन - 28 = 31108**
- **जप समय - सूर्योदय काल**
- **हवनवस्तु - अर्क, मदार**
- **रत्न - 6.5 रत्ती मीणिक या विद्रुम**
- **दान वस्तु - सुवर्ण, ताँबा, माणिक, गुड, गेहूँ, लाल गाय, लाल पुष्प, लाल वस्त्र, लाल चंदन**

सूर्य कवचम् .....

विनियोग - अस्य श्री सुर्य कवच स्तोत्रस्य। ब्रह्मा ऋषि:। अनुष्टुप छंद:। सूर्यो देवता। सूर्य प्रीत्यर्थे जपे विनियोग:॥

याज्ञवल्क्य उवाच .....

**श्रणुष्व मुनिशार्दूल सूर्यस्य कवचं शुभम्।
शरीरारोग्दं दिव्यं सव सौभाग्य दायकम्॥१॥**

**देदीप्यमान मुकुटं स्फुरन्मकर कुण्डलम।
ध्यात्वा सहस्त्रं किरणं स्तोत्र मेततु दीरयेत्॥२॥**

**शिरों में भास्कर: पातु ललाट मेडमित दुति:।
नेत्रे दिनमणि: पातु श्रवणे वासरेश्वर:॥३॥**

**घ्राणं धर्मं धृणि: पातु वदनं वेद वाहन:।
जिव्हां में मानद: पातु कण्ठं में सुर वन्दित:॥४॥**

**रक्षात्मकं स्तोत्रं लिखित्वा भूर्ज पत्रके।
दधाति य: करे तस्य वशगा: सर्व सिद्धय:॥५॥**

**सुस्नातो यो जपेत् सम्यग्योधिते स्वस्थ: मानस:।
सरोग मुक्तो दीर्घायु सुखं पुष्टिं च विदंति॥६॥**

सूर्य स्तोत्रम् .....

नवग्रहाणां सर्वेषां सूर्यादीनां पृथक् पृथक्।
पीड़ा च दु:सहा राजंजायते सततं नृणाम् ॥१॥

पीडानाशाय राजेन्द्र नामानि श्रृणु भास्वत:।
सूर्यादीनां च सर्वेषां पीड़ा नश्यति श्रृण्वत: ॥२॥

आदित्य: सविता सूर्य: पूषाऽर्क: शीघ्रगो रवि:।
भगस्त्वष्टाऽर्यमा हंसो हंलिस्तेजोनिधिर्हरि: ॥३॥

दिननाथो दिनकर: सत्पसप्ति: प्रभाकर:।
विभावसुर्वेदकर्ता वेदांगो वेदवाहन: ॥४॥

हरिदश्व: कालवक्त्र: कर्मसाक्षी जगत्पति:।
पद्मिनीबोधको भानुर्भास्कर: करूणाकर: ॥५॥

द्वादशात्मा विश्वकर्मा लोहितांगस्तमोनुद:।
जगन्नाथोऽरविन्दाक्ष: कालात्मा कश्यपात्मज:॥६॥

भूताक्षयो ग्रहपति: सर्वलोकनमस्कृत:।
जपाकुसुमसंकाशो भास्वानदितिनन्दन: ॥७॥

ध्वान्तेभसिंह सर्वात्मा लोकनेत्रो विकर्तन:।
मार्तण्डो मिहिर: सूरस्तपनो लोकतापन: ॥८॥

जगत्कर्ता जगत्साक्षी शनैश्चरपिता जय:।
सहस्त्ररश्मिस्तरणिर्भगवान्भक्तवत्सल: ॥९॥

विवस्वानादिदेवश्च देवदेवा दिवाकर:।
धन्वन्तरिव्र्याधिहर्ता दद्रुकुष्ठविनाशक: ॥१०॥

चराचरात्मा मैत्रेयोऽमितो विष्णुर्विकर्तन:।
लोकशोकापहर्ता च कमलाकर आत्मभू: ॥११॥

नारायणो महादेवो रूद्र: पुरूष ईश्वर:।
जीवात्मा परमात्मा च सूक्ष्मात्मा सर्वतोमुख: ॥१२॥

इन्द्रोऽनलो यमश्चैव नैर्ऋतो वरूणोऽनिल:।
श्रीद ईशान इन्दुश्च भौम: सोम्यो गुरू: कवि: ॥१३॥

शौरिर्विधुन्तुद: केतु: काल: कालात्मको विभु:।
सर्वदेवमयो देव: कृष्ण: कामप्रदायक: ॥१४॥

य एतैर्नामभिर्मर्त्यो भक्त्या स्तौति दिवाकरम्।
सर्वापापविनिर्मुक्त: सर्वरोगविवर्जित: ॥१५॥

पुत्रवान् धनवान् श्रीमांजायते स न संशय:।
रविवारे पठेद्यस्तु नामान्येतानि भास्वत: ॥१६॥

पीड़ाशान्तिर्भवेत्तस्य ग्रहाणां च विशेषत:।
सद्य: सुखमवाप्नोति चायुर्दीर्घं च नीयजम् ॥१७॥

॥ इति श्री भविष्य पुराणे आदित्य स्तोत्रम् सम्पूर्णम्॥

भगवान सूर्य के पवित्र, शुभ एवं गोपनीय 21 नाम .....

विकर्तनो विवस्वांश्च मार्तण्डो भास्करो रवि: ।
लोक प्रकाशक: श्री माँल्लोक चक्षुर्मुहेश्वर:॥१॥

लोकसाक्षी त्रिलोकेश: कर्ता हर्ता तमिस्रहा ।
तपनस्तापनश्चैव शुचि: सप्ताश्ववाहन:॥२॥

गभस्तिहस्तो ब्रह्मा च सर्वदेवनमस्कृत: ।
एकविंशतिरित्येष स्तव इष्ट: सदा रवे:॥३॥

विकर्तन, विवस्वान, मार्तण्ड, भास्कर, रवि, लोकप्रकाशक, श्रीमान, लोकचक्षु, महेश्वर, लोकसाक्षी, त्रिलोकेश, कर्ता, हर्त्ता, तमिस्राहा, तपन, तापन, शुचि, सप्ताश्ववाहन, गभस्तिहस्त, ब्रह्मा और सर्वदेव नमस्कृत

॥ चन्द्रमा ग्रह ॥

चन्द्रमा यमुना नदी से उद्भव। आत्रि गोत्र। जाति वैश्य। शुक्ल वर्ण। दक्ष प्रजापति की 27 कन्याओं से विवाह। 27 कन्यायें 27 नक्षत्रों के नाम से जानी जाती है।

- **शुभाशुभत्व - शुभ ग्रह**
- **भोग काल - सवा दो दिन - 2.25 दिन**
- **बीज मंत्र - ॐ सों सोमाय नम: / ॐ ऐं क्लीं सोमाय नम: / ॐ चन्द्राय नम:**
- **तांत्रिक मंत्र - ॐ श्राँ श्रीं श्रौं स: चंद्राय नम:**
- **वैदिक मंत्र - ॐ इमं देवा असपत्न$ सुवध्वं महते क्षत्राय महते ज्यैष्ठयाय महते जानराज्यायेन्द्रस्येन्द्रियाय। इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणाना$ राजा ॥**
- **पुराणोक्त मंत्र - ॐ दधि शंख तुषाराभं क्षीरोदार्णव सम्भवम। नमामि शशिनं सोमं शंभोर्मुकुट भूषणं ॥**
- **जप संख्या - 11000 कलयुगे चतुर्थगुणो अर्थात 44000 + दशांश हवन - 4400 + दशांश तर्पण - 440 + दशांश मार्जन - 44 = 48884**
- **जप समय - संध्याकाल**
- **हवनवस्तु - पलाश**
- **रत्न - 10 रत्ती मोती**
- **दान वस्तु - सुवर्ण, चाँदी, मोती, चावल, कपुर, घी, चाँदी शंख, सफेदपुष्प, सफेदवस्त्र, सफेद बैल**

चंद्र कवचम् .....

विनियोग - अस्य श्री चंद्र कवच स्तोत्र महा मंत्रस्य। गौतम ऋषि:। अनुष्टुप छंद:। श्री चंद्रो देवता। चंद्र: प्रीत्यर्थे जपे विनियोग: ॥

समं चतुर्भुजं वंदे केयूर मकुटोज्वलम्।
वासुदेवस्य नयनं शंकरस्य च भूषणम् ॥१॥

एवं ध्यात्वा जपेन्नित्यं शशिन: कवचं शुभम्।
शशि: पातु शिरो देशं भालं पातु कलानिधि ॥२॥

चक्षुषी: चंद्रमा: पातु श्रुती पातु निशापति:।
प्राणं कृपाकर: पातु मुखं कुमुदबांधव: ॥३॥

पातु कण्ठं च मे सोम: स्कंधौ जैवा तृकस्तथा।
करौ सुधाकर: पातु वक्ष: पातु निशाकर: ॥४॥

हृदयं पातु मे चंद्रो नाभिं शंकरभूषण:।
मध्यं पातु सुरश्रेष्ठ: कटिं पातु सुधाकर: ॥५॥

ऊरू तारापति: पातु मृगांको जानुनी सदा।
अब्दिज: पातु मे जंघे पातु पादौ विधु: सदा ॥६॥

सर्वाण्यन्यानि चांगानि पातु चंद्रोऽखिलं वपु: ।
ऐतद्धि कवचं दिव्यं भुक्ति मुक्ति प्रदायकम् ।
य: पठेत च्छृणुयाद्वापि सर्वत्र विजयी भवेत ॥७॥

॥ इती श्री चंद्र कवचं संपूर्णम् ॥

चन्द्र स्तोत्र .....

श्वेताम्बर: श्वेतवपु: किरीटी, श्वेतद्युतिर्दण्डधरो द्विबाहु: ।
चन्द्रो मृतात्मा वरद: शशांक:, श्रेयांसि मह्यं प्रददातु देव: ॥१॥

दधिशंखतुषाराभं क्षीरोदार्णवसम्भवम ।
नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम ॥२॥

क्षीरसिन्धुसमुत्पन्नो रोहिणी सहित: प्रभु: ।
हरस्य मुकुटावास: बालचन्द्र नमोऽस्तु ते ॥३॥

सुधायया यत्किरणा: पोषयन्त्योषधीवनम ।
सर्वान्नरसहेतुं तं नमामि सिन्धुनन्दनम ॥४॥

राकेशं तारकेशं च रोहिणीप्रियसुन्दरम ।
ध्यायतां सर्वदोषघ्नं नमामीन्दुं मुहुर्मुहु: ॥५॥

॥ इति मन्त्रमहार्णवे चन्द्रमस: स्तोत्रम ॥

चंद्र अष्टाविंशतिनाम स्तोत्रम् .....

विनियोग - अस्य श्री चंद्र स्याष्टाविंशति नाम स्तोत्रस्य । गौतम ऋषि: । विराट् छंद: । सोमो देवता । चंद्रस्य प्रीत्यर्थे जपे विनियोग: ॥

चंद्रस्य शृणु नामानि शुभदानि महीपते ।
यानि शृत्वा नरो दु:खान्मुच्यते नात्रसंशय: ॥१॥

सुधाकरश्च सोमश्च ग्लौरब्ज: कुमुदप्रिय: ।
लोकप्रिय: शुभ्रभानुश्चंद्रमा रोहिणीपति ॥२॥

शशी हिमकरो राजा द्विजराजो निशाकर: ।
आत्रेय इंदु: शीतांशुरोषधीश: कलानिधि: ॥३॥

जैवातृको रमाभ्राता क्षीरोदार्णव संभव: ।
नक्षत्रनायक: शंभु: शिरश्चूडामणिर्विभु: ॥४॥

तापहर्ता नभोदीपो नामान्येतानि य: पठेत् ।
प्रत्यहं भक्तिसंयुक्तस्तस्य पीडा विनश्यति ॥५॥

तद्दिने च पठेद्यस्तु लभेत् सर्वं समीहितम् ।
ग्रहादीनां च सर्वेषां भवेच्चंद्रबलं सदा ॥६॥

॥ इति श्री चंद्राष्टाविंशतिनाम स्तोत्रम् संपूर्णम् ॥

॥ मंगल ग्रह ॥

मंगल अवन्ति देश में उत्पत्ति । भारद्वाज गोत्र । जाति क्षत्रिय । रक्त वर्ण ।

- **शुभाशुभत्व - पाप ग्रह**
- **भोग काल - डेढ मास - 40 दिन**
- **बीज मंत्र - ॐ अं अंगारकाय नम: / ॐ हूँ श्रीं भौमाय नम: / ॐ भौमाय नम:**
- **तांत्रिक मंत्र - ॐ क्रां क्रीं क्रौं स: भौमाय नम:**
- **वैदिक मंत्र - ॐ अग्निमूर्धा दिव: ककुत्पति: पृथिव्या अयम्। अपा ऽ रेता ऽ सि जिन्वति।।**
- **पुराणोक्त मंत्र - ॐ धरणी गर्भ संभूतं विद्युत्कान्ति समप्रभम । कुमारं शक्ति हस्तञ्च मंगलं प्रणमाम्यहम ।।**
- **जप संख्या - 10000 कलयुगे चतुर्थगुणो अर्थात 40000 + दशांश हवन - 4000 + दशांश तर्पण - 400 + दशांश मार्जन - 40 = 44440**
- **जप समय - दिन का प्रथम प्रहर**
- **हवनवस्तु - खदिर (खैर)**
- **रत्न - 12.5 रत्ती मूँगा**
- **दान वस्तु - सुवर्ण, ताँबा, मूंगा, मसुर, गुड, गेहूँ, लाल बैल, लालपुष्प, लालवस्त्र,**

मंगल कवचम् .....

विनियोग - अस्य श्री अंगारक कवच स्तोत्र मंत्रस्य । कश्यप ऋषिः । अनुष्टुप् छन्दः । अङ्गारको देवता भौम पीडा परिहारार्थं पाठे विनियोग: ॥

रक्तांबरो रक्तवपु: किरीटी चतुर्भुजो मेषगमो गदाभृत् ।
धरासुत: शक्तिधरश्च शूली सदा ममस्याद्वरद: प्रशांत: ॥१॥

अंगारक: शिरो रक्षेन्मुखं वै धरणीसुत: ।
श्रवौ रक्तांबर: पातु नेत्रे मे रक्तलोचन: ॥२॥

नासां शक्तिधर: पातु मुखं मे रक्तलोचन: ।
भुजौ मे रक्तमाली च हस्तौ शक्तिधरस्तथा ॥३॥

वक्ष: पातु वरांगश्च हृदयं पातु लोहित: ।
कटिं मे ग्रहराजश्च मुखं चैव धरासुत: ॥४॥

जानु जंघे कुज: पातु पादौ भक्तप्रिय: सदा ।
सर्वण्यन्यानि चांगानि रक्षेन्मे मेषवाहन: ॥५॥

या इदं कवचं दिव्यं सर्वशत्रु निवारणम् ।
भूतप्रेतपिशाचानां नाशनं सर्व सिद्धिदम् ॥६॥

सर्वरोगहरं चैव सर्वसंपत्प्रदं शुभम् ।
भुक्तिमुक्तिप्रदं नृणां सर्वसौभाग्यवर्धनम् ॥७॥

॥ इति श्रीमार्कण्डेयपुराणे मंगलकवचं संपूर्ण ॥

अङ्गारक स्तोत्रम् .....

विनियोग - अस्य श्री अंगारक स्तोत्रस्य मंत्रस्य। विरुपांगिरस ऋषिः। अग्नि देवता। गायत्री छन्दः। भौम प्रीत्यर्थे पाठे विनियोगः॥

अंगारकः शक्तिधरो लोहिताङ्गो धरासुतः।
कुमारो मङ्गलो भौमो महाकायो धनप्रदः ॥१॥

ऋणहर्ता दृष्टिकर्ता रोगकृद्रोगनाशनः।
विद्युत्प्रभो व्रणकरः कामदो धनहृत् कुजः ॥२॥

सामगानप्रियो रक्तवस्त्रो रक्तायतेक्षणः।
लोहितो रक्तवर्णश्च सर्वकर्मावबोधकः ॥३॥

रक्तमाल्यधरो हेमकुण्डली ग्रहनायकः।
नामान्येतानि भौमस्य यः पठेत्सततं नरः ॥४॥

ऋणं तस्य च दौर्भाग्यं दारिद्र्यं च विनश्यति।
धनं प्राप्नोति विपुलं स्त्रियं चैव मनोरमाम्।
वंशोद्द्योतकरं पुत्रं लभते नात्र संशयः ॥५॥

योऽर्चयेदह्नि भौमस्य मङ्गलं बहुपुष्पकैः।
सर्वा नश्यति पीडा च तस्य ग्रहकृता ध्रुवम् ॥६॥

॥इति श्री स्कान्दपुराणे श्री अङ्गारकस्तोत्रं सम्पूर्णम्॥

ऋणमोचक मंगल स्तोत्र .....

मंगलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः।
स्थिरामनो महाकायः सर्वकर्मविरोधकः ॥१॥

लोहितो लोहिताक्षश्च सामगानां। कृपाकरं।
वैरात्मजः कुजौ भौमो भूतिदो भूमिनंदनः ॥२॥

धरणीगर्भसंभूतं विद्युत्कान्तिसमप्रभम्।
कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहम् ॥३॥

अंगारको यमश्चैव सर्वरोगापहारकः।
वृष्टेः कर्ताऽपहर्ता च सर्वकामफलप्रदः ॥४॥

एतानि कुजनामानि नित्यं यः श्रद्धया पठेत्।
ऋणं न जायते तस्य धनं शीघ्रमवाप्नुयात् ॥५॥

स्तोत्रमंगारकस्यैतत्पठनीयं सदा नृभिः।
न तेषां भौमजा पीडा स्वल्पाऽपि भवति क्वचित् ॥६॥

अंगारको महाभाग भगवन्भक्तवत्सल।
त्वां नमामि ममाशेषमृणमाशु विनाशयः ॥७॥

ऋणरोगादिदारिद्रयं ये चान्ये ह्यपमृत्यवः।
भयक्लेश मनस्तापाः नश्यन्तु मम सर्वदा ॥८॥

अतिवक्र दुराराध्य भोगमुक्तजितात्मनः।
तुष्टो ददासि साम्राज्यं रुष्टो हरसि तत्क्षणात् ॥९॥

विरञ्चि शक्रादिविष्णूनां मनुष्याणां तु का कथा।
तेन त्वं सर्वसत्वेन ग्रहराजो महाबलः ॥१०॥

पुत्रान्देहि धनं देहि त्वामस्मि शरणं गतः।
ऋणदारिद्रयं दुःखेन शत्रुणां च भयात्ततः ॥११॥

एभिद्र्वादशभिः श्लोकैर्यः स्तौति च धरासुतम्।
महतीं श्रियमाप्नोति ह्यपरा धनदो युवाः ॥१२॥

॥ इति श्रीस्कन्दपुराणे भार्गवप्रोक्त ऋणमोचन मंगलस्तोत्रम् ॥

॥ बुध ग्रह ॥

बुध मगध देश में उत्पत्ति। अत्री गोत्र। जाति वैश्य। पिता चंद्रमा।

- **शुभाशुभत्व - शुभ ग्रह**
- **भोग काल - एक मास - 30 दिन**
- **बीज मंत्र - ॐ बुं बुधाय नमः / ॐ ऐं श्रीं श्रीं बुधाय नमः / ॐ बुधाय नमः**
- **तांत्रिक मंत्र - ॐ ब्राँ ब्रीं ब्रौं सः बुधाय नमः**
- **वैदिक मंत्र - ॐ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सऽ सृजेथामयञ्च। अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यशमानश्च सीदत॥**
- **पुराणोक्त मंत्र - ॐ प्रियंगुकलिकाश्यामं रूपेणाप्रतिमं बुधम। सौम्यं सौम्य गुणोपेतं तं बुधं प्रणमाम्यहम॥**
- **जप संख्या - 9000 कलयुगे चतुर्थगुणो अर्थात 36000 + दशांश हवन - 3600 + दशांश तर्पण - 360 + दशांश मार्जन - 36 = 17776**
- **जप समय - मध्याह्न काल**
- **हवनवस्तु - अपामार्ग, चिचिडा**
- **रत्न - 6.5 रत्ति पन्ना**
- **दान वस्तु - सुवर्ण, कांस्य, पन्ना, मूंग, घी, हाथी, कस्तूरी, सर्वपुष्प, हरावस्त्र, पंचरत्न, हाथी दाँत**

बुध कवचम् .....

विनियोग - अस्य श्री बुधकवच स्तोत्र मन्त्रस्य। कश्यप ऋषिः। अनुष्टुप् छन्दः। बुधो देवता बुधप्रीत्यर्थे जपे विनियोगः।

**बुधस्तु पुस्तकधरः कुंकुमस्य समद्युतिः।
पीताम्बरधरः पातु पीतमाल्यानुलेपनः ॥१॥**

**कटिं च पातु मे सौम्यः शिरोदेशं बुधस्तथा।
नेत्रे ज्ञानमयः पातु श्रोत्रे पातु निशाप्रियः ॥२॥**

**घ्राणं गन्धप्रियः पातु जिह्वां विद्याप्रदो मम।
कण्ठं पातु विधोः पुत्रो भुजौ पुस्तकभूषणः ॥३॥**

**वक्षः पातु वरांगश्च हृदयं रोहिणीसुतः।
नाभिं पातु सुराराध्यो मध्यं पातु खगेश्वरः ॥४॥**

**जानुनी रौहिणेयश्च पातु जंघेऽखिलप्रदः।
पादौ मे बोधनः पातु पातु सौम्योऽखिलं वपुः ॥५॥**

**एतद्धि कवचं दिव्यं सर्वपापप्रणाशनम्।
सर्वरोगप्रशमनं सर्व दुःख निवारणम् ॥६॥**

**आयुरारोग्यशुभदं पुत्रपौत्रप्रवर्द्धनम्।
यः पठेच्छृणुयाद्वापि सर्वत्र विजयी भवेत् ॥७॥**

॥ इति श्रीब्रह्मवैवर्तपुराणे बुधकवचं सम्पूर्णम् ॥

बुध स्तोत्रम् .....

पीताम्बर: पीतवपु किरीटी, चतुर्भुजो देवदु:खापहर्ता ।
धर्मस्य धृक सोमसुत: सदा मे, सिंहाधिरुढ़ो वरदो बुधश्च ॥१॥

प्रियंगुकनकश्यामं रूपेणाप्रतिमं बुधम ।
सौम्यं सौम्यगुणोपेतं नमामि शशिनन्दनम ॥२॥

सोमसुनुर्बुधश्चैव सौम्य: सौम्यगुणान्वित: ।
सदा शान्त: सदा क्षेमो नमामि शशिनन्दनम ॥३॥

उत्पातरूपी जगतां चन्द्रपुत्रो महाद्युति: ।
सूर्यप्रियकरोविद्वान पीडां हरतु मे बुधं ॥४॥

शिरीषपुष्पसंकाशं कपिलीशो युवा पुन: ।
सोमपुत्रो बुधश्चैव सदा शान्तिं प्रयच्छतु ॥५॥

श्याम: शिरालश्चकलाविधिज्ञ:, कौतूहली कोमलवाग्विलासी ।
रजोधिको मध्यमरूपधृक स्या-दाताम्रनेत्रो द्विजराजपुत्र: ॥६॥

अहो चन्द्रासुत श्रीमन मागधर्मासमुदभव: ।
अत्रिगोत्रश्चतुर्बाहु: खड्गखेटकधारक: ॥७॥

गदाधरो नृसिंहस्थ: स्वर्णनाभसमन्वित: ।
केतकीद्रुमपत्राभ: इन्द्रविष्णुप्रपूजित: ॥८॥

ज्ञेयो बुध: पण्डितश्च रोहिणेयश्च सोमज: ।
कुमारो राजपुत्रश्च शैशवे शशिनन्दन: ॥९॥

गुरुपुत्रश्च तारेयो विबुधो बोधनस्तथा ।
सौम्य: सौम्यगुणोपेतो रत्नदानफलप्रद: ॥१०॥

एतानि बुधनामानि प्रात: काले पठेन्नर: ।
बुद्धिर्विवृद्धितां याति बुधपीडा न जायते ॥११॥

॥ इति मंत्रमहार्णवे बुधस्तोत्रम संपूर्णम् ॥

बुध पञ्चविंशतिनाम स्तोत्रम् .....

विनियोग - अस्य श्री बुध पञ्चविंशतिनाम स्तोत्रस्य प्रजापति ऋषिः । त्रिष्टुप् छन्दः । बुधो देवता । बुधप्रीत्यर्थे पाठे विनियोगः ॥

बुधो बुद्धिमतां श्रेष्ठो बुद्धिदाता धनप्रदः ।
प्रियङ्गुकलिकाश्यामः कञ्जनेत्रो मनोहरः ॥१॥

ग्रहपमो रौहिणेयो नक्षत्रेशो दयाकरः ।
विरुद्धकार्यहन्ता च सौम्यौ बुद्धिविवर्धनः ॥२॥

चन्द्रात्मजो विष्णुरूपी ज्ञानी ज्ञो ज्ञानिनायकः।
ग्रहपीडाहरो दारपुत्रधान्यपशुप्रदः ॥३॥

लोकप्रियः सौम्यमूर्तिर्गुणदो गुणिवत्सलः ।
पञ्चविंशतिनामानि बुधस्यैतानि यः पठेत् ॥४॥

स्मृत्वा बुधं सदा तस्य पीडा सर्वा विनश्यति ।
तद्दिने वा पठेद्यस्तु लभते स मनोगतम् ॥५॥

॥ इति श्रीपद्मपुराणे बुधपञ्चविंशतिनामस्तोत्रं सम्पूर्णम् ॥

॥ बृहस्पति ग्रह ॥

गुरु सिन्धु देश में उत्पत्ति। अंगिरस गोत्र। जाति ब्राह्मण। पीता अंगिरस। पुत्र कच। पीत वर्ण। उत्तर दिशा।

- **शुभाशुभत्व - शुभ ग्रह**
- **भोग काल - एक वर्ष - 365 दिन**
- **बीज मंत्र - ॐ बृं बृहस्पतये नम: / ॐ ह्रीं क्लीं हूँ बृहस्पतये नम: / ॐ गुरवे नम:**
- **तांत्रिक मंत्र - ॐ ग्राँ ग्रीं ग्रौं स: गुरवे नम:**
- **वैदिक मंत्र - ॐ बृहस्पते अति यदर्यो अर्हाद्युम द्विभाति क्रतुमज्जनेषु।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम्॥**
- **पुराणोक्त मंत्र - ॐ देवानां च ऋषीणां च गुरुं काचन सन्निभम।
बुध्दि भूतं त्रिलोकेशं तं नमामि बृहस्पितम॥**
- **जप संख्या - 19000 कलयुगे चतुर्थगुणो अर्थात 76000 + दशांश हवन - 7600 + दशांश तर्पण - 760 + दशांश मार्जन - 76 = 84436**
- **जप समय - प्रात:काल (सूर्योदय के समय)**
- **हवनवस्तु - पीपल**
- **रत्न - 6.5 रत्ति पुखराज**
- **दान वस्तु - सुवर्ण, कांस्य, पुखराज, हल्दी, नमक, शक्कर, घोडा, पीतपुष्प, पीतवस्त्र, पीतधान्य, माणिक या विद्रुम**

बृहस्पति कवचम् (ब्रह्मयामलोक्तम्) .....

विनियोग - अस्य श्री बृहस्पति कवच महामन्त्रस्य। ईश्वर ऋषि:। अनुष्टुप छन्द:। बृहस्पति देवता। गं बीजं। श्रीं शक्ति:। क्लीं कीलकम्। बृहस्पति प्रीत्यर्थे पाठे विनियोग:।

**अभीष्टफलदं देवं सर्वज्ञं सुरपूजितम्।
अक्षमालाधरं शान्तं प्रणमामि बृहस्पतिम्॥१॥**

**बृहस्पति: शिर: पातु ललाटं पातु में गुरु:।
कर्णौ सुरुगुरु: पातु नेत्रे मेंऽभीष्टदायक:॥२॥**

**जिह्वां पातु सुराचायो नासां में वेदपारग:।
मुखं मे पातु सर्वज्ञो कण्ठं मे देवता शुभप्रद:॥३॥**

**भुजौ आङ्गिरस: पातु करौ पातु शुभप्रद:।
स्तनौ मे पातु वागीश: कुक्षिं मे शुभलक्षण:॥४॥**

**नाभिं देवगुरु: पातु मध्यं पातु सुखप्रद:।
कटिं पातु जगदवन्द्य: ऊरू मे पातु वाक्पति:॥५॥**

**जानु जङ्गे सुराचायो पादौ विश्वात्मकस्तथा।
अन्यानि यानि चाङ्गानि रक्षेन् मे सर्वतो गुरु:॥६॥**

**इत्येतत् कवचं दिव्यं त्रिसन्ध्यं य: पठेन्नर:।
सर्वान् कामानवाप्नोति सर्वत्र विजयी भवेत्॥७॥**

॥ इति श्री ब्रह्मयामलोक्तम् बृहस्पति कवचं सम्पूर्णम्॥

बृहस्पति कवचम् (मन्त्र महार्णवे) .....

पीताम्बरः पीतवपुः किरीटी, चतुर्भुजो देवगुरुः प्रशान्तः।
दधाति दण्डं च कमण्डलुं च, तथाक्षसूत्रं वरदोऽस्तु मह्यम् ॥१॥

नमः सुरेन्द्रवन्द्याय देवाचार्याय ते नमः।
नमस्त्वनन्तसामर्थ्यं देवासिद्धान्तपारगः ॥२॥

सदानन्द नमस्तेऽस्तु नमः पीडाहराय च।
नमो वाचस्पते तुभ्यं नमस्ते पीतवाससे ॥३॥

नमोऽद्वितीयरूपाय लम्बकूर्चाय ते नमः।
नमः प्रहृष्टनेत्राय विप्राणां पतये नमः ॥४॥

नमो भार्गवशिष्याय विपन्नहितकारकः।
नमस्ते सुरसैन्याय विपन्नत्राणहेतवे ॥५॥

विषमस्थस्तथा नृणां सर्वकष्टप्रणाशनम्।
प्रत्यहं तु पठेद्यो वै तस्य कामफलप्रदम् ॥६॥

॥ इति मन्त्रमहार्णवे बृहस्पतिस्तोत्रम् ॥

बृहस्पति स्तोत्रम् .....

विनियोग - अस्य श्री बृहस्पति स्तोत्रस्य। गृत्समद ऋषिः। अनुष्टुप् छन्दः। बृहस्पति र्देवता। बृहस्पति प्रीत्यर्थं जपे विनियोगः।

गुरुर्बृहस्पतिर्जीवः सुराचार्यो विदां वरः।
वागीशो धिषणो दीर्घश्मश्रुः पीताम्बरो युवा ॥१॥

सुधादृष्टिर्ग्रहाधीशो ग्रहपीडापहारकः।
दयाकरः सौम्यमूर्तिः सुरार्च्यः कुड्मलद्युतिः ॥२॥

लोकपूज्यो लोकगुरुः नीतिज्ञो नीतिकारकः।
तारापतिश्चाङ्गिरसो वेदवेद्यः पितामहः ॥३॥

भक्त्या बृहस्पतिं स्मृत्वा नामान्येतानि यः पठेत्।
अरोगी बलवान् श्रीमान् पुत्रवान् स भवेन्नरः ॥४॥

जीवेत् वर्षशतं मर्त्यः पापं नश्यति नश्यति।
यः पूजयेत् गुरुदिने पीतगन्धाक्षताम्बरैः ॥५॥

पुष्पदीपोपहारैश्च पूजयित्वा बृहस्पतिम्।
ब्रह्मणान् भोजयित्वा च पीडाशान्तिर्भवेत् गुरोः ॥६॥

॥ इति श्री स्कन्दपुराणे बृहस्पतिस्तोत्रं सम्पूर्णम् ॥

॥ शुक्र ग्रह ॥

शुक्र भोजकर्कट देश में उत्पत्ति। भार्गव गोत्र। जाति ब्राह्मण। दैत्य गुरु। संजीवनी विद्या ज्ञाता। इन्हीं के वंश में जामदग्नेय पुत्र परशुराम का अवतार हुआ था।

- **शुभाशुभत्व - शुभ ग्रह**
- **भोग काल - एक मास - 30 दिन**
- **बीज मंत्र - ॐ शुं शुक्राय नम: / ॐ ह्रीं श्रीं शुक्राय नम: / ॐ शुक्राय नम:**
- **तांत्रिक मंत्र - ॐ द्राँ द्रीं द्रौं स: शुक्राय नम:**
- **वैदिक मंत्र - ॐ अन्नात्परिस्त्रुतो रसं ब्रम्हणा व्यपिवत्क्षत्रं पय: सोमं प्रजापति:। ऋतेन सत्यमिन्द्रियँ विपानऽ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु॥**
- **पुराणोक्त मंत्र - ॐ हिमकुन्द मृणालाभं दैत्यानां परमं गुरुम। सर्वशास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहम॥**
- **जप संख्या - 16000 कलयुगे चतुर्थगुणो अर्थात 64000 + दशांश हवन - 6400 + दशांश तर्पण - 640 + दशांश मार्जन - 64 = 71104**
- **जप समय - ब्रह्मवेला (सुर्योदय)**
- **हवनवस्तु - गूलर**
- **रत्न - 1 रत्ति हीरा**
- **दान वस्तु - सुवर्ण, चाँदी, हीरा, चावल, घी, हल्दी, नमक, सफेदपुष्प, सफेदवस्त्र,सफेद घोडा**

शुक्र कवचम् .....

विनियोग - अस्य श्री शुक्र कवच स्तोत्र मन्त्रस्य। भारद्वाज ऋषि:। अनुष्टुप छन्द:। शुक्रो देवता। शुक्रप्रीत्यर्थे पाठे विनियोगः।

मृणालकुन्देन्दुपयोजसुप्रभं पीताम्बरं प्रभृतमक्षमालिनम्।
समस्तशास्त्रार्थनिधिं महांतं ध्यायेत्कविं वान्छितमर्थसिद्धये ॥१॥

ॐ शिरो मे भार्गव: पातु भालं पातु ग्रहाधिप:।
नेत्रे दैत्यबृहस्पति: पातु श्रोतो मे चन्दनद्युति: ॥२॥

पातु मे नासिकां काव्यो वदनं दैत्यवन्दित:।
वचनं चोशना: पातु कण्ठं श्रीकण्ठभक्तिमान् ॥३॥

भुजौ तेजोनिधि: पातु कुक्षिं पातु मनोव्रज:।
नाभिं भृगुसुत: पातु मध्यं पातु महीप्रिय: ॥४॥

कटिं मे पातु विश्वात्मा उरू मे सुरपूजित:।
जानु जाड्यहर: पातु जंघे ज्ञानवतां वर: ॥५॥

गुल्फो गुणनिधि: पातु पादौ वराम्बर:।
सर्वाण्यंगानि मे पातु स्वर्णमालापरिष्कृत: ॥६॥

य इदं कवचं दिव्यं पठति श्रद्धयान्वित:।
न तस्य जायते पीड़ा भार्गवस्य प्रसादत: ॥७॥

॥ इति श्रीब्रह्माण्डपुराणे श्रीशुक्रकवचस्तोत्रम् सम्पूर्णम् ॥

शुक्र स्तोत्रम् .....

नमस्ते भार्गव श्रेष्ठ देव दानव पूजित: ।
वृष्टिरोधप्रकर्त्रे च वृष्टिकर्त्रे नमो नम: ॥१॥

देवयानीपितस्तुभ्यं वेदवेदांगपारग: ।
परेण तपसा शुद्ध: शंकरो लोकशंकर: ॥२॥

प्राप्तो विद्यां जीवनाख्यां तस्मै शुक्रात्मने नम: ।
नमस्तस्मै भगवते भृगुपुत्राय वेधसे ॥३॥

तारामण्डलमध्यस्थ स्वभासा भासिताम्बर: ।
यस्योदये जगत्सर्वं मंगलार्हं भवेदिह ॥४॥

अस्तं याते ह्यरिष्टं स्यात्तस्मै मंगलरूपिणे ।
त्रिपुरावासिनो दैत्यान् शिवबाणप्रपीडितान् ॥५॥

विद्यया जीवयच्छुक्रो नमस्ते भृगुनन्दन ।
ययातिगुरवे तुभ्यं नमस्ते कविनन्दन ॥६॥

बलिराज्यप्रदो जीवस्तस्मै जीवात्मने नम: ।
भार्गवाय नमस्तुभ्यं पूर्वं गीर्वाणवन्दितम् ॥७॥

जीवपुत्राय यो विद्यां प्रादात्तस्मै नमोनम: ।
नम: शुक्राय काव्याय भृगुपुत्राय धीमहि ॥८॥

नम: कारणरूपाय नमस्ते कारणात्मने ।
स्तवराजमिदं पुण्यं भार्गवस्य महात्मन: ॥९॥

य: पठेच्छुणुयाद्वापि लभते वाँछितफलम् ।
पुत्रकामो लभेत्पुत्रान् श्रीकामो लभते श्रियम् ॥१०॥

राज्यकामो लभेद्राज्यं स्त्रीकाम: स्त्रियमुत्तमाम् ।
भृगुवारे प्रयत्नेन पठितव्यं सुसमाहितै: ॥११॥

अन्यवारे तु होरायां पूजयेद्भृगुनन्दनम् ।
रोगार्तो मुच्यते रोगात् भयार्तो मुच्यते भयात् ॥१२॥

यद्यत्प्रार्थयते वस्तु तत्तत्प्राप्नोति सर्वदा ।
प्रात: काले प्रकर्तव्या भृगुपूजा प्रयत्नत: ॥१३॥

सर्वपापविनिर्मुक्त: प्राप्नुयाच्छिवसन्निधि: ॥१४॥

॥ इति श्री स्कन्दपुराणे शुक्रस्तोत्रं सम्पूर्णम् ॥

शुक्र स्तोत्रम् .....

विनियोग - अस्य शुक्र स्तोत्र मन्त्रस्य । प्रजापति ऋषि: । अनुष्टुप छन्द: । शुक्रो देवता ।
शुक्र प्रीत्यर्थे पाठे विनियोगः ।

शुक्रः काव्यः शुक्ररेताः शुक्लांबरधरः सुधीः।
हिमाभः कुन्दधवलः शुभ्रांशुः शुक्लभूषणः ॥१॥

नीतिज्ञो नीतिकृन्नीतिमार्गगामी ग्रहाधिपः।
उशना वेदवेदांगपारगः कविरात्मवित् ॥२॥

भार्गवः करुणासिन्धुः ज्ञानगम्यः सुतप्रदः।
शुक्रस्यैतानि नामानि शुक्रं स्मृत्वा तु यः पठेत् ॥३॥

आयुर्धनं सुखं पुत्रान् लक्ष्मीं वसतिमुत्तमाम्।
विद्यां चैव स्वयं तस्मै शुक्रस्तुष्टो ददाति हि ॥४॥

॥ इति श्री ब्रह्माण्ड पुराणे शुक्रस्तोत्रं सम्पूर्णम् ॥

॥ शनि मंत्र ॥

शनि सौराष्ट्र देश में उद्भव । कश्यप गोत्र । जाति असुर । माता छाया । कृष्ण वर्ण । पश्चिम दिशा ।

- **शुभाशुभत्व - पाप ग्रह**
- **भोग काल - ढाई वर्ष - 912.5 दिन**
- **बीज मंत्र - ॐ शं शनैश्चराय नमः / ॐ ऐं ह्रीं श्रीं शनैश्चराय नमः / ॐ शनये नमः**
- **तांत्रिक मंत्र - ॐ प्राँ प्रीं प्रौं सः शनैश्चराय नमः**
- **वैदिक मंत्र - ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये ।**
  शँयो रभिस्त्रवन्तु नः ॥
- **पुराणोक्त मंत्र - ॐ नीलांजन समाभासं रविपुत्रं यमाग्रजम ।**
  छायामार्तण्ड संभूतं तं नमामि शनैश्चरम ॥
- **जप संख्या - 23000 कलयुगे चतुर्थगुणो अर्थात 92000 + दशांश हवन - 9200 + दशांश तर्पण - 920 + दशांश मार्जन - 92 = 102212**
- **जप समय - मध्यान**
- **हवनवस्तु - शमी**
- **रत्न - 5 से 7.5 रत्ति नीलम (लोहा)**
- **दान वस्तु - सुवर्ण, नीलम, उडद, तिल, तेल, भैस, लोहा,**
  कृष्णपुष्प, कृष्णवस्त्र, कालीगाय

शनि कवचम् .....

विनियोग - अस्य श्री शनैश्चर कवच स्तोत्र मन्त्रस्य । कश्यप ऋषिः । अनुष्टुप् छन्द । शनैश्चरो देवता । श्री शक्तिः । शूं कीलकम् । शनैश्चर प्रीत्यर्थे पाठे विनियोगः ।

नीलाम्बरो नीलवपुः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान्।
चतुर्भुजः सूर्यसुतः प्रसन्नः सदा मम स्याद्वरदः प्रशान्तः ॥१॥

ब्रह्मोवाच

श्रृणुध्वमृषयः सर्वे शनिपीडाहरं महत् ।
कवचं शनिराजस्य सौरेरिदमनुत्तमम् ॥२॥
कवचं देवतावासं वज्रपंजरसंज्ञकम् ।
शनैश्चरप्रीतिकरं सर्वसौभाग्यदायकम् ॥३॥
ॐ श्रीशनैश्चरः पातु भालं मे सूर्यनंदनः ।
नेत्रे छायात्मजः पातु कर्णो यमानुजः ॥४॥
नासां वैवस्वतः पातु मुखं मे भास्करः सदा ।
स्निग्धकण्ठश्च मे कण्ठ भुजौ पातु महाभुजः ॥५॥
स्कन्धौ पातु शनिश्चैव करौ पातु शुभप्रदः ।
वक्षः पातु यमभ्राता कुक्षिं पात्वसितस्थता ॥६॥
नाभिं गृहपतिः पातु मन्दः पातु कटिं तथा ।
ऊरू ममाऽन्तकः पातु यमो जानुयुगं तथा ॥७॥
पदौ मन्दगतिः पातु सर्वांग पातु पिप्पलः ।
अंगोपांगानि सर्वाणि रक्षेन् मे सूर्यनन्दनः ॥८॥
इत्येतत् कवचं दिव्यं पठेत् सूर्यसुतस्य यः ।
न तस्य जायते पीडा प्रीतो भवन्ति सूर्यजः ॥९॥

व्ययजन्मद्वितीयस्थो मृत्युस्थानगतोऽपि वा ।
कलत्रस्थो गतोवाऽपि सुप्रीतस्तु सदा शनिः ॥१०॥
अष्टमस्थे सूर्यसुते व्यये जन्मद्वितीयगे ।
कवचं पठते नित्यं न पीडा जायते क्वचित् ॥११॥
इत्येतत् कवचं दिव्यं सौरेर्यन्निर्मितं पुरा।
जन्मलग्नस्थितान्दोषान् सर्वान्नाशयते प्रभुः ॥१२॥

॥ श्री ब्रह्माण्डपुराणे ब्रह्म-नारद संवादे शनैश्चर कवचं संपूर्ण ॥

शनि स्तोत्रम् .....

नमः कृष्णाय नीलाय शितिकण्ठ निभाय च।
नमः कालाग्निरूपाय कृतान्ताय च वै नमः ॥१॥
नमो निर्मांस देहाय दीर्घश्मश्रुजटाय च ।
नमो विशालनेत्रय शुष्कोदर भयाकृते ॥२॥
नमः पुष्कलगात्रय स्थूलरोम्णेऽथ वै नमः ।
नमो दीर्घायशुष्काय कालदष्ट्र नमोऽस्तुते ॥३॥
नमस्ते कोटराक्षाय दुर्निरीक्ष्याय वै नमः ।
नमो घोराय रौद्राय भीषणाय कपालिने ॥४॥
नमस्ते सर्वभक्षाय वलीमुखायनमोऽस्तुते ।
सूर्यपुत्र नमस्तेऽस्तु भास्करे भयदाय च ॥५॥
अधोदृष्टेः नमस्तेऽस्तु संवर्तक नमोऽस्तुते ।
नमो मन्दगते तुभ्यं निरिस्त्रणाय नमोऽस्तुते ॥६॥
तपसा दग्धदेहाय नित्यं योगरताय च ।
नमो नित्यं क्षुधार्ताय अतृप्ताय च वै नमः ॥७॥
ज्ञानचक्षुर्नमस्तेऽस्तु कश्यपात्मज सूनवे ।
तुष्टो ददासि वै राज्यं रुष्टो हरसि तत्क्षणात् ॥८॥
देवासुरमनुष्याश्च सिद्धि विद्याधरोरगाः ।
त्वया विलोकिताः सर्वे नाशंयान्ति समूलतः ॥९॥
प्रसाद कुरु मे देव वाराहोऽहमुपागत ।
एवं स्तुतस्तदा सौरिर्ग्रहराजो महाबलः ॥१०॥

विनियोग - अस्य श्री शनैश्चर स्तोत्रं । दशरथः ऋषि । शनैश्चरो देवता । त्रिष्टुप् छंद ।
शनैश्चर प्रीत्यर्थे जपे विनियोगः ॥

दशरथ उवाच

कोणोऽन्तका रौद्रयमोऽख बभ्रुःकृष्णः शनि पिंगलमन्दसौरि ।
नित्य स्मृतो यो हरते पीड़ां तस्मै नमः श्रीरविनन्दाय ॥१॥
सुरासुराः किंपु-रुषोरगेन्द्रा गन्धर्वाद्याधरपन्नगाश्च ।
पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्री रविनन्दनाय ॥२॥
नराः नरेन्द्राः पशवो मृगेन्द्रा वन्याश्च ये कीटपतंगभृंगा।
पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्री रविनन्दनाय ॥३॥
देशाश्च दुर्गाणि वनानि यत्र सेनानिवेशाः पुरपत्तनानि ।
पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्री रविनन्दनाय ॥४॥
तिलैर्यवैर्माषगुडान्नदानैर्लोहेन नीलाम्बर-दानतो वा ।
प्रीणाति मन्त्रैर्निजिवासरे च तस्मै नमः श्री रविनन्दनाय ॥५॥
प्रयाग कूले यमुनातटे च सरस्वती पुण्यजले गुहायाम् ।
यो योगिनां ध्यागतोऽपि सूक्ष्मस्तस्मै नमः श्री रविनन्दनाय॥६॥
अन्यप्रदेशात्स्वःगृहं प्रविष्टस्तदीयवारे स नरः सुखी स्यात ।
गहाद्गतो यो न पुनः प्रयाति तस्मै नमः श्री रविनन्दनाय ॥७॥
स्त्रष्टा स्वयं भूर्भुवनत्रयस्य त्रोता हरीशो हरते पिनाकी ।
एक स्त्रिधा ऋग्यजुःसाममूर्तिस्तस्मै नमः श्री रविनन्दनाय ॥८॥
शन्यष्टकं यः प्रयतः प्रयाते नित्यं सुपुत्रैः पशुबान्धवैश्च।
पठेतु सौख्यं भुवि भोगयुक्तः प्राप्नोति निर्वाण पदं तदन्ते ॥९॥
कोणस्थः पिंगलो बभ्रुः कृष्णो रौद्रान्तको यमः।
सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः ॥१०॥
एतानि दश नामानि प्रतारुत्थाय यः पठेत् ।
शनैश्चकृता पीड़ा न कदाचिद् भविष्यति ॥११॥

॥ इति श्री दशरथ कृत शनि स्तोत्रम् सम्पूर्णम् ॥

॥ राहु ग्रह ॥

राहु राठिनापुर देश में उद्भव। पैठिनस गोत्र। जाति असुर। माता सिहिंका। निल वर्ण। नैऋत्य दिशा।

- **शुभाशुभत्व - क्रूर ग्रह**
- **भोग काल - डेढ़ वर्ष - 547.5 दिन**
- **बीज मंत्र - ॐ रां राहवे नमः / ॐ ऐं ह्रीं राहवे नमः / ॐ राहवे नमः**
- **तांत्रिक मंत्र - ॐ भ्राँ भ्रीं भ्रौं सः राहवे नमः**
- **वैदिक मंत्र - ॐ कया नश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता॥**
- **पुराणोक्त मंत्र - ॐ अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम। सिंहिकागर्भ संभूतं तं राहुं प्रणमाम्यहम॥**
- **जप संख्या - 18000 कलयुगे चतुर्थगुणो अर्थात 72000 + दशांश हवन - 7200 + दशांश तर्पण - 720 + दशांश मार्जन - 72 = 79992**
- **जप समय - रात्रिकाल 12 बजे**
- **हवनवस्तु - दूर्वा**
- **रत्न - 6.5 रत्ति गोमेद**
- **दान वस्तु - सुवर्ण, शीसा, गोमेद, तील, तेल, घोडा, लोहा, गेहुँ कृष्णपुष्प, नीलवस्त्र, कम्बल, अर्भक**

राहु कवचम् .....

विनियोग - अस्य श्रीराहु कवचस्य। चन्द्रमा ऋषिः। अनुष्टुप छन्दः। रां बीजं। नभः शक्तिः। स्वाहा कीलकम्। राहु प्रीत्यर्थे पाठे विनियोगः।

**प्रणमामि सदा राहुं शूर्पाकारं किरीटिनम्।
सैन्हिकेयं करालास्यं लोकानां भयप्रदम् ॥१॥**

**नीलाम्बरः शिरः पातु ललाटं लोकवन्दितः।
चक्षुषी पातु मे राहुः श्रोत्रे त्वर्धशरीरवान् ॥२॥**

**नासिकां मे धूम्रवर्णः शूलपाणिर्मुखं मम।
जिव्हां मे सिंहिकासूनुः कंठं मे कठिनांघ्रिकः ॥३॥**

**भुजङ्गेशो भुजौ पातु निलमाल्याम्बरः करौ।
पातु वक्षःस्थलं मन्त्री पातु कुक्षिं विधुन्तुदः ॥४॥**

**कटिं मे विकटः पातु ऊरु मे सुरपूजितः।
स्वर्भानुर्जानुनी पातु जंघे मे पातु जाड्यहा ॥५॥**

**गुल्फ़ौ ग्रहपतिः पातु पादौ मे भीषणाकृतिः।
सर्वाणि अंगानि मे पातु निलश्चन्दनभूषणः ॥६॥**

**राहोरिदं कवचमृद्धिदवस्तुदं यो।
भक्त्या पठत्यनुदिनं नियतः शुचिः सन् ॥७॥**

**प्राप्नोति कीर्तिमतुलां श्रियमृद्धिमायुरारोग्यम्।
आत्मविजयं च हि तत्प्रसादात् ॥८॥**

॥ इति श्रीमहाभारते धृतराष्ट्रसंजय सम्वादे द्रोणपर्वणि राहुकवचं सम्पूर्णम् ॥

राहु स्तोत्रम् .....

विनियोग - अस्य श्री राहु स्तोत्रस्य। वामदेव ऋषिः। गायत्री छन्दः। राहुर्देवता।
राहुप्रीत्यर्थे पाठे विनियोगः॥

**राहुर्दानव मन्त्री च सिंहिकाचित्तनन्दनः।
अर्धकायः सदाक्रोधी चन्द्रादित्यविमर्दनः ॥१॥**

**रौद्रो रुद्रप्रियो दैत्यः स्वर्भानुर्भानुमीतिदः।
ग्रहराजः सुधापायी राकातिथ्यभिलाषुकः ॥२॥**

**कालदृष्टिः कालरुपः श्रीकष्ठहृदयाश्रयः।
विधुंतुदः सैंहिकेयो घोररुपो महाबलः ॥३॥**

**ग्रहपीडाकरो द्रंष्टी रक्तनेत्रो महोदरः।
पञ्चविंशति नामानि स्मृत्वा राहुं सदा नरः ॥४॥**

**यः पठेन्महती पीडा तस्य नश्यति केवलम्।
विरोग्यं पुत्रमतुलां श्रियं धान्यं पशूंस्तथा ॥५॥**

**ददाति राहुस्तस्मै यः पठते स्तोत्रमुत्तमम्।
सततं पठते यस्तु जीवेद्वर्षशतं नरः ॥६॥**

॥ इति श्रीस्कन्दपुराणे राहुस्तोत्रं संपूर्णम् ॥

॥ केतु मंत्र ॥

केतु अंतर्वेदी देश में उत्पत्ति। जैमिनी गोत्र। जाति असुर। धूम्र वर्ण। वायव्य दिशा। छाया ग्रह।

- **शुभाशुभत्व - पाप ग्रह**
- **भोग काल - डेढ़ वर्ष - 547.5 दिन**
- **बीज मंत्र - ॐ कं केतवे नमः / ॐ ह्रीं ऐं केतवे नमः / ॐ केतवे नमः**
- **तांत्रिक मंत्र - ॐ स्रां स्रीं स्रौं सः केतवे नमः**
- **वैदिक मंत्र - ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे।
  समुषभ्दिरजायथाः॥**
- **पुराणोक्त मंत्र - ॐ पलाश पुष्प संकाशं तारका ग्रह मस्तकम।
  रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम॥**
- **जप संख्या - 17000 कलयुगे चतुर्थगुणो अर्थात 68000 + दशांश हवन - 6800 + दशांश तर्पण - 680 + दशांश मार्जन - 68 = 75548**
- **जप समय - रात्रिकाल 12 बजे**
- **हवनवस्तु - कुशा**
- **रत्न - 6.5 रत्ति लहसुनीया (पोलाद)**
- **दान वस्तु - सुवर्ण, लहसुनीया, पोलाद, तील, तेल, बकरी,
  कृष्णवस्त्र, धूम्रपुष्प, कम्बल, शस्त्र**

केतु कवचम् .....

विनियोग - अस्य श्रीकेतु कवच स्तोत्र मन्त्रस्य। त्रयम्बक ऋषिः। अनुष्टप् छन्दः। केतुर्देवता। कं बीजं। नमः शक्तिः। केतुरिति कीलकम्। केतु प्रीत्यर्थं पाठे विनियोगः।

**केतु करालवदनं चित्रवर्णं किरीटिनम्।
प्रणमामि सदा केतुं ध्वजाकारं ग्रहेश्वरम् ॥१॥**

**चित्रवर्णः शिरः पातु भालं धूम्रसमद्युतिः।
पातु नेत्रे पिंगलाक्षः श्रुती मे रक्तलोचनः ॥२॥**

**घ्राणं पातु सुवर्णाभश्चिबुकं सिंहिकासुतः।
पातु कंठं च मे केतुः स्कन्धौ पातु ग्रहाधिपः ॥३॥**

**हस्तौ पातु श्रेष्ठः कुक्षिं पातु महाग्रहः।
सिंहासनः कटिं पातु मध्यं पातु महासुरः ॥४॥**

**ऊरुं पातु महाशीर्षो जानुनी मेऽतिकोपनः।
पातु पादौ च मे क्रूरः सर्वाङ्गं नरपिंगलः ॥५॥**

**य इदं कवचं दिव्यं सर्वरोगविनाशनम्।
सर्वशत्रुविनाशं च धारणाद्विजयि भवेत् ॥६॥**

॥ इति श्रीब्रह्माण्डपुराणे केतुकवचं सम्पूर्णम् ॥

केतु स्तोत्रम् .....

विनियोग - अस्य श्रीकेतु पंच विंशति नाम स्तोत्रस्य। मधुपछन्द: ऋषिः। गायत्री छन्दो:। केतुर्देवता। केतु प्रीत्यर्थे पाठे विनियोगः।

केतु: काल: कलयिता धूम्रकेतुर्विवर्णक:।
लोककेतुर्महाकेतु: सर्वकेतुर्भयप्रद: ॥१॥

रौद्रो रूद्रप्रियो रूद्र: क्रूरकर्मा सुगन्धक्।
फलाशधूमसंकाशश्चित्रयज्ञोपवीतधृक् ॥२॥

तारागणविमर्दो च जैमिनेयो ग्रहाधिप:।
पंचविंशति नामानि केतुर्य: सततं पठेत् ॥३॥

तस्य नश्यंति बाधाश्चसर्वा: केतुप्रसादत:।
धनधान्यपशूनां च भवेद् व्रद्धिर्नसंशय: ॥४॥

॥ इति श्री केतु स्तोत्रम् सम्पूर्णम् ॥

એક વખત ખરીદી ખાત્રી કરો
श्री
वैदिक-नवग्रहशान्ति विधानपद्धतिः
સબીજ,વેદોક્ત,પુરાણોક્ત નવગ્રહમંત્ર
ધ્યાન,પૂજા,સ્તોત્ર,પાઠ,કવચ,દાન,
જપ સંખ્યા,મંગલવ્રતવિધાનસહિત
(૧૦૧) વિષયોથી ભરપૂર
ગ્રહપીડિત મનુષ્યોના રક્ષણમાટે
નવ્વાણું ઉપાયમાંનો એક મહાન
ચમત્કારિક ગ્રંથ
पण्डित नारायण मूलजी पुस्तकालय
कालिकादेवी रोड, मुंबई नं० २

वैदिक-नवग्रहशान्ति-विधानपद्धतिः ।

(मङ्गलव्रतविधानसमन्विता सबीजवेदोक्तपुराणोक्तनवग्रहमन्त्रध्यानपूजास्तोत्रपाठकवचदानजपसंख्यासहिता च)

(ग्रहपीडित मनुष्योना रक्षण माटे नव्वाणुं उपायमांनो एक महान् चमत्कारिक ग्रन्थ)

प्रयोजकः—

शुक्ल उमाशंकर नर्मदाशंकर (सिद्धपुरनिवासी)

प्रकाशकः—

राजगुरुपंडितरविशंकरज्येष्ठारामात्मजजदुरामशर्मा

संशोधकः—

शास्त्री हरगोविन्द यदुराम व्यास

प्रचारकः—

पण्डित नारायण मूलजी पुस्तकालय

कालकादेवीरोड, नरनारायणमन्दिरपासे **मुंबई, २**

शके १८६१] **प्रथमावृत्तिः** [सने १९३९

मूल्यं ०–६–० आणकाः

॥ अथ विषयानुक्रमणिका ॥

	विषयाः	पृष्ठाङ्काः
१	ग्रहशान्त्यर्थविचारः ...	२
२	ग्रहाणांजपसंख्या... ...	२
३	राशिपरत्वेरोगिमरण-विचारज्ञानम्	३
४	नवग्रहसमिदादिविचारः ...	४
५	राशिचक्रम्	४
६	ग्रहराशिविचारः	५
७	शुभाशुभफलविचारः ...	५
८	सूर्यशुभफलम्	५
९	सूर्यअशुभफलम्	५
१०	सूर्यपूजाप्रयोगः	६
११	ब्राह्मणवरणविधिः ...	७
१२	प्रधानसंकल्पः	७
१३	उपयुक्तविचारः	८
१४	जपसंकल्पः	९
१५	आदित्यमंत्रः	९
१६	सूर्यदानम्	१०
१७	पुराणोक्तसूर्यमन्त्रः ...	११
१८	सूर्यकवचम्	११
१९	सूर्यकवचस्तोत्रम्	१३
२०	शुभचन्द्रफलम्	१४
२१	अशुभचन्द्रफलम् ...	१४
२२	चन्द्रपूजाप्रयोगः ...	१५
२३	सङ्कल्पः	१५
२४	चन्द्रमन्त्रः	१६
२५	चन्द्रदानम्	१६
२६	पुराणोक्तचन्द्रमंत्रः ...	१७
२७	चन्द्रकवचम्	१७
२८	चन्द्रस्तोत्रम्	१८
२९	भौमस्य शुभफलम् ...	१८
३०	मङ्गलयंत्रम्	१९
३१	भौमस्यअशुभफलम् ...	२०
३२	मङ्गलपूजाप्रयोगः... ...	२०
३३	भौममन्त्रजपविधिः ...	२५
३४	भौममन्त्रः	२६
३५	भौमदानम्	२६
३६	पुराणोक्तभौममन्त्रः ...	२६
३७	मङ्गलकवचम्	२७
३८	मङ्गलस्तोत्रम्	२७
३९	बुधपूजाप्रयोगः	२९
४०	बुधस्यशुभफलम्	२९
४१	बुधस्यअशुभफलम् ...	२९
४२	संकल्पः	३०
४३	देहाङ्गन्यासः	३०
४४	बुधमन्त्रः	३०
४५	बुधदानम्	३१
४६	पुराणोक्तबुधमन्त्रः ...	३१
४७	बुधकवचम्	३१
४८	बुधस्तोत्रम्	३२
४९	गुरुपूजाप्रयोगः	३३
५०	गुरोःशुभफलम्	३३

विषयाः	पृष्ठाङ्काः
५१ गुरोःअशुभफलम् ...	३३
५२ संकल्पः	३४
५३ बृहस्पतिमन्त्रः	३५
५४ गुरुदानम्...	३५
५५ पुराणोक्तगुरुमन्त्रः ...	३५
५६ बृहस्पतिस्तोत्रम्	३६
५७ बृहस्पतिकवचम्	३६
५८ शुक्रपूजाप्रयोगः	३७
५९ शुक्रस्यशुभफलम् ...	३७
६० शुक्रस्यअशुभफलम् ...	३७
६१ सङ्कल्पः	३८
६२ शुक्रमन्त्रः	३९
६३ शुक्रदानम्	३९
६४ पुराणोक्तशुक्रमन्त्रः ...	३९
६५ शुक्रकवचम्	४०
६६ शुक्रस्तोत्रम्	४०
६७ शनिपूजाप्रयोगः	४२
६८ मन्दस्यशुभफलम् ...	४२
६९ मन्दस्यअशुभफलम् ...	४२
७० लघुपनोतिविचारः ...	४२
७१ बृहत्पनोतिविचारः ...	४३
७२ पनोतिपादफलम् ...	४३
७३ प्रातःकृत्यम्	४४
७४ सङ्कल्पः	४४
७५ शनिमन्त्रः	४५
७६ शनैश्चरस्यदानम्	४५
७७ पुराणोक्तशनिमंत्रः ...	४६
७८ शनिकवचम्	४६
७९ शनिस्तोत्रम्	४७
८० राहुपूजाप्रयोगः	४९
८१ राहोःश्रेष्ठफलमशुभफलंच	४९
८२ संकल्पः	५०
८३ राहुमन्त्रः...	५०
८४ राहोर्दानम्	५१
८५ पुराणोक्तराहुमंत्रः ...	५१
८६ राहुकवचम्	५१
८७ राहुस्तोत्रम्	५२
८८ केतुपूजाप्रयोगः	५३
८९ केतुशुभफलम्	५३
९० केतुअशुभफलम्	५३
९१ प्रातःकृत्यम्	५३
९२ संकल्पः	५४
९३ केतुमन्त्रः...	५४
९४ केतोर्दानम्	५५
९५ पुराणोक्तकेतुमन्त्रः ...	५५
९६ केतुकवचम्	५६
९७ केतुस्तोत्रम्	५६
९८ श्रेयोदानविधिः	५७
९९ नवग्रहस्तोत्रम्	५८
१०० हनुमत्स्तोत्रम्	६०
१०१ घंटाकरण महावीरानो मंत्र	६१

પ્રસ્તાવના

આધુનિક સમયમાં પાશ્ચાત્ય કેળવણી લીધેલા સુશિક્ષિત લોકોને 'ફલજ્યોતિષ શાસ્ત્ર' ઉપર-વિશ્વાસ હોતો નથી. એટલું જ નહિ પણ એ શાસ્ત્રવિષે રહેલું પોતાનું અજ્ઞાન ન દર્શાવતાં તેઓ તેને પેટ ભરવાનું એક સાધન ગણી ઊપહાસ કરે છે.

કોઈ પણ સુજ્ઞ મનુષ્ય આ વિષયમાં જો સૂક્ષ્મદૃષ્ટિથી અવલોકન કરશે તો સત્ય-વસ્તુ શું છે તેની સમજણ પડશે, એમાં જરા પણ શંકા નથી. સૂર્ય અને ચંદ્રનો નિયમિત રીતે અને સમયે થતો ઉદયાસ્ત આપણે દરરોજ નજરે જોઇએ છીએ. તેમ જ સમુદ્રમાં જે ભરતી ઓટ નિયમિત રીતે થાય છે તે પણ આપણે ઘણી વાર નજરે જોએલું હશે. ગ્રહો પણ પોતાની ગતિઅનુસાર નિયમિત રીતે અને સમયે આકાશમાં પોતાના માર્ગનું આક્રમણ કરે છે. ચંદ્રસૂર્યના ગ્રહણો ગતિ મુજબ ચોક્કસ ટાઇમેજ થાય છે. કમળની પાંખડીઓ સૂર્યોદય થયાં પછી ખીલે છે, અને સામલતાઓનું ક્ષય તથા વૃદ્ધિત્વ ચંદ્રની કલા ઉપર અવલંબિત છે. ભિન્ન ભિન્ન પ્રકારના ફલો તથા પુષ્પો પણ નિયમિત રીતે નિયમિત ઋતુમાં જ થાય છે, જ્યારે આ બધું નિયમિત રીતે અને નિયમિત ટાઇમે થાય છે તો પછી બાકીનાં બધાં કાર્યો અનિયમિત રીતે થઈ શકે ખરાં કે ?

જ્યારે સઘળાં કાર્યો એકજ નિયમિત મર્યાદામાં થવાં જોઇએ એવો સિદ્ધાન્ત છે માટે ફળજ્યોતિષ પણ ખરૂં છે. એમ કહેવામાં જરાપણ વાંધો નથી.

પ્રાણીઓનાં જન્મ, મરણ, ઉન્નતિ, અવનતિ, સંતતિ, સંપત્તિ વિગેરે સારા માઠાં પ્રસંગો ગ્રહોની સ્થિતિ ઉપર જ આધાર રાખે છે. સામાન્ય રીતે આપણે જોઇએ છીએ કે જેમની જન્મ રાશિથી અથવા જન્મલગ્નથી ગુરૂ જ્યારે ૪।૮।૧૨। અથવા મંગળ ૪।૮।૧૨।૭ અથવા શનિ ૪।૮।૧૨ પનોતિ ચાલુ હોય ત્યારે અશુભ ફળ ન મળ્યું હોય એવું ક્વચિત જ જોવામાં આવે છે.

સામાન્ય રીતે જ્યારે એનો અનુભવ થાય છે તો પછી ગ્રહોનું વિશિષ્ટ પ્રકારની ગતિમાં પરિભ્રમણ થાય છે ત્યારે તો અમુક પ્રકારનું વિશિષ્ટ શુભાશુભ ફળ મળ્યા સિવાય રહેતું નથી. તેમાં ગ્રહોની કસૂર નથી પરંતુ—અજ્ઞાનતાને લીધે આપણે કોઈ પણ ઉપાય ન કરતાં સંકટોના ભોગ થઇએ છીએ માટે શાસ્ત્ર શું છે તે જાણવાને

માટે પ્રયત્ન કરી તેમાં વિશ્વાસ રાખીને તેમાં દર્શાવેલા ઉપાયો યોજવામાં તત્પર થવું જોઇએ. અશુભ ગ્રહોની શાંતિ કરવાથી શુભ ફળ કેવી રીતે મળે છે ?

અશુભ ગ્રહોના યોગથી મનુષ્ય ઉપર અનેકપ્રકારના સંકટો આવે છે, રોગ ઉત્પન્ન થાય છે. દ્રવ્યનો નાશ થાય છે, અકાળ મૃત્યુ પ્રાપ્ત થાય છે એવાં ઘણા અનિષ્ટ પરિણામો ઉપજે છે ત્યારે અશુભ ગ્રહોની શાંતિ શાસ્ત્રમાં દર્શાવેલા દાન, જપ વિગેરે ઉપાયોવડે કરવાથી અનિષ્ટ પ્રસંગો ટળી જાય છે. (સંકટોનો નાશ થાય છે) બધાં જ સંકટોનો નાશ થાય તે એવું નથી કારણ કે કેટલા એક પ્રસંગો એવા હોય છે જે ટાળવા ઘણા મુશ્કેલ છે. તેથી શાસ્ત્ર ખોટું છે તેમ જ તેનો ઉપયોગ નથી એમ કહેવું એ ભૂલ ભરેલું છે. ધારો કે આપણા શરીરની સર્વ શક્તિઓ જ્યારે નષ્ટ થઈ વૃદ્ધત્વ આવે છે ત્યારે વૈદ્યકશાસ્ત્રમાં કહેલા કોઈ પણ ઔષધથી તે નષ્ટ થઈ શકતું નથી એટલે ઔષધોપચારથી ગયેલી સર્વ શક્તિઓ પાછી આવીને યુવાવસ્થા પ્રાપ્ત થતી નથી. માટે વૈદ્યકશાસ્ત્ર ખોટું છે તેમજ તેનો કંઈ ઉપયોગ નથી એમ કહેવું ભુલ ભરેલું છે તેવી જ રીતે ફળજ્યોતિષ શાસ્ત્રનિરૂપયોગી છે એમ કહેવું એ મૂર્ખતા જ છે.

ગ્રહ શું વસ્તુ છે એ પ્રશ્નનું ઉત્તર આપણી પૃથ્વી પ્રમાણે જ ગ્રહો પણ માટી પથ્થર વિગેરે દ્રવ્યોથી બનેલા છે. માટી તથા પથ્થર વિગેરેથી બનેલા ગ્રહોનું પૂજન કરવાથી તે પ્રસન્ન થાય તે એ મૂર્તિપૂજક લોકોને વધારે વિસ્તારથી કહેવાની આવશ્યકતા નથી. અત્યંત શ્રેષ્ઠ અને દયાળુ એવા જગન્નિયંતા સર્વત્ર જળ, સ્થળ, કાષ્ટ, પાષાણ આદિ વસ્તુઓમાં વાસ કરે છે માટે ગ્રહોમાં પણ તે હોવા જોઇએ અને ગ્રહોની પૂજા એટલે જ સાક્ષાત્ પરમાત્માની પૂજા થાય છે. અને તેથી આવનારાં સંકટોનું તેની કૃપાથી નિવારણ થાય છે. ઈશ્વરની કૃપા શિવાય કોઈ પણ સંકટ દુર થવું અશકય છે. એવું આપણે બધાં જાણીએ છીએ અને ગ્રહોની પૂજા અથવા જપ એજ ઈશ્વરની પૂજા છે માટે તે કરવાથી ઈશ્વર પ્રસન્ન થઇને પોતાનાં ભક્તોની ઇચ્છાઓ પૂર્ણ કરી તેમનું રક્ષણ કરે છે. ગ્રહોની શાંતિ અને જપ દાન વિગેરે કરવાથી સંકટો તેમજ અનિષ્ટ-બનાવો ટળી જાય છે (તેનો નાશ થાય છે) તેમાં જરા પણ શંકાને સ્થાન આપવા જેવું નથી. અનિષ્ટ ગ્રહોના શાંતિ, દાન જપ વિગેરે કરવાથી ઘણા માણસો સંકટ તેમજ રોગ મુક્ત થયા છે એવો અમારો અનુભવ છે માટે શાસ્ત્રમાં દર્શાવેલા ઉપાયો પરમાત્મા ઉપર શ્રદ્ધા રાખીને કરશો તો જરૂર તેનું શુભ ફળ મળશે. પ્રસ્તુત ગ્રંથના વિષય ઉપર અત્યાર સુધીમાં ઘણા પુસ્તકો બહાર

પડેલા છે પરંતુ તેમાં ઘણી ખામીઓ છે તથા અશુદ્ધિ હોવાના કારણે અમોએ આ સ્તુત્ય પ્રયાસ કર્યો છે. વૈદિક—નવગ્રહ શાન્તિ વિધાન પદ્ધતિમાં દરેક ગ્રહના નામ રૂપ, વર્ણ તેના જપ સંખ્યાનો પ્રકાર, દાન, જપની વિધિ તેમજ દરેક ગ્રહનું સ્તોત્ર કવચ, આપવામાં આવેલું છે.

વૈદિકમંત્રનો જેને અધિકારનથી તેને માટે પણ પુરાણોક્ત મંત્ર આપેલા છે. ઉપરાંત વિભીષણ વિરચિત સંકટ મોચન હનુમાન વડવાનલ સ્તોત્ર તથા ઘંટાકરણનો એક ચમત્કારિક પ્રયોગ પણ સાથે દાખલ કરેલ છે જે પ્રયોગ કરવાથી ત્વરિત સિદ્ધિ પ્રાપ્ત થાય છે એટલુંજ નહિ પણ મનુષ્યે ધારેલા ઘણા કાર્યો તેમાંથી થાય છે અત્યાર સુધીમાં આ વિષય ઉપર છપાયેલ પુસ્તકોમાં આ ગ્રંથ સર્વોત્કૃષ્ટ છે એમાં જરા પણ સંદેહનથી કારણકે તેમાં દર્શાવેલા મંત્રો વિગેરે પ્રાચીન ઋષિમુનિ-પ્રણીત હસ્તલિખીત ગ્રંથોમાંથી મેળવેલા છે માટે આ ગ્રંથ જનતાને એક અલૌકીક દિવ્ય સંદેશ છે એમ કહેવામાં અતિશયોક્તિ નથી.

રાજગુરૂ પંડિત રવિશંકર જેષ્ટારામ

श्रीशुक्लयजुःशाखीयकर्मकाण्डनो महान् ग्रंथ.

तैयार छे.] वेदोक्तसंस्कारप्रयोगकर्मावली. [तैयार छे.

આ ગ્રંથ સુકલયજુર્વેદીય માધ્યંદિની શાખાના બ્રાહ્મણોને ગર્ભાધાનાદિ ષોડશ સંસ્કારો કરવા કરાવવા માટે અતિ ઉપયોગી છે. એની પ્રયોગરચના અને પદ્ધતિ એવી ઉત્તમ અને સરલ રીતે યોજી છે કે એની મદદ લઈ દરેક બ્રાહ્મણ (વિદ્વાન્ કે અવિદ્વાન્) સરલતાથી પ્રયોગ કરાવી શકે છે. અને પ્રયોગવિધિ ઝટ સમજી શકે છે.

જેમને વ્યાકરણનું જ્ઞાન નથી છતાં શુકલવૃત્તિ [યજમાનવૃત્તિ] કરવાની છે તેવાઓને આ ગ્રંથ એક આશીર્વાદરૂપ છે. તેથી જ આ ગ્રંથ બીજા ગ્રંથો કરતાં ઘણે દરજ્જે શ્રેષ્ઠ છે. કારણ કે સરળ ભાષા અને સરળ રચનાને લીધે આખો પ્રયોગ ઝાઝો પ્રયત્ન કર્યા વિના જ અનાયાસે જલદી મુખપાઠ થઈ શકે છે અને વારંવાર બીજા ગ્રંથોની પેઠે પ્રયોગ કરાવતી વખતે પુસ્તક સાથે રાખવાની જરૂર પડતી નથી. વળી આમાં જ્યોતિષશાસ્ત્રને અનુસરી સંસ્કાર કર્મો માટેનાં મુહૂર્તો અને લગ્નશુદ્ધિ માટેના ઘટતા શાસ્ત્રાર્થ સાથેનો સ્પષ્ટ નિર્ણય સવિસ્તર પ્રસિદ્ધ કર્યો છે, જેથી તેને માટે બીજા ગ્રંથો જોવાની કે કોઈ વિદ્વાનને પૂછવાની જરૂર રહેતી નથી. વળી આ ગ્રંથ ન્હાનાં મ્હોટાં શાંતિકર્મો, ગ્રહશાંતિ, નવચંડી, વિષ્ણુયાગ જેવાં યાજ્ઞિક કાર્યોમાં પણ ઘણો ઉપયોગી થઈ પડે તેમ છે. ખાસ કરી સ્વસ્તિ-વાચન, ગ્રહદેવતામંડલ, અર્કવિવાહ, વર્ધાપનપ્રયોગ અને ગ્રહશાંતિના પ્રયોગો વિદ્વાનો પાસે પ્રથમથી સંશોધન કરાવીને જ દાખલ કરેલા છે. અને લગ્નવિધિમાં અતિ ઉપયોગી સપ્તપદીના મંત્રો [વરવધૂને લેવાની પ્રતિજ્ઞાઓ]ના ગુજરાતી અર્થો અને મંગલાષ્ટક સાથે આપેલાં છે તેથી ચાલુ જમાનામાં દરેકને વિવાહક્રિયામાં રસ પડી શકે તેમ છે. ટુંકમાં આવો કોઈ ઉત્તમ ગ્રંથ હજુ સુધી બહાર પડ્યો નથી. એક વખત મંગાવી જોઈ ખાત્રી કરી લેવાની ખાસ ભલામણ કરીએ છીએ. સુંદર બાઇન્ડીંગ, ઉંચા ગ્લેજ કાગળ અને સુવાચ્ય ટાઈપોમાં છપાવી વિશેષમાં અનુક્રમ-ણિકા ગ્રહોનું કોષ્ટક વિગેરે વિગેરે પરિશિષ્ટરૂપે સાથે છે. છતાં કીંમત માત્ર રૂ. ૨-૦-૦ રાખી છે. બહારગામ પોસ્ટેજ જુદું.

मलवानुं ठेकाणुः—

पंडित नारायण मूलजी पुस्तकालय,

२२९, कालबादेवी रोड, नरनानायण मंदिर पासे, **मुंबई**-२.

॥ श्रीगणेशाय नमः ॥

अथ वैदिक–नवग्रहशान्ति–विधानपद्धतिः

(मङ्गलव्रतसमन्वित–नवग्रह–ध्यान–पूजा–पाठ–स्तोत्रकवच,
मन्त्र–जप–दान–विधिसहिता ।)

ग्रहशान्त्यर्थविचारः ॥

देवब्राह्मणवन्दनाद् गुरुवचःसंपादनात्प्रत्यहं
साधूनामभिभाषणात्कतिपयश्रेयःकथाकर्णनात् ॥
होमादध्वरदर्शनाच्छुचिमनोभावाज्जपाद्दानतो
नो कुर्वंति कदाचिदेव पुरुषस्यैवं ग्रहाः पीडनम् ॥ १ ॥

જ્યારે પોતાને ગ્રહદશા નઅળી હોય અથવા દશા અન્તરદશા સારી ન હોય ત્યારે ગ્રહદોષશાન્ત્યર્થે આટલું કર્મ અવશ્ય કરવું જોઇએ. પોતાના ઇષ્ટ દેવતા અને બ્રાહ્મણને દંડવત્ વંદન (પ્રણામ) કરવાથી, ગુરૂની આજ્ઞાનું પાલન કરવાથી, દરરોજ મહાત્મા સાધુ-સંન્યાસી પુરૂષોની સાથે વાર્તાલાપ કરવાથી, કેટલીએક પરમાત્માના ગુણાનુવાદવાળી કથાઓ સાંભળવાથી, સૂર્યાદિ ગ્રહોની શાન્ત્યર્થે મંડપ બનાવી તે મધ્યે કુંડ કરી, ગ્રહવેદીની રચના કરી તે મધ્યે સૂર્યાદિ ગ્રહોનું પૂજન કરી ગ્રહોની જપસંખ્યા પ્રમાણે જપ કરી તેનો દશાંશ જવ-તિલ-સમિધ-ઘૃતયુક્ત હોમ કરવાથી, યજ્ઞનારાયણના દર્શનથી, મન શુદ્ધ હોવાથી, અનુષ્ઠાન કરવાથી તથા સૂર્યાદિ ગ્રહોનું દાન આપવાથી, પુરુષોને કદીપણ સૂર્યાદિ ગ્રહો પીડા કરતા નથી. ૧

अथ ग्रहाणां जपसंख्या ॥

रवेः सप्तसहस्राणि चन्द्रस्यैकादश स्मृताः ॥
भौमे दशसहस्राणि बुधे चाष्टसहस्रकम् ॥
एकोनविंशतिर्जीवे भृगोर्नृपसहस्रकम् ॥
त्रयोविंशतिः सौरेश्च राहोरष्टादश स्मृताः ॥
केतोरत्यष्टसाहस्रं जपसंख्याः प्रकीर्तिताः ॥

कलौ चतुर्गुणम् ॥

સૂર્યના જપ ૭૦૦૦ હજાર, ચંદ્રના ૧૧૦૦૦ હજાર, મંગલના ૧૦૦૦૦ હજાર, બુધના ૮૦૦૦ હજાર, ગુરૂના ૧૯૦૦૦ હજાર, શુક્રના ૧૬૦૦૦ હજાર, શનિના ૨૩૦૦૦ હજાર, રાહુના ૧૮૦૦૦ હજાર, અને કેતુના ૧૭૦૦૦ હજાર, આ પ્રમાણે સૂર્યાદિ નવગ્રહોના જપની સંખ્યા કહેલી છે. અને કલિયુગમાં ચાર ગણુા જપ કરવાથી તેનું ફળ મલે છે.

राशिपरत्वे रोगिमरणविचारज्ञानम् ॥

૧ **मेष** રાશિવાળાને **पूर्वाफाल्गुनी** નક્ષત્રમાં તાવ આવ્યો હોય તો તે જીવે નહીં. ૨ **वृषभ** રાશિવાળાને **हस्त** નક્ષત્રમાં તાવ આવ્યો હોય તો તે બચેજ નહીં. ૩ **मिथुन** રાશિવાળાને **स्वाति** નક્ષત્રમાં તાવ આવ્યો હોય તો તે મરણુ પામે છે. ૪ **कर्क** રાશિવાળાને **अनुराधा** નક્ષત્રમાં તાવ આવ્યો હોય તો તે સ્વધામમાં પહોંચે છે. ૫ **सिंह** રાશિ-વાળાને **पूर्वाषाढा** નક્ષત્રમાં તાવ આવ્યો હોય તો તે આ લોક છોડી યમલોકમાં પધારે છે. ૬ **कन्या** રાશિવાળાને **श्रवण** નક્ષત્રમાં તાવ આવ્યો હોય તો તે યમપુરીમાં જાય છે. ૭ **तुला** રાશિવાળાને **शत-मिषा** નક્ષત્રમાં તાવ આવ્યો હોય તો તે મરણુને શરણુ થાય છે. ૮ **वृश्चिक** રાશિવાળાને **रेवती** નક્ષત્રમાં તાવ આવ્યો હોય તો તે યમલોકમાં જાય છે. ૯ **धन** રાશિવાળાને **भरणी** નક્ષત્રમાં તાવ આવ્યો હોય તો તે સ્વર્ગવાસી થાય છે. ૧૦ **मकर** રાશિવાળાને **रोहिणी** નક્ષત્રમાં તાવ આવ્યો હોય તો તે કૈલાસવાસી થાય છે. ૧૧ **कुंभ** રાશિવાળાને **आर्द्रा** નક્ષત્રમાં તાવ આવ્યો હોય તો તેનું મૃત્યુ થાય છે. ૧૨ **मीन** રાશિવાળાને **आश्लेषा** નક્ષત્રમાં તાવ આવ્યો હોય તો તે જરૂર યમલોકમાં જાય છે. માટે રાશિપરત્વેનો વિચાર કરીને જે ગ્રહ અરિષ્ટ હોય તે ગ્રહનો જપ, હોમ, દાન, સ્તોત્ર–પાઠ બ્રાહ્મણુ પાસે કરાવવાથી જલદી આરામ થાય છે અને ગ્રહોનું ફળ દરેક પ્રકારે શુભ લાભદાયક

થાય છે. અને વિશેષમાં રુદ્રાભિષેક અને મહામૃત્યુંજયના જપ, વિદ્વાન્ બ્રાહ્મણ પાસે કરાવવાથી આયુષ્ય અને આરોગ્યતા પ્રાપ્ત થાય છે.

॥ नवग्रहसमिदादिविचारः ॥

सूर्य० जपान्ते अर्कसमित्तिलपायसघृतैर्दशांशहोमः तद्दशांशतर्पणं तद्दशांशमार्जनं तद्दशांशब्राह्मणभोजनम् च जपसंख्या ७००० ॥ चन्द्राय० पलाश० जप ११००० ॥ भौमाय० खदिर० जप १०००० ॥ बुधाय० अपामार्ग जप ८००० ॥ गुरवेअश्वत्थ० जप १९००० ॥ शुक्राय० उदुम्बर० जप १६००० ॥ शनैश्चराय० शमीस० जप २३००० राहवे दूर्वा० जप १८००० ॥ केतवे कुशस० जप १७००० अन्यत्सर्वं पूर्ववत् ॥ यस्मिंश्च निगदेनैव जपसंख्या विधीयते ॥ तत्र सर्वत्र मंत्राणां संख्यां वृद्धिर्युगक्रमात् ॥ कल्पोक्तैव कृते संख्या त्रेतायां द्विगुणा भवेत् ॥ द्वापरे त्रिगुणा प्रोक्ता कलौ संख्या चतुर्गुणा ॥ १ ॥ इति वैशंपायनसंहितावचनम् ॥

राशि (રાશિ જોવાની સમજણ) चक्रम् ॥

રાશિ	—	અક્ષરો	રાશિ	—	અક્ષરો
૧ મેષ	—	અ. લ. ઈ.	૭ તુલા	—	ર. ત.
૨ વૃષભ	—	બ. વ. ઉ.	૮ વૃશ્ચિક	—	ન. ય.
૩ મિથુન	—	ક. છ. ઘ.	૯ ધન	—	ભ. ધ. ફ. ઢ.
૪ કર્ક	—	ડ. હ.	૧૦ મકર	—	ખ. જ.
૫ સિંહ	—	મ. ટ.	૧૧ કુંભ	—	ગ. શ.
૬ કન્યા	—	પ. ઠ. ણ.	૧૨ મીન	—	દ. ચ. થ. ઝ.

આ પ્રમાણે બાર રાશિઓ છે. તેમાં ઈશ્વર નામના માણસને પોતાની રાશિ જાણવી હોય તો પોતાના નામનો પહેલો અક્ષર 'ઈ' એટલે ઉપર જણાવેલી પેહેલી રાશિમાં (અ. લ. ઈ.) છે માટે 'ઈ' એ મેષ રાશિમાં આવ્યો, એટલે ઈશ્વરની મેષ રાશિ કહેવાય એજ પ્રમાણે દરેક અક્ષરોની રાશિનો વિચાર કરવો.

ग्रहराशि (ગ્રહો જોવાની સમજણ.) विचारः

અમુક ગ્રહ હાલમાં કઈ રાશિને માટે કેવો છે તે જાણવું હોય તો પંચાંગમાં કુંડલી જોવી, તેમાં બાર રાશિના બાર ઘરો છે, તે દરેક ઘરમાં દરેક ગ્રહો ફરતાજ રહે છે, તે જોવા. દાખલા તરીકે સૂર્ય હાલમાં **કુંભ** રાશિમાં છે તે **વૃષભ** રાશિને દશમો થાય એમ સમજવું. એજ પ્રમાણે દરેક ગ્રહોની સમજણ છે. અને તેના શુભાશુભ ફળો નીચે દર્શાવ્યા પ્રમાણે છે.

शुभाशुभफलविचारः

(ગ્રહોથી ઉત્પન્ન થતાં શુભાશુભ ફળોની માહિતી.)

सूर्यशुभफलम् (સારા સૂર્યનું ફળ.)

પોતાની રાશિથી ૩–૬–૧૦ અને ૧૧ મો સૂર્ય હોય તો તે સારો સમજવો. તેથી ધન તથા યશની પ્રાપ્તિ થાય છે. રાજા તરફથી માન માન્યતા મળે છે. સર્વ કાર્ય સિદ્ધ થાય છે. બુદ્ધિ સારી રહે. તેમજ દ્રવ્યલાભ સાથે કુટુંબીઓને સુખ પ્રાપ્ત થાય છે. અને પુત્રસુખ સાથે પુન્યની વૃદ્ધિ થાય છે.

सूर्याशुभफलम् (નડતા સૂર્યનું અશુભફલ.)

પોતાની રાશિથી જો પહેલો, બારમો, સાતમો, બીજો, ચોથો, પાંચમો, આઠમો અને નવમો સૂર્ય હોય તો રોગ, શોક, ભય, અગ્નિપીડા, વ્યાધિ, પરદેશ ગમન અને દ્રવ્યનો નાશ કરેછે. સૂર્ય એક રાશિ પર એક માસ સુધી રહે છે. નડતા સૂર્યને માટે નીચે લખેલ સૂર્યના મંત્રનો જપ ૭૦૦૦ કરાવવો તથા તેનુ દાન કરવું.

अथ सूर्यपूजाप्रयोगः

દરરોજ પ્રાતઃકાલમાં ઉઠી ન્હાઈ સ્વચ્છ કપડાં પહેરી આસન ઉપર બેસીને શ્રદ્ધાપૂર્વક નિત્યકર્મથી પરવારી સૂર્ય મંત્રના જપ સાત હજાર કરવા. દરરોજ આપણાથી થાય તેટલા કરીને સાત હજાર જપ પુરા કરવા અથવા પોતાથી ન બનતું હોય તો કોઈ વિદ્વાન બ્રાહ્મણ પાસે કરાવવા; તેમ કરવાથી સૂર્યની પીડા ઓછી થાય છે અને તેનું ફળ સારૂં મળે છે.

સૂર્યાદી જે ગ્રહની શાન્તિ કરવી હોય તે ગ્રહનું ચોખાવડે મંડળ કરવું; પછી આચમન પ્રાણાયામ સંકલ્પ કરી ગણપતિ પૂજન કરી ઘીનો દીવો પ્રથમથી ગ્રહ આગળ મૂકી ગ્રહના મંડળનું નામ મંત્ર અથવા જે ગ્રહનું પૂજન કરવું હોય તે ગ્રહના મંત્રથી ષોડશોપચાર પૂજન કરવું. તે પછી ગ્રહના મંત્રનો વિનિયોગ કરી મંત્ર ન્યાસ કરી માળાનું પૂજન કરવું. પછી જપનો પ્રારંભ કરવો.. તે દર રોજ યથાશક્તિ જપ કરવો. જ્યાં સુધી જપ પુરા ન થાય ત્યાંસુધી ઉપર લખેલા ક્રમ પ્રમાણે નિત્યવિધિ કરવો. જપ પુરા થયા પછી યજમાનને શ્રેય આપવું–દાન કરાવવું. બ્રાહ્મણ ભોજન કરાવવું–અને બને તો જેટલા જપ કર્યા હોય તેટલા જપ દશાંશ સમિધ–ઘી–જવ–તલથી હોમ કરવો. આપ્રમાણે જે ગ્રહના જપ કરવા હોય તેનો વિધિ ઉપરપ્રમાણે લખ્યો તે પ્રમાણે કરવું.

॥ अथ प्रयोगविधिः ॥

तत्रादौ जपानुष्ठानादिबृहत्कार्येषु शांत्यादिकार्येषु निर्विघ्नतासिद्ध्यर्थं आदौ शांतिपाठं, गणपतिपूजनम्, अर्घबन्धनम्, दिग्बन्धनम्, ब्रह्माचार्यादिवरणं वरुणश्राद्धं च कुर्यात्। पश्चात् कलशस्थापनम् वरुणपूजनं स्वस्तिवाचनं च कुर्यात् ततः जपार्थं ब्राह्मणवरणम् ॥

तत्रादौ ब्राह्मणवरणविधिः

शुभासने यजमानः पूर्वाभिमुख उपविशेत् । ब्राह्मणः उदङ्मुखः आसनोपरि उपविशेत् । यजमानः आचमनं, प्राणायामं, च कृत्वा "अपवित्रः पवित्रेति" मंत्रेण स्वशरीरं सम्प्रोक्षयेत् ॥ ब्राह्मणो यजमानस्य तिलकं अक्षत वन्दनं हस्ते *मांगल्यसूत्र-बन्धनम्, च कुर्यात् पश्चात् "ॐ सुमुखश्चेत्यादि गणपतिस्मरणं कुर्यात् ॥ अथ प्रधानसंकल्पः २ ॐ विष्णुर्विष्णुर्विष्णुः० श्रीमद्भगवतो महापुरुषस्य० मासे पक्षे तिथौ वासरे अमुक-गोत्रोत्पन्नस्य अमुकशर्मणः मम (वा यजमानस्य) जन्मराशेः सकाशाद्विरुद्धचतुर्थाष्टमद्वादशादिस्थानस्थितामुकग्रहपीडापरि-हारद्वारा †एकादशस्थानस्थितवदुत्तमफलप्राप्त्यर्थं अमुककाम-नासिद्ध्यर्थं वा परमेश्वरप्रीत्यर्थं, अमुकमंत्रजपं वा अमुकपाठं अमुकसंख्याकं अहं ब्राह्मणद्वारा कारयिष्ये (स्वयमेव कर्ता चेत्) अहमाचरिष्ये वा करिष्ये इति पश्चात् यजमानो ब्राह्मणवरण-मारभेत ॥ ब्राह्मणवरणं कृत्वा ॥ सूर्यमन्त्रजपं कुर्यात् ॥

---

* (स्त्रीयजमानः) येन बद्धो बली० ॥ १ ॥ मांगल्यं तंतुना येन भर्तुर्जीवन हेतुना ॥ हस्ते बध्नामि सुभगे सजीव शरदः शतम् ॥ २ ॥ पत्नीवामकरे सूत्रं बध्वा सौख्यधनागमं ॥ बहुसम्पत्तिमारोग्यं रक्षार्थे कंकणं शुभम् ॥ ३ ॥ स्त्रियाः वामहस्ते मंगलसूत्र बन्धनम् ॥

† भविष्ये-संकल्पेन विना विप्र यत्किंचित्कुरुते नरः ॥ फलं चास्याल्पकं तस्य धर्मस्यार्धक्षयो भवेत् ॥ १ ॥

उपयुक्तविचारः (स्कंदपुराणे)

विवाहोत्सवयज्ञेषु प्रतिष्ठादिषु कर्मसु । निर्विघ्नार्थं मुनिश्रेष्ठ तथोद्वेगाद्भुतेषु च ॥ वश्यकर्माभिचारादौ तथैवोच्चाटनादिके । नवग्रहमखं कृत्वा ततः काम्यं समाचरेत् ॥ अन्यथा फलदं पुंसां न काम्यं जायते क्वचित् । तस्मादयुतहोमस्य विधानं तु समाचरेत् ॥ तथा ॥ अन्नहीनो दहेद्राष्ट्रं मंत्रहीनस्तु ऋत्विजः । यजमानमदाक्षिण्यो नास्ति यज्ञसमो रिपुः ॥ अहिंसकस्य दांतस्य धर्मार्जितधनस्य च । नित्यं च नियमस्थस्य सदा सानुग्रहा ग्रहाः ॥ ग्रहा गावो नरेंद्राश्च ब्राह्मणाश्च विशेषतः । पूजिताः पूजयंत्येते निर्दहंत्यवमानिताः ॥ ग्रहाणामिदमातिथ्यं कुर्यात्संवत्सरादपि । आरोग्यबलसंपन्नो जीवेच्च शरदां शतम् ॥ पुनः—देवदानवगन्धर्वा यक्षराक्षसकिन्नराः । पीड्यन्ते ग्रह-पीडाभिः किं पुनर्भुवि मानवाः ॥ शनैश्चरेण सौदासो नरमांसे नियोजितः । राहुणा पीडितो राजा नलो भ्रान्तो महीतले ॥ अंगारकविरोधेन रामो राष्ट्राद्विवासितः । अष्टमेन शशांकेन हिरण्यकशिपुर्हतः ॥ रविणा सप्तमस्थेन रावणो विनिपातितः । गुरुणा जन्मसंस्थेन हतो राजा सुयोधनः ॥ पाण्डवाः सौम्य-पीडायां विकर्मणि नियोजिताः । षष्ठेनोशनसा युद्धे हिरण्याक्षो निपातितः ॥ एते चान्ये च बहवो ग्रहदोषैस्तु पीडिताः ॥

(याज्ञवल्क्यः)

ग्रहाधीना नरेन्द्राणामुच्छ्रायाः पतनानि च । भावाभावौ च जगतस्तस्मात्पूज्यतमा ग्रहाः ॥

प्रयोगपारिजाते उत्पलपरिमले।

कार्यारंभेषु सर्वेषु प्रतिष्ठास्वध्वरेषु च। नववेश्मप्रवेशे च गर्भाधानादिकर्मसु। आरोग्यस्नानसमये संक्रान्तौ रोगसम्भवे॥ अभिचारे च यः कुर्याद्ग्रहपूजां विधानतः। सोऽभीष्टं फलमाप्नोति निर्विघ्नेन न संशयः॥ श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत्। वृद्ध्यायुःपुष्टिकामो वा तथैवाभिचरन्नपि॥

॥ जपसंकल्पः॥

शुभासने उपविश्य आचमनं प्राणायामं गणपतिस्मरणम् च कृत्वा। संकल्प०॥ अद्य पूर्वो० ममाऽत्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्त्यर्थं मम जन्मराशेः सकाशाद्विरुद्धचतुर्थाष्टमद्वादशादिस्थानस्थित अमुकग्रहकृतसर्वारिष्टनिवृत्तिपूर्वकायुरारोग्यैश्वर्याद्यभिवृद्ध्यर्थं अमुकग्रहदेवताप्रसादार्थं यथासंख्यकं वैदिकामुकग्रहमंत्रजपं अमुकगोत्रोत्पन्नः अमुकशर्माऽहं करिष्ये।

अथ आदित्यमन्त्रः॥ ॐ आकृष्णेति मंत्रस्य हिरण्यस्तूपाङ्गिरसऋषिस्त्रिष्टुप्छन्दः सूर्यो देवतासूर्यप्रीत्यर्थे जपे विनियोगः॥ अथ देहांगन्यासः॥ आकृष्णेन शिरसि॥ रजसा ललाटे॥ वर्तमानो मुखे॥ निवेशयन् हृदये॥ अमृतं नाभौ॥ मर्त्यं च कट्याम्॥ हिरण्ययेन सविता ऊर्वोः॥ रथेना जान्वोः॥ देवो याति जंघयोः॥ भुवनानि पश्यन् पादयोः॥ अथ करन्यासः आकृष्णेन रजसा अंगुष्ठाभ्यां नमः॥ वर्तमानो

निवेशयन् तर्जनीभ्यां नमः॥ अमृतं मर्त्यं च मध्यमाभ्यां नमः॥ हिरण्ययेन अनामिकाभ्यां नमः॥ सविता रथेनाकनिष्ठिकाभ्यां नमो देवो याति भुवनानि पश्यन् करतलकरपृष्ठाभ्यां नमः॥ एवं हृदयादिन्यासः॥ आकृष्णेन रजसा हृदयाय नमः॥ वर्तमानो निवेशयन् शिरसे स्वाहा॥ अमृतं मर्त्यं च शिखायै वषट्॥ हिरण्ययेन कवचायहुं। सविता रथेना नेत्रत्रयाय वौषट्॥ देवो याति भुवनानि पश्यन् अस्त्राय फट्॥ अथ ध्यानम्॥ पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरङ्गवाहनः॥ दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः॥ गायत्री॥ आदित्याय विद्महे दिवाकराय धीमहि॥ तन्नः सूर्यः प्रचोदयात्॥ ॐ ह्राँ ह्रीं ह्रौं सः ॐ भूर्भुवः स्वः—ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च॥ हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॐ स्वः भुवः भूः ॐ सः ह्रौं ह्रीं ह्राँ ॐ सूर्याय नमः॥

જપ પુરા થયા પછી નીચે લખ્યા પ્રમાણે દાન બ્રાહ્મણને આપવું.

अथ सूर्यदानम्।

माणिक्यगोधूमसवत्सधेनुं कौसुंभवस्त्रं गुडहेमताम्रम्।
आरक्तकं चंदनपंकजं च वदंति दानं हि प्रदीप्तधाम्ने॥ १॥

માણેક, ગહું, વાછરડા સહિત ગાય, કુસુંબી રંગનું વસ્ત્ર, ગોળ, સોનું, તાંબુ, લાલ ચંદન અને કમળ એટલી વસ્તુઓ સૂર્યના દાનમાં આપવાની કહેલી છે॥ ૧॥ મધ્ય વર્તુલ મંડલ અંગુલ ૧૨, કલિંગદેશમાં જન્મ,

કાશ્યપ ગોત્ર, રક્ત વર્ણ, સિંહ રાશીનો સ્વામી, જપ ૭૦૦૦. સૂર્યના કલિયુગમાં જપ સંખ્યા ૨૮૦૦૦ કરવા. જેને વેદનો અધિકાર નથી તેઓને માટે પુરાણોક્ત નીચે લખેલા સૂર્ય મંત્રના જપ કરવા.

॥ पुराणोक्तसूर्यमंत्रः ॥

ह्रीं जपाकुसुमसंकाशं काश्यपेयं महाद्युतिं ॥
तमोरिं सर्वपापघ्नं प्रणतोस्मि दिवाकरम् ॥

આપ્રમાણે જપ કરી રહ્યાપછી દરરોજ સૂર્યનું કવચ તથા સ્તોત્રનો પાઠ કરવો, જેથી નડતા સૂર્યની શાન્તિ થાય છે.

सूर्यस्तोत्राणि।

सूर्यकवचम्।

श्रीगणेशाय नमः॥ श्रीसूर्य उवाच। सांब सांब महाबाहो शृणु मे कवचं शुभम्। त्रैलोक्यमंगलं नाम कवचं परमाद्भुतम्॥ यज्ज्ञात्वा मंत्रवित्सम्यक् फलं प्राप्नोति निश्चितम्। यद्धृत्वा च महादेवो गणानामधिपोभवत्॥ पठनाद्धारणाद्विष्णुः सर्वेषां पालकः सदा। एवमिन्द्रादयः सर्वे सर्वैश्वर्यमवाप्नुवन्॥ कवचस्य ऋषिर्ब्रह्मा छंदोनुष्टुबुदाहृतः। श्रीसूर्यो देवता चात्र सर्वदेवनमस्कृतः॥ यश आरोग्यमोक्षेषु विनियोगः प्रकीर्तितः। प्रणवो मे शिरः पातु घृणिर्मे पातु माल-

कम् ॥ सूर्योऽव्यान्नयनद्वंद्वमादित्यः कर्णयुग्मकम् । अष्टाक्षरो महामंत्रः सर्वाभीष्टफलप्रदः ॥ ह्रीं बीजं मे मुखं पातु हृदयं भुवनेश्वरी । चंद्रबिंबं विंशदाद्यं पातु मे गुह्यदेशकम् ॥ अक्षरोऽसौ महामंत्रः सर्वतंत्रेषु गोपितः । शिवो वह्निसमायुक्तो वामाक्षीबिंदुभूषितः । एकाक्षरो महामंत्रः श्रीसूर्यस्य प्रकीर्तितः । गुह्याद्गुह्यतरो मंत्रो वांछाचिंतामणिः स्मृतः ॥ शीर्षादिपादपर्यंतं सदा पातु मनूत्तमः । इति ते कथितं दिव्यं त्रिषु लोकेषु दुर्लभम् ॥ श्रीप्रदं कांतिदं नित्यं धनारोग्यविवर्धनम् । कुष्ठादिरोगशमनं महाव्याधिविनाशनम् ॥ त्रिसंध्यं यः पठेन्नित्यमरोगी बलवान्भवेत् । न पुनः किमिहोक्तेन यद्यन्मनसि वर्तते ॥ तत्तत्सर्वं भवेत्तस्य कवचस्य च धारणात् । भूतप्रेतपिशाचाश्च यक्षगंधर्वराक्षसाः ॥ ब्रह्मराक्षसवेताला न द्रष्टुमपि ते क्षमाः । दूरादेव पलायंते तस्य संकीर्तनादपि ॥ भूर्जपत्रे समालिख्य रोचनागुरुकुंकुमैः । रविवारे च संक्रांत्यां सप्तम्यां च विशेषतः । धारयेत्साधकश्रेष्ठः श्रीसूर्यस्य प्रियो भवेत् ॥ त्रिलोहमध्यगं कृत्वा धारयेद् दक्षिणे करे । शिखायामथवा कंठे सोपि सूर्यो न संशयः ॥ इति ते कथितं सांब त्रैलोक्यं मंगलाभिधम् । कवचं दुर्लभं लोके तव स्नेहात्प्रकाशितम् ॥ अज्ञात्वा कवचं दिव्यं यो जपेत्सूर्यमुत्तमम् । सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि ॥ इति श्रीब्रह्मयामले त्रैलोक्यमंगलं नाम सूर्यकवचं संपूर्णम् ॥

सूर्यकवचस्तोत्रम् ।

श्रीगणेशाय नमः ॥ याज्ञवल्क्य उवाच । शृणुष्व मुनिशार्दूल सूर्यस्य कवचं शुभम् । शरीरारोग्यदं दिव्यं सर्वसौभाग्यदायकम् ॥ देदीप्यमानमुकुटं स्फुरन्मकरकुंडलम् । ध्यात्वा सहस्रकिरणं स्तोत्रमेतदुदीरयेत् ॥ शिरो मे भास्करः पातु ललाटं मेऽमितद्युतिः । नेत्रे दिनमणिः पातु श्रवणे वासरेश्वरः ॥ घ्राणं धर्मघृणिः पातु वदनं वेदवाहनः । जिह्वां मे मानदः पातु कंठं मे सुरवंदितः ॥ स्कंधौ प्रभाकरः पातु वक्षः पातु जनप्रियः । पातु पादौ द्वादशात्मा सर्वांगं सकलेश्वरः ॥ सूर्यरक्षात्मकं स्तोत्रं लिखित्वा भूर्जपत्रके । दधाति यः करे तस्य वशगाः सर्वसिद्धयः ॥ सुस्नातो यो जपेत्सम्यग्योऽधीते स्वस्थमानसः । स रोगमुक्तो दीर्घायुः सुखं पुष्टिं च विंदति ॥ इति श्रीमद्याज्ञवल्क्यविरचितं सूर्यकवचस्तोत्रं संपूर्णम् ॥

इति सूर्यपूजाप्रयोगः ।

शुभचंद्र (સારા ચંદ્રનું ફળ.) फलम्

પોતાની રાશિથી ૧-૩-૬-૭-૧૦ અને ૧૧ મો ચંદ્ર આવે તો તે સારો સમજવો. તેથી દ્રવ્ય લાભ થાય સારા મિત્રો સાથે સમાગમ રહે. બુદ્ધિમાં વધારો થાય ધારેલું કામ પાર પડે. બ્રાહ્મણોની સેવા તથા ધાર્મિક કામમાં ધ્યાન રહે દાન-ધર્મ કરવાનું મન થાય.

अशुभ (નડતા ચંદ્રનું ફળ.) चंद्रफलम्

પોતાની રાશિથી ૨-૪-૫-૮-૯ અને ૧૨ મો ચંદ્ર આવે તો તે નઠારો સમજવો. તેથી દ્રવ્યની હાનિ થાય, ચોર તથા અગ્નિનો ભય રહે તેમજ મનમાં ચિંતા રહે.

શુકલ પક્ષમાં પોતાની રાશિથી ૨-૫-૯ મો ચંદ્ર હોય અને કૃષ્ણ પક્ષમાં ૪-૮-૧૨ મો ચંદ્ર હોય તો તે સારો સમજવો કેમ કે તે પોતાની માતાની પેઠે રક્ષણ કરે છે.

ચંદ્ર એક રાશિપર સવા બે દીવસ સુધી રહે છે.

નડતા ચંદ્રને માટે ચંદ્ર મંત્રના જપ ૧૧૦૦૦ તથા દાન કરવું.

अथ चंद्रपूजाप्रयोगः ॥

દરરોજ પ્રાતઃકાલમાં ઉઠી ન્હાઈ, સ્વચ્છ કપડાં પહેરી આસન ઉપર બેસીને શ્રદ્ધાપૂર્વક સંધ્યાદિ નિત્યકર્મ કર્યા પછી ચંદ્ર મંત્રના જપ અગીઆર હજાર કરવા. દરરોજ આપણાથી થાય તેટલા કરીને અગીઆર હજાર જપ પુરા કરવા અથવા પોતાનાંથી ન બને તો કોઈ વિદ્વાન બ્રાહ્મણ પાસે કરાવવા તેમ કરવાથી ચંદ્રની પીડા ઓછી થાય છે અને તેનું ફળ સારૂં મળે છે.

आचम्य प्राणानायम्य संकल्पः ॥

इमन्देवेति मन्त्रस्य गौतमऋषिः। सोमो देवता विराट्छन्दः सोमप्रीत्यर्थे जपे विनियोगः। अथ देहांगन्यासः ॥ इमन्देवा शिरसि ॥ असपत्नठं ललाटे ॥ सुवध्वं नासिकायाम् ॥ महते क्षत्राय मुखे। महते ज्यैष्ठ्याय हृदये। महते जानराज्याय उदरे ॥ इन्द्रस्येन्द्रियाय नाभौ। इमममुष्य कट्याम् ॥ पुत्रममुष्यै मेढ्रे। पुत्रमस्यै ऊर्वोः ॥ विशऽएष वो जान्वोः ॥ मीराजा जंघयोः ॥ सोमोऽस्माकं गुल्फयोः ॥ ब्राह्मणाना ९ राजा पादयोः ॥ अथ करन्यासः ॥ इमन्देवाऽअसपत्नठं सुवध्वं अंगुष्ठाभ्यां नमः ॥ महते क्षत्राय महते ज्यैष्ठ्याय तर्जनी० ॥ महते जानराज्यायेन्द्रस्येन्द्रियाय मध्यमा० ॥ इमममुष्य पुत्रममुष्यै पुत्रमस्यै अनामिका० ॥ विशऽएषवो मी राजा कनिष्ठिका० ॥ सोमोऽस्माकं ब्राह्मणाना ९ राजा करतल० ॥ एवं हृदयादि न्यासः ॥ इमन्देवाऽअसपत्न ९ सुवध्वं हृदयाय० ॥ महते क्षत्राय महते ज्यैष्ठ्याय

शिरसे० ॥ महते जानराज्यायेन्द्रस्येन्द्रियाय शिखायै० ॥ इमममुष्य पुत्रममुष्यै पुत्रमस्यै कवचा० ॥ विशऽएष वो मी राजा नेत्रत्रयाय० ॥ सोमोऽस्माकं ब्राह्मणाना ँ राजा अस्त्राय फट् ॥ अथ ध्यानम् ॥ श्वेताम्बरः श्वेतविभूषणश्च श्वेतद्युतिर्दण्डधरो द्विबाहुः ॥ चन्द्रोऽमृतात्मा वरदः किरीटी मयि प्रसादं विदधातु देवः ॥ १ ॥ गायत्री ॥ अत्रिपुत्राय विद्महे सागरोद्भवाय धीमहि ॥ तन्नश्चन्द्रः प्रचोदयात् ॥१॥ चन्द्रमंत्रः ॥ ॐ श्राँ श्रीं, श्रौं, सः ॐ भूर्भुवः स्वः ॐ इमन्देवाऽअसपत्न ँ सुवध्वम्महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय ॥ इमममुष्य पुत्रममुष्यैपुत्रमस्यैव्विशऽएषवो मीराजासोमोस्माकंब्राह्मणाना ँ राजा ॥ ॐ स्वः भुवः भूः ॐ सः श्रौं श्रीं श्राँ ओं सोमाय नमः ॥

જપ પુરા થયા પછી નીચે લખ્યા પ્રમાણે બ્રાહ્મણને ચંદ્રનું દાન આપવું.

अथ चंद्रदानम् ॥

सद्वंशपात्रस्थिततंदुलाश्च कर्पूरमुक्ताफलशुभ्रवस्त्रम् । गवोपयुक्तं वृषभं च रौप्यं चंद्राय दद्याद् घृतपूर्णकुंभम् ॥ २ ॥

સારા વાંસનું પાત્ર ભરીને ચોખા, કપૂર, મોતી, સફેતવસ્ત્ર, ગાય સહિત વાછરડો, રૂપું અને ઘીનો ભરેલો કુંભ એટલી વસ્તુનું ચંદ્રને માટે દાન કરવું ॥ ૨ ॥

અગ્નિ કોણમાં ચોખંડું મંડળ અંગુલ ૨૪ નું, પાશ્ચમાભિમુખ, યમુનાતીરોદ્ભવ, આત્રેયસગોત્ર, શુકલવર્ણ, કર્ક રાશીનો સ્વામી, જપ ૧૧૦૦૦. કલિયુગમાં ચંદ્રનો જપ ૪૪૦૦૦ હજાર કરવો જેને વેદનો અધિકાર નથી તેઓને માટે પુરાણોક્ત નીચે લખેલ ચંદ્ર મંત્રનો જપ કરવો.

पुराणोक्तचंद्रमंत्रः ॥

ह्रीं दधिशङ्खतुषाराभं क्षीरोदार्णवसन्निभम् ॥ नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम् ॥ २ ॥

આ પ્રમાણે જપ થયા પછી ચંદ્રની પ્રીતિને માટે ચંદ્રનું કવચ તથા સ્તોત્રનો પાઠ કરવો તેથી નડતા ચંદ્રની શાન્તિ થાય છે.

चंद्रकवचम् ॥

अस्य श्रीचंद्रकवचस्तोत्रमंत्रस्य गौतमऋषिः अनुष्टुप् छंदः श्रीचन्द्रो देवता जपे विनियोगः ॥ समं चतुर्भुजं वन्दे केयूरमुकुटोज्ज्वलम् ॥ वासुदेवस्य नयनं शंकरस्य च भूषणम् ॥ एवं ध्यात्वा जपेन्नित्यं शशिनः कवचं पठेत् । शशी पातु शिरोदेशं भालं पातु कलानिधिः ॥ चक्षुषी चंद्रमाः पातु श्रुती पातु निशापतिः । घ्राणं क्षपाकरः पातु मुखं कुमुदबांधवः ॥ पातु कण्ठं च मे सोमः स्कंधौ जैवातृकस्तथा । करौ सुधाकरः पातु वक्षः पातु निशाकरः ॥ हृदयं पातु मे चंद्रो नाभिं शंकरभूषणः । मध्यं पातु सुरश्रेष्ठः कटिं पातु सुधाकरः ॥ ऊरू तारापतिः पातु मृगांको जानुनी सदा । अब्धिजः पातु मे जंघे पातु पादौ विधुः सदा ॥ सर्वाण्यन्यानि चांगानि पातु चन्द्रोऽखिलं वपुः । एतद्धि कवचं दिव्यं भुक्तिमुक्तिप्रदायकम् ॥ यः पठेच्छृणुयाद्वापि सर्वत्र विजयी भवेत् ॥ इति श्रीचंद्रकवचं संपूर्णम् ॥

चंद्रस्तोत्रम् ॥

अहो चंद्र जगत्प्राण यमुनाविषयोद्भव । वरप्रद गदापाणे श्वेतवर्णात्रिगोत्रज ॥ दशाश्ववाहनागच्छ उमारूपसमन्वित । तद्दले देवमंत्रेण मंत्रेण ह्यग्निनार्चितः ॥ रोहिणीशः सुधामूर्तिः सुधागात्रः सुधाशनः । विषमस्थानसंभूतां पीडां दहतु मे विधुः ॥ ग्रहा राज्यं प्रयच्छंति ग्रहा राज्यं हरंति च । ग्रहैश्च व्यापितं सर्वं त्रैलोक्यं सचराचरम् ॥

इति चंद्रपूजाप्रयोगः ।

भौमस्य (સારા મંગળનું ફળ) शुभफलम् ॥

મંગળ ૩, ૬, ૧૧ મો હોય તો તે દ્રવ્ય, જમીન, સોનું, વસ્ત્ર વિગેરેનો લાભ, શત્રુઓનો નાશ, રાજાની કૃપા, શરીરે આરોગ્ય તથા નાના પ્રકારના સુખને પ્રાપ્ત કરે છે.

पूजनार्थं
मंगलयन्त्रमिदम्.
१२ ॐ कुजाय नमः
१३ ॐ भौमाय नमः
११ ॐ धरात्म- जाय नमः
१४ ॐ भूमि- नन्दनाय नमः
१० ॐ सामगानां कृपाकराय नमः
१५ ॐ भूति- दाय नमः
९ ॐ लोहिताक्षाय नमः
८ ॐ लोहितायनमः
१६ अंगारकाय नमः
७ ॐ सर्वकर्मावरोध- काय नमः
१७ ॐ यमाय नमः
६ ॐ महाकायाय नमः
१ ॐ मंगलाय नमः
१८ ॐ सर्वरो- गापहारकाय नमः
५ ॐ स्थिरासनाय नमः
४ ॐ धनप्रदाय नमः
३ ॐ ऋणहर्त्रे नमः
२ ॐ भूमिपुत्राय नमः
२१ ॐ सर्वकाम- फलप्रदाय नमः
१९ ॐ वृष्टिकर्त्रे नमः
२० ॐ वृष्टिहर्त्रे नमः

નડતા (भौमस्य अशुभफलम्) મંગળનું ફળ.

મંગળ ૧, ૨, ૪, ૫, ૭, ૮, ૯, ૧૦, ૧૨ મો હોય તો તે શરીરે ગડગુમડ, ખસ વિગેરે રક્તવિકારના વ્યાધિ, શત્રુઓનો ભય, પરદેશ-ગમન તથા મિત્રોની સાથે વિરોધ કરાવે છે.

મંગળ એક રાશિ પર દોઢ માસ સુધી રહે છે. નડતા મંગળ માટે મંગળ મંત્રના જપ ૧૦૦૦૦ તથા દાન કરવું.

મંગળ ગ્રહ ક્રૂર છે તેથી જ્યારે ખરાબ રાશિ ઉપર આવેછે ત્યારે અનેક પ્રકારની વિપત્તિઓ, દુઃખ, આવી પડેછે માટે જો એ વિપત્તિ ઓથી બચવું હોય અને–પુત્ર તથા સ્ત્રી સુખ અને ધન, સંપત્તિ, વિગેરે મેળવવા ઇચ્છા હોય તો જરૂર આ લખ્યાપ્રમાણે મંગળ વ્રતનું વિધાન અને તેની પૂજા કરવી.

अथ मंगलपूजाप्रयोगः

मार्गशीर्षे वैशाखे वा शुद्धपक्षे प्रथमे मंगले व्रतारंभः । तत्र अरुणोदय उत्थाय आवश्यकं कृत्वा हस्तपादप्रक्षालनं कृत्वा अपामार्गसमिधा मौनेन दंतधावनं कृत्वा मौनव्रती नद्यादिजले स्नात्वा रक्तवस्त्रद्वयं धृत्वा नैवेद्यपुष्पचंदनानि संपाद्य विधिज्ञं ब्राह्मणमाहूय तदाज्ञया भौमं पूजयेत् ॥ आचम्य प्राणाना-यम्य ॐ अद्येत्यादि० अमुकगोत्रामुकनामाहं मम भौमदोष-सूचितसंततिप्रतिबन्धकनानादोषपरिहारपूर्वकचतुर्विधवंध्यत्व-दोषनिवृत्तये चिरजीविगुणवत्पुत्रप्राप्तये भौमव्रताङ्गत्वेन विहितं भौमपूजनं करिष्ये ॥ तदङ्गत्वेन गणपतिपूजनादि नान्दीश्राद्धान्तं

वरणपर्यन्तं कर्म कृत्वा मंगलं पूजयेत् ॥ तदादौ न्यासाः। ॐ मंगलाय नमः शिखायाम्। ॐ भूमिपुत्राय नमः जानुनोः। ॐ ऋणहर्त्रे नमः ऊर्वोः। ॐ धनप्रदाय नमः कट्योः। ॐ स्थिरासनाय नमः गुह्ये। ॐ महाकायाय नमः उरसि। ॐ सर्वकर्मावरोधकाय नमः वामबाहौ। ॐ लोहिताय नमः दक्षिणबाहौ। ॐ लोहिताक्षाय नमः गले। ॐ सामगानां कृपाकराय नमः मुखे। ॐ धरात्मजाय नमः नासिकयोः। ॐ कुजाय नमः अक्ष्णोः। ॐ भौमाय नमः ललाटे। ॐ भूतिदाय नमः भ्रुवोर्मध्ये। ॐ भूमिनंदनाय नमः मस्तके। ॐ अंगारकाय नमः शिखायाम्। ॐ यमाय नमः सर्वांगे। ॐ सर्वरोगापहारकाय नमः बाहुद्वये। ॐ वृष्टिकर्त्रे नमः मूर्द्धादिपादपर्यन्तम्। ॐ वृष्टिहर्त्रे नमः पादादिमूर्द्धान्तम्। ॐ सर्वकामफलप्रदाय नमः दिक्षु। ॐ आराय नमः नाभौ। ॐ वक्राय नमः वक्षसि। ॐ भूमिजाय नमः मूर्द्धनि। एवं न्यासं कृत्वा ध्यायेत् ॥ रक्तमाल्यांबरधरः शक्तिशूलगदाधरः। चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः॥ ॐ अंगारकाय विद्महे भूमिपुत्राय धीमहि ॥ तन्नो भौमः प्रचोदयात् ॥ ॐ अग्निमूर्द्धेति भौमगायत्र्या प्रतिष्ठां कुर्यात् ॥ ॐ नमो भगवते सुखसन्तानदात्रे मंगलाय नमः आवाहयामि॥ ततः ॐ मंगलाय नमः इति मंत्रेण मंगलं उक्तविधिना आवाहनस्थापनाऽऽ-

सनपाद्याऽर्घ्याऽऽचमनीयस्नानवस्त्रगंधपुष्पैः पूजयित्वा ॐ ह्रां-हृदयाय नमः। ॐ ह्रींशिरसे स्वाहा। ॐ ह्रूंशिखायै वषट्। ॐ ह्रैं कवचाय हुं। ॐ ह्रंसः नेत्रत्रयाय वौषट्। ॐ खंखः अस्त्राय फट् इति षडंगानि संपूज्य अभीष्टसिद्धिमिति मन्त्रेण प्रथमावरणं निवेद्य (एकविंशतिकोष्ठेषु) ॐ मंगलाय नमः पादौ पूजयामि॥ ॐ भूमिपुत्राय नमः जानुनी पू०॥ ॐ ऋणहर्त्रे नमः ऊरू०॥ ॐ धनप्रदाय नमः कटीं०॥ ॐ स्थिरासनाय नमः गुह्यं०॥ ॐ महाकायाय नमः उरः पू०॥ ॐ सर्वकर्मावरोधकाय नमः वामबाहुं०॥ ॐ लोहिताय नमः दक्षिणबाहुं०॥ ॐ लोहिताक्षाय नमः कंठं पू०॥ ॐ सामगानांकृपाकराय नमः मुखं०॥ ॐ धरात्मजाय नमः नासिकां०॥ ॐ कुजाय नमः नेत्रद्वयं०॥ ॐ भौमाय नमः ललाटं०॥ ॐ भूतिदाय नमः भ्रुवोर्मध्यं०॥ ॐ भूमिनंदनाय नमः मस्तकं०॥ ॐ अंगारकाय नमः शिखां०॥ ॐ यमाय नमः सर्वांगं०॥ ॐ सर्वरोगापहारकाय नमः बाहुद्वयँ०॥ ॐ वृष्टिकर्त्रे नमः मूर्द्धादिपादपर्यन्तं०॥ ॐ वृष्टिहर्त्रे नमः चरणादिमस्तकांतं०॥ ॐ सर्वकामफलप्रदाय नमः दिशः पू०॥ इति नामभिः संपूज्य। अभीष्टसिद्धिमिति मन्त्रेण द्वितीयावरणं निवेद्य (त्रिकोणेषु) ॐ वक्राय नमः। ॐ आराय नमः। ॐ भूमिजाय नमः (एतान् संपूज्य) "अभीष्टसिद्धिं मे देहि

शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनमिति" निवेद्य॥ तद्बहिः ॐ ब्राह्म्यै नमः॥ ॐ माहेश्वर्यै नमः॥ ॐ कौमार्यै नमः ॥ ॐ वैष्णव्यै नमः ॥ ॐ वाराह्यै नमः ॥ ॐ इन्द्राण्यै नमः ॥ ॐ चामुण्डायै नमः ॥ ॐ महालक्ष्म्यै नमः (एताः संपूज्य) "अभीष्टसिद्धिं मे देहि शरणागतवत्सल॥ भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम्" इति निवेद्य तद्बाह्ये ॥ ॐ इन्द्राय नमः ॥ ॐ अग्नये नमः ॥ ॐ यमाय नमः ॥ ॐ निर्ऋतये नमः ॥ ॐ वरुणाय नमः ॥ ॐ वायवे नमः ॥ ॐ सोमाय नमः ॥ ॐ ईशानाय नमः ॥ ॐ ब्रह्मणे नमः ॥ ॐ अनंताय नमः ॥ (इत्येतान् संपूज्य) "अभीष्टसिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं पंचमावरणार्चनमिति" निवेद्य तद्बाह्ये ॐ वज्राय नमः ॥ ॐ शक्तये नमः ॥ ॐ दण्डाय नमः ॥ ॐ पाशाय नमः ॥ ॐ अंकुशाय नमः । ॐ गदायै नमः ॥ त्रिशूलाय नमः । ॐ पद्माय नमः । ॐ चक्राय नमः। "अभीष्टसिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं समस्तावरणार्चनमिति" निवेद्य। मंगलाय सांगाय सपरिवाराय धूपं दीपं समर्प्य गोधूमान्नं एकविंशतिमिष्टान्नं निवेद्य जलपूर्णताम्रपात्रे रक्तचंदनरक्तपुष्पाक्षतफलानि निःक्षिप्य जानुद्वयं निपात्य हस्ते अर्घ्यपात्रं गृहीत्वा अर्घ्यं दद्यात् ॥ ॐ भूमिपुत्र महातेजः स्वेदोद्भव पिना-

किनः ॥ पुत्रार्थी त्वां प्रपन्नोऽहं गृहाणार्घ्यं नमोस्तु ते ॥ रक्त-प्रवालसंकाश जपाकुसुमसन्निभ ॥ महीसुत महाबाहो गृहाणार्घ्यं नमोस्तु ते ॥ इत्यर्घ्यद्वयं दत्वा ॥ पूर्वोक्तैरेकविंशतिनामभिः प्रणम्य एकविंशति प्रदक्षिणाः कृत्वा प्रणमेत् । (ततो मूलमन्त्रेण अष्टोत्तरशतमन्त्रजपः कार्यः) ततः खदिरांगारकेण स्वपुरतः समं ऋणरेखात्रयं कृत्वा वामपादेन मंत्रद्वयं पठन् प्रमार्जयेत् । दुःखदौर्भाग्यनाशाय पुत्रसन्तानहेतवे ॥ कृतं रेखात्रयं वामपादेन तत्प्रमार्ज्म्यहम् ॥ ऋणदुःखविनाशाय मनोऽभीष्टार्थसिद्धये ॥ मार्जयाम्यसिता रेखास्तिस्रो जन्मत्रयोद्भवाः ॥ पुनः पुष्पांजलिं गृहीत्वा प्रार्थयेत् ॥ धरणीगर्भसंभूतं विद्युत्तेजःसमप्रभम् ॥ कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहम् ॥ ऋणहर्त्रे नमस्तुभ्यं दुःखदारिद्र्यनाशिने ॥ नमामि द्योतमानाय सर्वकल्याणकारिणे ॥ देवदानवगंधर्वयक्षराक्षसपन्नगाः ॥ सुखं यान्ति यतस्तस्मै नमो धरणिसूनवे ॥ यो वक्रगतिमापन्नो नृणां विघ्नं प्रयच्छति ॥ पूजितः सुखसौभाग्यं तस्मै क्ष्मासूनवे नमः ॥ प्रसादं कुरु मे नाथ मंगलप्रद मंगल ॥ मेषवाहन रुद्रात्मन् पुत्रान्देहि धनं यशः ॥ इत्यादि प्राथ्य पुष्पांजलिं दत्वा पूजायां निवेदितान्नेन एकभुक्तव्रतं कुर्यात् । ततो वायनदानम् ॥ गुडमिश्रितगोधूमैर्वायनं दद्यात् । एवं संवत्सरावधि व्रतं कृत्वा पश्चादुद्यापनं विधाय पंचाशद्ब्राह्मणान् भोजयेत् ॥ एवं व्रतपरा

नारी प्राप्नुयात्सुभगान् सुतान् ॥ धनाप्त्यै ऋणनाशाय व्रतं कुर्यात् पुमानपि ॥ इति मंगलव्रतविधिः ॥

દરરોજ પ્રાતઃકાલમાં ઉઠી ન્હાઇ સ્વચ્છ કપડાં પહેરી આસન ઉપર બેસી શ્રદ્ધાપૂર્વક સંધ્યાદિ નિત્યકર્મ કર્યા પછી મંગળ મંત્રના જપ દશ હજાર કરવા દરરોજ આપણાથી થાય તેટલા કરીને દશ હજાર પૂરા કરવા અથવા પોતાથી ન બને તો કોઇ વિદ્વાન્ બ્રાહ્મણ પાસે કરાવવા તેમ કરવાથી મંગળની પીડા ઓછી થાય છે, અને તેનું ફળ સારૂં મળે છે.

॥ अथ भौममन्त्रजपविधिः ॥

आचम्य प्राणानायम्य ॥ संकल्पः ॥ अग्निर्म्मूर्द्धेति मंत्रस्य विरूपाङ्गिरस ऋषिः। अग्निर्देवता। गायत्रीछन्दः। भौमप्रीत्यर्थे जपे विनियोगः॥ अथ देहांगन्यासः। अग्निः शिरसि। मूर्द्धा ललाटे। दिवः मुखे॥ ककुत् हृदये॥ पतिः उदरे॥ पृथिव्याः नाभौ॥ अयं कट्याम् अपा ँ जान्वोः॥ रेता ँ सि गुल्फयोः॥ जिन्वति पादयोः॥ अथ करन्यासः॥ अग्निर्मूर्द्धा अंगुष्ठा०॥ दिवः ककुत् तर्जनी०॥ पतिः मध्यमा०॥ पृथिव्या अयम् अनामिका०॥ अपा ँ रेता ँ सि कनिष्ठिका०॥ जिन्वति करतल०॥ एवं हृदयादिन्यासः॥ अग्निर्म्मूर्द्धा हृदयाय०॥ दिवः ककुत् शिरसे०॥ पतिः शिखायै०॥ पृथिव्या अयं कवचा०॥ अपा ँ रेता ँ सि नेत्रत्र०॥ जिन्वति अस्त्राय०॥ अथ ध्यानम्॥ रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाधरः॥ धरासुतः शक्तिधरश्च

शूली सदा मम स्याद्वरदः प्रशांतः ॥ भौमगायत्री ॥ क्षिति-पुत्राय विद्महे लोहितांगाय धीमहि ॥ तन्नो भौमः प्रचोदयात् ॥ अथ भौममन्त्रः ॥

ॐ क्राँ क्रीं क्रौं सः ॐ भूर्भुवः स्वः ॐ अग्निर्म्मूर्द्धा दिवः ककुत्पतिः पृथिव्व्याऽअयम् ॥ अपा ७ रेता ७ सि जिन्न्वति ॥ ॐ स्वः भुवः भूः ॐ सः क्रौं क्रीं क्राँ ॐ भौमाय नमः ॥

જપ પૂરા થયા પછી નીચે લખ્યાપ્રમાણે વૈદિક બ્રાહ્મણનું પૂજન કરી મંગળની પ્રીતિને માટે તેનું દાન આપવું—

अथ भौमदानम् ।

प्रवालगोधूममसूरिका च वृषारुणं चापि गुडं सुवर्णम् ।
आरक्तवस्त्रं करवीरपुष्पं ताम्रं हि भौमाय वदंति दानम् ॥

પરવાલાં, ઘઉં, મસૂરની દાલ, લાલ બળદ, ગોળ, સુવર્ણ, લાલ વસ્ત્ર, લાલ કરેણનું ફુલ અને ત્રાંબુ એ સર્વનું દાન મંગલને માટે કહ્યું છે.

દક્ષિણમાં ત્રણ અંગુલનું ત્રિકોણ મંડળકરી, દક્ષિણાભિમુખ, અવ-ન્તિદેશોદ્ભવ, ભારદ્વાજ સગોત્ર, રક્ત વર્ણ, મેષ અને વૃશ્ચિક રાશિનો સ્વામી. જપ ૧૦૦૦૦, કલિયુગે જપસંખ્યા ૪૦૦૦૦ પોતે અથવા બ્રાહ્મણ પાસે કરાવવા.

જેને વૈદિકકર્મનો અધિકાર નથી તેવા યજમાનોની વતી બ્રાહ્મણોએ નીચે લખ્યા મુજબ પુરાણોક્ત મંગળમંત્રનો જપ કરવો.

पुराणोक्तभौममन्त्रः ।

ह्रीं धरणीगर्भसंभूतं विद्युत्काञ्चनसन्निभम् ।
कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम् ॥

આપ્રમાણે જપ થયા પછી દરરોજ મંગળ ગ્રહની પ્રીતિ માટે મંગળ કવચ તથા સ્તોત્રનો પાઠ કરવો, તેથી ધન ધાન્ય સ્ત્રી પુત્રનો લાભ થાય છે અને હમેશાં મંગળ સારૂં ફળ આપે છે.

॥ मंगलकवचम् ॥

अस्य श्रीअंगारककवचस्तोत्रमंत्रस्य कश्यपऋषिः अनुष्टुप् छंदः अंगारको देवता जपे विनियोगः ॥ रक्तांबरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाभृत् । धरासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशांतः ॥ अंगारकः शिरो रक्षेन्मुखं वै धरणीसुतः । श्रवौ रक्तांबरः पातु नेत्रे मे रक्तलोचनः ॥ नासां शक्तिधरः पातु मुखं मे रक्तलोचनः । भुजौ मे रक्त-माली च हस्तौ शक्तिधरस्तथा ॥ वक्षः पातु वरांगश्च हृदयं पातु रोहितः । कटिं मे ग्रहराजश्च मुखं चैव धरासुतः ॥ जानु-जंघे कुजः पातु पादौ भक्तप्रियः सदा । सर्वाण्यन्यानि चांगानि रक्षेन्मे मेषवाहनः ॥ य इदं कवचं दिव्यं सर्वशत्रुनिवारणम् । भूतप्रेतपिशाचानां नाशनं सर्वसिद्धिदम् ॥ सर्वरोगहरं चैव सर्वसंपत्प्रदं शुभम् ॥ भुक्तिमुक्तिप्रदं नृणां सर्वसौभाग्यवर्धनम् ॥ रोगबंधविमोक्षं च सत्यमेतन्न संशयः ॥

इति श्रीमार्कंडेयपुराणे अंगारककवचं सम्पूर्णम् ॥

॥ मंगलस्तोत्रम् ॥

मंगलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः । स्थिरासनो महाकायः

सर्वकर्माविरोधकः ॥ लोहितो लोहिताक्षश्च सामगानां कृपाकरः । धरात्मजः कुजो भौमो भूतिदो भूमिनंदनः ॥ अंगारको यमश्चैव सर्वरोगापहारकः । वृष्टिकर्ता च हर्ता च सर्वकामफलप्रदः ॥ एतानि कुजनामानि नित्यं यः श्रद्धया पठेत् । ऋणं न जायते तस्य धनं शीघ्रमवाप्नुयात् ॥ धरणीगर्भसंभूतं विद्युत्कांतिसमप्रभम् । कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहम् ॥ स्तोत्रमंगारकस्यैतत्पठनीयं सदा नृभिः । न तेषां भौमजा पीडा स्वल्पापि भवति क्वचित् ॥ अंगारक महाभाग भगवन्भक्तवत्सल । त्वां नमामि ममाशेषमृणमाशु विमोचय ॥ ऋणरोगादि दारिद्र्यं ये चान्ये चापमृत्यवः । भयक्लेशमनस्तापा नश्यंतु मम सर्वदा ॥ अतिवक्र दुराराध्य भोगमुक्त जितात्मनः । तुष्टो ददासि साम्राज्यं रुष्टो हरसि तत्क्षणात् ॥ विरिंचिशक्रविष्णूनां मनुष्याणां तु का कथा । तेन त्वं सर्वसत्त्वेन ग्रहराजो महाबलः ॥ पुत्रान्देहि धनं देहि त्वामस्मि शरणं गतः । ऋणदारिद्र्यदुःखेन शत्रूणां च भयात्ततः ॥ एभिर्द्वादशभिः श्लोकैर्यस्तु वेत्ति धरासुतम् । महतां श्रियमाप्नोति ह्यपरो धनदो युवा ॥

इति श्रीस्कंदपुराणे भार्गवप्रोक्तं भौमस्तोत्रं सम्पूर्णम् ॥

इति भौमपूजाप्रयोगः ।

अथ बुधपूजाप्रयोगः ॥

बुध

बुधस्य शुभफलम् ॥ સારા બુધનું ફળ

બુધ જ્યારે ૨, ૪, ૬, ૮, ૧૦, ૧૧ મો હોય તો તે શ્રેષ્ઠ ફળ આપે છે. જેમકે લાભ, ભાગ્યનો ઉદય, મનનો આનંદ, દ્રવ્યનો લાભ, ઉત્તમ સુખ, અને સંપત્તિનો વધારો કરે છે.

बुधस्य अशुभफलम् ॥ નડતા બુધનું ફળ

બુધ જ્યારે ૧, ૩, ૫, ૭, ૯, ૧૨ મો હોય તો તે સુખનો નાશ, દ્રવ્યની હાનિ, બન્ધુઓની સાથે વિરોધ કરાવે, શોક, શરીરે મહા પીડા, અનેક રીતે શત્રુભય, હમેશાં દુઃખ, વ્યાધિ, તથા વિયોગની પ્રાપ્તિ કરે છે.

બુધ એક રાશિપર એકમાસ રહે છે. નડતા બુધ ને માટે બુધ મંત્રના જપ ૮૦૦૦ તથા દાન કરવું.

દરરોજ પ્રાતઃકાલમાં ઉઠી ન્હાઇ સ્વચ્છ કપડાં પહેરી આસન ઉપર બેસી શ્રદ્ધાપૂર્વક સંધ્યાદિ નિત્યકર્મ થયા પછી બુધ મંત્રના જપ આઠ હજાર કરવા. દરરોજ આપણાથી થાય તેટલા કરીને આઠ હજાર પૂરા કરવા અથવા પોતાથી ન બને તો કોઈ વિદ્વાન બ્રાહ્મણ પાસે કરાવવા તેમ કરવાથી બુધની પીડા ઓછી થાય છે, અને તેનું ફળ સારૂં મળે છે.

आचम्य प्राणानायम्य ॥ सङ्कल्पः ॥

उद्बुध्यस्वेतिमंत्रस्य परमेष्ठी प्रजापतिर्ऋषिः । त्रिष्टुप्छन्दः । बुधो देवता ॥ बुधप्रीत्यर्थे जपे विनियोगः ॥ अथ देहांगन्यासः ॥ उद्बुध्यस्वेति शिरसि ॥ अग्नेप्रति ललाटे ॥ जागृहित्वं मुखे ॥ इष्टापूर्ते हृदये ॥ स ॱ सृजेथा मयश्च नाभौ ॥ अस्मिन्त्सधस्थे कट्याम् ॥ अध्युत्तरस्मिन् ऊर्वोः ॥ विश्वेदेवा जान्वोः ॥ यजमानश्च गुल्फयोः ॥ सीदत पादयोः ॥ अथ करन्यासः ॥ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वं अंगुष्ठाभ्यां नमः ॥ इष्टापूर्ते तर्जनी० ॥ स ॱ सृजेथा मयं च मध्यमा० ॥ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन् अनामिका० ॥ विश्वेदेवा यजमानश्च कनिष्ठिका० ॥ सीदत करतल० ॥ हृदयादिन्यासः ॥ उद्बुध्यस्वाग्ने प्रतिजागृहित्वं हृदयाय० ॥ इष्टापूर्ते शिरसे० ॥ स ॱ सृजेथा मयश्च शिखायै० ॥ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन् कवचा० ॥ विश्वेदेवा यजमानश्चनेत्रत्र० ॥ सीदत अस्त्राय० ॥ अथ ध्यानम् ॥ पीताम्बरः पीतवपुः किरीटी चतुर्भुजो दंडधरश्च हारी ॥ चर्मासिधृक् सोमसुतो गदाभृत् सिंहाधिरूढो वरदो बुधश्च ॥ गायत्री ॥ चन्द्रपुत्राय विद्महे रोहिणीप्रियाय धीमहि । तन्नो बुधः प्रचोदयात् ॥ (बुध) मंत्रः ॥ ॐ ब्राँ ब्रीं ब्रौं सः भूर्भुवः स्वः ॐ उद्बुध्यस्वाग्नेप्रति जागृहित्वमिष्टापूर्ते स ॱ सृजेथा-मयञ्च ॥ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत ॥ ॐ स्वः भुवः भूः ॐ सः ब्रौं ब्रीं ब्राँ ॐ बुधाय नमः ॥

જપ પૂરા થયા પછી નીચે લખ્યા પ્રમાણે કર્મનિષ્ઠ વૈદિકબ્રાહ્મણનું પૂજન કરી.

બુધની પ્રીતિ માટે તેનુ દાન આપવું.

अथ बुधदानम् ।

चैलं च नीलं कलधौतकांस्यं मुद्राश्च गौरुत्तमतस्य पुष्पम् ।
दासी च हस्ती च सदा प्रदेयं वदंति दानं विधुनंदनाय ॥ ४ ॥

નીલવસ્ત્ર, સ્વચ્છ કાંસું, મગ, ગોરૂચંદન, પુષ્પ, દાસી, હાથી તેટલાં બુધના માટે સદા દાન કહેલાં છે ॥ ૪ ॥

ઈશાન કોણમાં બાણાકાર ચાર આંગળના મંડલમાં ઉત્તરાભિમુખ. મગધ દેશોદ્ભવ, આત્રેયસગોત્ર, પીતવર્ણ, કન્યા અને મિથુન રાશિનો સ્વામી જપ ૮૦૦૦.

કલિયુગમાં બુધના મંત્રનો જપ ૩૨૦૦૦ હજાર કરવો.

જેને વૈદિક કર્મનો અધિકાર ન હોય તેમણે બ્રાહ્મણ પાસે નીચે લખ્યા પ્રમાણે પુરાણોક્તમંત્રનો જપ કરાવવા.

पुराणोक्तबुधमन्त्रः ॥

ह्रीं प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम् ॥ सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम् ॥

આપ્રમાણે જપ થયા પછી દરરોજ બુધની પ્રીતિ માટે બુધ કવચ તથા સ્તોત્રનો પાઠ કરવો, પાઠ કરવાથી બુધની પીડા શાન્ત થાય છે અને ધન, પુત્ર, સ્ત્રી, સુખ વિગેરે મળે છે

॥ बुधकवचम् ॥

अस्य श्रीबुधकवचस्तोत्रमंत्रस्य कश्यपऋषिः अनुष्टुप् छंदः बुधो देवता जपे विनियोगः ॥ बुधस्तु पुस्तकधरः कुंकुमस्य

समद्युतिः । पीतांबरधरः पातु पीतमाल्यानुलेपनः ॥ कटिं च पातु मे सौम्यः शिरोदेशं बुधस्तथा । नेत्रे ज्ञानमयः पातु श्रोत्रे पातु निशाप्रियः ॥ घ्राणं गंधप्रियः पातु जिव्हां विद्याप्रदो मम । कंठं पातु विधोः पुत्रो भुजौ पुस्तकभूषणः ॥ वक्षः पातु वरांगश्च हृदयं रोहिणीसुतः । नाभिं पातु सुराराध्यो मध्यं पातु खगेश्वरः ॥ जानुनी रौहिणेयश्च पातु जंघेऽखिलप्रदः । पादौ मे बोधनः पातु पातु सौम्योऽखिलं वपुः ॥ एतद्धि कवचं दिव्यं सर्वपापप्रणाशनम् । सर्वरोगप्रशमनं सर्वदुःखनिवारणम् ॥ आयुरारोग्यशुभदं पुत्रपौत्रप्रवर्धनम् ॥ यः पठेच्छृणुयाद्वापि सर्वत्र विजयी भवेत् ॥

इति श्रीब्रह्मवैवर्तकपुराणे बुधकवचं संपूर्णम् ॥

॥ बुधस्तोत्रम् ॥

अहो चंद्रसुतः श्रीमान् मागधायां समुद्भवः । अत्रिगोत्रश्चतुर्बाहुः खंगखेटकधारकः ॥ गदाधरो नृसिंहस्थः स्वर्णनाभसमन्वितः । कृष्णवृक्षस्य पत्रं च इंद्रविष्णुप्रपूजितः ॥ ज्ञेयो बुधः पंडितश्च रौहिणेयश्च सोमतः । कुमारो राजपुत्रश्च शैशवः शशिनंदनः ॥ गुरुपुत्रश्च तारेयो विबुधो बोधनस्तथा । सौम्यः सर्वगुणोपेतो रत्नदानफलप्रदः ॥ एतानि बुधनामानि प्रातःकाले पठेन्नरः । बुद्धिर्विबुद्धितां याति बुधपीडा न जायते ॥

इति बुधपूजाप्रयोगः ॥

॥ अथ गुरुपूजाप्रयोगः ॥

गुरोः शुभफलम् ॥ સારા ગુરૂનું ફળ.

ગુરૂ જ્યારે ૨, ૫, ૭, ૯, ૧૧ મો હોય તો ક્રયવિક્રયમાં લાભ થાય, આબરૂ વધે તેમજ બુદ્ધિનો વધારો, દ્રવ્યનો લાભ, સુખ તથા સંપત્તિનો વધારો કરે છે.

गुरोः अशुभफलम् ॥ નડતા ગુરૂનું ફળ.

ગુરૂ ૧, ૩, ૪, ૬, ૮, ૧૦, ૧૨, મો હોય તો તે શરીરે વ્યાધિ, પરદેશગમન, તથા મિત્રોની સાથે કલેશ કરાવે છે.

ગુરૂ એક રાશિપર તેર માસ સુધી રહે છે.

નડતા ગુરૂને માટે નીચે લખેલ ગુરૂનો મંત્ર જપ ૧૯૦૦૦ તથા દાન કરવું.

દરરોજ પ્રાતઃકાલમાં ઉઠી ન્હાઈ સ્વચ્છ કપડાં પહેરી આસન ઉપર બેસીને શ્રદ્ધાપૂર્વક સંધ્યાદિ કર્મ કરીને ગુરૂ મંત્રના જપ ઓગણીસ હજાર કરવા. દરરોજ આપણાથી થાય તેટલા કરીને ઓગણીસ

હજાર પૂરા કરવા અથવા પોતાથી ન બનતું હોય તો કોઇ વિદ્વાન્ બ્રાહ્મણ પાસે કરાવવા, તેમ કરવાથી ગુરૂની પીડા ઓછી થાય છે અને તેનું ફળ સારૂં મળે છે.

आचम्य प्राणानायम्य ॥ संकल्पः ॥

अथ बृहस्पतिमन्त्रः ॥ बृहस्पत इतिमन्त्रस्य गृत्समदऋषिः । अनुष्टुप्छन्दः । ब्रह्मा देवता ॥ बृहस्पतिप्रीत्यर्थे जपे विनियोगः ॥ अथ देहांगन्यासः ॥ बृहस्पते शिरसि ॥ अति यदर्यो ललाटे ॥ अर्हाद्युमत् मुखे ॥ विभातिक्रतुमत् हृदये ॥ जनेषु नाभौ ॥ यद्दीदयत् कट्याम् ॥ शवसऋतप्रजात ऊर्वोः । तदस्मासुद्रविणं जान्वोः ॥ धेहि गुल्फयोः ॥ चित्रं पादयोः ॥ अथ करन्यासः ॥ बृहस्पतेऽअति यदर्य्यो अंगुष्ठा० ॥ अर्हाद्युमत् तर्जनी० ॥ विभातिक्रतुमत् मध्यमा० ॥ जनेषु अनामिका० ॥ यद्दीदयच्छवसऋतप्रजाततदस्मासु कनिष्ठिका० ॥ द्रविणं धेहि चित्रम् करतल० ॥ एवं हृदयादिन्यासः ॥ बृहस्पतेऽअतियदर्य्यो हृदयाय० । अर्हाद्युमत् शिरसे० ॥ विभातिक्रतुमत् शिखायै० ॥ जनेषु कवचा० । यद्दीदयच्छवसऋतप्रजाततदस्मासु नेत्रत्र० । द्रविणं धेहि चित्रम् अस्त्राय फट् ॥ अथ ध्यानम् ॥ पीताम्बरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशान्तः ॥ तथाक्षसूत्रं च कमण्डलुश्च दण्डश्च बिभ्रद्वरदोऽस्तु मह्यम् ॥ १ ॥ गायत्री ॥ अंगिरोजाताय विद्महे वाचस्पतये धीमहि ॥ तन्नो गुरुः प्रचोदयात् ॥ बृहस्पति-

मंत्रः ॥ ॐ ह्राँ ह्रीं ह्रौं सः भूर्भुवः स्वः ॐ बृहस्पतेऽअतियद्-र्य्योऽअर्हाद्युमद्विभातिक्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजा-ततदस्मासुद्रविणन्धेहि चित्रम् ॥ ॐ स्वः भुवः भूः ॐ सः ह्रौं ह्रीं ह्राँ ॐ बृहस्पतये नमः ॥

જપ પૂરા થયા પછી નીચે લખ્યા મુજબ બ્રાહ્મણને આમંત્રણ કરી તેમનું પૂજન કરી ગુરૂની પ્રીતિ માટે દાન આપવું.

अथ गुरुदानम्।

शर्करा च रजनी तुरंगमः पीतधान्यमपि पीतमंबरम्।
पीतपुष्पलवणं च कांचनं प्रीतये सुरगुरोः प्रदीयताम् ॥

સાકર, હલદર, ઘોડો, પીળું અનાજ, પીળું વસ્ત્ર, પીળું ફુલ, મીઠું અને સોનું એ સર્વેનું ગુરૂની પ્રીતિ માટે દાન કરવું.

ઉત્તરમાં દીર્ઘ ચતુરસ્ર મંડલ, અંગુલ છ, ઉત્તરાભિમુખ, સિન્ધુદેશોદ્‌ભવ, પીતવર્ણ, આંગિરસગોત્ર, મીન અને ધનરાશિનો સ્વામી જપ ૧૯૦૦૦. કલિયુગમાં ૭૬૦૦૦ મંત્રનો જપ કરવો.

જેઓ વેદાધિકારથી રહિત છે તેઓ એ વિદ્વાન્ બ્રાહ્મણની પાસે નીચે લખ્યા પ્રમાણે પુરાણોક્તમંત્રનો જપ કરાવવો **ह्रीं देवानाञ्च ऋषीणाञ्च गुरुं काञ्चनसन्निभम् ॥ बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥**

આ પ્રમાણે જપાનુષ્ઠાન થયા પછી હંમેશ ગુરૂની પ્રીતિ માટે ગુરૂ કવચ તથા સ્તોત્રનો પાઠ કરવો.

પાઠ કરવાથી ગુરૂની પીડા શાન્ત થાય છે અને ધન, યશ, માન, આનંદમય સુખ શાંતિનો વધારો થાય છે.

॥ बृहस्पतिस्तोत्रम् ॥

नमः सुरेंद्रवंद्याय देवाचार्याय ते नमः । नमस्तेऽनंतसामर्थ्य वेदसिद्धांतपारग ॥ सदानंद नमस्तेऽस्तु नमः पीडाकराय च । नमो वाचस्पते तुभ्यं नमस्ते पीतवाससे ॥ नमोऽद्वितीयरूपाय लम्बकूर्चाय ते नमः । नमः प्रहृष्टनेत्राय विप्राणां पतये नमः ॥ नमो भार्गवशिष्याय विपन्नहितकारक । नमस्ते सुरसैन्याय विपन्नत्राणहेतवे ॥ विषमस्थस्तथा नृणां सर्वकष्टप्रणाशनः । प्रत्यहं तु पठेद्यो वै तस्य कामफलप्रदः ॥

इति गुरुपूजाप्रयोगः ।

॥ बृहस्पतिकवचम् ॥

अस्य श्रीबृहस्पतिकवचस्तोत्रमंत्रस्य ईश्वर ऋषिः अनुष्टुप् छंदः गुरुर्देवता गं बीजं श्रीशक्तिः क्लीँ कीलकं जपे विनियोगः ॥ अभीष्टफलदं देवं सर्वज्ञं सुरपूजितम् । अक्षमालाधरं शांतं प्रणमामि बृहस्पतिम् ॥ बृहस्पतिः शिरः पातु ललाटं पातु मे गुरुः । कर्णौ सुरगुरुः पातु नेत्रे मेऽभीष्टदायकः ॥ जिह्वां पातु सुराचार्यो नासां मे वेदपारगः । मुखं मे पातु सर्वज्ञो कंठं मे देवतागुरुः ॥ भुजावांगिरसः पातु करौ पातु शुभप्रदः । स्तनौ मे पातु वागीशः कुक्षिं मे शुभलक्षणः ॥ नाभिं देवगुरुः पातु मध्यं पातु सुखप्रदः । कटिं पातु जगद्वंद्य ऊरू मे पातु वाक्पतिः ॥ जानुजंघे सुराचार्यो पादौ विश्वात्मक-

स्तथा । अन्यानि यानि चांगानि रक्षेन्मे सर्वतो गुरुः ॥ इत्येतत्कवचं दिव्यं त्रिसंध्यं यः पठेन्नरः । सर्वान्कामानवाप्नोति सर्वत्र विजयी भवेत् ॥ इति श्रीब्रह्म० बृहस्पतिकवचं संपूर्णम् ॥

॥ अथ शुक्रपूजाप्रयोगः ॥

शुक्रस्य शुभफलम् ॥ સારા શુક્રનું ફળ.

જન્મરાશિથી ગણુતાં શુક્ર, ૧, ૨, ૩, ૪, ૫, ૮, ૯, ૧૧, ૧૨, મો હોય તો તે મોટા માણુસો સાથે સમાગમ, તેમ બન્ધુવર્ગ તથા પુત્રાદિકનું સુખ આપે છે.

शुक्रस्य अशुभफलम् ॥ નડતા શુક્રનું ફળ.

શુક્ર જ્યારે ૬, ૭, ૧૦, આવે તો નેષ્ટ કહેલો છે જે રોગ તથા શોક પ્રાપ્ત કરે છે તેમજ કાર્યનો નાશ કરે છે, નાની મોટી વિપત્તિ આ

સાથે વિરોધ, અને હમેશાં કષ્ટ આપે છે, શુક્ર એક રાશિ પર એક માસ સુધી રહે છે, નડતા શુક્ર માટે શુક્ર મંત્રના જપ ૧૬૦૦૦ તથા દાન કરવું.

દરરોજ પ્રાતઃકાલમાં ઉઠી ન્હાઇ સ્વચ્છ કપડાં પહેરી આસન ઉપર બેસી શ્રદ્ધાપૂર્વક સંધ્યાદિકર્મ કરીને શુક્ર મંત્રના જપ સોળ હજાર કરવા, દરરોજ આપણાથી થાય તેટલા કરીને સોળ હજાર પૂરા કરવા અથવા પોતાથી ન બને તો કોઈ વિદ્વાન્ બ્રાહ્મણ પાસે કરાવવા, તેમ કરવાથી શુક્રની પીડા ઓછી થાય છે, અને તેનું ફળ સારૂં મળે છે.

॥ आचम्य प्राणानायम्य ॥

सङ्कल्पः । अन्नात्परिस्रुतेति मंत्रस्य प्रजापतिर्ऋषिः । अनुष्टुप्छन्दः । शुक्रो देवता । शुक्रप्रीत्यर्थे जपे विनियोगः । अथ देहांगन्यासः ॥ अन्नात्परिस्रुतः शिरसि ॥ रसं ब्रह्मणा ललाटे ॥ व्यपिबत्क्षत्रं मुखे ॥ पयः सोमं हृदये ॥ प्रजापतिः नाभौ ॥ ऋतेन सत्यं कट्याम् । इन्द्रियं विपान ᳪ गुदे ॥ शुक्रं वृषणे ॥ अन्धस ऊर्वोः ॥ इन्द्रस्येन्द्रियं जानुनोः ॥ इदं पयः गुल्फयोः ॥ अमृतं मधु पादयोः ॥ अथ करन्यासः ॥ अन्नात्परिस्रुतोरसं अंगुष्ठा० ॥ ब्रह्मणाव्यपिबत्क्षत्रं तर्जनी० ॥ पयःसोमम्प्रजापतिः मध्यमा० ॥ ऋतेन सत्यमिन्द्रियं अनामिका० ॥ विपानᳪशुक्रमन्धस कनिष्ठिका० ॥ इन्द्रस्येन्द्रियमिदम्पयोमृतंमधु करतल० ॥ हृदयादिन्यासः ॥ अन्नात्परिस्रुतो रसं हृदया० ॥ ब्रह्मणाव्यपिबत्क्षत्रं शिरसे० ॥ पयः सोमं प्रजापतिः शिखायै० ॥ ऋतेनसत्यमिन्द्रियं कवचा० ॥ विपान ᳪ शुक्रमन्धस नेत्रत्र० । इन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु अस्त्राय० ॥ अथ ध्यानम् ॥

श्वेताम्बरः श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशान्तः ॥ तथाक्षसूत्रश्च कमण्डलुश्च दण्डश्च बिभ्रद्वरदोऽस्तु मह्यम् ॥ गायत्री ॥ भृगुवंशजाताय विद्महे श्वेतवाहनाय धीमहि ॥ तन्नः कविः प्रचोदयात् ॥ शुक्रमंत्रः ॥ ॐ द्राँ द्रीं द्रौं सः भूर्भुवः स्वः
ॐ अन्नात्परिस्रुतोरसम्ब्रह्मणा व्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः ॥ ऋतेन सत्यमिन्द्रियं व्विपानꣳशुक्रमन्धसइन्द्रस्येन्द्रियमिदम्पयो-मृतम्मधु ॐ स्वः भुवः भूः ॐ सःद्रौँ द्रीं द्रां ॐ शुक्राय नमः ॥

જપ પૂરા થયા પછી બ્રાહ્મણનું પૂજન કરી શુક્રની પ્રીતિ સારૂ નીચે લખ્યા મુજબ દાન આપવું.

अथ शुक्रदानम् ।

चित्रांबरं शुभ्रतरस्तुरंगो धेनुःसवत्सा रजतं सुवर्णम् । सुतंदुलंचैव सुगंधयुक्तं वदंति दानं भृगुनंदनाय ॥

ચિત્રવસ્ત્ર, ધોળોઘોડો, વાછરડાસહિત ગાય, ચાંદી, ચોખા, અને સુગંધી એટલી વસ્તુનું દાન શુક્ર માટે કહેલું છે.

પૂર્વમાં પંચકોણવાલા નવ આંગળના મંડલમાં, પૂર્વાભિમુખ, ભોજકટદેશોદ્ભવ, ભાર્ગવસગોત્ર શુકલવર્ણ, વૃષભ અને તુલારાશિનો સ્વામી, જપ ૧૬૦૦૦. કલિ યુગમાં ૬૪૦૦૦ જપ કરવા.

જેને વૈદિકકર્મનો અધિકાર નથી તેમણે બ્રાહ્મણ પાસે પુરાણોક્ત મંત્રનો જપ કરાવવો—**ह्रीं हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् ॥ सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥** આ પ્રમાણે જપ થયા પછી **શુક્રનું કવચ** તથા સ્તોત્રનો પાઠ કરવો તેનાથી શુક્રની પીડા શાન્ત થાય છે, આયુષ્ય આરોગ્યની પ્રાપ્તિ થાય છે.

॥ शुक्रकवचम् ॥

अस्य श्रीशुक्रकवचस्तोत्रमंत्रस्य भारद्वाज ऋषिः अनुष्टुप् छन्दः शुक्रो देवता जपे विनियोगः ॥ मृणालकुन्देन्दुपयोजसुप्रभं पीतांबरं प्रसृतमक्षमालिनम् ॥ समस्तशास्त्रार्थनिधिं महांतं ध्यायेत्कविं वांछितमर्थसिद्धये ॥ ॐ शिरो मे भार्गवः पातु भालं पातु ग्रहाधिपः। नेत्रे दैत्यगुरुः पातु श्रोत्रे मे चन्दनद्युतिः ॥ पातु मे नासिकां काव्यो वदनं दैत्यवन्दितः। वचनं चोशना पातु कंठं श्रीकंठभक्तिमान् ॥ भुजौ तेजोनिधिः पातु कुक्षिं पातु मनोव्रजः। नाभिं भृगुसुतः पातु मध्यं पातु महीप्रियः ॥ कटिं मे पातु विश्वात्मा ऊरू मे सुरपूजितः। जानुं जाड्यहरः पातु जंघे ज्ञानवतां वरः ॥ गुल्फौ गुणनिधिः पातु पातु पादौ वरांबरः। सर्वाण्यंगानि मे पातु स्वर्णमालापरिष्कृतः ॥ य इदं कवचं दिव्यं पठति श्रद्धयान्वितः। न तस्य जायते पीडा भार्गवस्य प्रसादतः ॥ इति श्रीब्रह्मांडपुराणे शुक्रकवचं संपूर्णम् ॥

॥ शुक्रस्तोत्रम् ॥

नमस्ते भार्गवश्रेष्ठ दैत्यदानवपूजित। वृष्टिरोधप्रकर्त्रे च वृष्टिकर्त्रे नमो नमः ॥ देवयानिपितस्तुभ्यं वेदवेदांगपारग। परेण तपसा शुद्धः शंकरो लोकसुंदरः ॥ प्राप्तो विद्यां जीव-

नाख्यां तस्मै शुक्रात्मने नमः ॥ नमस्तस्मै भगवते भृगुपुत्राय वेधसे ॥ तारामंडलमध्यस्थ स्वभासाभासितांबर । यस्योदये जगत्सर्वं मंगलार्हं भवेदिह ॥ अस्तं याते ह्यरिष्टं स्यात्तस्मै मंगलरूपिणे । त्रिपुरावासिनो दैत्यान् शिवबाणप्रपीडितान् ॥ विद्ययाजीवयच्छुक्रो नमस्ते भृगुनंदन । ययातिगुरवे तुभ्यं नमस्ते कविनंदन ॥ बलिराज्यप्रदो जीवस्तस्मै जीवात्मने नमः । भार्गवाय नमस्तुभ्यं पूर्वगीर्वाणवंदित ॥ जीवपुत्राय यो विद्यां प्रादात्तस्मै नमो नमः । नमः शुक्राय काव्याय भृगुपुत्राय धीमहि ॥ नमः कारणरूपाय नमस्ते कारणात्मने । स्तवराजमिमं पुण्यं भार्गवस्य महात्मनः ॥ यः पठेच्छृणुयाद्वापि लभते वांछितं फलम् । पुत्रकामो लभेत्पुत्रान् श्रीकामो लभते श्रियम् ॥ राज्यकामो लभेद्राज्यं स्त्रीकामः स्त्रियमुत्तमाम् । भृगुवारे प्रयत्नेन पठितव्यं समाहितैः ॥ अन्यवारे तु होरायां पूजयेद् भृगुनन्दनम् । रोगार्तो मुच्यते रोगाद् भयार्तो मुच्यते भयात् ॥ यद्यत्प्रार्थयते जन्तुस्तत्तत्प्राप्नोति सर्वदा । प्रातःकाले प्रकर्तव्या भृगुपूजा प्रयत्नतः ॥ सर्वपापविनिर्मुक्तः प्राप्नुयाच्छिवसन्निधिम् ॥ इति शुक्रस्तोत्रम् ॥

इति शुक्रपूजाप्रयोगः ॥

॥ अथ शनिपूजाप्रयोगः ॥

मन्दस्य शुभफलम् ॥ સારા શનિનું ફળ.

શનિ જ્યારે, ૩, ૬, ૧૧, મો હોય ત્યારે સુવર્ણનો લાભ, વસ્ત્રોનો લાભ, રાજદરબારથી માન, સન્માન અને સ્નેહનો વધારો, મિત્રપક્ષથી જય, ધનનો લાભ, તેમ ઇચ્છા મુજબ સુખ સંપત્તિનો વધારો કરે છે.

मन्दस्य अशुभफलम् ॥ નડતા શનિનું ફળ.

શનિ જ્યારે ૧, ૨, ૪, ૫, ૭, ૮, ૯, ૧૦, ૧૨, મો હોય ત્યારે પોતાના બન્ધુઓ સાથે વિરોધ, ધનની હાનિ તેમ દરેક પ્રકારથી કાર્યની હાનિ કરે છે.

શનિ એક રાશિપર ૨ાા વરસ સુધી રહે છે.

નડતા શનિ માટે શનિના મંત્ર જપ ૨૩૦૦૦ તથા દાન કરવું.

लघुपनोतिविचारः ॥

અઢી વરસની પનોતિનું ફળ.

શનિ ૪, ૮, મો આવે તો તેને દુઃખ આપનારી શનિની નાની પનોતિ

અઢી વરસની જાણવી. તે શરીરને વિષે વ્યાધિ, બન્ધુઓની સાથે વિરોધ, પરદેશગમન, કલેશ, અને અત્યંત ચિંતા ઉપન્ન કરે છે. તેમજ મનુષ્યને નાના પ્રકારનાં દુઃખો, અગ્નિભય, મૃત્યુતુલ્ય પીડા કરે છે તથા શસ્ત્રનો ભય અને હમેશાં દુઃખ પ્રાપ્ત કરે છે.

बृहत्पनोतिविचारः ॥

મોટી પનોતિ (સાડા સાત વરસની) નું ફળ.

રાશિથી ગણુતાં શનિ ૧૨, મો આવે તો માથાને વિષે પનોતિ જાણુ-વી, પહેલો શનિ આવે તો છાતીએ પનોતિ જાણુવી, અને બીજો શનિ આવે તો પગને વિષે પનોતિ જાણુવી. આ પ્રમાણે પનોતિ સાડાસાત વરસની જાણુવી. તેનું ફળ વિવિધ પ્રકારના કલેશ, ખરાબ માણુસોથી ભય, પુત્ર તથા પશુ આદિકને પીડા કરે છે. તેમ હાનિ, મરણુ, વિદેશમાં ગમન, સાધારણુ સુખ, સ્ત્રી તથા સમૃદ્ધિનો નાશ કરે છે. ચોથો અથવા આઠમો શનિ આવે તો અઢી વરસની નાની પનોતિ જાણુવી, તેનું ફળ પણુ પૂર્વમાં લખ્યા મુજબ છે.

पनोतिपादफलम् ॥

પનોતિના પાયાની સમજણ.

પનોતિના ચાર પાયા છે. સોનાનો, રૂપાનો, ત્રાંબાનો અને લોઢાનો જ્યારે શનિ બદલાતો હોય ત્યારે હરકોઈ માણુસને પોતાની રાશિથી ગણુતાં ૧–૬, અને ૧૧, મો ચંદ્ર હોય તો તે સોનાને પાયે પનોતી સમજવી.

સોનાને પાયે બેઠેલી પનોતિ નઠારી જાણુવી. તે પોતાના કુટુંબમાં તથા સ્વજનમાં વિરોધ કરાવે અનેક પ્રકારના રોગો, કલેશ ઉત્પન્ન કરાવે. અને દ્રવ્યની હાનિ કરાવે.

૨–૫, મો અને ૯, મો ચંદ્ર હોય તો તે રૂપાને પાયે પનોતિ છે. એમ સમજવું.

રૂપાને પાયે પનોતિ બેઠી હોય તો તે સારી જાણવી. તે ધન, ધાન્ય અને સંપત્તિ કરાવે. રાજા રજવાડા તરફથી માન મળે. સુખ પ્રાપ્તિ થાય, સારાં કામ કરાવે, ધારેલાં કામ પાર પડે.

૩–૭, મો અને ૧૦, મો ચંદ્ર હોય તો તે ત્રાંબાના પાયે સમજવી.

ત્રાંબાના પાયે પનોતિ બેઠી હોય તો તે પણ સારી જાણવી તેથી લક્ષ્મીનો બહુજ લાભ થાય છે. તથા સ્ત્રી પુત્ર સંબંધી સુખની પ્રાપ્તિ થાય અને સર્વપ્રકારનું સુખ મળે, ધારેલાં કામમાં ઘણોજ લાભ થાય.

ચોથો, આઠમો, અને બારમો ચંદ્રમા હોયતો લોખંડને પાયે પનોતિ જાણવી અને તે બહુ કષ્ટ આપનાર જાણવી.

લોખંડને પાયે પનોતિ બેઠી હોય તો શરીરે પીડા, લોહીનો પ્રકોપ, સ્ત્રી, પુત્ર અને પશુને પીડા, વ્યાપારનો નાશ, રાજાથી ભય અને નિર્ધન-પણું પ્રાપ્ત કરે છે.

શનિ એ ક્રૂર ગ્રહ છે માટે તેની પીડાની શાન્તિ ને માટે નીચે લખ્યા-મુજબ તેની પૂજા કરવી.

॥ प्रातःकृत्यम् ॥

દરરોજ પ્રાતઃકાલમાં ઉઠી ન્હાઈ સ્વચ્છ કપડાં પહેરી આસન ઉપર બેસી શ્રદ્ધાપૂર્વક સંધ્યાદિ નિત્યકર્મ કરી રહ્યા પછી શનિમંત્રના જપ ત્રેવીસ હજાર કરવા દરરોજ આપણાથી થાય તેટલા કરીને ત્રેવીસ હજાર પૂરા કરવા અથવા પોતાથી ન બને તો કોઈ વિદ્વાન્ બ્રાહ્મણ પાસે કરાવવા, તેમ કરવાથી શનિની પીડા ઓછી થાય છે, અને તેનું ફળ સારૂં મળે છે.

आचम्य प्राणानायम्य ॥ संकल्पः ॥

शन्नो देवीति मंत्रस्य सिन्धुद्वीपऋषिः । गायत्रीच्छन्दः ॥ आपो देवताः शनिप्रीत्यर्थे जपे विनियोगः ॥ अथ देहांग-

न्यासः ॥ शन्नो शिरसि ॥ देवी ललाटे ॥ अभिष्टय मुखे ॥ आपो कंठे ॥ भवन्तु हृदये ॥ पीतये नाभौ ॥ शं कट्याम् ॥ योः ऊर्वोः ॥ अभि जान्वोः ॥ स्रवन्तु गुल्फयोः ॥ नः पादयोः ॥ अथ करन्यासः ॥ शन्नो देवी अंगुष्ठा० ॥ अभिष्टय तर्जनी० ॥ आपो भवन्तु मध्यमा० ॥ पीतये अनामि० शंय्योरभि कनिष्ठि० ॥ स्रवन्तु नः करतल० ॥ एवं हृदयामिदि० ॥ शंनोदेवी हृदयाय० ॥ अभिष्टय शिरसे० ॥ आपो भवन्तु शिखायै० ॥ पीतये कवचा० ॥ शंय्योरभि नेत्रत्र० ॥ स्रवन्तु नः अस्त्राय० ॥ अथ ध्यानम् ॥ नीलाम्बरः शूलधरः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् ॥ चतुर्भुजः सूर्यसुतः प्रशांतः सदास्तु मह्यं वरदोऽल्पगामी ॥ गायत्री ॥ कृष्णांगाय विद्महे रविपुत्राय धीमहि ॥ तन्नः-सौरिः प्रचोदयात् ॥ शनिमंत्रः ॥ ॐ खाँ खीं खौं सः ॐ भूर्भुवः स्वः ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये ॥ शंय्योरभिस्रवन्तु नः ॥ स्वः भुवः भूः ॐ सः खौं खीं खाँ ॐ शनैश्चराय नमः ॥

જપ પૂરા થયા પછી બ્રાહ્મણનું પૂજન કરી શનિની પ્રીતિ માટે નીચે લખ્યા મુજબ દાન આપવું.

अथ शनैश्चरस्य दानम् ।

माषाश्च तैलं विमलेंद्रनीलं नीलांबरं स्यान्महिषी च लोहम् ।
सदक्षिणं चेति वदंति नूनं दुष्टाय दानं रविनंदनाय ॥

અડદ, તેલ ઇંદ્રનીલ (નીલમ), કાળું વસ્ત્ર, ભેંસ અને લોઢું એ સર્વે વસ્તુ દક્ષિણા સહિત નેષ્ટ શનિને માટે આપવી.

પશ્ચિમમાં ધનુષ્યાકાર, બે આંગળના મંડલમાં પશ્ચિમાભિમુખ, સૌરાષ્ટ્રદેશોદ્ભવ, કાશ્યપસગોત્ર, કૃષ્ણવર્ણ મકર અને કુંભ રાશિનો સ્વામી, જપ ૨૩૦૦૦. કલિ યુગે જપ ૯૨૦૦૦ પોતે અથવા બ્રાહ્મણ પાસે કરાવવા. જેમને વૈદિક કર્મનો અધિકાર નથી તેમણે બ્રાહ્મણ પાસે પુરાણોક્ત મંત્રનો જપ કરાવવો.

पुराणोक्तशनिमंत्रः ॥

ह्रीं नीलाञ्जनसमाभासं रविपुत्रं यमाग्रजम् ॥
छायामार्तण्डसंभूतं तं नमामि शनैश्चरम् ॥

આ પ્રમાણે જપ થયા પછી શનિ કવચ તથા સ્તોત્રનો પાઠ કરવો, તેનાથી શનિની પીડા શાન્ત થાય છે અને દરેક પ્રકારે સુખશાન્તિ મળે છે. મનકામના સિદ્ધ થાય છે.

॥ शनिकवचम् ॥

अस्य श्रीशनैश्चरकवचस्तोत्रमंत्रस्य कश्यप ऋषिः अनुष्टुप्छंदः शनैश्चरो देवता शिंशक्तिः शूंकीलकं शनैश्चरप्रीत्यर्थे जपे विनियोगः ॥ नीलांबरो नीलवपुः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् । चतुर्भुजः सूर्यसुतः प्रसन्नः सदा मम स्याद्वरदः प्रशान्तः॥ श्रीब्रह्मा उवाच । शृणुध्वमृषयः सर्वे शनिपीडाहरं महत् । कवचं शनिराजस्य सौरेरिदमनुत्तमम् ॥ कवचं देवतावासं वज्रपंजरसंज्ञकम् । शनैश्चरप्रीतिकरं सर्वसौभाग्यदायकम् ॥ ॐश्रीशनैश्चरः पातु भालं मे सूर्यनंदनः । नेत्रे छायात्मजः पातु पातु कर्णौ यमानुजः ॥ नासां वैवस्वतः पातु मुखं मे भास्करः सदा । स्निग्ध-

ભાગ ૪ થામાં—નાડીવ્રણ, ભગંદર, ઉપદંશ, લિંગના અર્શ, શુકદોષ. કોઢ, શિતપિત્ત, ઉદદ, કોઠ, ઉત્કોઠ, વિસર્પ, સ્નાયુ, વિસ્ફોટ, ફિરંગરોગ, મસૂરિકા, શીતલા, ક્ષુદ્રરોગ, શિરોરોગ, નેત્રરોગ, કર્ણરોગ, નાસિકારોગ, મુખરોગ, ઝેર, પ્રદર, સોમરોગ, સ્ત્રીરોગ, બાળરોગ આદિ રોગોની તેનાં નિદાન સહિત ચિકિત્સા આપવામાં આવી છે.

એ પ્રમાણે આવા મોટા કદના ગ્રંથની સમાપ્તિની સાથે વૈદ્ય વિદ્યાની જાણવા જેવી સઘળી બાબતોનો સમાવેષ થાય છે. પાકા પુઠાના ગ્રંથની કિંમત રૂ. ૧૨—૦—૧

તૈયાર છે !!! નવીન છઠ્ઠી આવૃત્તિ તૈયાર છે !!!

माधवनिदान—માધવનિદાન મૂળ શ્લોક સહિત શુદ્ધ ગુજરાતી ભાષાંતર. આ નિદાન ગ્રંથ **માધવાચાર્ય** નામના પ્રાચીન આર્યવિદ્વાને રચેલો છે, એમાં ઘણું કરીને દરેક રોગ થવાનાં કારણ, રોગનાં લક્ષણ, સાધ્યાસાધ્ય વિચાર વગેરે વૈદ્યોએ અને ગૃહસ્થોએ પ્રથમ અને અવસ્ય જાણવાજોગ હકીકતનું ખુલાસાથી વર્ણન કરેલું છે. રોગ થવાનાં કારણ બરાબર સમજ્યા સિવાય અને થયેલા રોગની સ્થિતિ અવસ્થા યોગ્ય રીતે પારખ્યા સિવાય દવા કરવાથી કાર્યસિદ્ધિ ભાગ્યે જ થવાની. દરેક શખ્સે પ્રથમ નિદાન ભાગ અવશ્ય જાણવો જોઇએ. અને તે જાણવા સારૂ **આ પુસ્તક ઘણું ઉપયોગી થાય તેવું બનાવ્યું છે.** એમાં મૂળ સંસ્કૃત તથા તેની ગુજરાતી ટીકા સમજાય તેવી રીતે આપેલી છે. **ઔષધોના પુસ્તક કરતાં આવું પુસ્તક સાધારણ લોકોને પણ ઉપયોગી થાય;** કેમકે રોગ થવાનાં કારણ અને રોગની હાલત તેમના સમજવામાં આવે તો તેથી સાવચેત રહેવા પ્રયત્ન કરી શકાય અને એમ બને એટલે ઔષધની ગરજ ઘણીજ થોડી પડે. કાગળ અને છાપ ઉત્તમ છે.

વૈદ્યકના **શારીરશાસ્ત્ર, નિદાન** (રોગની ઉત્પત્તિ વગેરેનાં કારણો સમજવાં તે) અને **ચિકિત્સા** (ઓષધવિચાર) એવા ત્રણ મુખ્ય ભાગ છે. એમાં પણ **નિદાન સૌથી વધારે ઉપયોગી હોવું જોઇએ,** એમાં કાંઈ શક નથી. **નિદાન વિષે માધવનો આ ગ્રંથ પરમ પ્રમાણ ગણાય છે.** સંસ્કૃતમાં આવી એક કહાણી છે કેઃ—

निदाने माधवः श्रेष्ठः सूत्रस्थाने तु वाग्भटः ।
शारीरे सुश्रुतः प्रोक्तश्चरकस्तु चिकित्सिते ॥

આ ગ્રંથનું મૂળસહિત શુદ્ધ ગુજરાતી ભાષાંતર સરળ તથા બધાથી સમજાય એવું છે.

આ ચોપડી વૈદ્યરાજોને ઘણી વાંચવા યોગ્ય છે. શરીરમાં કેવા કેવા પ્રકારના નાહાના મોટા રોગોની ઉત્પત્તિ થાય છે અને તે કેવા પ્રકારે થાય છે વિગેરે સમજવા યોગ્ય બાબતો આ ગ્રંથમાંથી મળી આવે છે. કેટલાક ઉંટવૈદો રોગ થવાનાં કારણો વગેરે જાણ્યા સિવાય પોતાની કમ સમજશક્તિને આધિન થઇને ઉંટવૈદુ કરી ઉધુંચતું કરી નાખે છે, તેઓને તો આ ગ્રંથ અવશ્ય કરીને વાંચવાની અમે ભલામણ કરીએ છીએ. આ પુસ્તકનો સર્વ સજ્જનોએ અવસ્ય સંગ્રહ કરવોજ જોઇએ. કિંમત ૨–૦–૦

मैथुनी अने टांकीना रोगो—આ પુસ્તક બધું ગુજરાતીમાં જ લખાયેલું છે. આ પુસ્તકમાં બે વિભાગ પાડવામાં આવ્યા છે તેમાં પહેલા વિભાગમાં પરસ્ત્રીસંયોગથી ઉત્પન્ન થતાં જે દરદો ખરી ટાંકીના વર્ગથી જૂદાં છે; તેનું અને બીજા વિભાગમાં ખરી ટાંકી અને તેને લગતા સર્વે દરદોનું વર્ણન કરવામાં આવ્યું છે. પ્રમેહ, બદ, ચાંદી, વીગેરે દરેક દરદોની સંપૂર્ણ હકીકત સહેલા ને સસ્તા અલૌકિક ઉપચારો સાથે લખવામાં આવી છે. પૃષ્ઠ (૬૬૪) મૂલ્ય રૂ. ૪–૦–૦ છે. છતાં હાલ ઘટાડેલી કીંમત માત્ર રૂ. ૨–૦–૦

रसप्रकाशसुधाकर—મૂળ સંસ્કૃત આ પુસ્તકમાં રસાયણિક સંબંધી ઘણા ઉપચારો લખવામાં આવ્યા છે ૨–૦–૦

वैद्यजीवन—महाकविश्री लोलिंबराज प्रणीत. શ્લોકો સહિત પદ્યાત્મક અને ગદ્યાત્મક શુદ્ધ સરળ ગુજરાતી ભાષાંતર. આ પુસ્તકમાં શ્રૃંગાર અને વૈદ્યક બંને વિષયો આપેલા છે. આ પુસ્તકમાં લખેલા ઉપચારોથી ઘણા દરદીઓ સારા થયા છે. વૈદ્યકમાં આ પુસ્તક એક રત્નસમાન ગણાય છે.

રે રોગી ! સુખ સાધવા કરવા દરદજ દૂર, વૈદ્યજીવન ઔષધ સદા ભજ ભાવે ભરપુર,
વૈદ્યજીવન ભણવા વિષે જેને ઉર અતિ વ્હાલ, કરવો તેનો સુગમપથ ટીકા રચી રસાળ

ઉપર લખ્યા મુજબ ઉંચો વૈદ્યકનો ગ્રંથ છે; તેમાં ૩૫૫ ઉપર પાનાં છે ઉત્તમ છપાઈ ગ્લેજ કાગળ છે. અને આ પુસ્તક દશ રૂપીયા ખરચતાં પણ મળતું નહતું તે જ હાલમાં નવું છાપ્યું છે. પાકું સોનેરી બાઈન્ડીંગ છતાં કિંમત માત્ર ૧–૪–૦

वाजीकरण कल्पद्रुम–આ પુસ્તકમાં પુરૂષત્વ તથા સ્ત્રીત્વ વધારવાના અનેક ઉપાયો છે. અને આ પુસ્તકમાં લખેલા વાજીકરણના ઉપચારો અજમાવવાથી પુરૂષને વૃદ્ધાવસ્થા કદી આવતી નથી એવા સહેલા સારા ઉપાયો છે. હિંદી ટીકા રૂ. ૧–૦–૦

वैद्यामृत–ભટ્ટ મોરેશ્વરભટ્ટ પ્રણિત તાત્કાલીક ગુણકારક થઈ પડે તેવાં અનુભવી ઔષધોના સંગ્રહનું ગુજરાતી ટીકામાં પુસ્તક ૦–૧૦–૦

हारीत संहिता—મહર્ષી આત્રેય પ્રણિત મૂળસહિત ગુજરાતી ટીકા. વૈદ્યકના અસંખ્ય ઉપયોગી વિષયોથી ભરપૂર ૫–૦–૦

हितोपदेश—(जैनवर्य पंडित श्रीकंठसुरिविरचित) વૈદ્યક ગ્રંથ મૂળસહિત શુદ્ધ સરળ ગુજરાતી ભાષાંતર. ૨–૮–૦

वनस्पतिशास्त्र—(કચ્છ દેશની વનસ્પતિ) આ ગ્રંથ પ્રખ્યાત વૈદ્ય જયકૃષ્ણ ઇન્દ્રજીએ લખેલો છે. આ ગ્રન્થમાં કચ્છ દેશમાં ઉત્પન્ન થતી દરેક વનસ્પતિઓ તેમજ તેના ગુણદોષ વિગેરે આપવામાં આવ્યું છે. વનસ્પતિ ઓળખવા માટે કેટલીએક આકૃતિઓ પણ આપવામાં આવેલ છે. આવા અમૂલ્ય ગ્રંથની કીંમત માત્ર રૂા. ૧૦–૦–૦ રાખવામાં આવી છે

ભટ્ટ કુલશંકર અમરજીનો બનાવેલો અસલ ગ્રંથ

તૈયાર છે !!! નવિન દ્વિતીયાવૃત્તિ તૈયાર છે !!!

शार्ङ्गधर संहिता—મૂળ શ્લોકોસાથે ગુજ૦ ટીકાસહિત રચનાર ભટ્ટ કુલશંકર અમરજીની અલૌકિક રોગક્રમોપરિનિદાન અનુક્રમણિકા અને વિષયાનુક્રમણિકા સહિત.

આવું અલૌકિક પુસ્તક આજ દીવસ સુધીમાં બીજે છપાયું નથી. તેમજ આયુર્વેદ શીખવા માટે અર્વાચીન પદ્ધતિએ લખાયેલું આ પુસ્તક શિક્ષકો અને વિદ્યાર્થિઓને અતિશય ઉપયોગી થઈ પડે તેવું છે. આ ગ્રંથના અભ્યાસીઓને અને વૈદકનો ધંધો કરનારાઓને રોગ પર અમુક ઓષધ મેળવવાનું ઠીક પડે તેવી અપૂર્વ

યુક્તિ ગોઠવી છે. તેમજ સરકારી કેળવણી ખાતાંએ ઇનામ અને લાઇબ્રરીઓમાં રાખવા માન્ય કર્યું છે.

આ પુસ્તકની કિંમત રૂ. ૬-૦-૦ હતી છતાં લોકસમુદાયને જલદી ઉપયોગી થઈ પડે અને જનસમાજને થોડે ખરચે મોટો લાભ મલે તેટલા માટેજ આ પુસ્તકની મૂળ કિંમત ઘટાડીને રૂ. ૫-૦-૦ રાખવામાં આવી છે.

वंध्याकल्प—જે સ્ત્રીઓને ગર્ભસ્થાનમાં રહેલા દોષોને કારણે બચ્ચાં ન થતાં હોય તેઓને માટે **વાંઝણી** સ્ત્રીઓને ગર્ભ રહે તેવા ઉપાયોથી ભરપૂર. ૦-૨-૦

નર્મદાતટ નિવાસી પૂ૦ શ્રીરંગ અવધૂત મહારાજ કૃત ભક્તિમાર્ગના પુસ્તકો

શ્રી ગુરૂલીલામૃત—ત્રણે ભાગ ગુજરાતીમાં-જેમાં ભગવાન શ્રીદત્તાત્રેયની ઉપાસનાનો સરળ માર્ગ, મહારાજશ્રીની ભાવયુક્ત અલૌકીક વાણીથી તેમજ અનેક દૃષ્ટાંતોથી સગુણ તથા નિર્ગુણ ઉપાસનાનું રહસ્ય સમજાવવામાં આવ્યું છે જેથી વાંચક વર્ગના હૃદયમાં ભક્તિનો સાચો આવિર્ભાવ થાય છે. સંપૂર્ણ ત્રણ ભાગ સાથે લેનારને ૩-૧૨-૦

૧ **શ્રી ગુરૂલીલામૃત** (જ્ઞાનકાંડ):—આમાં શ્રીમદ ભાગવત જેવું નિરૂપણ આપેલું હોવાથી વાંચક વર્ગને જ્ઞાન તેમજ આનંદ આપે છે, એટલુંજ નહિં પરંતુ નિર્ગુણ બ્રહ્મનો ભેદ ઉકેલવામાં આવ્યો છે. કીં. રૂ. ૧-૮-૦

૨ **શ્રી ગુરૂલીલામૃત**—(કર્મકાણ્ડ) મરાઠી ગુરૂચરિત્રના જેવું આ પુસ્તક છે. આનું પારાયણ ઉપાસનાની દૃષ્ટિએ અત્યંત મહત્વનું છે. કીંમત ૧-૮-૦

૩ **શ્રી ગુરૂલીલામૃત**—(ઉપાસના કાંડ) જેમાં ૫૦૫૦ સ્વામી શ્રી વાસુદેવાનંદ સરસ્વતિ (ટેંબે) સ્વામીની અલૌકીક લીલાઓ તથા સગુણ ઉપાસનાનું રહસ્ય આપવામાં આવ્યું છે. કીં. ૧-૦-૦

૪ **અવધૂતાનંદ**:—તત્વજ્ઞાનથી ભરપૂર એવા ભજનોનો ઉત્તમ સંગ્રહ ૧-૮-૦

૫ **રંગહૃદયમ**:—પૂજ્ય મહારાજશ્રીનાં બનાવેલાં જ્ઞાનભક્તિથી રંગાયેલાં સંસ્કૃત સ્તોત્રનું સંગ્રહાત્મક ઉત્તમ પુસ્તક ૦-૧૨-૦

તૈયાર છે !!! તૈયાર છે !!!

વૈદીક મંત્રોના ચમત્કારીક પ્રયોગનો ગ્રંથ વિધિવિધાન સાથે

॥ शैव सर्वस्व सभाष्य सचित्र ॥

लक्षं तु वेदाश्चत्वारो—ચાર લાખ વેદના મંત્રોમાંથી સચોટ રીતે જવાબ આપનાર ચમત્કારીક મંત્રોને ઉદ્ધૃત કરી મનુષ્યના જીવનમાં નવું અમૃત સીંચવા, સંજીવની વિદ્યા રૂપી ઋષિ મુનીઓના અજમાવેલા પ્રયોગનો પૂજ્યપાદ્ સ્વામીશ્રી **પ. પ. આત્માનંદ સરસ્વતી પ્રણીત** પ્રસાદરૂપ અનેક વિષયો સાથેનો, **મહાન** ગ્રંથ આજ દિન સુધી નહીં જોએલો, નહીં સાંભળેલો, નહીં છપાયેલો એવો, પ્રાચીન હસ્ત લીખીત ગ્રંથ ઉપરથી છાપવામાં આવ્યો છે તે પુસ્તક જોવાથી માલૂમ પડશે.

ઉપરના ગ્રંથ **શૈવસર્વસ્વ**માં જગતના કલ્યાણરૂપ, સુંદર યોજના સાથે, રૂદ્ર મંત્રોનું અનુષ્ઠાન, પુરશ્ચરણાદિ વિધિ વિધાન સાથે શુદ્ધ ગુજરાતી ભાષામાં આપેલું છે. આ સાથે આપેલી અને એવી બીજી અનેક સિદ્ધિઓ આ ગ્રંથથી મેળવી શકાય છે. હજાર વર્ષ સુધી જીવવાનો ઉપાય, સુવર્ણ બનાવવાનો ઉપાય, ભૂત, પ્રેત, પિશાચ, રાક્ષસ, સર્પ વિગેરેને વશ કરવાનો, રાજા અને તેના સૈન્યને સ્તંભન, અને વશીકરણ કરવાનો, મહાન અને અસાધ્ય રોગને નાશ કરવાનો, ઇંદ્રને પ્રસન્ન કરી જગતના કલ્યાણ માટે વૃષ્ટિ લાવવાનો ઉપાય; મારણ, મોહન, વશીકરણ, ઉચ્ચાટન, વિગેરેના પ્રકાર; વ્યાઘ્ર, સિંહ આદિ ક્રૂર પ્રાણીઓને વશ્ય કરવાનો, ધન, લક્ષ્મી મેળવવાનો, અગ્નિ ઉત્પન્ન કરવાનો પ્રયોગ, જગતને વશ કરી રાજ્ય પ્રાપ્ત કરવાનો જપાનુષ્ઠાન પ્રયોગ, સૂર્ય, ચંદ્ર, શિવ, વિષ્ણુ આદિ દેવતાઓને પ્રસન્ન કરવાનો પ્રયોગ આવા ઉત્તમ પ્રયોગોથી ભરપુર છે.

આ એકજ ગ્રંથની મદદથી હજારો કાર્ય થઈ શકે છે. આવો ઉત્તમ ગ્રંથ હોવા છતાં ધાર્મિક જનતા તેનો પુરો લાભ ઉઠાવે એ કારણથી કિંમત જુજ રાખવામાં આવી છે તો દરેક ધર્માનુરાગી સજ્જનોને પોતાના ઈહલોક તથા પરલોકના શ્રેય માટે આ ગ્રંથનો જરૂર સંગ્રહ કરવા અમારી ભલામણ છે. સુંદર છપાઈ સુવાચ્ય અક્ષર ગ્લેજ કાગળ પાકું બાઈન્ડીંગ સાથે કિંમત. ફક્ત રૂ. ૧-૮-૦ બહારગામ પોસ્ટેજ જુદું.

પ્રાપ્તિસ્થાન—

મુંબઈમાં દરેક જાતનાં ધાર્મિક પુસ્તકો મળવાનું મોટું મથક

પંડિત નારાયણ મૂલજી પુસ્તકાલય,

કાલબાદેવી રોડ આનંદભૂવન દાદીશેઠ અગ્યારી લેન, મુંબઈ નં. ૨

એક ઘડીના પણ વિલંબ
વિના
દરેક વૈષ્ણવજન
આ ધાર્મિક સ્તોત્રગ્રંથ
પોતાના ઘરમાં
વસાવી જીવન
સફળ
બનાવે.
મત
મતાન્તર
સહિત બ્રહ્મસૂત્ર
પાઠ સાથે
આ ગ્રંથમાં વૈષ્ણવ સંપ્રદાયના
આચાર્ય શ્રી.શ્રીવિઠ્ઠલેશજી, શ્રી
રઘુનાથજી, શ્રીહરિહરરાયજી
શ્રી જીવનજી વગેરે
ગોસ્વામિઓ
વિરચિત
૩૦૬
સ્તોત્રો છે.
। श्रीः ।
बृहत्स्तोत्रसरित्सागरः
गद्यपद्यात्मकः
[सचित्रः]
૮૦૦ પાનાં, પાકાં પુઠાની બાઇ-
ન્ડીંગને સોનેરી નામ.
શ્રી
ગુંસાઇજી
અને
ગોસ્વામિઓના
સુંદર ચિત્રો
શ્રીવલ્લભાચાર્યજીનાં
સુંદર રંગીન (૧૦) ચિત્રો
છતાં
કિંમત માત્ર
રૂપિયા ૫-૦-૦
પુષ્ટિ સંપ્રદાયનો
મહાન ધાર્મિકસ્તોત્ર
ગ્રંથ.
આ
પુસ્તક
મળવાનું
જાણીતું સ્થળ:
પંડિત
શ્રી નારાયણ
મૂલજી પુસ્તકાલય
કાલબાદેવી રોડ, આનંદ
ભૂવન, દાદીશેઠ અગ્યારીલેન,
મુંબઈ, ૨.

NAVAGRAHA-KOSHA

VOLUME TWO

PROF. S.K. RAMACHANDRA RAO

A PROJECT ON NAVAGRAHA-KOSHA

Kalpatharu Research Academy Publication

Chief Editor: DAIVAJNA K.N. SOMAYAJI

NAVAGRAHA-KOSHA

VOLUME TWO

By

S.K. RAMACHANDRA RAO

KALPATHARU RESEARCH ACADEMY

NO. 37, SHANKARA PARK, SHANKARAPURAM,
BANGALORE 560 004
PHONE: 624847

A PROJECT ON NAVAGRAHA-KOSHA

Kalpatharu Research Academy Publication

Chief Editor: DAIVAJNA K.N. SOMAYAJI

NAVAGRAHA-KOSHA

VOLUME TWO

By

S.K. RAMACHANDRA RAO

WITH ASSISTANCE FROM

DR. S.R.N. MURTHY

KALPATHARU RESEARCH ACADEMY

NO. 37, SHANKARA PARK, SHANKARAPURAM,
BANGALORE 560 004
PHONE: 624847

NAVAGRAHA-KOSHA, Vol. II, being an Encyclopaedic account of the Poojas in connection with the Navagrahas, by Vidyalankara, Sastra-Chudamani, Sangita-Kalaratna, Prof. S.K. Ramachandra Rao (With assistance from Dr. S.R.N. Murthy), and published by Daivajna K.N. Somayaji, Chief Editor and Director, Kalpatharu Research Academy, No. 37, Shankarapark, Shankarapuram, Bangalore - 4, Phone : 624847.

Price: Rupees One Hundred and Fifty Only (Subsidized)

The Publications of Kalpatharu Research Academy are meant to reach all sections of society, and hence are sold at highly subsidized prices. An appeal is hereby made to book sellers to adhere to the prices indicated in each volume by the publishers, and not to enhance them on any acccount.

UBS PUBLISHERS DISTRIBUTORS LTD.,
No. 10, First Main Road, Gandhi Nagar,
P.B. No. 9713, Bangalore 560 009,
Phones: 2263901, 2263902, 2253903, 2263904.
Branches: New Delhi - Bombay - Bangalore - Madras - Calcutta
Patna - Kanpur - London

Printed by: H. Venkataramaiah
at M/s. Payonidhi Printers Pvt. Ltd., Bangalore - 70 ✆ 6634074, 6641203.

PREFACE

The Kalpatharu Research Academy of Bangalore is happy and proud to bring out the Second Volume of Navagraha-Kosha in fairly quick succession to the first, which was published in the month of June this year. While the first volume provides elaborate and comprehensive background to `Navagraha-Puja', which is popular and prevalent all over the country, the second volume is intended to serve as a practical guide to the actual performance of the Puja in all its details. The Puja is performed not only to offset the evil effects of certain planetary positions and conjunctions, but to secure health, wealth and happiness of all persons. The rituals constituting the Puja are indicated in this volume, along with the Mantras to be recited, the Mandalas to be prepared, and the gifts to be made. The Puja is done to individual Grahas as well as to all the Grahas collectively. Both forms of Puja are given in this volume.

It is hoped that, like the previous publications of the Kalpatharu Research Academy, this volume will be found useful to those interested in Indian Culture and religion. It will fulfil a want that has along been felt. An exhaustive account of the Navagrahas as also the Puja of the Navagrahas, like the one that is now brought out, had not appeared till now, although scholars and students were looking forward to such a volume. The Kalpatharu Research Academy, naturally feels gratified that it has been possible to publish these two volumes.

As in case of the previous volumes, the Academy acknowledges its grateful thanks to Vidyalankara, Sastra-Chudamani, Vedanta-Nidhi, Sangita-Kalaratna, Prof. S. K. Ramachandra Rao, for having taken the trouble to prepare for the Academy these two volumes constituting Nava-Graha-Kosha. The Academy also acknowledges the help rendered by Dr. S.R.N. Murthy by preparing the first section in this volume.

The Academy is planning to bring out in future some more volumes on the same subject: Grahas, Nakshatras and Rasis. Besides these, several volumes on Devata-Kosha and Vol on Bharatiya-Samskriti-Sarvasva-Kosha, are also on the anvil.

The Academy expresses its deep indebtedness to Sri. J.P. Sharma, I.A.S., Principal Secretary to the Govt. of Karnataka, for his encouragement to our projects and the Academy also expresses its deep gratitude to Poojya Sri. D. Veerendra Heggade, of Sri Manjunatha Swamy Temple, Dharmasthala, for his encouragement and support, and to all our friends and well-wishers, who have made our publications possible.

Our greateful thanks are also due to Sri. H. Venkataramaiah and his staff in Payonidhi Printers (p) Ltd., for having printed this volume neatly and promptly.

Bangalore
03-10-1995
Vijayadashami

DAIVAJNA K.N. SOMAYAJI
CHIEF EDITOR AND DIRECTOR
KALPATHARU RESEARCH ACADEMY

KALPATHARU RESEARCH ACADEMY

INSTITUTION FOR:

* Promotion of Research-oriented studies in Veda, Vedanga, Agama, Jyothisha, Vedanta, Yoga and Ayurveda.
* Study of Sanskrit language in particular and other related languages.
* Propagation of Vedic Phonetics.
* Establishment of Veda Patashalas in Guru-kula system.
* Running of Oriental winLibraries (Prachya Granthalaya).
* Collection, Preservation and Publication of Old Manuscripts.

INTRODUCTION

This is a sequel to the first volume, which dealt with the ideology of the nine planetary deities in the Indian context. The present volume is more practical in purpose: it presents all the available texts relating to the worship of the planetary deities. Principally, it includes `Navagraha-Puja-Vidhi' (the text of which was collected and prepared for the press by Dr. S.R.N. Murthy, formerly of the Geological Survey of India), and `Graha-Yāga-Paddhati' as prevalent in South India. An illustrated account of `Sūrya-Namaskāra', a praxis of physical excercise as well as propitiation of the Sun-God, widely in practice in our country, is also appended. Included here besides the Sūrya-upanishads and stotras of the grahas, are excerpts from popular texts like **Mantra-mahodadhi,** and from rare texts like **Vaikhānasa-āgama Khilādhikāra** and **Bhṛgu-samhitā,** relating to the worship of the nava-grahas, especially of Sūrya.

I am indebted to Daivajna K.N. Somayaji for having provided me the opportunity to prepare this volume for the Kalpatharu Research Academy, Bangalore.

I acknowledge the co-operation and help rendered by Sri. H. Venkataramaiah and his sons Shri. Sheshadri and Shri. Sundaresh, of the Payonidhi Printers, in the preparation of this volume.

S.K. RAMACHANDRA RAO

NAVAGRAHA

SŪRYA (bronze)
(with other grahas)

The Commencement of the Pūjā

नवग्रहपूजासंकल्पः।।

On the auspicious day chosen, the person who undertakes to worship the nine grahas makes a solemn resolution (samkalpa) to carry out all the details of worship which are prescribed in the scriptures.

अथ संकल्पितदिवसे चंद्रताराबलान्विते यजमानः स्नात्वा वस्त्राभरणालंकारयुक्तः सभार्यया पुण्याहं वाचयित्वा नान्दीशोभनदेवतापूजां कृत्वा नक्षत्रसूक्तं पठित्वा या पूजयित्वा अनंतरं आचम्य देशकालौ संकीर्त्य 'एवंगुण विशेषण विशिष्टायां शुभतिथौ शोभने मुहूर्ते आद्यब्रह्मणः द्वितीय परार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे कलियुगे प्रथम पादे जंबुद्वीपे भरतवर्षे भरतखण्डे अस्मिन् वर्तमाने व्यवहारिके चांद्रमानेन प्रभवादि षष्ठिसंवत्सराणां मध्ये अमुक संवत्सरे अयने-ऋतौ-मासे-पक्षे-तिथौ-वासरे अस्माकं सह कुटुंबानां क्षेम स्थैर्य विजय

आयुरारोग्य ऐश्वर्यादिसिध्यर्थं समस्तमंगलावाप्त्यर्थं समस्ताभ्युदयार्थं च धर्मार्थकामप्रजाः चतुर्विधफलपुरुषार्थसिध्यर्थं विशेषेण मम शरीरे समस्तपीडापरिहारार्थं मम देहारोग्यसिध्यर्थं मम जन्मनक्षत्रपूर्वक जन्मनक्षत्रवशात् जन्मराशिवशात् नामनक्षत्रपूर्वक नामनक्षत्रवशात् नामराशिवशात् जन्मलग्नवशात् नामलग्नवशात् जन्मांशवशात् नामांशवशात् महादशाधिवशात् षड्बलवेधावशात् गोथाश्वेधावशात् त्रिविधिशास्त्रोक्त वेधावशात् कालचक्रवशात् सर्वतोभद्रचक्रवशात् अष्टकवर्गवशात् अंगग्रहवशात् भावग्रहवशात् पक्षग्रहवशात् नक्षत्रग्रहवशात् भूतग्रहवशात् भूताद्य रिक्षमहोत्पातक दुःस्वप्न दुःशकुनवशात् यो दोषः समजनि तद्दोषपरिहारार्थं आयुष्याभिवृध्यर्थं ये ये ग्रहाः शुभस्थानेषु स्थिताः तेषां अतिशयफलावाप्त्यर्थं ये ये ग्रहाः दुष्टस्थाने स्थिताः तेषां आनुकूल्यता सिध्यर्थं नक्षत्रसूक्त पठन पूर्वक आदित्यादि नवग्रहदेवतामुद्दिश्य आदित्यादिनवग्रहदेवताप्रीत्यर्थं आदित्यादिनवग्रह पूजां करिष्ये' इति संकल्पयित्वा पूजामारभति।।१।।

Āditya (bronze)

I

The Worship of Sūrya

सूर्यग्रहावाहनम्

आकृष्णेन हिरण्यस्तूपसवितात्रिष्टुप्।

हिरण्यस्तूपऋषिः सविता देवता, त्रिष्टुप् छन्दः

ॐ आकृष्णेन रजसा वर्तमानो निवेशायन्नमृतं मर्त्यं च।
हिरण्मयेन सविता रथेन देवो याति भुवनानि पश्यन्।।

अग्निदूतं मेधातिथिरग्निर्गायत्री;-

ॐ अग्निं दूतं वृणीमहे होतारं विश्ववेदसम्।
अस्य यज्ञस्य सुक्रतुम्।

सूर्यस्य अधिदेवता रुद्रावाहनम्।

कद्रुद्रायत्यस्य कण्वोरुद्रोगायत्री;-

ॐ कद्रुदाय प्रचेतसे मीळ्हुष्टमाय तव्यसे।
वोचेम शंतमं हृदे।

अथ आवाहनं।।

भगवान् सूर्यग्रहं रक्तवर्णं रक्तगंधं रक्तपुष्पं रक्तमाल्यांबरधरं रक्तच्छत्रध्वजपताकोपभिशोभितम् दिव्यरथसमारुढं मेरुं प्रदक्षिणीकुर्वाणं प्राङ्मुखं पद्मासनस्थं द्विभुजं सप्ताश्वसप्तरज्जुं कलिंगदेशधिपं काश्यपगोत्रं प्रभवसंवत्सर माघशुक्लसप्तम्यां कृत्तिका नक्षत्रे जातं सिंहराश्याधिपं भानुवारप्रयुक्तं किरीटिनं सुखासीनं पत्नीपुत्रपरिवारसमेतं ग्रहमण्डलप्रविष्टम् अस्मिन् अधिकरणमध्ये वर्तुलाकारमण्डले।

भूः सूर्यग्रहमावाहयामि।

Sūrya (Āśutosh Museum, Calcutta) (7th Century)

भुवः सूर्यग्रहमावाहयामि।
सुवः सूर्यग्रहमावाहयामि।
भूर्भुवस्सुवः सूर्यग्रहमावाहयामि।
स्थापयामि।

पूजयामि।

सूर्यस्य प्रत्याधिदेवता अग्न्यावाहनम्।

सूर्यग्रहस्य दक्षिणदिग्भागे अग्निमावाहयामि,
स्थापयामि पूजयामि।
सूर्यग्रहस्य उत्तरदिग्भागे रुद्रमावाहयामि,
स्थापयामि पूजयामि।।

आदित्यजपः

अस्य श्री सूर्यमहामंत्रस्य-हिरण्यस्तूपऋषिः।
त्रिष्टुप् छन्दः। सूर्यो देवता। घ्रीं बीजं। णीं
शक्तिः सूं कीलकम्। मम सर्वाभीष्ट फलसिध्यर्थे
सूर्यग्रहप्रसादसिध्यर्थे जपे विनियोगः।
सूर्यायागुंष्ठाभ्यां नमः हृदयायनमः।
तेजोमूर्तये तर्जनीभ्यां नमः - शिरसे स्वाहा।
वरदाय मध्यमाभ्यां नमः - शिखायै वषट्।
हंसायानामिकाभ्यां नमः - कवचाय हुं।
शांताय कनिष्ठिकाभ्यां नमः -
नेत्रत्रयाय वौषद्।
कर्मसाक्षिणे करतलकरपृष्ठाभ्यां नमः -
अस्त्राय फट्।
एवं हृदयादिषडंगन्यासः।।
भूर्भुवस्सुवरोमितिदिग्बंधः। ध्यानम्;-
द्विभुजं पद्महस्तं च वरदं मकुटान्वितम्
ध्यायेद्दिवाकरं देवं सर्वाभीष्ठप्रदायकम्।
लमित्यादि पंचोपचारपूजां कुर्यात्।।
लं पृथिव्यात्मने गंधं कल्पयामि।
हं आकाशात्मने पुष्पं कल्पयामि।
यं वाय्वात्मने धूपं आघ्रापयामि।
वं अमृतात्मने अमृतोपहारनैवेद्यं समर्पयामि।
सं सर्वोपचारपूजां समर्पयामि।।

आकृष्णेन......पश्यन्।। यथाशक्तिजपं कृत्वा पुनः अंगन्यास करन्यासं कृत्वा दिग्विमोचनम् कुर्यात्।।

सूर्यकवचम्।।

ऊँ अस्य श्री सूर्यकवचस्तोत्रमहामन्त्रस्य अगस्त्यो भगवान् ऋषिः। अनुष्टुप् छन्दः। आदित्यो देवता। श्रीं बीजं। णीं शक्तिः। सूं कीलकम्। मम आदित्यप्रसादसिध्यर्थे जपे विनियोगः।।

ध्यानं।।

जपाकुसुमसंकाशं द्विभुजं पद्महस्तकं।
सिन्दूराम्बरमाल्यं च रक्तगंधानुलेपनं।।
माणिक्यरत्नखचितसर्वभरण भूषितं।
सप्ताश्वरथवाहं तु मेरुं चैव प्रदक्षिणं।।
देवासुरवरैर्वन्द्यं घृणिभिः परिसेवितं।
ध्यायेत् पठेत् सुवर्णाभं सूर्यस्य कवचं मुदा।।
घृणिः पातु शिरोदेशे सूर्यःपातु ललटकम्
आदित्यो लोचने पातु श्रुती पातु दिवाकरः।।
घ्राणं पातु सदा भानुः मुखं पातु सदा रविः
जिह्वां पातु जगन्नेत्रः कंठं पातु विभावसुः।।
स्कन्धौ ग्रहपतिः पातु भुजौ पातु प्रभाकरः।
करावब्जकरः पातु हृदयं पातु भानमान्।।
मध्यं पातु सुसप्ताश्वो नाभिं पातु नभोमणिः।
द्वादशात्मा कटिं पातु सविता पातु सक्थिनी।।
ऊरू पातु सुरश्रेष्ठो जानुनी पातु भास्करः।
जंघे मे पातु मार्तण्डः गुल्फौ पातु त्विषांपतिः।

Sūrya, Rajshahi Museum, E. Bengal (10th Century)

पादौ दिनमणिः पातु पातु मित्रोऽखिलं वपुः।
आदित्यकवचं पुण्यं अभेद्यं वज्रसन्निभम्।
संवत्सरमुपासित्वा सांम्राज्यपदवीं लभेत्।।
ध्यानम्।।
अनेक रत्नसंयुक्तं स्वर्णमाणिक्यसन्निभम्
कल्पवृक्षसमाकीर्णं कदंबकुसुमप्रियम्।
अशेषरोगशान्त्यर्थं ध्यायेदादित्यमंडलम्।।
सिन्दूरवर्णाय सुमण्डलाय सुवर्णरत्नाभरणाय तुभ्यम्।
पद्मादिनेत्रे च सुपंकजाय ब्रह्मेन्द्रनारायणशंकराय।।
संरक्तचूर्णं ससुवर्णतोयं
सकुंकुमाभं सकुशं सपुष्पं
प्रदत्तमादाय च हेमपात्रे
प्रशस्तनादं भगवन् प्रसीद।।
इति श्री पाद्मे आदित्यकवचं संपूर्णम्।।

आदित्यस्तोत्रमन्त्रः।।

अस्य श्री भगवान् आदित्यस्तोत्रमहामन्त्रस्य। अगस्त्य ऋषिः। अनुष्टु छन्दः। सूर्यनारायणो देवता। सूं बीजं। यं शक्तिः। मं कीलकम्। मम आदित्यप्रसादसिध्यर्थ स्तोत्रपठणे विनियोगः।

आदित्यायागुष्ठाभ्यां नमः हृदयाय नमः।
अदारये तर्जनीभ्यां नमः शिरसे स्वाहा।
दिवाकराय मध्यमाभ्यां नमः शिखायै वषद्।
प्रभाकराय अनामिकाभ्यां नमः कवचाय हुं।
सहस्रकिरणाय कनिष्ठिकाभ्यां नमः नेत्रत्रयायै वौषट्।
मार्ताण्डाय करतलकरपृष्ठाभ्यां नमः अस्त्राय फट्।।
एवं हृदयादि षडंग न्यासः।।
भूर्भुवस्सुवरोमिति दिग्वन्धः।।

ध्यानम्।।

ध्यायेत्सूर्यमनन्वकोटिकिरणं तेजोमयं भास्करं
भक्तानामभयप्रदं दिनकरं ज्योतिर्मयं शंकरं
आदित्यं जगदीशमच्युतमजं त्रैलोक्यचूडामणिं
भक्ताभीष्टवरप्रदं दिनमणिं मार्ताडमाद्यं शुभं।।
कालात्मा सर्वभूतात्मा वेदात्मा विश्वतोमुखः।
जन्मंमृत्युजराव्याधिसंसारभयनाशनः।।
ब्रह्मस्वरूपमुदये मध्याह्ने तु महेश्वरः।
अस्तमाने स्वयं विष्णुः त्रयीमूतिर्दिवाकरः।।
एकचक्ररथो यस्य दिव्यः कनकभूषितः।
सोयं भवतु नः प्रीतः पद्महस्तो दिवाकरः।।
पद्महस्तपरंज्योतिस्तत्वमूर्तिर्नमो नमः।।
अण्डयोनिर्महासाक्षी आदित्याय नमो नमः।
कमलासन देवेश आदित्याय नमो नमः।
क्षयापस्मारकुष्ठादिदुर्दोषव्याधिनाशिने।।
सर्वज्वरहरं चैव कुक्षिरोगनिवारणे।
एतत् स्तोत्रं शिवप्रोक्तं सर्वसिद्धिकरं परं।
सर्वसंपत्करं चैव सर्वाभीष्टप्रदायकम्।।

Sūrya Panel from Bharatpur (11th Century)

सूर्याष्टोत्तरशतनामावलिः॥

ॐ अरुणाय नमः।
ॐ शरण्याय नमः।
ॐ करुणारससिन्धवे नमः।
ॐ असमानबलाय नमः।
ॐ आर्तरक्षकाय नमः।
ॐ आदित्याय नमः।
ॐ आदिभूताय नमः।
ॐ अखिलागमवेदिने नमः।
ॐ अच्युताय नमः।
ॐ अखिलज्ञाय नमः॥१०॥
ॐ अनंताय नमः।
ॐ इनाय नमः।
ॐ विश्वरूपाय नमः।
ॐ इज्याय नमः।
ॐ इन्द्राय नमः।
ॐ भानवे नमः।
ॐ इन्दिरामन्दिराप्ताय नमः।
ॐ वन्दनीयाय नमः।
ॐ ईशाय नमः।
ॐ सुप्रसन्नाय नमः॥२०॥
ॐ सुशीलाय नमः।
ॐ सुवर्चसे नमः।
ॐ वसुप्रदाय नमः।
ॐ वसवे नमः।
ॐ वासुदेवाय नमः।
ॐ ऊज्वलाय नमः।
ॐ उग्ररूपाय नमः।
ॐ ऊर्ध्वगाय नमः।
ॐ विवस्वते नमः।
ॐ उद्यत्किरणजालाय नमः॥३०॥
ॐ हृषीकेशाय नमः।
ॐ उर्जस्वलाय नमः।
ॐ वीराय नमः।
ॐ निर्जराय नमः।
ॐ जयाय नमः।
ॐ ऊरुद्वयभावरूपयुक्तसारथये नमः।
ॐ ऋणिबन्धाय नमः।
ॐ रुग्हन्त्रे नमः।
ॐ ऋक्षचक्रचराय नमः।
ॐ ऋजुस्वभावचित्ताय नमः॥४०॥
ॐ नित्यस्तुत्याय नमः।
ॐ ऋकारमातृकावर्णरूपाय नमः।
ॐ ऊज्वल्तेवेजसे नमः।
ॐ ऋक्षादिनाथमित्राय नमः।
ॐ पुष्कराक्षाय नमः।
ॐ लुप्तदंताय नमः।
ॐ शांताय नमः।
ॐ कांतिदाय नमः।

Sūrya-Trimūrti from Mārtaṇḍ (12th Century)

ॐ घनाय नमः।
ॐ कनत्कनकभूषाय नमः।
ॐ खद्योताय नमः।
ॐ ऊनिताखिलदैत्याय नमः।
ॐ सत्यानन्दस्वरूपिणे नमः।
ॐ अपवर्गप्रदाय नमः।
ॐ आर्तशरण्याय नमः।
ॐ एकाकिने नमः।
ॐ भगवते नमः।
ॐ सृष्टिस्थित्यन्तकारिणे नमः।
ॐ गुणात्मने नमः।
ॐ घृणिभृते नमः।।६०।।
ॐ बृहते नमः।
ॐ ब्रह्मणे नमः।
ॐ ऐश्वर्यदाय नमः।
ॐ शर्वाय नमः।
ॐ हरिदश्वाय नमः।
ॐ शौरये नमः।
ॐ दशदिक्सम्प्रकाशाय नमः।
ॐ भक्तवश्याय नमः।
ॐ ऊर्जस्कराय नमः।
ॐ जयिने नमः।।७०।।
ॐ जगदानन्दहेतवे नमः।
ॐ जन्ममृत्युजराव्याधिवर्जिताय नमः।
ॐ उच्चस्थानसमारूढरथस्थाय नमः।
ॐ असुरारये नमः।
ॐ कमनीयकराय नमः।
ॐ अब्जवल्लभाय नमः।
ॐ अंन्तर्बहिःप्रकाशाय नमः।
ॐ अचिंन्त्याय नमः।
ॐ आत्मरूपिणे नमः।
ॐ अच्युताय नमः।।८०।।
ॐ अमरेशाय नमः।
ॐ परस्मै ज्योतिषे नमः।
ॐ अहस्कराय नमः।
ॐ रवये नमः।
ॐ हरये नमः।
ॐ परमात्मने नमः।
ॐ तरुणाय नमः।
ॐ वरेण्याय नमः।
ॐ ग्रहणांपतये नमः।
ॐ भास्कराय नमः।।९०।।
ॐ आदिमध्यान्तरहिताय नमः।
ॐ सौख्यप्रदाय नमः।
ॐ सकलजगतांपतये नमः।
ॐ सूर्याय नमः।
ॐ कवये नमः।
ॐ नारायणाय नमः।
ॐ परेशाय नमः।
ॐ तेजोरूपाय नमः।
ॐ श्रीं हिरण्यगर्भाय नमः।
ॐ ह्रीं संपत्कराय नमः।।१००।।
ॐ ऐं इष्टार्थदाय नमः।
ॐ अनुप्रसन्नाय नमः।
ॐ श्रीमते नमः।
ॐ श्रेयसे नमः।
ॐ भक्तकोटिसौख्यप्रदायिने नमः।
ॐ निखिलागमवेद्याय नमः।
ॐ नित्यानन्दाय नमः।
ॐ छायाउषादेवीसमेताय नमः।।१०८।।
ॐ श्रीमते सूर्यनारायणस्वामिने नमः।
अष्टोत्तरशतनामपूजां समर्पयामि।।

Āditya, Sūrya Temple, Kumbhakāśi

III

श्री सूर्यनमस्कार पद्धतिः।।

Sūrya-namaskāra, which is very popular in the country, is a praxis of physical exercise and also propitiation to the Sun-god as the source of energy and health. It consists of twelve mantras (which are names of Sūrya), recited while assuming twelve bodily postures; the mantras follow the six seedsyllables which are variants of hrīm (signifying energy). Sūrya-namaskāra is generally done in the morning, in the open, and facing the Sun. The exercise-prayer begins with a formal 'Samkalpa', which is as follows:

यजमानः आचम्य प्राणानायम्य एवंगुण विशेषण विशिष्टायां शुभतिथौ छायासंज्ञादेवीसमेत श्री

सूर्यनारायणदेवतामुद्दिश्य श्री सूर्यनारायणदेवता प्रीत्यर्थं त्रचकल्पविधिना नमस्कारजपअर्घ्यप्रदानानि करिष्ये:-

Then the eight - syllabled mantra of Sūrya is recited (Saura-ashṭākshari) 'om ghṛṇih, Sūrya ādityom'. What follows is the sequence of mantra-upāsanā.

तदंगत्वेन आदौ सैराष्टाक्षरीमन्त्रजपं करिष्ये॥

अस्य श्री सौराष्टाक्षरीमन्त्रस्य, गायत्र्यादि सप्तछन्दांसि। ब्रह्मा ऋषिः। सूर्यो देवता। अं बीजं। ह्रीं शक्तिः। क्रों कीलकम्। छायासंज्ञा उषादेवी समेत श्री सूर्यनारायण प्रीत्यर्थे जपे विनियोगः॥

ह्रां अंगुष्ठाभ्यां नमः - हृदयाय नमः।
ह्रीं तर्जनीभ्यां नमः - शिरसे स्वाहा।
ह्रूं मध्यमाभ्यां नमः - शिखायै वषट्।
ह्रैं अनामिकाभ्यां नमः - कवचाय हुं।
ह्रौं कनिष्ठिकाभ्यां नमः - नेत्रत्रयाय वौषट्।
ह्रः करतलकरपृष्टाभ्यां नमः - अस्त्राय फट्।
ॐ भूर्भुवस्सुवरोमिति दिग्बन्धः॥

अथ ध्यानम्॥

पद्मासनः पद्मकरो द्विबाहुः
पद्मद्युतिः सप्ततुरंग वाहः।
दिवाकरो लोकगुरुः किरीटी
मयि प्रसादं विदधातु देवः॥
लं पृथिव्यात्मने गन्धं कल्पयामि।
हं आकाशात्मने पुष्पं कल्पयामि।
यं वाय्वात्मने धूपं कल्पयामि।
रं तेजस्तत्वात्मने दीपं कल्पयामि।
वं अमृतत्वात्मने अमृतोपहार नैवेद्यं कल्पयामि॥
श्री गुरुध्यानम्॥
गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुदेवो महेश्वरः।
गुरुःसाक्षात्परब्रह्म तस्मै श्री गुरवे नमः॥

The mantra which is eight-syllabled must be recited 108 times every day.

मन्त्रः॥

"ॐ घृणिःसूर्य आदित्यों"॥
एवं प्रतिदिनं अष्टाविंशत्युत्तरशतं जपं कुर्यात्।
तथा भानुवासरे सहस्र जपं कुर्यात्॥

Sūrya-gāyatri (24-syllabled)

दशांशं सूर्य गायत्री॥
ॐ भास्कराय विद्माहे महाद्युतिकराय धीमहि
तन्नो अदित्यः प्रचोदयात्॥
फल समर्पणं॥ एतत्फलं श्री छायासंज्ञासमेत श्री सूर्यनारायण गुरु ब्रह्मार्पणमस्तु॥
किञ्चित् जलं प्रणवपूर्वकं पिबेत्॥
इति मन्त्रोपासनक्रमः समाप्तः॥

कलशार्चनम्॥

Kalaśārchana

कलशार्चनं॥

संकल्प्य, गोमयेन वर्तुलमंडलं कृत्वा, हरिद्राकुंकुम श्वेत तंडुल चूर्णैः स्थंडिलं विरच्य, तदुपरि पीठं संस्थाप्य, तस्योपरि जलपूरित ताम्रकलशं संस्थाप्य, तन्मध्ये शक्ति षट्कं विलिख्य (ह्रीं-ह्रः) त्रिमूर्त्यात्मकं सूर्यं भावयेत्॥
ध्यानम्॥

Sūrya from Koṇārka (stone, 13th Century)

ध्येयःसदा सवितृ मण्डल मध्यवर्ति
नारायणः सरसिजासन सन्निविष्टः।
केयूरवान् मकरकुंण्डलवान् किरीटी
हारी हिरण्यवपुर्धृतशंखचक्रः।।
नमःसवित्रे जगदेकचक्षुषे
जगात्प्रसूति स्थितिनाशहेतवे।
त्रयीमयाय त्रिगुणात्मधारिणे
विरिञ्चि नारायण शंकरात्मने।।

The brief worship of the Sūrya yantra:

सूर्ययन्त्रार्चनम्।।

कलशस्य प्राग् भागे यन्त्रं संस्थाप्य, सौर मन्त्रेण दशवारं अभिमन्त्र्य, सप्रणव मातृकाद्यैः जीवकलां विभाव्य, पुनः सौरमंत्रेण शतवारमभिमंत्र्य लघ्वर्चनं कुर्यात्।।

यंत्रस्थ भास्कराय नमः ध्यानं समर्पयामि।
यंत्रस्थ भास्कराय नमः आवाहनं समर्पयामि।
यंत्रस्थ भास्कराय नमः आसनं समर्पयामि।
यंत्रस्थ भास्कराय नमः पाद्यं समर्पयामि।
यंत्रस्थ भास्कराय नमः अर्घ्यं समर्पयामि।
यंत्रस्थ भास्कराय नमः आचमनं समर्पयामि।
यंत्रस्थ भास्कराय नमः स्नानम् समर्पयामि।
यंत्रस्थ भास्कराय नमः वस्त्रं समर्पयामि।
यंत्रस्थ भास्कराय नमः उपवीतं समर्पयामि।
यंत्रस्थ भास्कराय नमः गंधं समर्पयामि।
यंत्रस्थ भास्कराय नमः पुष्पं समर्पयामि।
यंत्रस्थ भास्कराय नमः धूपं समर्पयामि।
यंत्रस्थ भास्कराय नमः दीपं समर्पयामि।
यंत्रस्थ भास्कराय नमः नैवेद्यं समर्पयामि।
यंत्रस्थ भास्कराय नमः ताम्बूलं समर्पयामि।
यंत्रस्थ भास्कराय नमः नीराजनं समर्पयामि।
यंत्रस्थ भास्कराय नमः मंत्रपुष्पं समर्पयामि।
यंत्रस्थ भास्कराय नमः प्रदक्षिणनमस्कारान् समर्पयामि।।

सौरमंत्रः - घृणिःसूर्यादित्यों इति।
मातृकाः अं - क्षं।
कलशस्थ जलेन अर्घ्यत्रयं दद्यात्

१. तच्चक्षुर्देवहिवं शुक्रमुच्चरेत् । पश्येम शरदश्शतम्। जीवेम शरदश्शतम्।।
ह्रां ह्रीं ह्रूँ ह्रैं ह्रौं ह्रः
ह्रः ह्रौं ह्रैं ह्रूँ ह्रीं ह्रां
मित्र रवि सूर्य भानु खग पूष
हिरण्यगर्भ मरीचि आदित्य सवितृ अर्क भास्करेभ्यो।।
नमः।। इदमर्घ्यं समर्पयामि।।

२. चक्षुर्नेदिवस्सविता चक्षुर्णउतपर्वतः।
चक्षुर्धाता दधातु नः ह्रां-ह्रूँ, मित्र-भास्करेभ्यो नमः - इदं अर्घ्यं समर्पयामि।।

३. चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः सं चेदं विच पश्येवं।। ह्रूँ- ह्रां, मित्र-भास्करेभ्यो नमः - इदं अर्घ्यं समर्पयामि।।
ततः उपस्थानं कुर्यात्।।

१. सूर्यो नो दिवस्पातु वातोऽन्तरिक्षात्। अग्निर्न पार्थिवेभ्यः।।
२. जोषा सवितर्यस्यते हरश्शतं सवाँ अर्हति। पहि नो दिद्युतः पतन्त्याः।।

एवं उपस्थाय पश्चात् नमस्कारं कुर्यात्।।

अथ ऋग्वेदीय-महासौर-सूर्यनमस्कार-मंत्रपाठः उदुत्यंजातवेदसमित्यस्य त्रयोदशर्चस्य सूक्तस्य प्रस्कण्वः सूर्यो नवाद्यागायत्र्यो अन्त्याश्चतस्त्रानुष्टुप्छन्दाः, चित्रंदेवानामितिषाड्र्चस्यसूक्तस्य आंगीरसः कुत्सः सूर्यः त्रिष्टुप्; इनद्रमितिद्वयो

Sūrya from Kolal, Kheraklana, Kabul Museum, Afghanistan

औचथ्यो दीर्घतमाः सूर्य त्रिष्टुप् ; हंसश्शुचिषदित्यस्य गौतमो वामदेवः सूर्यो जगती; यत्वेति भौमात्रिः सूर्यः अनुष्टुप्; यदद्येत्येका, उत्सूर्यइति तिस्रः उद्वेतीति चतस्रो अर्धञ्चमा एतासां मैत्रावरुणिः वसिष्ठः सूर्यः त्रिष्टुप्; उदुत्यद्दर्शतमिति ऋचस्य मैत्रावरुणिः वसिष्ठः सूर्यः आद्या बृहती द्वितीयापुरउष्णिक्; बण्महानिति द्वयोर्भार्गवो जमदग्निः सूर्यः बार्हत प्रगाथः; नमो मित्रस्येति द्वादशार्चस्य सूक्तस्य सूर्योशितपाः जगती दशामी त्रिष्टुप्; सूर्योनो इति पञ्चस्य सूर्यः चक्षुः सूर्यः गायत्री; विभ्राड् बृहदिति चतुऋचस्य सूक्तस्य अभितपाः सूर्यो सौर्यः जगती अन्त्या प्रस्तार पक्तिः; आयं गोरिति त्र्यर्चस्य सार्पराज्ञी सूर्यो गायत्री; त्रतंचेदिति त्र्यर्चस्य माधुश्चन्दसोघमर्षणे भाववृत्तमनुष्टप् श्री सवितृनारायण प्रीत्यर्थे मंत्रपठणे विनियोगः अथवा सूर्यनमस्करणे विनियोगः॥

Sūrya-Nārāyaṇa, Sūrya-Nārāyaṇa Temple, Nārāvi

RASI-CHAKRA: Twelve Astrological Signs Around The Sun

Sūrya from Rājasthān (12th Century)

सूर्यनमस्कार-मंत्रपाठः।।

उदुत्यमितित्रयोदशर्च सप्तमं सूक्तं प्रस्कण्वःसूर्यः नवाद्या गायत्र्योऽन्त्याश्चनुष्टुभः अन्त्यस्तृचो रोगघ्न उपनिषत् अन्त्योर्धर्चो द्विषघ्नः।।

उदुत्यं जातवेदसं देवं वहंन्तिकेतवः। दृशे विश्वाय सूर्यम्।। अपत्येनायवो यथा नक्षत्रा यंत्यक्तुभिः सूराय विश्वचक्षसे अदृश्रमस्य केतवो विरश्मयो जनाँ अनु। भ्रांजंतो अग्नयो यथा।। तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमाभासि रोचनं।। प्रत्यङ्देवानां विशः प्रत्यङ्देषिमानुपान् प्रत्यङ्विश्वदृशे ।। ७ ।। येनापावक चक्षसासभुरण्यन्तं जनाँ अनु त्वं वरुण पश्यसि।। विद्यामेषिरजम्पृथ्वहामिमानोः अक्तुभिः। पश्यं जन्मानि सूर्य।। सप्त त्वाहरितो रथे वहंति देव सूर्य। शोचिष्केशं विचक्षण।। अयुक्तसप्तशुं ध्युवः सूरो रथस्य नप्त्यः। ताभिर्याति स्वयुक्तिभिः।। उद्वयंतमसस्परि ज्योतिष्पश्यंत उत्तरं। देवं देवत्रा सूर्यमगन्मज्योतिरुत्तमं।। उद्यंनद्यमित्रमह आरोहन्नुत्तरं दिवं। हृद्रोगं मम सूर्य हरिमाणं च नाशय।। शुकेषु मे हरिमाणं रोपणाकासु दध्मसि। अथो हारिद्रवेषु मे हरिमाणं निदध्मसि।। उदगादयमादित्यो विश्वे न सहसा सह। द्विषंतं मह्यं रंधयन्मो अहं द्विषते रधं।।८।। इति प्रथमे मण्डले नवमोऽनुवाकः।।

चित्रं देवानामुदंगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आ प्रा द्यावापृथिवी अंतरिक्षं सूर्यं आत्मा जगंतस्तस्थुषश्च।। सूर्यो देवीमुषरोचमानां मर्यो नद्योषमभ्र्वेतिषश्चात्। यत्रा नरो देवयंतो घुगानि वितन्वतं प्रति भद्राऽअश्वांहरितः सूर्यस्य चित्राऽ एतग्वाऽअनुमाद्यासः। नमस्यंतो दिव आपृष्ठमस्थुः परि द्यावापृथिवी यंति सद्याः।। तत्सूर्यस्य देव त्वं नन्महित्वं मध्य कर्तोर्विततं सं जसार।। यदेदयुक्तहरितः सधस्थादाद्रात्रि वासस्तनुते सिमस्मै।। तस्मिन्नत्पवरुणस्याभिचक्षेसूर्यो रूपेकृणुतेद्योरुपस्थे। अनंतमन्यद्रुंदस्यपाजः कृष्णमन्यद्धरितः संभ्ररंति।। अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निखद्यात्।। तन्मो मित्रो वरुणो यामहंतामदितिः सिंधुः पृथिवी उतद्यौः।।७।। इति प्रथमे मण्डले षोडशोनुवाकः।।

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यस्ससुपर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।।२०।।

कृष्णं नियानं हरयस्सुपर्णा आपो वसाना दिवमुत्पतंति। त अववृत्रन्त्सदनादृतस्यादि धृतेन पृथिवी व्युद्यते।।२१।।

हंसश्शुचिषद्वसुरन्तरिक्षसत् होता वेदिषदतिथि र्दुरोणसत्। नृषद्वरसदृत सद्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम्।।

यत्वा सूर्य स्वर्भानुस्तमसा विध्यदासुरः। अक्षेत्र विद्यथा मुग्धो भुवनान्यधीदयुः।।२३।।

यदद्य सूर्य ब्रवो नागा उद्यनिनत्राय वरुणाय सत्यम्। वयं देवत्राऽदिते स्याम तव प्रियासो अर्यमन्गृणन्तः।।२४।।

उत्सूर्यो बृहद चींष्यश्रोतपुरु विश्वा जनिम मानुषाणाम्। समो दिवा ददृशे रोचमानः क्रत्वाकृत सुकृतः कर्तुभिर्भूत्।।२५।।

स सूर्य प्रति पुरो न उद्गा एभिस्तोमेभिरेतशेभिरेवैः। प्र णो मित्राय वरुणाय वोचो नागसो अर्यम्णे अग्नये च।।२६।।

वि नस्सहस्रं शुरुधो रदन्त्वृतावानो वरुणो मित्रो अग्निः। यच्छन्तु चंद्रा उपमंनो अर्कमानः कामं पूपुरन्तु स्तवानाः।।२७।।

उद्वेति सुभगो विश्वचक्षास्साधारणस्सूर्यो मानुषाणाम्। चक्षुर्मित्रस्य वरुणस्य देवश्चर्मेब यस्समविव्यक्तमांसि।।२८।।

उद्वेति प्रसवीता जननां महान्केतुरर्णवस्सूर्यस्य। समानं चक्रं पर्याविवृत्सन्यदेतशो वहति धूर्षुयुक्तः।।२९।।

विभ्राजमान उषसामुपस्थाद्रभैरुदेत्य नुमद्यमानः। ऐष मे देवस्सविता चच्छन्द यस्स मानं न प्रमिनति धाम।।३०।।

दिवो रुक्म उरुचक्षा उदेति द्रे अर्थस्तरणिर्भ्रा जमानः। नूनं जनास्सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि।।३१।।

यत्रा चक्रुरमृता गातं मस्मैश्र्येनो न दियन्नन्वे तिपाथः।।३२।।

उदुत्यद्दर्षतं वपुर्दिव एति प्रतिह्वरे। यदी माशुर्वहति देव एतशो विश्वस्मै चक्षसे अरम्।।३३।।

शीर्ष्णश्शीर्ष्णो जगतस्तस्थुषस्पतिं समया विश्वमारजः। सप्तस्वसारसुविताय सूर्यं वहन्ति हरितो रथे।।३४।।

तच्चक्षुर्देवहितं शुक्रमुच्चरत्। पश्येम शरदश्शतम् जिवेम शरदश्शतम्।।३५।।

बण्महाँ असि सूर्य बळादित्यस्य महाँ असि। महस्ते सतो महिमापनस्यतेऽद्धादेव महाँ असि।।

बट् सूर्यश्रवसामहाँ असि सत्रा देव महाँ असि। मन्हा देवानामसूर्यः पुरोहितो विभु ज्योति रदाभ्यम्।।३७।।

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत। दूतेदृशे देवजाताय केतवे दिवसुत्राय सूर्याय शंसत।।३८।।

सामासत्योक्तिः परिपातु विश्वतो द्यावा च यत्र ततनन्नहानि च। विश्वमन्यं निविशते यदेजति विश्वाहाऽऽपो विश्वापोदेति सूर्यः।।३९।।

न ते अदेवः प्रदिनो निवासतेयदेतशेभिः पतरै रथर्यसि। प्राचीनमन्यदनुवर्तते रज उदन्येन ज्योतिषा यासि सूर्य।।४०।।

येन सूर्य ज्योतिषा बाधसे तमो जगच्च विश्व मुदियर्षि भानुना। तेनास्माद्विश्वामनिरामनाहुति मपामीवा मप दुष्वप्न्यं सुव।।४१।।

स्वधा अनु। यदद्यत्वा सूर्योप्रब्रवामहे तन्नो देवा अनमंसीरत क्रतुम्।।४२।।

तन्ना द्यायावापृथिवी तन्नाऽआप इन्द्र श्रुण्वन्त मरुतो हवं वचः। मा शूने भूम सूर्यस्य संदृशि भद्रं जीवंतो जरणामशीमहि।।४३।।

विश्वाहा त्वा सुमनसस्सुचक्षसः प्रजावंतो अनमीवा अनागसः। उद्यन्तं त्वा मित्रमहो दिवेदिवे जोग्जीवाः प्रति पश्येम सूर्य।।४४।।

महि ज्योतिर्बिभ्रतं त्वा विचक्षण भास्वंतं चक्षुषे चक्षुषे मयः । आरोहन्तं बृहतः पाजसस्परिवयं जीवाः प्रति पश्येम सूर्य।।४५।।

यस्य ते विश्वा भुवनानि केतुना प्रचीरते नि च विशन्ते अक्तुभिः। अनागास्त्वेन हरिकेशा सूर्यान्हाऽन्हा नो वस्यसा वस्यसो दिहि।।४७।।

शं नो भव चक्षसा शं नो अन्हा शं भानुना शं हि मा शं घृणेव। यथा शमध्वं जमसत् दुरोणे तत्सूर्य द्रविणं धेहि चित्रम्।।४७।।

अस्माकं देवा उभयाय जन्मने शर्म यच्छतद्विपदे चतुष्पदे। अदत्पिब दूर्जयमानमाशितं तदस्मे शं यो ररपो दधातन।।४८।।

यद्वो देवाश्चक्रम जिह्वया गुरु मनसो वा प्रयुती देवाहेळनम्। अरावा योनो अभिदुच्चुनायते तस्मिन्यदेनो वसवो निधेत नः।।४९।।

सूर्यो नोदिवस्पातु वातो अन्तरिक्षात्।
अग्निर्न पार्थिवेभ्यः।।५०।।

जोषा सवितर्यस्य ते हरश्शतं सवाँ अर्हति।
पाहि नो विद्युतः पतन्त्याः।।५१।।

चक्षुर्नो देवस्सविता चक्षुर्न उत पर्वतः
चक्षुर्धाता दधातु नः।।५२।।

चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः।
सं चेदं वि च पश्येम।।५३।।

विभ्राडब्रहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञफता वविहुतं। वातजूतो यो अभिरक्षतित्मना प्रजाः पुपोष पुरुधा विराजति।।५५।।

संसंश्दृशं त्वा वयं प्रति पश्येम सूर्य वि पश्येवं नृचक्षसः।।५४।।

विभ्राड्ब्रहत्सुभृतं वाजसातमं धर्मन्हिपो धरुणे सत्यमर्पितम्। अमित्रहा वृत्रहा वस्युहं तमंज्योति र्जज्ञे असुरहा सपत्सहा।।५६।।

इदं श्रोष्ठं ज्योतिषां ज्योतिरत्तमम् विष्वजिद् धनजिद् उच्चते बृहत्। विश्वभ्राड् भ्राजो महिसूयोदृश उरु पप्रदे सह ऊजो अच्युतम्।।५७।।

विभ्राजं ज्योतिषां स्वरगच्छो रोचनं दिवः।
येनेमा विश्वा भुवनान्याभृता विश्वकर्मणा विश्वदेव्यावत।।५८।।

आयं गौः पृष्णीरक्रमीदसदन्मातरं पुरः।
पितरं च प्रयन्त्स्वः।।५९।।

अन्तश्चरति रोचनाऽस्य प्राणादेपानती।
व्यस्व्यन्महिषो दिवम्।।६०।।

त्रिंशद्धाम विराजति वाक्पतंगाय धीयते।
प्रति वस्तो रह द्युभिः।।६१।।

ऋतं चासत्यं चाभी ध्दात्तपसोऽध्य जायत।
ततो रात्र्यजायत ततस्समुद्रो अर्णवः॥६२॥

समुद्रादर्णवादधि संवत्सरो अजायत अहो रात्राणि विदधाद्विश्वस्यमिषतो वशी॥६३॥

सूर्या चंद्रमसो धाता यथापूर्वमकल्पयत् दिवं। च पृथिवीं चांतरिक्षमथो स्वः॥६४॥

सविता पश्चतात्सविता पुरस्तात्सवितोत्तरात्तात्सविता धरात्तात्। सविता नस्सुवतु सर्वतातिं सविता नो रासतां दीर्धमायुः॥६५॥

इति ऋग्वेदीयमहासौरमंत्रपाठस्समाप्तः॥

अरुणनमस्कारः॥

विनता तनयो देवः कर्मसाक्षी सुरेश्वरः।
सप्ताश्वस्सप्तरज्जुश्च अरुणो मे प्रसीदतु॥
ॐ कर्मसाक्षिणे अरुणाय नमस्कारान् समर्पयामि॥
अनेन सूर्यनमस्कारात्मककर्मणा भगवान् सवितृ सूर्यनारायणः प्रीयताम् ॐ तत्सत्॥

तीर्थग्रहणम्॥

अकालमृत्युहरणं सर्वपापप्रणाशनम्।
सूर्यपादोदकं तीर्थं जठरे धारयाम्यहम्॥
एवं नियमेन संवत्सरं चरेत स पूतो भवेत्।
अभीष्ठान् लभते। सर्वपापेभ्यो विमुक्तो भवति॥

श्लोकरूप-लघु-सूर्यनमस्कारम्॥

प्रतिदिनं प्रातः महागणपतिं पूजयित्वा सुवर्णपात्रे श्री सूर्यनारायणप्रतिमां निधाय, षोडशोपचारैः संपूज्य, क्षीगन्नं पायसं वा निवेद्य, नमस्काराणि कुर्यात्॥

जन्मांतरकृतैर्दोषैः शरीरे मे समुत्थिताम्।
व्याधिं विनाशय क्षिप्रं भास्कराय नमोनमः॥१॥
श्री भास्कराय नमः नमस्कारं समर्पयामि॥

ज्वरपीडासमुद्भूत देहपीडानिवृत्तये।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥२॥

अपस्मारगदोपेत देहपीडानिवृत्तये।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥३॥

क्षयव्याधिसमाक्रान्तं देहचिंतानिपीडितः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥४॥

कुष्ठपीडापरिक्षीणशरीरव्याधि बाधितः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥५॥

जलोदरगदाक्रान्त नितांतक्लिन्नमानसः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥६॥

पंडुरोगसमाक्रान्त शुष्कीभूतशरीरिणः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥७॥

मारीमशूचीप्रभृति सर्वरोगनिवृत्तये।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥८॥

रणव्यधिमहापीडानितांतक्लिन्नमानसः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥९॥

वातोष्णपैत्यप्रभृति व्याधिबाधानिपीडितः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥१०॥

संतानहीनचिंताया नितांतक्लिन्नमानसः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥११॥

सर्वसंपत्प्रदानाय समृध्दोसि तरूत्तम।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥१२॥

सर्वयज्ञक्रियारंभ साधनोसि महातरो।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥१३॥

ब्रह्मविष्णुस्वरूपोसि सर्वदेवमयोत्यसि।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥१४॥

ऋग्यजुरूसामरुपोसि सर्वशास्त्रमयोद्यसि।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥१५॥

पिशाचादिमहाभूतसदापीडितमानसः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥१६॥

ब्रह्मराक्षसपीडादि दूरीकरणशक्तिमान्।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥१७॥

सर्वतीर्थमयो वृक्ष अश्वत्थ इति चस्मृतः
श्री भास्कराय नमः नमस्कारं समर्पयामि॥१८॥

परंप्रयोगजातायाः पीडायाक्लिन्नमानसः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥१९॥

सर्वामयनिवृत्यै त्वं समर्थोऽसि तरूत्तम।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥१८॥

दुःस्स्वप्नदुर्निमित्तादि दोषसंघनिवृत्तये।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥२१॥

भवार्णव निमग्नस्य समुध्दरणशक्तिमान्।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥२२॥

पापानल प्रदग्धस्य शांत्यै विपुलवारिदः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥२३॥

गवां कोटिप्रदानेन यत्फलं लभते जनः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥२४॥

सर्वव्रतविधानाच्च सर्वदेवाभिपूजनात्।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥२५॥

सुमंगलीत्वसौभाग्य सौशील्यादिगुणाप्तये।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥२६॥

हृदये मे यद्यदिष्टं तत्सर्वं सफलं कुरु।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥२७॥

दिवाकर नमस्तुभ्यं पापाज्ञानप्रणाशन।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥२८॥

नारायण परंज्योतिरात्मा नारायणः परः।
नारायण परो देवो धाता नारायणः परः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥२९॥

नारायण परंब्रह्म नारायण नमोस्तु ते।
नारायण परं ध्याता नारायण नमोस्तु ते।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥३०॥

नारायण परं धाम ध्यानं नारायण परः।
नारायण परो धर्मो नारयण नमोस्तुते।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥३१॥

नारायण परो देवो विद्या नारायण परः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥३२॥

विश्वं नारायणस्साक्षात् नारायण नमोस्तुते।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥३३॥

नारायणाद्विधिर्जातो जातो नारायणाद् भवः।
जातो नारायणादिन्द्रो नारायण नमोस्तुते।

श्री भास्कराय नमः नमस्कारं समर्पयामि॥३३॥

रविर्नारायणस्तेजः चंद्रो नारायणो महान्।
वन्हिर्नारारणस्साक्षात् नारायण नमोस्तुते।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥३४॥

नारायण परो बोधो नारायण नमोऽस्तुते
नारायण फलं मुख्यं सिद्धिर्नारायण परः।
हरिर्नारायणश्शुद्धिः नारायण नमोऽस्तुते।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥३६॥

निरावेदितानन्तकल्याणगुणवारिधे।
नारायण नमस्तेस्तु नरकार्णवतारक।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥३७॥

जन्ममृत्युजराव्याधिपारतत्र्यादिभिस्सदा।
दोषैरस्पृष्टरुपाय नारायण नमोऽस्तुते।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥३८॥

वेदशास्त्रार्थविज्ञानसाध्यभक्तैकगोचर।
नारायण नमस्तेऽस्तु मामुध्दर भवार्णवात्।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥३९॥

नित्यानन्दमहोदार परात्पर जगत्पते
नारायण नमस्तेऽस्तु मोक्षसाम्राज्यदायिने।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥४०॥

आब्रहस्तंबपर्यन्तं अखिलात्ममहाश्रय।
सर्वभूतात्म भूतात्मान् नारायण नमोऽस्तुते।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥४१॥

पालिताशेषलोकाय पुण्यश्रवणकीर्तन।
नारायण नमस्तेऽस्तु प्रळयोदकशयिने।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥४२॥

निरस्तसर्वदोषाय भक्त्यादिगुणदायिने।
नारायण नमस्तेऽस्तु त्वां विना नहि मे गतिः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥४३॥

धर्मार्थकाममोक्षाख्यपुरुषार्थ प्रदायिने।
नारायण नमऽस्ते स्तु पुनस्तेस्तु नमोनमः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥४४॥

आदित्यस्सवितासूर्यः खग पूषा गभस्तिमान्
सुपर्णस्तपनो भानुः हिरण्यरेता दिवाकरः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥४५॥

हरिदश्वस्सहस्त्रार्चिः सप्तसप्तिर्मरीचिमान्।
तिमिरोन्मथनश्शंभुः त्वष्टा मार्तांड अंशुमान्।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥४६॥

हिरण्यगर्भः शिशिरः तपनो भास्करो रविः।
अग्निगर्भो अदितेः पुत्रः शंखश्शिशिरनाशनः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥४७॥

व्योमनाथस्तमोभेदि ऋग्यजुस्सामपारगः।
घनवृष्टिरपांमित्रो विन्ध्यवीथी प्लवंगमः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥४८॥

आतपी मंडली मृत्युः पिंगळस्सर्वतापनः।
कविर्विश्वो महातेजा रक्तस्सर्वभवोद्भवः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥४९॥

नक्षत्रग्रहताराणं अधिपो विश्वभावनः।
तेजसामपि तेजस्वी द्वादशात्मन्नमोऽस्तुते।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥५०॥

नमः पूर्वाय गिरये पश्चिमो गिरये नमः।
ज्योतिर्गणानां पतये दिनाधिपतये नमः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥५१॥

जयाय जयभद्राय हर्यश्वाय नमोनमः।
नमो नमस्सहस्रांशो आदित्याय नमोनमः।
श्री भास्कराय नमः नमस्कारं समर्पयामि॥५३॥

ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः॥
श्री भास्कराय नमः नमस्कारं समर्पयामि॥५४॥
एतानेन पुनर्वारं पठित्वा च प्रदक्षिणं।
कुर्याच्चेत् भक्तिसहितो ह्यष्टोत्तरशतं भवेत्॥
ॐ तत्सत्॥

आदित्यहृदयम्॥

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम्।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम्॥१॥
दैवतैश्च समागम्य द्रष्टुमित्यागतो रणम्।
उपागम्याब्रवीद्राममगस्त्यो भगवानृषिः॥२॥

रांम राम महाबाहो श्रुणु गुह्यं सनातनम्।
येन सर्वानरीन् वत्स समरे विजयिष्यसि॥३॥

आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम्।
जयावहं जपेन्नित्यमक्षय्यं परमं शिवम्॥४॥

सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम्।
चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम्॥५॥

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम्।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम्॥६॥

सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः।
एष देवासुरगणाँल्लोकान् पाति गभस्तिभिः॥७॥

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः।
महेन्द्रो धनदः कालो यमः सोमो ह्यपांपतिः॥
पितरो वसवः सन्ध्या ह्यश्विनौ मरुतो मनुः।
वायुर्वह्निः प्रजाप्राण ऋतुकर्ता प्रभाकरः॥९॥

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान्।
सुवर्णसदृशो भानुः स्वर्णरिता दिवाकरः॥
हरिदश्व सहस्रार्चिः सप्तसप्तिर्मरीचिमान्।
तिमिरोन्मथनः शंभुस्त्वष्टा मार्ताण्ड अंशुमान्॥११॥

हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः।
अग्निगर्भोदितेः पुत्रः शङ्खः शिशिरनाशनः॥१२॥

व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः।
घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवङ्गमः॥१३॥

आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः।
कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः॥१४॥

नक्षत्रग्रहताराणामधिपो विश्वभावनः।
तेजसामपि तेजस्वी द्वादशात्मन्नमोऽस्तु ते॥१५॥

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः।
ज्योतिर्गणानां पतये दिनाधिपतये नमः॥१६॥

जयाय जयभद्राय हर्यश्वाय नमो नमः।
नमो नमः सहस्रांशो आदित्याय नमो नमः॥१७॥

नम उग्राय वीराय सारङ्गाय नमो नमः।
नमः पद्मप्रबोधाय मार्ताण्डाय नमो नमः॥१८॥

ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः॥१९॥

तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः॥२०॥

तप्तचामीकराभाय वह्नये विश्वकर्मणे।
नमस्तमोऽभिनिघ्नाय रवये लोकसाक्षिणे॥२१॥

नाशयत्येष वै भूतं तदेव सृजति प्रभुः।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः॥२२॥

एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः।
एष एवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम्॥२३॥

वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च।
यानि कृत्यानि लोकेषु सर्व एष रवि प्रभुः॥२४॥

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च।
कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव॥२५॥

पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम्।
एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि॥२६॥

अस्मिन् क्षणे महाबाहो रावणं त्वं वधिष्यसि।
एवमुक्त्वा तदागस्त्यो जगाम च यथागतम्॥२७॥

एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा।
धारयामास सुप्रीतो राघवः प्रयतात्मवान्॥२८॥

अदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान्।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान्॥२९॥

रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत्।
सर्वयत्नेन महता वधे तस्य धृतोभवत्॥३०॥

अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं
प्रहृष्यमाणः।
निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो
वचस्त्वरेति॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशतिसहस्त्रिकायां संहितायाम् युद्धकाण्डे आदित्यहृदयं नाम सप्तोत्तरशततमः सर्गः॥

II
Worship of Chandra
चंद्रग्रहावाहनम्॥

आप्यायस्व गौतमस्सोमा गायत्री

गौतम ऋषिः सोमो देवता गायत्री छन्दः-

ॐ आप्यायस्व समेतु ते विश्वतस्सोम वृष्ण्यम। भवा वाजस्य संगथे॥

अप्सुमे सिंधुद्वीप आपो गयत्रीः-

ॐ अप्सुमे सोमो अब्रवीत् अन्तर्विश्वानि भेषजा। अग्निं च विश्वशंभुवम्॥

गौरीर्मिमाय दीर्घतम उमा जगतीः-

ॐ गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी। अष्टापदी नवपदी बभूवुषी सहस्त्राक्षरा परमे व्योमन्॥

भगवान् चंद्रग्रहं श्वेतवर्णं श्वेतगंधं श्वेतपुष्पं श्वेतमाल्यांबरधरं श्वेतच्छत्र ध्वज रथपताकाभिशोभितं दिव्यरथसमारूढं मेरुं प्रदक्षिणीकुर्वाणं दशाश्वरथवाहनं

प्रत्यङ्मुखं द्विभुजं दंडधरं यामुनदेशाधिपं आत्रेयगोत्रं सौम्यसंवत्सरे कार्तीकमासे शुक्लपक्षे दश म्यां उत्तराभाद्रानक्षत्रे जातं कर्कटकराश्याधिपतिं इन्दुवासर प्रयुक्तं किरीटिनं सुखासीनं पत्नीपुत्रपरिवार समेतं ग्रहमंडलं प्रविष्टम् अस्मिन्नाधिकरणमध्ये सूर्यग्रहस्य आग्नेयदिग्भागे चतुरस्त्रमंडले

भूः चंद्रग्रहमावाहयामि

भुवः चंद्रग्रहमावाहयामि

सुवः चंद्रग्रहमावाहयामि

भूर्भुवस्सुवः चंद्रग्रहमावाहयामि स्थापयामि पूजयामि।

चंद्रग्रहस्य दक्षिणदिग्भागे आपो देवतां आवाहयामि स्थापयामि पूजयामि। चंद्रग्रहस्य उत्तर दिग्भागे गौरीमावाहयामि स्थापयामि पूजयामि।।

चन्द्र जपम्।।

अस्य श्री चन्द्रमहामंत्रस्य गौतम ऋषिः गायत्री छन्दः। सोमो देवता।। सां बीजं। सीं शक्तिः। सूं कीलकं।। मम सर्वाभीष्टफलसिध्यर्थे सोमग्रहप्रसादसिध्यर्थे जपे विनियोगः-

सोमायांगुष्ठाभ्यां नमः हृदयायनमः निशाकराय तर्जिनीभ्यां नमः शिरसे स्वाहा।

क्षींरोदार्णव संभवाय मध्यमाभ्यां नमः- शिखायै वषट्।

लक्ष्मीसहोदराय अनमिकाभ्यं नमः कवचाय हुँ नारकेशाय कनिष्ठकाभ्यां नमः। नेत्रत्रयाय वौषट् सुधामूर्तये करतलकरपृष्ठाभ्यां नमः। अस्त्राय फट् एवं हृदयादि षडंगन्यासः। भूर्भुवस्सुवरोमिति दिग्बन्धः।।

ध्यानम्।।

गदाधरधरं देवं श्वेतवर्णं निशकरं।
ध्यायेदमृतसंभूतं सर्वकामफलप्रदं।।
लमित्यदि पंचोपचार पूजां कुर्यात्।।

चन्द्र कवचम्।।

अस्य श्रीचन्द्रकवचस्तोत्रमहामन्त्रस्य।

गौतमऋषिः। गायत्री छन्दः। सोमो देवता। रं बीजं। सं शक्तिः। ॐ कीलकं। मम सोम ग्रह प्रसाद सिध्यर्थे जपे विनियोगः।

वां अंगुष्ठाभ्यां नमः हृदयायनमः।
बीं तर्जिनीभ्यां नमः शिरसे स्वाहा।
वूं मध्यमाभ्यां नमः शिखायै वषट्।
वैं अनामिकाभ्यां नमः कवचाय हुं।
वौं कनिष्टिकाभ्यां नमः नेत्रत्रयाय वौषट्।
वः- करतलकरपृष्ठाभ्यां नमः अस्त्रााय फट्।
एवं हृदयादि षडंग न्यासः। भूर्भुवस्सुवरों
इति दिग्बन्धः।

ध्यानम्।।

सोमं द्विभुजपद्मं च शुक्लांबरधरं शुभं।
श्वेतगंधानुलेपं च मुक्ताभरणभूषितं।।
श्वेताश्वरथमारुढं मेरुं चैव प्रदक्षिणं।
सोमं चतुर्भुजं देवं केयूरमकुटोज्वलं।।

वासुदेवस्य नयनं शंकरस्य च भूषणं।
एवं ध्यात्वा जपेन्नित्यं चंद्रस्य कवचं मुदा।।
शशी पातु शिरोदेशे फालं पातु कलानिधिः।
चक्षुषी चंद्रमा पातु मुखं कुमुदबान्धवः।।

सोमःकरौ तु मे पातु स्कन्धौ पातु सुधात्मकः।
ऊरु मैत्रीनिधिःपातु उरः पातु शशधरः।।

मृगांको जानुनी पातु जंघे पात्वमृताब्धिजः।
पादौ हिमकरः पातु चन्द्रोऽ खिलं वपुः।।

एतद्धिह कवचं पुण्यं भुक्तिमुक्तिप्रदायकं
यः पठेत् श्रुणुयात् वापि सर्वत्र विजयीभवेत्।।

इति ब्रह्मकैवर्तमहापुराणे दक्षिण खंडे चंद्रकवचः संपूर्णम्।

चन्द्रस्तोत्रम्।।

अस्य श्रीचन्द्रस्तोत्रमहामन्त्रस्य। गौतम ऋषिः। चंद्रो देवता। चंद्रग्रह प्रसादसिध्यर्थे जपे विनियोगः;-

मं अंगुष्टाभ्यां नमः हृदयाय नमः।
वीं तर्जिनीभ्यां नमः शिरसे स्वाहा।
वूं मध्यमाभ्यां नमः शिखायै वषट्।
वैं अनामिकाभ्यां नमः कवचाय हुं।
वौं कनिष्ठिकाभ्यां नमः नेत्रत्रयाय वौषट्।
वः करतलकरपृष्ठाभ्यां नमः अस्त्राय फट्।
भूर्भुवस्सुवरोमिति दिग्वन्धः।

ध्यानं श्वेताश्वयुक्तरथगं सुरसेवितांघ्रिं।।
दोर्भ्यां धृताभयगदं वरदं सुधांशुं।
श्रीवत्समौक्तिकधरं प्रणमामि चन्द्रम्।।

आग्नेयभागे सरथो दशाश्वः।
आत्रेयजो यामुनदेशगश्च प्रत्यङ्मुखस्थः चतुरश्रपीठे
गदादरांगो वर रोहिणीशः।।

चंद्रं चतुर्भुजंदेवं केयूरमकुटोज्वलं
वासुदेवस्य नमनं शंकरस्य च भूषणं।।

चन्द्रं च द्विभुजं सेयं श्वेतवस्त्रधरं विभुं।
श्वेतमाल्यांबरधरं श्वेतगन्धानुलेपनं।।
श्वेतछत्रधरं देवं सर्वाभरणभूषितं।
एतत् स्तोत्रं पठित्वा तु सर्वसंपत्करं शुभं।।

क्षयापस्मारकुष्ठादि तापज्वरनिवारणं।
इदं निशाकरस्तोत्रं य पठेत्सततं नरः।।

उपद्रवात्प्रमुच्येत नात्र कार्या विचारणा।
इति श्री ब्रह्मांडपुराणे उमामहेश्वरसंवादे दक्षिण खंडे चंद्रस्तोत्रं संपूर्णम्।।

चन्द्राष्टोत्तरशतनामावलिः

ॐ श्रीमते नमः।
ॐ शशधराय नमः।
ॐ चंद्राय नमः।
ॐ ताराधीशाय नमः।
ॐ निशाकराय नमः।
ॐ सुधानिधये नमः।
ॐ सदाराध्याय नमः।
ॐ सत्पतये नमः।
ॐ साधुपूजिताय नमः।
ॐ जितेन्द्रियाय नमः॥१०॥

ॐ जयोद्योगाय नमः।
ॐ ज्योतिश्चक्रप्रवर्तकाय नमः।
ॐ विकर्तनानुजाय नमः।
ॐ वीराय नमः।
ॐ विश्वेशाय नमः।
ॐ विदुषांपतये नमः।
ॐ दोषाकराय नमः।
ॐ दुष्टदूराय नमः।
ॐ पुष्टिमते नमः।
ॐ शिष्टपालकाय नमः॥२०॥

ॐ अष्टमूर्तिप्रियाय नमः।
ॐ अनंताय नमः।
ॐ कष्टदारुकुठाराय नमः।
ॐ स्वप्रकाशाय नमः।
ॐ प्रकाशत्मने नमः।
ॐ द्युचराय नमः।
ॐ देवभोजनाय नमः।
ॐ कलाधराय नमः।
ॐ कालहेतवे नमः।
ॐ कामकृते नमः॥३०॥

ॐ कामदायकाय नमः।
ॐ मृत्युसंहारकाय नमः।
ॐ अमर्त्याय नमः।
ॐ नित्यानुष्ठानदाय नमः।
ॐ क्षपाकाराय नमः।
ॐ क्षीणपापाय नमः।
ॐ क्षयवृद्धिसमन्विताय नमः।
ॐ जैवात्तकाय नमः।
ॐ शुचये नमः।
ॐ शुभ्राय नमः॥४०॥

ॐ जयिने नमः।
ॐ जयफलप्रदाय नमः।
ॐ सुधामयाय नमः।
ॐ सुरस्वामिने नमः।
ॐ भुक्तिदाय नमः।
ॐ भद्राय नमः।
ॐ भक्तानामिष्टदायकाय नमः।
ॐ भक्तदारिद्रभंजनाय नमः।

ॐ सामगानप्रियाय नमः।
ॐ सर्वरक्षकाय नमः॥५०॥
ॐ सगरोद्भवाय नमः।
ॐ भयांतकृते नमः।
ॐ भवितगम्याय नमः।
ॐ भवबन्धविमोचकाय नमः।
ॐ जगत्प्रकाशकिरणाय नमः।
ॐ जगदानन्दकारणाय नमः।
ॐ निःसपत्नाय नमः।
ॐ निराहाराय नमः।
ॐ निर्विकाराय नमः।
ॐ निरामयाय नमः॥६०॥
ॐ भूछायाच्छादिताय नमः।
ॐ भव्याय नमः।
ॐ भुवनप्रतिपालकाय नमः।
ॐ सकलार्तिहराय नमः।
ॐ सौम्यजनकाय नमः।
ॐ साधुवंदिताय नमः।
ॐ सर्वागमज्ञाय नमः।
ॐ सर्वज्ञाय नमः।
ॐ सनकादिमुनिस्तुताय नमः।
ॐ सितछत्रध्वजोपेताय नमः॥७०॥
ॐ सितांगाय नमः।
ॐ श्वेतमास्यांबरधराय नमः।
ॐ सितभूषणाय नमः।
ॐ श्वेतगंधानुलेपनाय नमः।
ॐ दशाश्वरथसंरुढाय नमः।
ॐ दण्डपाणये नमः।
ॐ धनुर्धराय नमः।
ॐ कुंदपुष्पोज्वलाकाराय नमः।
ॐ नयनाब्जसमुद्भवाय नमः।
ॐ आत्रेयगोत्रजाय नमः॥८०॥
ॐ अत्यंतविनयाय नमः।
ॐ प्रियदायकाय नमः।
ॐ करुणारससंपूर्णाय नमः।
ॐ कर्कटकप्रभवे नमः।
ॐ चतुरस्त्रासमारूढाय नमः।
ॐ अव्ययाय नमः।
ॐ चतुराय नमः।
ॐ दिव्यवाहनाय नमः।
ॐ विवस्वन्मंडलाज्ञेयवासाय नमः।
ॐ वसुसमृद्धिदाय नमः॥९०॥
ॐ महेश्वरप्रियाय नमः।
ॐ दान्ताय नमः।
ॐ मेरूगोत्रप्रदक्षिणाय नमः।
ॐ ग्रहमंडलमध्यस्थाय नमः।
ॐ ग्रसितार्काय नमः।
ॐ द्विजराजाय नमः।
ॐ द्युतिलकाय नमः।
ॐ द्विभुजाय नमः।
ॐ द्विजपूजिताय नमः।
ॐ औदुंबरनगावासाय नमः॥१००॥
ॐ उदाराय नमः।
ॐ रोहिणीपतये नमः।
ॐ नित्योदयाय नमः।
ॐ मुनिस्तुताय नमः।
ॐ नित्यानन्दफलप्रदाय नमः।
ॐ सकलाह्लादनकराय नमः।
ॐ पलाशसमिधप्रियाय नमः।
ॐ श्री चन्द्रमसे नमः॥१०८॥

इति श्री चंद्राष्टोत्तरशतनामावलिः॥

III

WORSHIP OF ANGĀRAKA

अङ्गारकग्रहावाहनम्।।

अग्निर्मूर्धाविरूपो अंगारको गायत्री।
विरूपऋषिः। अंगारको देवता। गायत्री छन्दः।।

ॐ अग्निर्मूर्धा दिवः ककुत्पातिः पृथिव्या अयम्।

अपां रेतांसि जिन्वति।।

स्योना मेधातिथिर्भूमिर्गायत्री।

ॐ स्योना पृथिविभवानृक्षरा निवेशनी।
यच्छा नः शर्म सप्रथाः।।
कुमारं माता स्कन्दस्कन्दस्त्रिष्टुप्।

ॐ कुमारं माता युवतिस्समुब्धं गुहा बिभर्ति न ददाति पित्रे। अनीकमस्य नमि नज्जनासः पुरः पश्यंति निहित मरूतो।।

भगवान् अंगारकग्रहं रक्तवर्णं रक्तगंधं रक्त पुष्पं रक्तमाल्यांबरधरं रक्तछत्रध्वजपताकाभिशोभितं दिव्यरथसमारूढं मेरुं प्रदक्षिणीकुर्वणं मेषवाहनं दक्षिणाभिमुखं चतुर्भुजं गदाशूलशक्तिधरं अवंति देशाधिपं भारद्वाजगोत्रं राक्षससंवत्सरस्य आषाढ कृष्णचतुर्दश्यां मृगशिरानक्षत्रे जातं मेष-वृश्चिक राश्याधिपतिं भौमवासरप्रयुक्तं किरीटिनं सुखासीनं पत्नीपुत्रपरिवारसमेतं ग्रहमंडले प्रविष्ठं अस्मिन्नधिकरणे सूर्यग्रहस्य दक्षिणदिग्भागे त्रिकोणाकार मंडले।

भूः अंगारक ग्रहमावाहयामि।
भुवः अंगारक ग्रहमावाहयामि।
सुवः अंगारक ग्रहमावाहयामि।
भूर्भुवस्सुवः अंगारक ग्रहमावाहयामि।
स्थापयामि।
पूजयामि।।

अंगारक ग्रहस्य दक्षिणदिग्भागे भूमिं आवाहयामि स्थापयामि पूजयामि। अंगारक ग्रहस्य उत्तर दिग्भागे कुमारं आवाहयामि स्थापयामि पूजयामि।।

अंगारकजपम्।।

अस्य श्री अंगारकमहामन्त्रस्य। विरूपाक्ष ऋषिः। गायत्री छन्दः। अंगारको देवता। मम अंगारकग्रहप्रसादसिध्यर्थे जपे विनियोग।

अंगारकायांगुष्ठाभ्यां नमः हृदयाय नमः।
धरणीसुताय तर्जिनीभ्यां नमः शिरसे स्वाहा।
रक्तवाससे मध्यमाभ्यां नमः शिखायै वषट्।
रक्तलोचनाय अनामिकाभ्यां नमः
कवचाय हुं।
शक्तिधराय कनिष्ठिकाभ्यां नमः
अस्त्राय फट्।

भूर्भुवस्सुवरोमिति दिग्बन्धः।

ध्यानम्।।

रक्तमाल्यांबरधरं हेमरुपं चतुर्भुजं।
शक्तिशूलगदापद्मान् धारयन्तं करांबुजैः।।
लमित्यादि पंचोपचार पूजां कुर्यात्।

अंगारक कवचम्।।

ॐ अस्य श्री अंगारककवचस्तोत्रमहामन्त्रस्य विरूपाक्ष ऋषिः। गायत्री छन्दः। अंगारको देवता। अं बीजं। गं शक्तिः।

रं कीलकं।। मम अंगारकग्रहप्रसादसिध्यर्थे जपे विनियोगः।

आं अंगुष्ठाभ्यां नमः हृदयाय नमः।
ईं तर्जिनीभ्यां नमः शिरसे स्वाहा।
ॐ मध्यमाभ्यां नमः शिखायै वषट्।
ऐं अनामिकाभ्यां नमः कवचाय हुं।
औं कनिष्ठिकाभ्यां नमः नेत्रत्रयाय वौषट्।
अः करतलकरपृष्ठाभ्यां नमः अस्त्राय फट्।
भूर्भुवस्सुवरोमिति दिग्बंधः।

ध्यानम्।।

नमाम्यंगारकं देवं रक्तांगवरभूषणं।
जानुस्थं वामहस्ताभ्यां चापेक्षुवरपाणिनं।।

चतुर्भुजं मेषवाहं वरदं चावनीसुतम्।
शक्तिशूलगदाखङ्गं ज्वालापुंजोर्ध्वकेशकं।।

मेरुं प्रदक्षिणं कृत्वा सर्वदेवात्मसिध्दिदं।
अंगारकः शिरो रक्षेत् मुखं वै धरणीसुतः।।

कर्णौ रक्तांबरः पातु नेत्रे मे रक्तलोचनः।
नासिकां मे शक्तिधरः कंठं मे पातु भौमकः।।

भुजौ तु रक्तमाली च हस्तं शूलधरस्तथा।
चतुर्भुजो मे हृदयं कुक्षिं रोगापहारकः।।

कटिं मे भूमिजः पातु ऊरु पातु गदाधरः।
जानू जंघे कुजः पातु पादौ भौमस्सदा मम।।

सवणि यानि चांगनि रक्षेन्मे मेषवाहनः।
य इदं कवचं दिव्यं सर्वशत्रुविनाशनम्।।

भूतप्रेतपिशाचानां नाशनं सर्वसिध्दिदम्।
सर्वरोगहरं चैव सर्वसंपत्प्रदं शुभम्।।

भुक्तिमुक्तिप्रदं नृणां सर्वसौभाग्यवर्धनं।
ऋणबन्धविमोक्षं च सत्यमेव न संशयः।।

स्तोत्रपाठस्तु कर्तव्यो देवस्याग्रे समाहितः।
रक्तगंधाक्षतैः धूपदीपगुडोदनैः।।

मंगळं पूजयित्वा तु मंगळेहनि सर्वदा।
ब्राह्मणान् भोजयेत् पश्चात् चतुरो द्वादशोऽथवा।।

अनेन विधिना यस्तु कृत्वा वृतमनुत्तमम्।
व्रतं तदेव कुर्वीत सप्तवारेषु वा यदि।।

तेषां शस्ताण्युत्पलानि वन्हिःस्यात् चन्द्रशीतलः।
न चैनं बधियन्त्यस्मान् मृगपक्षिगजादयः।।

महान्धतमसे प्राप्ते मार्तांडस्योदयादिव।
विलयं यान्ति पापानि शतजन्मार्जितानि वै।।

इति अंगारक कवचम् संपूर्णम्।।

अंगारक स्तोत्रम्।।

-ऋणविमोचनम्-

स्कंद उवाच-

ऋणग्रस्तनराणां तु ऋणमुक्तिः कथं भवेत्।

ब्रह्मोवाच-

वक्ष्येऽहं सर्वलोकानां हितार्थं हितकामदं।

अस्य श्री अंगारकस्तोत्रमहामन्त्रस्य।

गौतम ऋषिः। अनुष्टुप् छन्दः। अंगारको देवता।

मम ऋणविमोचनार्थे अंगारकजपे विनियोगः पूर्ववत्

ध्यानम्।।

रक्तमाल्यांबरधरः शूलशक्तिगदाधरः।

चतुर्भुजो मेषगतो वरदश्च धरासुतः।।

मंगळो भूमिपुत्रश्च ऋणहर्ता धनप्रदः।

स्थिरासनो महाकायः सर्वकामफलप्रदः।।

लोहितो लोहिताक्षश्च सामगानां कृपाकरः।

धर्मात्मजः कुजो भौमो भूमिदो भूमिनन्दनः।।

अंगारको यमश्चैव सर्वरोगापहारकः।

वृष्टेः कर्ता च हर्ता च सर्वदेवैश्च पूजितः।।

एतानि कुजनामानि नित्यं यः प्रयतः पठेत्।

ऋणं न जायते तस्य धनं प्राप्नोत्यसंशयः।।

अंगारक महीपुत्र भगवन् भक्तवत्सल।

नमोऽस्तु ते ममाशेषऋणमाशु विनाशय।।

रक्तगंधैश्च पुष्पैश्च धूपदीपैर्गुडोदनैः।

मंगळं पूजयित्वा तु मंगळेऽहनि सर्वदा।।

एकविंशतिनामानि पठित्वा तु तदंतिके।

ऋणरेखा प्रकर्वव्या अंगारेण तदग्रतः।।

ताश्च प्रमार्जयेत्पश्चात् वामपादेन संस्पृशेत्।

मूलमन्त्रः।।

अंगारक महीपुत्र भगवन् भक्तवत्सल।

नमोऽस्तुते ममाशेषऋणमाशु विमोचय।।

एवं कृते न संदेहः ऋणं हित्वा धनी भवेत्।

महतीं श्रियमाप्नोति ह्यपरो धनदो युवा।।

अर्घ्यम्।।

अंगारक महीपुत्र भगवन् भक्तवत्सल।

नमोऽस्तुते ममाशेष ऋणमाशु विमोचय।।

भूमिपुत्र महातेज स्वेदोद्भव पिनाकिनः।

ऋणार्तस्त्वां प्रपन्नोऽस्मि गृहाणार्घ्यं नमोऽस्तुते।।

-इति अंगारकस्तोत्रं संपूर्णम्-

अंगारकाष्टोत्तरशतनामावलिः।।

ॐ महीसुताय नमः।
ॐ महाभागाय नमः।
ॐ मंगळाय नमः।
ॐ मंगळप्रदाय नमः।
ॐ महावीराय नमः।
ॐ महाशूराय नमः।
ॐ महाबलपराक्रमाय नमः।
ॐ महारौद्राय नमः।
ॐ महाभद्राय नमः।
ॐ माननीयाय नमः।।१०।।

ॐ दयाकराय नमः।
ॐ मानदाय नमः।
ॐ अमर्षणाय नमः।
ॐ क्रूराय नमः।
ॐ तापपापविवर्जिताय नमः।
ॐ सुप्रतीपाय नमः।
ॐ सुताम्राक्षाय नमः।
ॐ सुब्रह्मण्याय नमः।
ॐ सुखप्रदाय नमः।
ॐ वक्रसंभादिगमनाय नमः।।२०।।

ॐ वरेण्याय नमः।
ॐ वरदाय नमः।
ॐ सुखिने नमः।
ॐ वीरभद्राय नमः।
ॐ विरूपाक्षाय नमः।
ॐ विदूरस्थाय नमः।
ॐ विभावसवे नमः।
ॐ नक्षत्रचक्रसंचारिणे नमः।
ॐ नक्षत्ररूपाय नमः।
ॐ क्षात्रबर्जिताय नमः।।३०।।

ॐ क्षयवृद्धिविनिर्मुक्ताय नमः।
ॐ क्षमायुक्ताय नमः।
ॐ विचक्षणाय नमः।
ॐ अक्षीणफलदाय नमः।
ॐ चक्षुर्गोचराय नमः।
ॐ शुभलक्षणाय नमः।
ॐ वीतरागाय नमः।
ॐ वीतभयाय नमः।
ॐ वीच्विराय नमः।
ॐ विश्वकारणाय नमः।।४०।।

ॐ नक्षत्रराशिसंचारिणे नमः।
ॐ नानाभयनिकृन्तनाय नमः।
ॐ कमनीयाय नमः।
ॐ दयासाराय नमः।
ॐ कनत्कनकभूषणाय नमः।
ॐ भयत्राय नमः।
ॐ भव्यफलदाय नमः।
ॐ भक्ताभयवरप्रदाय नमः।
ॐ शत्रुहन्त्रे नमः।
ॐ शमोपेताय नमः।।५०।।

ॐ शरणागतपोषणाय नमः।
ॐ साहसिने नमः।

ॐ सद्गुणाध्यक्षाय नमः।
ॐ साधवे नमः।
ॐ समरदुर्जयाय नमः।
ॐ दुष्टदूराय नमः।
ॐ शिष्टपूज्याय नमः।
ॐ सर्वकष्टनिवारणाय नमः।
ॐ दुश्चेष्टावारकाय नमः।
ॐ दुःखभंजनाय नमः॥६०॥
ॐ दुर्धर्षाय नमः।
ॐ हरये नमः।
ॐ दुःस्वप्नहन्त्रे नमः।
ॐ दुर्धराय नमः।
ॐ दुष्टगर्वविमोचनाय नमः।
ॐ भरद्वाजकुलोद्भूताय नमः।
ॐ भूसुताय नमः।
ॐ भव्यभूषणाय नमः।
ॐ रक्तांबराय नमः।
ॐ रक्तवपुषे नमः॥७०॥
ॐ भक्तपालनतत्पराय नमः।
ॐ चतुर्भुजाय नमः।
ॐ गदाधारिणे नमः।
ॐ मेषवाहनाय नमः।
ॐ अमिताशनाय नमः।
ॐ शक्तिशूलधराय नमः।
ॐ शक्ताय नमः।
ॐ शस्त्रविद्याविशारदाय नमः।
ॐ तार्किकाय नमः।
ॐ तामसाधाराय नमः॥८०॥
ॐ तपस्विने नमः।
ॐ ताम्रलोचनाय नमः।
ॐ तप्तकांचनसंकाशाय नमः।
ॐ रक्तकिंजुल्कसन्निभाय नमः।
ॐ गोत्राधिदेवाय नमः।
ॐ गोमध्यचराय नमः।
ॐ गुणविभूषणाय नमः।
ॐ असृजे नमः।
ॐ अंगरकाय नमः।
ॐ अवंतिदेशाधीशाय नमः॥९०॥
ॐ जनार्दनाय नमः।
ॐ सूर्ययाम्यप्रदेशस्थाय नमः।
ॐ यौवनाय नमः।
ॐ याम्यदिङ्मुखाय नमः।
ॐ त्रिदशाधिपसन्नुताय नमः।
ॐ शुचये नमः।
ॐ शुचिकराय नमः।
ॐ शूराय नमः।
ॐ शुचिवश्याय नमः॥१००॥
ॐ शुभावहाय नमः।
ॐ मेषवृश्चिकराशीशाय नमः।
ॐ मेधाविने नमः।
ॐ मितभाषणाय नमः।
ॐ सुखप्रदाय नमः।
ॐ सुरूपाक्षाय नमः।
ॐ सर्वाभीष्टफलप्रदाय नमः।
ॐ श्रीमते अंगारकाय नमः॥१०८॥

इति अंगारकाष्टोत्तरशतनामावळिः॥

Āditya, in Śṛingeri

IV

WORSHIP OF BUDHA

बुधग्रहावाहनम्।।

उदबुध्यध्वं बुधो बुधः त्रिष्टुप्ः।
बुधर्षिः बुधो देवता त्रिष्टुप् छन्दः।

ॐ उद्बुध्यध्वं समनसस्सखयस्समग्निमिन्ध्वं बहवस्सनीळाः। दधिक्रामग्निमुषसं देवीमिन्द्रा वतोवसे निह्वएवः।।

ॐ इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री।
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं। समूळह
मस्य पांसुरे।।

सहस्रशीर्षा नारायणः पुरुषोऽनुष्टुप्।
ॐ सहस्रशीर्षा पुरुषः सहस्राक्षस्सहस्रपात्।
स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशांगुलम्।।

भगवान् बुधग्रहं पीतवर्णं पीतगंधं पीतपुष्पं पीतमाल्यांबरधरं पीतछत्रध्वजरथपताकादिशोभितं दिव्यरथसमारूढं मेरुं प्रदक्षिणीकुर्वाणं सिंहवाहनं उदङ्मुखं मगधदेशाधिपम् चतुर्भुजं खड्गचर्मांबरधरं आत्रेयसगोत्रं आंगीरससंवत्सरस्य मार्गशीर्षशुक्ल सप्तम्यां पूर्वाभाद्रानक्षत्रे जातं कन्यामिथुनराश्याधिपम् सौम्यवासरप्रयुक्तं किरीटिनं सुखासीनं पत्नीपुत्रपरिवार समेतं ग्रहमंडले प्रविष्टमास्मिन्नधिकरणे सूर्यग्रहस्य ईशान्यदिग्भागे बाणकारमंडले।
भूः बुधग्रहमावाहयामि।
भूवः बुधग्रहमवाहयामि।
सुवः बुधग्रहमावाहयामि।
भूर्भुवस्सुवः बुधग्रहमावाहयामि स्थापयामि पूजयामि।।

बुधजपम्।।

अस्य श्री बुधमहामन्त्रस्य कश्यप ऋषिः।
त्रिष्टुप् छन्दः। बुधो देवता। बुधग्रहप्रसादसिध्यर्थे जपे विनियोगः-

बुधायांगुष्टाभ्यां नमः हृदयाय नमः
सौम्याय तर्जिनीभ्यां नमः शिरसे स्वाहा।
सिंहारूढाय मध्यमाभ्यां नमः शिखायै वषट्।
चतुर्बाहवे अनामिकाभ्यां नमः कवचाय हुं।
गदाधराय कनिष्ठिकाभ्यां नमः नेत्रत्रयाय वौषट्।
सोमपुत्राय करतलकरपृष्ठाभ्यां नमः अस्राय फट्।
भूर्भुवस्सुवरोमिति दिग्बन्धः।

ध्यानम्।।

सिंहारूढं चतुर्बाहुं खड्गंचर्मगदाधरं।
सोमपुत्रं महासौम्यं ध्यायेत्सर्वार्थसिद्धिदं।।

लमित्यादि पंचोपचार पूजां कुर्यत्।।

उद्बुध्यध्वं निह्वएवः यथाशक्ति जपित्वा पुनः अंगन्यास करन्यासं कृत्वा दिग्विमोचनं कुर्यात्।।

बुधकवचम्।।

ॐ अस्य श्री बुधकवचस्तोत्रमहामन्त्रस्य कात्यायनऋषिः। अनुष्टुप् छन्दः। बुधो देवता। यं बीजं। ह्रीं शक्तिः। ॐ कीलकं। मम बुधग्रह

प्रसादसिध्यर्थे जपे विनियोगः।
बां अंगुष्टाभ्यां नमः हृदयाय नमः।
बीं तर्जिनीभ्यां नमः शिरसे स्वाहा।
बूं मध्यमाभ्यां नमः शिखायै वषट्।
बैं अनामिकाभ्यां नमः कवचाय हुं
बौं कनिष्ठिकाभ्यां नमः नेत्रत्रयाय वौषट्।
बः करतलकरपृष्टाभ्यां नमः अस्त्राय फट्।
भूर्भुवस्सुवरोमिति दिग्वंधः।

ध्यानम्।।

बुधः पुस्तकहस्तस्थ कुंकुमस्य समद्युतिः।
बुधं ज्ञानमयं सर्वं कुंकुमाभं चतुर्भुजं।।

खड्गशूलगदापाणिं वरदांकितमुद्रितम्।
पीतांपरधरं देवं पीतमाल्यानुलेपनम्।।

वज्राद्याभरणं चैव किरीटमकुटोज्वलम्।
श्वेताश्वरथमारुढं मेरुं चैव प्रदक्षिणं।।

बुधः पातु शिरो देशं सौम्यः पातु च फालकं।
नेत्रे ज्ञानमयः पातु श्रुती पातु शशीसुतः।।

घ्राणं गंधधरः पातु भुजौ पुस्तुकभूषितः।
मध्यं पातु सुराराध्यः पातु नभिं खगेश्वरः।।

कटिं कालात्मजः पातु ऊरू पातु सुरेश्वरः।
जानुनी रोहिणीसूनुः पातु जंघे फलप्रदः।।

पादौ बाणासनः पातु पातु सौम्योऽखिलं वपुः।
एषोपि कवचः पुण्यः सर्वोपद्रवशान्तिदः।।

सर्वरोगप्रशमनः सर्वदःखनिवारकः।
आयुरारोग्यशुभदः पुत्रपौत्रप्रवर्धनम्।।

यः पठेत् कवचं दिव्यं श्रुणुयाद्वा समाहितः।
सर्वान्कामानवाप्नोति दीर्घमायुश्च विन्दति।।

इति श्री स्कांदे पुराणे उत्तरखंडे बुधकवचः समाप्तः

बुधग्रहस्तोत्रम्।।

ॐ अस्य श्री बुधग्रहस्तोत्रमहामन्त्रस्य।
वसिष्ठ ऋषिः। त्रिष्टुप् छन्दः। श्री बुधो देवता।
बुधग्रहप्रसादसिध्यर्थे जपे विनियोगः।।
बां इत्यादि षडंग न्यासं कुर्यात्। भूर्भुवस्सुवरोमिति दिग्बन्धः।

ध्यानम्।।

बुधः चतुर्भिर्वरदाभयासि।
गदा वहन्तं वरदं प्रशांतं।
पीतप्रभं चंद्रसुतं सुराढ्यं
सिंहे निषण्णम् बुधमाश्रयामि।।

पीतांबरः पीतवपुः किरीटी च चतुर्भुजः।
पीतध्वजपताकी च रोहिणीगर्भसंभवः।
ईशान्यादिषु देशेषु बाणासन उदङ्मुखः।
नाथो मगधदेशस्य मन्त्रो मन्त्रार्थतत्वविंत्।।

सुखासनः कर्णिकारो जेत्रश्चात्रेयगोत्रवान्।
भरद्वाजऋषि प्रख्यै ज्योतिर्मंडलमांडितः।।

अधिप्रत्यधिदेवाभ्याम् अन्वितो ग्रहमंडले।
प्रविष्टस्सूक्ष्मरूपेण समस्तवरदस्सुखी।।

सदा प्रदक्षिणं मेरोः कुर्वाणः कामरूपवान्।
असिदंडौ च बिभ्राणः संप्राप्तसुफलप्रदः।।

मुद्गधान्यप्रदो नित्यं मर्त्यामर्त्यसुरार्चितः।
यस्तु सौम्येन मनसा स्वमात्मानं प्रपूजयेत्।।

तस्यैवश्चोभवेन्नित्यं सौम्यनामधरो बुधः।
कन्याया मिथुनस्यापि राशेरधिपतिर्द्वयोः।।

बुधस्तोत्रमिदं गुह्यं वसिष्ठेनोदितं पुरा।
दिलीपाय च भक्ताय याचमानाय भूभृते।।

यः पठेदेकवारं वा सर्वाभीष्टमवाप्नुयात्।
स्तोत्रराजमिदं पुण्यं गुह्याद्गुह्यतमं महत्।।

एकवारं द्विवारं वा त्रिवारं यः पठेन्नरः।
तस्यापस्मारकुष्ठादिव्याधिबाधा न विद्यते।।

सर्वग्रहकृता पीडा पठितेऽस्मिन्न विद्यते।
कृत्रिमैषधदुर्मन्त्रंकृत्रिमादिनिशाचरैः।।

यद्यद्भयं भवेत्तत्र पठितेऽस्मिन्न विद्यते।
प्रतिमाया च स्वर्णेन लिखिता तु भुजाष्टकम्।।

मुद्गधान्योपरि न्यस्तपीतवस्त्रान्विते घटे।
विन्यस्य विधिना सम्यक् मासमेकं निरन्तरम्।।

ये पूजयंति ते यान्ति दीर्घमायुः प्रजा धनम्।
आरोग्यं भस्मगुल्मादि सर्वव्याधिविनाशनम्।।

यं यं कामयते सम्यक् तत्तदाप्नोत्यसंशयः।
इति श्री स्कान्दे पुराणे बुधस्तोत्रं संपूर्णम्।।

बुधाष्टोत्तरशतनामावलिः।।

ॐ बुधाय नमः।
ॐ बुधार्चिताय नमः।
ॐ सौम्याय नमः।
ॐ दृढफलाय नमः।
ॐ श्रुतिजालप्रबोधकाय नमः।
ॐ सत्यवासाय नमः।
ॐ सत्यवचसे नमः।
ॐ श्रेयसां पतये नमः।
ॐ अव्ययाय नमः।।१०।।

ॐ सोमजाय नमः।
ॐ सुखदाय नमः।
ॐ श्रीमते नमः।
ॐ सोमवंशप्रदीपकाय नमः।
ॐ वेदविदे नमः।
ॐ वेदतत्वज्ञाय नमः।
ॐ वेदान्तज्ञानभास्वराय नमः।
ॐ विद्याविचक्षणविभवे नमः।
ॐ विद्वत्पतिकराय नमः।
ॐ ऋजवे नमः।।२०।।

ॐ विश्वानुकूलसंचारिणे नमः।
ॐ विशेषविनयान्विताय नमः।
ॐ विविधागमसारज्ञाय नमः।
ॐ वीर्यवते नमः।
ॐ विगतज्वराय नमः।
ॐ त्रिवर्गफलदाय नमः।
ॐ अनन्ताय नमः।
ॐ त्रिदशाधिपपूजिताय नमः।
ॐ बुद्धिमते नमः।
ॐ बहुशास्त्रज्ञाय नमः।।३०।।

ॐ बलिने नमः।
ॐ बन्धविमोचनाय नमः।
ॐ वक्रातिवक्रगमनाय नमः।
ॐ वासवाय नमः।
ॐ वसुधाधिपाय नमः।
ॐ प्रसादवदनाय नमः।
ॐ वन्द्याय नमः।
ॐ वरेण्याय नमः।
ॐ वाग्विलक्षणाय नमः।।४०।।

ॐ सत्यवते नमः।
ॐ सत्यसंधाय नमः।
ॐ सत्यसंकल्पाय नमः।
ॐ सदाधराय नमः।
ॐ सर्वमृत्युनिवारकाय नमः।
ॐ वाणिज्यनिपुणाय नमः।
ॐ वश्याय नमः।
ॐ वातांगिने नमः।
ॐ वातरोगहते नमः।।५०।।

ॐ स्थूलाय नमः।
ॐ स्थैर्यगुणाध्यक्षाय नमः।

ॐ स्थूलसूक्ष्मादिकारणाय नमः।
ॐ अप्रकाशाय नमः।
ॐ प्रकाशात्मने नमः।
ॐ धनाय नमः।
ॐ गगनभूषणाय नमः।
ॐ विधिस्तुताय नमः।
ॐ विशालाक्षाय नमः।
ॐ विद्वज्जनमनोहराय नमः।।६०।।

ॐ चारुशीलाय नमः।
ॐ स्वप्रकाशाय नमः।
ॐ चपलाय नमः।
ॐ जितेन्द्रियाय नमः।
ॐ उदङ्मुखाय नमः।
ॐ मखासक्ताय नमः।
ॐ मगधाधिपतये नमः।
ॐ हरये नमः।
ॐ सौम्यवत्सरसंजाताय नमः।
ॐ सोमप्रियकराय नमः।।७०।।

ॐ सुखिने नमः।
ॐ सिंहादिरूढाय नमः।
ॐ सर्वज्ञयाय नमः।
ॐ शिखिवर्णाय नमः।
ॐ शिवंकराय नमः।
ॐ पीतांबराय नमः।
ॐ पीतवपुषे नमः।
ॐ खड्गचर्मधराय नमः।
ॐ कार्यकर्त्रे नमः।।८०।।

ॐ कलुषहराय नमः।
ॐ आत्रेयगोत्रजाय नमः।
ॐ अत्यंतविनयाय नमः।
ॐ विश्वपावनाय नमः।
ॐ चांपेयपुष्पसंकाशाय नमः।
ॐ चारणाय नमः।
ॐ चारुभूषणाय नमः।
ॐ वीतरागाय नमः।
ॐ वीतभयाय नमः।
ॐ विशुध्दाय नमः।।९०।।

ॐ कनकप्रभाय नमः।
ॐ बन्धुप्रियाय नमः।
ॐ बन्धमुक्ताय नमः।
ॐ बाणमंडलसंश्रिताय नमः।
ॐ अर्केशाननिवासस्थाय नमः।
ॐ तर्कशास्त्रविशारदाय नमः।
ॐ प्रशांताय नमः।
ॐ प्रीतिसंयुक्ताय नमः।
ॐ प्रियकृते नमः।
ॐ प्रियभाषणाय नमः।।१००।।

ॐ मेधाविने नमः।
ॐ माधवासक्ताय नमः।
ॐ मिथुनाधिपतये नमः।
ॐ सुधिये नमः।
ॐ कन्याराशिप्रियाय नमः।
ॐ कामप्रदाय नमः।
ॐ घनफलाशाय नमः।
ॐ बुधाय नमः।

-इति बुधाष्टोत्तरशतनामावळिः संपूर्णम्-

V

WORSHIP OF BRHASPATI

बृहस्पतिग्रहावाहनम्।।

बृहस्पते गृत्समदो बृहस्पतिः त्रिष्टुप्।
गृत्समद ऋषिः बृहस्पतिर्देवता। त्रिष्टुप् छन्दः।

बृहस्पते अति यदर्यो अर्हाद्युमभाति द्विक्रतुमज्जनेषु। यद्दीदयच्छवसऋत प्रजात तदस्मासु द्रविणं धेहि चित्रम्।।

इन्द्र श्रेष्ठानि गृत्समद इन्द्रः त्रिष्टुप्।

इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे। पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचस्सुदिनत्वमन्हाम्।

ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखाय सधमाद आशू। स्थिरं रथं सुखमिंद्राधि तिष्टन्प्रजानन्विद्वानुपयाहि सोमं।।

भगवान् बृहस्पतिग्रहं कनकवर्णं कनकगन्धं कनकपुष्पं कनकमाल्यांबरधरं कनकछत्रध्वजरथपताकादिशोभितं दिव्यरथसमारूढं मेरुं प्रदक्षिणीकुर्वाणं पूर्वाभिमुखं पद्मासनस्थं चतुर्भुजं दण्डाक्षमालाधारिणं सिंधुद्वीपदेशाधिपं आंगीरसगोत्रं धात्रसंवत्सर वैशाख कृष्ण चतुर्दश्यां भरणिनक्षत्रे जातं धनुमीनराश्याधिपं गुरुवासरप्रयुक्तं किरीटिनं सुखासनस्थं पत्नीपुत्रपरिवारसमेतं ग्रहमंडले प्रविष्टं अस्मिन्नधिकरणे सूर्यग्रहस्य उत्तरदिग्भागे दीर्घचतुरश्राकारमंडले भूः बृहस्पतिग्रहं मावाहयामि।
भुवः बृहस्पतिग्रहमावाहयामि।
सुवः बृहस्पतिग्रहमावाहयामि।
भूर्भुवस्सुवः बृहस्पतिग्रहं आवाहयामि। स्थापयामि। पूजयामि।।

बृहस्पतिग्रहस्य दक्षिणदिग्भागे।
इन्द्रमावाहयामि। स्थापयामि। पूजयामि।
बृहस्पतिग्रहस्य उत्तरदिग्भागे ब्रह्माणमावाहयामि। स्थापयामि। पूजयामि।।

बृहस्पतिजपम्।।

अस्य श्री बृहस्पतिमहामन्त्रस्य। गृत्समद ऋषिः।
जगती छन्दः। बृहस्पतिर्देवता।
बृहस्पतिग्रहप्रसादसिध्यर्थे जपे विनियोगः-
गुरवे अंगुष्टाभ्यां नमः हृदयाय नमः।
वाक्पतये तर्जिनीभ्यां नमः शिरसे स्वाहा।
गीर्वाणवंदिताय मध्यमाभ्यां नमः शिखायै वषट्।
वरदाय अनामिकाभ्यां नमः कवचाय हुं।
सुरार्चिताय कनिष्ठिकाभ्यां नमः नेत्रत्रयाय वौषट्।
कमंडलुधराय करतलकरपृष्ठाभ्यां नमः अस्त्राय फट्।
भूर्भुवस्सुवरोमिति दिग्बन्धः।

ध्यानम्।।

वराक्षमालिकादण्डकमंडलुधरं विभुं
पुष्परागांकितं पीतं वरदं भावयेद्गुरुं।।

लमित्यादि पंचोपचार पूजां कुर्यात्।
ॐ बृहस्पते धेहि चित्रं यथा शक्ति जपित्वा पुनः अंगन्यास करंन्यासं कृत्वा दिग्विमोचनं कुर्यात्।।

बृहस्पतिकवचम्।।

अथ बृहस्पति कवचस्तोत्र महामन्त्रस्य।

ईश्वर ऋषिः। अनुष्टुप् छन्दः। बृहस्पतिः देवता। ह्रां बीजं। ह्रीं शक्तिः। ह्रूं कीलकं। बृहस्पतिग्रह प्रसादसिध्यर्थे जपे विनियोगः। ह्रॉं इत्यदि अंगन्यासः। भूर्भुवस्सुवरोमिति दिग्बंधः।।

ध्यानम्।।

रक्तकांचनवर्णाभं चतुर्भुजसमन्वितम्।
दणडाक्षमालिकाहस्तं कमंडलुवरान्वितम्।।

पीतांबरधरं देवं पीतगन्धानुलेपनम्।
पुष्परागविभूषाढ्यं विचित्रमकुटोज्वलम्।।

स्वर्णाश्च रथमारुहय पीतध्वजसुशोभितम्।
मेरुं प्रदक्षिणं यांतं गुरुं देवं नतोऽस्म्यहं।।

अभीष्टवरदं देवं सर्वज्ञं सुरपूजितम्।
सर्वकार्यार्थसिध्यर्थं प्रणमामि गुरुं सदा।।

बृहस्पतिः शिरः पातु ललाटं पातु मे गुरुः।
कर्णौ सुरगुरुः पातु नेत्रे मेऽभीष्टदायकः।।

नासां नतामरः पातु जिह्वां मे वेदपारगः।
मुखं मे पातु सर्वज्ञः भुजौ भयविनाशनः।।
करौ मे वरदः पातु कक्षौ गीर्वाणपूजितः।।

वक्षो वागीश्वरः पातु कुक्षिं क्रतुभुजां गुरुः।।

नाभिं मे पातु नीतिज्ञः कटिं कल्मषवर्जितः।
ऊरू पीतांबरः पातु जंघे मे ज्ञानदायकः।।

गीष्पतिः पातु मे पादौ सर्वांगानि सुरार्चितः।
प्रातः पुण्यस्मृतिः पातु संगमे सुरवंदितः।।

मध्यान्हे मघवद्वन्द्यः सायं सर्वाधिनाशनः।
निशीथे निर्मलः पायात् सर्वदा सर्वदैव तु।।

जीवस्य कवचं दिव्यं त्रिसंध्यां यः पठेन्नरः।
सर्वान् कामान् अवाप्नोति सर्वत्र विजयी भवेत्।।

इति बृहस्पति कवचम्-

बृहस्पतिस्तोत्रम्।।

बृहस्पतिस्सुराचार्यो दयावान् शुभलक्षणः।
लोकत्रयगुरुः श्रीमान् सर्वज्ञस्सर्वकोविदः।।

सर्वेशः सर्वदाऽभीष्टः सर्वजित् सर्वपूजितः।
अक्रोधनो मुनिश्रेष्ठः नीतिकर्ता गुरुः पिता।।

विश्वात्मा विश्वकर्ता च विश्वयोनिः अयोनिजः।
भूर्भुवस्सुवरों चैव भर्ता चैव महाबलः।।

पंचविंशतिनामानि पुण्यानि नियतात्मना।
वसतानन्दभवने विष्णुना कीर्तितानि वै।।

यः पठेत् प्रातरुत्थाय प्रयतस्सुसमाहितः।
विपरीतोऽपि भगवान् प्रीतो भवति वै गुरुः।।

यः श्रुणोति गुरुस्तोत्रं चिरं जीवेन्न संशयः।
बृहस्पतिकृतापीडा न कदाचित् भविष्यति।।

-इति गुरुस्तोत्रं संपूर्णम्।।

गुर्वष्टोत्तरशतनामावलिः-

ॐ गुरवे नमः।
ॐ गुणवराय नमः।
ॐ गोप्त्रे नमः।
ॐ गोचराय नमः।
ॐ गोपतिप्रियाय नमः।
ॐ गुणिने नमः।
ॐ गुणवतां श्रेष्ठाय नमः।
ॐ गुरुणां गुरवे नमः।
ॐ अव्ययाय नमः।
ॐ जेत्रे नमः॥१०॥

ॐ जयंताय नमः।
ॐ जयदाय नमः।
ॐ जीवाय नमः।
ॐ अनन्ताय नमः।
ॐ जयावहाय नमः।
ॐ आंगीरसाय नमः।
ॐ अध्वरासक्ताय नमः।
ॐ विविक्ताय नमः।
ॐ अध्वरकृत्पराय नमः।
ॐ वाचस्पतये नमः॥२०॥

ॐ वशिने नमः।
ॐ वश्याय नमः।
ॐ वरिष्ठाय नमः।
ॐ वाग्विचक्षणाय नमः।
ॐ चित्तशुद्धिकराय नमः।
ॐ श्रीमते नमः।
ॐ चैत्राय नमः।
ॐ चित्रशिखण्डिजाय नमः।
ॐ बृहद्रथाय नमः।
ॐ बृहद् भानवे नमः॥३०॥

ॐ बृहस्पतये नमः।
ॐ अभीष्टदाय नमः।
ॐ सुराचार्याय नमः।
ॐ सुराध्यक्षाय नमः।
ॐ सुरकार्यहितंकराय नमः।
ॐ गीर्वाणपोषकाय नमः।
ॐ धन्याय नमः।
ॐ गीष्पतये नमः।
ॐ गिरिशाय नमः।
ॐ अनघाय नमः॥४०॥

ॐ धीवराय नमः।
ॐ दिव्यभूषणाय नमः।
ॐ देवपूजिताय नमः।
ॐ धनुर्धराय नमः।
ॐ दैत्यहन्त्रे नमः।
ॐ दयासाराय नमः।
ॐ दयाकराय नमः।
ॐ दारिद्र्यविनाशनाय नमः।
ॐ धन्याय नमः।
ॐ धिषणाय नमः॥५०॥

ॐ दक्षिणायनसंभवाय नमः।
ॐ धनुर्मीनाधिपाय नमः।
ॐ देवाय नमः।

ॐ धनुर्बाणधराय नमः।
ॐ हरये नमः।
ॐ अंगीरसाब्दसंजाताय नमः।
ॐ अंगिरसकुलोद्भवाय नमः।
ॐ सिंधुदेशाधिपाय नमः।
ॐ धीमते नमः।
ॐ स्वर्णकायाय नमः॥६०॥

ॐ चतुर्भुजाय नमः।
ॐ हेमांगदाय नमः।
ॐ हेमवपुषे नमः।
ॐ हेमभूषणभूषिताय नमः।
ॐ पुष्यनाथाय नमः।
ॐ पुष्यरागमणिमंडनमंडिताय नमः।
ॐ काशपुष्पसमानाभाय नमः।
ॐ कलिदोषनिवारकाय नमः।
ॐ इन्द्रादिदेवदेवेशाय नमः।
ॐ देवताभीष्टदायकाय नमः॥७०॥

ॐ असमानबलाय नमः।
ॐ सत्वगुणसंपद्विभावसवे नमः।
ॐ भूसुराभीष्टफलदाय नमः।
ॐ भूरियशसे नमः।
ॐ पुण्यविवर्धनाय नमः।
ॐ धर्मरूपाय नमः।
ॐ धनाध्यक्षाय नमः।
ॐ धनदाय नमः।
ॐ धर्मपालनाय नमः।
ॐ सर्वदेवतार्थतत्वज्ञाय नमः॥८०॥

ॐ सर्वापाद्विनिवारकाय नमः।
ॐ सर्वपापप्रशमनाय नमः।
ॐ स्वमतानुगतामराय नमः।
ॐ ऋग्वेदपारगाय नमः।
ॐ सदानन्दाय नमः।
ॐ सत्यसंधाय नमः।
ॐ सत्यसंकल्पमानसाय नमः।
ॐ सर्वागमज्ञाय नमः।
ॐ सर्वज्ञाय नमः॥९०॥

ॐ सर्ववेदान्तविदुषे नमः।
ॐ ब्रह्मपुत्राय नमः।
ॐ ब्राह्मणेशाय नमः।
ॐ ब्रह्मविद्याविशारदाय नमः।
ॐ समानाधिकनिर्मुक्ताय नमः।
ॐ सर्वलोकवशंकराय नमः।
ॐ सुरासुरगंधर्ववन्दिताय नमः।
ॐ सत्यभाषणाय नमः।
ॐ बृहस्पतये नमः।
ॐ सुराचार्याय नमः॥१००॥

ॐ दयावते नमः।
ॐ शुभलक्षणाय नमः।
ॐ लोकत्रयगुरवे नमः।
ॐ श्रीमते नमः।
ॐ सर्वगाय नमः।
ॐ सर्वतोविभवे नमः।
ॐ सर्वेशाय नमः।
ॐ सर्वदा तुष्टाय नमः।
ॐ सर्वगाय नमः।
ॐ सर्वपूजिताय नमः॥१०८॥

इति बृहस्पत्यष्टोत्तरशतनामावलिः॥

VI

WORSHIP OF ŚUKRA

शुक्रग्रहावाहनम्।।

शुक्रं ते भरद्वाजः शुक्रः त्रिष्टुप्।

भरद्वाज ऋषिः। शुक्रो देवता। त्रिष्टुप् छन्दः।

ॐ शुक्रं ते अन्यद्यजंते अन्यद्विषुरूपे अहनि द्यौरिवासि। विश्वाहि माया अवसि स्वधावो भद्रा ते पूषान्निह रातिरस्तु।।

इन्द्राणि वृषाकपिरिन्द्राणि पांक्तिः

ॐ इन्द्राणि मासुनारिषु सुभगामहमश्रवम्। न ह्यस्या अपरं च न जरसामरते पतिर्विश्वस्मा दिन्द्रउत्तरः।।

ॐ इन्द्र ओ मधुच्छन्दा इन्द्रो गायत्री।
इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः।
अस्माकमस्तु केवलः।।

भगवान् शुक्रग्रहं श्वेतवर्णं श्वेतगन्धं श्वेतपुष्पं श्वेतमाल्यांबरधरं श्वेतच्छत्रध्वजरथपताकादिशोभितं दिव्यरथसमारूढं मेरुं प्रदक्षिणीकुर्वाणं पूर्वाभिमुखं पद्मासनस्थं चतुर्भुजं दंडाक्षमालाजटावल्कलधारिणं कांभोजदेशाधिपं भार्गवगोत्रं पार्थिव संवत्सरे श्रावण मासे शुक्ल द्वादश्यां ज्येष्ठा नक्षत्रे जातं तुलावृषभराश्याधिपतिं भृगुवासर प्रयुक्तं किरीटिनं सुखासीनं पत्नीपुत्रपरिवारसमेतं ग्रहमंडले प्रविष्टम् आस्मिन्नधिकरणे सूर्यग्रहस्य प्राग्भागे पंचकोणाकारे मंडले।।

भूः शुक्रग्रहं आवाहयामि।
भुवः शुक्रग्रहं आवाहयामि।
सुवः शुक्रग्रहं आवाहयामि।
भू र्भुवस्सुवः शुक्रग्रहं आवाहयामि।
स्थापयामि। पूजयामि।।

शुक्रग्रहस्य दक्षिणदिग्भागे इन्द्राणीं आवाहयामि। स्थापयामि। पूजयामि।

शुक्रग्रहस्य उत्तरदिग्भागे इन्द्रं आवाहयामि। स्थापयामि पूजयामि।।

शुक्रजपम्।।

अस्य श्री शुक्रग्रहमहामन्त्रस्य भरद्वाजऋषिः। त्रिष्टुप् छन्दः। शुक्रो देवता। मम शुक्रग्रहप्रसाद सिध्यर्थे जपे विनियोगः।।

दानवपूजितायांगुष्टाभ्यां नमः हृदयाय नमः।
दैत्याचार्याय तर्जिनीभ्यां नमः शिरसे स्वाहा।
वरदाय मध्यमाभ्यां नमः शिखायै वषट्।
श्वेतवस्त्राय अनामिकाभ्यां नमः कवचाय हुं।
शुक्राय कनिष्ठिकाभ्यां नमः नेत्रत्रयाय वौषट्।
कमंडलुधराय करतलकरपृष्ठाभ्यां नमः अस्त्राय फट्।

भू र्भुवस्सुवरोमिति दिग्बंधः।।

ध्यानम्।।

जटिलं चाक्षसूत्रं च वरदंड कमंडलुम्।
श्वेतवस्त्रोज्वलं शुक्रं सर्वदानवपूजितम्ः।।
लमित्यादि पंचोपचार पूजां कृत्वा।
ॐ शुक्रं ते रतिरस्तु।।
यथाशक्ति जपित्वा।
पुनरंगन्यासकरन्यासं कृत्वा दिग्विमोचनं कुर्यात्।।

शुक्रकवचम्।।

अस्य श्री शुक्रकवचस्तोत्रमहामन्त्रस्य भरद्वाज ऋषिः। अनुष्टुप् छन्दः। शुक्रो देवता। ह्रां बीजं। ह्रीं शक्तिः। ह्रूं कीलकं। शुक्रग्रहप्रसादसिध्यर्थे जपे विनियोगः।।

शुक्राय अंगुष्टाभ्यां नमः हृदयाय नमः।
दैत्यगुरवे तर्जिनीभ्यां नमः शिरसे स्वाहा।
काव्याय मध्यमाभ्यां नमः शिखायै वषट्।
उषनसे अनामिकाभ्यां नमः कवचाय हुं।
भार्गवाय कनिष्ठिकाभ्यां नमः नेत्रत्रयाय वौषट्।
कवये करतलकरपृष्ठाभ्यां नमः अस्त्राय फट्।
भू र्भुवस्सुवरोमिति दिग्बन्धः।।

ध्यानम्।।

शुक्रं चतुर्भुजं देवं अक्षमालाकमंडुलं।
दण्डहस्तं च वरदं द्युतिजालांगशोभितं।।

शुक्लांबरं शुक्लमाल्यं शुक्लमाल्यानुलेपनं।
वज्रामाभरणं चैव किरीटमकुटोज्वलं।।

मृणाळकुन्देन्दुपयोहिमप्रभं
सितांबराढ्यं सितगंधमालिनं।
समस्तशास्त्रश्रुतितत्वदर्शनं
ध्यायेत्कविं वांछितवस्तुसंपदम्।।

शिरो मे भार्गवः पातु फालं पातु ग्रहाधिपः।
नेत्रे दैत्यगुरुः पातु श्रोत्रं श्रीचंदनद्युतिः।।

पातु मे नासिकां काव्यः वदनं दैत्यवंदितः।
रसनामुशनः पातु कंठं श्रीकंठभक्तिमान्।।

भुजौ तेजोनिधिः पातु वक्षो योगविदां वरः।
अक्षमालाधरो रक्षेत् कुक्षिं यक्षादिवंदितः।।

कटिं मे पातु विश्वात्मा सक्थिनी सर्वपूजितः।
जानुनी भार्गवः पातु जंघे मे जयदायकः।।

गुल्फौ गुणनिधिः पातु पादौ मे पांडराम्बरः।
सर्वाण्यंगानि मे पातु शुक्रः कविरहर्निशम्।।

कलै कविः सदा पातु संगवे मां सितोऽवतु।
मध्यान्हे भार्गवो रक्षेत् सायंकाले सुरार्चितः।।

प्रदोषे पांडरः पातु निशीथे र्नीतिवल्लभः।
संध्यायां सर्वदो रक्षेत् दुर्गे मां भृगुनन्दनः।।

शुक्रस्य कवचं गुह्यं पठेद्यः श्रद्धयान्वितः।
न तस्य जायते पीडा क्वापि शुक्रप्रसादतः।।

-इति श्री शुक्रकवचः संपूर्णम्-

शुक्रस्तोत्रम्।।

श्रुण्वन्तु मुनयः सर्वे शुक्रस्तोत्रमिदं शुभम्।
रहस्यं सर्वभूतानां शुक्रप्रीतिकरं शुभम्।।

एषां संकीर्तनान्नित्यं सर्वान् कामान् अवाप्नुयात्।
तानि शुक्रस्य नामानि कथयामि शुभानि च।।

शुक्रः शुभग्रहः श्रीमान् वर्षकृत् वर्षविघ्नकृत्।।
तेजोनिधिः ज्ञानदाता योगी योगविदां वरः।।

दैत्यसंजीवनो धीरः दैत्यनेतोऽशना कविः।
नीतिकर्ता ग्रहाधीशः विश्वात्मा लोकपूजितः।।
शुक्लमाल्यांबरधरः श्रीचंदनसमप्रभः।
अक्षमालाधरः काव्यः तपोमूर्तिः धनप्रदः।।

चतुर्विंशतिनामानि अष्टोत्तरशतं यथा।
देवस्याग्रे विशेषेण पूजां कृत्वा विधानतः।।

य इदं पठति स्तोत्रं भार्गवस्य महात्मनः।
विषमस्थोऽपि भगवान् तुष्टः स्यान्नात्र संशयः।।

स्तोत्रं भृगोरिदमनन्तगुणप्रदं यो
भक्त्या पठेच्च मनुजो नियतः शुचिःसन्।
प्राप्नोति नित्यमतुलां श्रियमीप्सितार्थान्
राज्यं समस्तधनधान्ययुतां समृद्धिम्।।

इति श्री शुक्रस्तोत्रं संपूर्णम्।।

शुक्राष्टोत्तरशतनामावलिः।।

ॐ शुक्राय नमः।
ॐ शुचये नमः।
ॐ शुभगुणाय नमः।
ॐ शुभदाय नमः।
ॐ शुभलक्षणाय नमः।
ॐ शोभनाक्षाय नमः।
ॐ शुभग्रहाय नमः।
ॐ शुभ्रवाहाय नमः।
ॐ शुद्धस्फटिकभास्वराय नमः।
ॐ दीनार्तिहराय नमः।।१०।।

ॐ दैत्यगुरवे नमः।
ॐ देवाभिनन्दिताय नमः।
ॐ काव्यासक्ताय नमः।
ॐ कामपालाय नमः।
ॐ कवये नमः।
ॐ कल्याणदायकाय नमः।
ॐ भद्रमूर्तये नमः।
ॐ भद्रगुणाय नमः।
ॐ भार्गवाय नमः।
ॐ भक्तपालनाय नमः।।२०।।

ॐ भोगदाय नमः।
ॐ भुवनाध्यक्षाय नमः।
ॐ चारुशीलाय नमः।
ॐ चारुचंद्रनिभाननाय नमः।
ॐ निधये नमः।
ॐ निखिलशास्त्रज्ञाय नमः।
ॐ नीतिविद्याधुरंधराय नमः।
ॐ सर्वलक्षणसंपन्नाय नमः।
ॐ सर्वावगुणवर्जिताय नमः।।३०।।

ॐ समानाधिकनिर्मुक्ताय नमः।
ॐ सकलागमपारगाय नमः।
ॐ भृगवे नमः।
ॐ भोगकराय नमः।
ॐ भूसुरपालनतत्पराय नमः।
ॐ मनस्विने नमः।
ॐ मानदाय नमः।
ॐ मान्याय नमः।
ॐ मायातीताय नमः।
ॐ महाशयाय नमः।।४०।।

ॐ बलिप्रसन्नाय नमः।
ॐ अभयदाय नमः।
ॐ बलिने नमः।
ॐ बलपराक्रमाय नमः।
ॐ भवपाशपरित्यागाय नमः।
ॐ बलिबन्धविमोचनाय नमः।
ॐ धनाशयाय नमः।
ॐ धनाध्यक्षाय नमः।
ॐ कंबुग्रीवाय नमः।
ॐ कलाधराय नमः।।५०।।

ॐ कारुण्यरसपूर्णाय नमः।
ॐ कल्याणगुणवर्धनाय नमः।
ॐ श्वेतांबराय नमः।

ॐ श्वेतवपुषे नमः।
ॐ चतुर्भुजसमन्विताय नमः।
ॐ अक्षमालाधराय नमः।
ॐ अचिंत्याय नमः।
ॐ अक्षीणगुणभासुराय नमः।
ॐ नक्षत्रगणसंचाराय नमः।
ॐ नयदाय नमः॥६०॥
ॐ नीतिमार्गदाय नमः।
ॐ वर्षप्रदाय नमः।
ॐ हृषीकेशाय नमः।
ॐ क्लेशनाशकराय नमः।
ॐ कवये नमः।
ॐ चिंतितार्थप्रदाय नमः।
ॐ शांतिमते नमः।
ॐ चित्तसमाधिकृते नमः।
ॐ आधिव्याधिहराय नमः।
ॐ भूरिविक्रमाय नमः॥७०॥
ॐ पुण्यदायकाय नमः।
ॐ पुराणपुरुषाय नमः।
ॐ पूज्याय नमः।
ॐ पुरुहूतादिसन्नुताय नमः।
ॐ अजेयाय नमः।
ॐ विजितारातये नमः।
ॐ विविधाभरणोज्वलाय नमः।
ॐ कुन्दपुष्पप्रतीकाशाय नमः।
ॐ मन्दहासाय नमः।
ॐ महामनसे नमः॥८०॥
ॐ मुक्ताफलसमानाभाय नमः।
ॐ मुक्तिदाय नमः।
ॐ मुनिसन्नुताय नमः।
ॐ रत्नसिंहासनारूढाय नमः।
ॐ रथस्थांय नमः।
ॐ रजतप्रभाय नमः।
ॐ सूर्यप्राग्देशसंचाराय नमः।
ॐ सुरशत्रुसुहृदे नमः।
ॐ कशये नमः।
ॐ तुलावृषभराशीशाय नमः॥९०॥
ॐ दुर्धराय नमः।
ॐ धर्मपालनाय नमः।
ॐ भाग्यदाय नमः।
ॐ भव्यचारित्राय नमः।
ॐ भवबन्धविमोचनाय नमः।
ॐ गौडदेशेश्वराय नमः।
ॐ गोप्त्रे नमः।
ॐ गुणिने नमः।
ॐ गुणविभूषणाय नमः।
ॐ ज्येष्ठानक्षत्रसंभूताय नमः॥१००॥
ॐ ज्येष्ठाय नमः।
ॐ श्रेष्ठाय नमः।
ॐ शुचिस्थिताय नमः।
ॐ अपवर्गप्रदाय नमः।
ॐ अनन्ताय नमः।
ॐ संतानफलदायकाय नमः।
ॐ सर्वेश्वर्यप्रदायकाय नमः।
ॐ सर्वगीर्वाणसन्नुताय नमः॥१०८॥
इति श्री शुक्रशष्टोत्तरशतनामावलिः

VII

WORSHIP OF ŚANI

शनिग्रहावाहनम्॥

शमग्नि रिरिंबिठ शनैश्चर उष्णिक्
शिरिंबिठ ऋषिः। शनैश्चरो देवता। उष्णिक् छन्दः॥

ॐ शमग्निरग्निभिः करच्छन्नस्तपतु सूर्यः।
शं वातो वा त्वरपा अपसृथः॥
प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्॥

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव।
यत्कामास्ते जुहमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्॥

ॐ यमाय सोमं यमो यमोऽनुष्टुप्॥
यमाय सोमं सुनुत यमाय जुहुता हविः।
यमं ह यश्यो गच्छत्यग्निदूतो अरंकृतः॥
भगवान् शनैश्चरग्रहं नीलवर्णं
नीलगंधं नीलपुष्पं नीलमाल्यांबरधरं
नीलच्छत्रध्वजरथपताकादिशोभितं दिव्य
रथसमारूढं मेरुं प्रदक्षिणीकुर्वाणं
चापासनस्थं प्रत्यङ्मुखं गृध्ररथं चतुर्भुजं
शूलायुधधरं सौराष्ट्रदेशाधिपं काश्यपस

गोत्रं विश्वामित्रऋषिं प्रमोदूतसंवत्सरे पुष्यकृष्ण अष्टम्यां स्वतिनक्षत्रे जातं मकरकुंभराश्याधिपं मन्दवारप्रयुक्तं किरीटिनं सुखासीनं पत्नीपुत्रपरिवारसमेतं ग्रहमंडले प्रविष्टम्

अस्मिन्नधिकरणे सूर्यग्रहस्य पश्चिमदिग्भागे धनुराकारमंडले॥

भूः शनैश्चरग्रहं आवाहयामि।
भुवः शनैश्चरग्रहं आवाहयामि।
सुवः शनैश्चरग्रहं आवाहयामि।
भूर्भुवस्सुवः शनैश्चरग्रहं आवाहयामि।
स्थापयामि। पूजयामि॥
शनेर्दक्षिणदिग्भागे प्रजापतिमावाहयामि।
स्थापयामि। पूजयामि।
शनेस्तरदिग्भागे यमं आवाहयामि।
स्थापयामि। पूजयामि॥

शनैश्चरजपम्॥

अस्य श्री शनैश्चरमहामन्त्रस्य उरुमित्र ऋषिः गायत्री छन्दः। शनैश्चरो देवता।
शनैश्चरप्रसादसिध्यर्थे जपे विनियोगः।
शनैश्चरायांगुष्ठाभ्यां नमः हृदयाय नमः।
मंदगतये तर्जनीभ्यां नमः शिरसे स्वाहा।
अधोक्षजाय मध्यमाभ्यां नमः शिखायै वषट्।
सौरये अनामिकाभ्यां नमः कवचाय हुं।

अभयंकराय कनिष्ठिकाभ्यां नमः नेत्रत्रयाय वौषट्।

ऊर्ध्वरोम्णे करतलकरपृष्ठाभ्यां नमः अस्त्राय फट्।

भूर्भुवस्सुवरोमिति दिग्बन्धः॥
ध्यानम्:-
नीलांबरो नीलवपुः किरीटी

गृध्रस्थितः त्रासकरो धनुष्मान्
चतुर्भुजः सूर्यसुतः प्रशांतः
सदाऽस्तु मह्यं वरदः प्रसन्नः।।
लमित्यादि पंचोपचारं कृत्वा। ॐ शमग्निः.....
अपसृथः, यथाशक्ति जपं कृत्वा। पुनः
अंगन्यास करन्यासं कृत्वा। दिग्विमोचनं कुर्यात्।।

शनैश्चरकवचम्।।

अस्य श्री शनैश्चरकवचमहामन्त्रस्य काश्यप ऋषिः। अनुष्टुप् छन्दः। शनैश्चरो देवता। शं बीजं। नं शक्तिः। मं कीलकं।। शनैश्चरकृतपीडापरिहारार्थं जपे विनियोगः।
शनैश्चराय अंगुष्ठाभ्यां नमः हृदयाय नमः।
मंदगतये तर्जनीभ्यां नमः शिरसे स्वाहा
अधोक्षजाय मध्यमाभ्यां नमः शिखायै वषट्।
सौरये अनामिकाभ्यां नमः कवचाय हुं।
शुष्कोदराय कनिष्ठिकाभ्यां नमः नेत्रत्रयाय वौषट्।
छायात्मजाय करतलकरपृष्ठभ्यां नमः अस्त्राय फट्।
भूर्भुवस्सुवरोमिति दिग्बन्धः।।
ध्यानं:-

कृष्णांबरधरं देवं द्विभुजं गृध्रसंस्थितम्।
सर्वपीडाहरं नृणां ध्यायेद्ग्रहगणोत्तमम्।।

शनैश्चरः शिरो रक्षेत् मुखं भक्तार्तिभंजनः।
कर्णौ कृष्णांबरो रक्षेत् नेत्रे सर्वभयंकरः।।

कृष्णांगो नासिकां रक्षेत् कंठं मे शितिकंठकः।
भुजौ मे सुभुजः पातु हस्तौ नीलोत्पलप्रभः।।
पातु मे हृदयं कृष्णः कुक्षिं शुष्कोदरस्तथा।
कटिं मे विकटः पातु सक्थिनी घोररूपवान्।।

जानुनी पातु दीर्घे मे जंघे मे मंगळप्रदः।
गुल्फौ गुणाकरः पातु पादौ मे पद्मपादकः।।

सर्वाण्यपि ममांगनी पातु भास्करनन्दनः।
य इदं कवचं दिव्यं सर्वपीडाहरं नृणाम्।।

पठति श्रद्धया युक्तः सर्वान्कामानवाप्नुयात्।
तिलधान्ये च संस्थाप्य यंत्रं लोहविनिर्मितं।।

कृष्णगंधाक्षतैः पुष्पैः अर्चयन्मूलमन्त्रतः।
कृष्णवस्त्रयुतं दद्यात् श्रोत्रियाय कुटुंबिने।।

प्रीतः शनैश्चरः तस्य सर्वबाधां व्यपोहति।
दद्यात्सर्वसमृद्धिं च पुत्रपौत्रादिसंततिम्।।

आयुष्यं दीर्घमारोग्यं सर्वत्र विजयं दिशेत्
-इति शनैश्चरकवचं संपूर्णम्-

शनैश्चरस्तोत्रं।।

अथ श्री शनैश्चरस्तोत्रमहामन्त्रस्य काश्यप ऋषिः। अनुष्टुप् छन्दः। शनैश्चरो देवता। शं बीजं। नं शक्तिः। मं कीलकं। शनैश्चरग्रहप्रसादसिध्यर्थे जपे विनियोगः:-
शनैश्चराय अंगुष्ठाभ्यां नमः हृदयाय नमः।
मंदगतये तर्जनीभ्यां नमः शिरसे स्वाहा।
अधोक्षजाय मध्यमाभ्यां नमः शिखायै वैषट्।
सौरये अनामिकाभ्यां नमः कवचाय हुं।
शुष्कोदराय कनिष्ठिकाभ्यां नमः नेत्रत्रयाय वौषट्।

छायात्मजाय करतलकरपृष्ठाभ्यां नमः अस्त्राय फट्।
भूर्भुवस्सुवरोमिति दिग्बंधः।।

ध्यानंः-

चापासनो गृध्ररथस्तु नीलः
प्रत्यङ्मुखः काश्यपगोत्रजातः।
सशूलचापेषुगदाधरोऽव्यात्
सौराष्ट्रदेशप्रभवश्च सौरिः।।
नीलांबरो नीलवपुः किरीटी
गृध्रसनस्थो विकृताननश्च
केयूरहारादिविभूषितांगः
सदाऽस्तु मे मन्दगतिः प्रसन्नः।
शनैश्चराय शांताय सर्वाभीष्टप्रदायिने।
नमस्सर्वात्मने तुभ्यं नमो नीलांबराय च।।
द्वादशाष्टमजन्मादि द्वितीयान्तेषु राशिषु।
ये ये मे संगता दोषा सर्वे नश्यन्तु वै प्रभो।।

सूत उवाच।

श्रुणुध्वं मुनयस्सर्वे शनिपीडाहरं शुभं ।
शनिप्रीतिकरं स्तोत्रं सर्वाभीष्टफलप्रदं।।

पुरा कैलासशिखरे पार्वत्यै शंकरेण च।
उपदिष्टं शनिस्तोत्रं प्रवक्ष्यामि तपोधनाः।।

रघुवंशेति विख्यातो राजा दशरथः प्रभुः।
बभूव चक्रवर्ती च सप्तद्वीपाधपो बली।।

कृत्तिकान्ते शनौ याते दैवज्ञैः स्थापितो हि सः।
रोहिणी शकटं भित्वा शनिर्यास्यति सांप्रतम्।।

इत्थं शकटभेदेन सुरासुरभयंकरः।
द्वादशाब्दं तु दुर्भिक्षं भविष्यति सुदारुणम्।।

देशाश्च नगरग्रामाः भयभीताः समंततः।
ब्रुवंति सर्वलोकानां भयमेतत्समागमम्।।

एवमुक्तस्ततो वाक्यं मन्त्रिभिः सः पार्थिवः।
व्याकुलं तु जगद्दृष्टववा पौरजानपदादिकं।।

पप्रच्छ प्रयतो राजा वसिष्ठप्रमुखान् ऋषीन्।
समाधानं किमस्यास्ति ब्रूत मे मुनिसत्तमाः।।

प्रजानां परिराक्षायै सर्वज्ञाः सर्वदर्शिनः।
तच्छुत्वा मुनयससर्वे प्रोचुरस्य बलं महत्।।

शनैश्चरेण शकटे तस्मिन् भिन्ने कुतः प्रजाः।
अयं योगो ह्यसाध्यस्तु शक्रब्रह्मादिभिस्तदा।।

स तु संचिंत्य मनसा सहसा पुरुषर्षभः।
समाधाय धनुर्दिव्यं दिव्यायुधसमन्वितम्।।

रथमारुह्य वेगेन गतो नक्षत्रमंण्डलम्।
सपादयोजनं लक्षं सूर्यस्योपरि संस्थितम्।।

रोहिणीं पृष्ठतः स्थाप्य राजा दशरथस्तदा।
रथे तु कांचने दिव्ये सर्वरत्नविभूषिते।।

हंसवर्णहयैर्युक्ते महाकेतुसमुच्छ्रिते।
दीप्यमानो महारक्तं किरीटकटकादिभिः।।

बभ्राज स तदाकाशे द्वितीय इव भास्करः।
आकर्णपूर्णचापेन संहारास्त्रं न्ययोजयत्।।

संहारास्त्रं शनिर्दृष्ट्वा सुरासुरभयंकरं।
कृत्तिकांते तदास्थित्वा प्रविशन्किल रोहिणीं।।

दृष्ट्वा दशरथं चाग्रे तस्थौ सः भृकुटीमुखः।
हसित्वा तद्भयात्सौरिः इदं वचनमब्रवीत्॥
पौरुषं तव राजेन्द्र सुरासुरभयंकरम्।
देवासुरमनुष्याश्च सिद्धविद्याधरोरगाः॥
मयाऽवलोकितास्सर्वे दैन्यमाशु व्रजन्ति ते।
तुष्टोऽहं तव राजेन्द्र तपसा पौरुषेण च॥
वरं बूहि प्रदास्यामि मनसा यदभीप्सितम्।

दशरथ उवाच।

प्रसादं कुरु मे सौरे वरदो यदि मे स्थितः॥
अद्यप्रभृति मे राष्ट्रे पीडा कार्या न कस्यचित्।
रोहीणीं भेदयित्वा तु न गंतव्यं त्वया शने॥
सरितस्सागरास्सर्वे यावच्चन्द्रार्कमेदिनी।
द्वादशाब्दं तु दुर्भिक्षं न कदाचित् भविष्यति॥
वाचितं तु मया सौरे नान्यदिच्छाम्यहं वरं।
एवमस्त्विति सुप्रीतो वरं प्रादात्तु शाश्वतं॥
कीर्तिरिषा त्वदीया च त्रैलोक्ये संभविष्यति।
प्राप्य चैनं वरं राजा कृतकृत्योऽभवत्तदा॥
एवं वरं तु संप्राप्य हृष्टरोमा च पार्थिवः।
रथोपस्थे धनुः प्राप्य भूत्वा चैव कृतांजलिः॥
ध्यात्वा सरस्वतीं देवीं गणनाथं विनायकं॥
राजा दशरथः स्तोत्रं सौरेरिदमथाऽकरोत्।

दशरथ उवाच।

नमः कृष्णाय नीलाय शितिकंठनिभाय च॥
नमो नीलमुखाब्जाय नीलोत्पलनिभाय च।
नमो निर्मांसदेहाय दीर्घश्मश्रुजटाय च॥
नमो विंशालनेत्राय शुष्कोदर भयानक।
नमः परुषनेत्राय स्थूलरोम्णे नमो नमः॥
नमो नित्यं क्षुधार्ताय अतृप्ताय नमो नमः।
नमो दीर्घाय शुष्काय कालदंष्ट्राय ते नमः॥
नमो घोराय रौद्राय भीषणाय कराळिने।
नमस्ते सर्वभक्षाय वलीमुख नमोऽस्तु ते॥
सूर्यपुत्र नमस्तेऽस्तु भास्कराभयदायिने।
अधोदृष्टे नमस्तेऽस्तु संवर्तक नमो नमः॥
नमो मंदगतये तुभ्यं निष्प्रभाय नमो नमः।
नमो दुस्सहदेहाय नित्यं योगरताय च॥
ज्ञानदृष्टे नमस्तेऽस्तु कश्यपात्मजसूनवे।
तुष्टो ददसि त्वं राज्यं क्रुद्धो हरसि तत्क्षणात्॥
देवासुरमनुष्याश्च सिद्धविद्याधरोरगाः॥
त्वयावलोकितास्सर्वे दैन्यमाशु व्रजंति ते।
ब्रह्मा शक्रो यमश्चैव ऋषयस्सप्तसागराः॥
राज्यभ्रष्टा भवंतीह तव दृष्ट्यावलाकिताः।
देशाश्च नगरग्रामाः द्वीपाश्च निरयस्सदा॥
सरितास्सागरास्सर्वे नाशं याति समन्ततः।
प्रसादं कुरु मे सौरे वरदोऽसि महाबल॥
एवमुक्तः तदा सौरिः ग्रहराजो महाबलः।
अव्रवीच्च शनिर्वाक्यं हृष्टरोमा स भास्करिः॥

शनिरुवाच।

तुष्टोऽहं तव राजेन्द्र स्तोत्रेणानेन सुव्रत।
वरं ब्रूहि प्रदास्यामि मनसा यदभीष्टितम्॥

दशरथ उवाच।

प्रसन्ना यदि मे सौरे पीडां कुरु न कस्यचित्।
देवासुरमनुष्याणां पशुपन्नगपक्षिणाम्।।

शनिरुवाच।

ग्रहणाच्च ग्रहाक्षेभाः ग्रहाः पीडाकर स्मृताः।
अदेयोऽपि वरोऽस्माभिः तुष्टोऽहं तु ददामि ते।।

देवासुरमनुष्याश्च सिद्धविद्यधरोरगाः।
पशुपक्षिमृगा वृक्षाः पीडां मुंचंतु सर्वदा।।

त्वया प्रोक्तं इदं स्तोत्रं यः पठेदिह मानवः।
एककालं क्वचित्कालं पीडां मुंचामि तस्य वै।।

मृत्युस्थानगतो वाऽपि जन्मव्ययगतोऽपि वा।
पठति श्रद्धया युक्तः शुचिस्नात्वा समाहितः।।

शमीपत्रैः समभ्यर्च्य प्रतिमां लोहजां मम।
माषौदनं तिलैर्मिश्रं दद्याल्लोहं तु दक्षिणां।।

कृष्णां गां महिषीं वस्त्रं मामुद्दिश्य द्विजातये।
मद्दिनेतु विशेषेण स्तोत्रेणानेन पूजयेत्।।

पूजयित्वा जपेत् स्तोत्रं भूत्वा चैव कृतांजलिः।
तस्य पीडा न चैवाहं करिष्यामि कदाचन।।

गोचरे जन्मलग्ने वा दशासु अन्तर्दशासु च।
रक्षामि सततं तस्य पीडास्वन्यग्रहस्य च।।

अनेनैव प्रकारेण पीडामुक्तं जगद् भवेत्।

सूत उवाच-

वरद्वयं तु संप्राप्य राजा दशरथस्तदा।।

मेने कृतार्थमात्मानं नमस्कृत्य शनैश्चरं।
शनिना चाभ्यनुज्ञातः स्वस्थानमगमन्नृपः।।

स्वस्थानं च ततो गत्वा प्राप्तकामोऽभवत्तदा।
कोणं शनैश्चरो मंदः छाया हृदयनन्दनः।।
मार्ताण्डजस्तथा शौरिः पातंगिग्रहनायकः।
ब्रह्मण्यः क्रूरकर्मा च नीलवस्त्रांजनद्युतिः।
द्वादशैतानि नामानि यः पठेच्च दिने दिने।।

विषमस्थोऽपि भगवान् सुप्रीतस्तस्य जायते।
मंदवारे शुचिस्नात्वा मिताहारो जितेन्द्रियः।।

तद्वर्णकुसुमैर्युक्तं सर्वांगं द्विजसत्तमः।
पूजयित्वाऽन्नपानाद्यैः स्तोत्रं यः प्रयतः पठेत्।।

पुत्रकामो लभेत् पुत्रं धनकामो लभेद् धनम्।
राज्यकामो लभेद्राज्यं जयार्थी विजयी भवेत्।।

आयुष्कामो लभेदायुः श्रीकामः श्रियमाप्नुयात्।
यद्यद् भवति तत्सर्वं ददाति च न संशयः।।

इति दशरथमहाराजकृत शनैश्चर
स्तोत्रं संपूर्णम्।।

शन्यष्टोत्तरशतनामावळिः।।

ॐ शनैश्चराय नमः।
ॐ शांताय नमः।
ॐ सर्वाभीष्टप्रदायिने नमः।
ॐ शरण्याय नमः।
ॐ वरेण्याय नमः।
ॐ सर्वेशाय नमः।
ॐ सैम्याय नमः।
ॐ सुरवंद्याय नमः।
ॐ सुरलोकविहारिणे नमः।
ॐ सुखासनोपविष्टाय नमः।। (१०)

ॐ सुन्दराय नमः।
ॐ घनाय नमः।
ॐ घनरूपाय नमः।
ॐ घनाभरणधारिणे नमः।
ॐ खद्योताय नमः।
ॐ मन्दाय नमः।
ॐ मन्दचेष्टाय नमः।
ॐ महनीयगुणत्मने नमः।
ॐ मर्त्यपावनपादाय नमः।। (२०)

ॐ महेशाय नमः।
ॐ छायापुत्राय नमः।
ॐ शर्वाय नमः।
ॐ शततूणीरधारिणे नमः।
ॐ चरस्थिरस्वभावाय नमः।
ॐ चंचलाय नमः।
ॐ नीलवर्णाय नमः।
ॐ नित्याय नमः।
ॐ नीलांजननिभाय नमः।
ॐ नीलांबरविभूषाय नमः।। (३०)

ॐ निश्चलाय नमः।
ॐ वेद्याय नमः।
ॐ विधिरूपाय नमः।
ॐ विरोधाधारभूमये नमः।
ॐ वेदास्वादस्वभावाय नमः।
ॐ वज्रदेहाय नमः।
ॐ वैराग्यदाय नमः।
ॐ वीराय नमः।
ॐ वीतरोगभयाय नमः।
ॐ विपत्परंपरेशाय नमः।। (४०)

ॐ विश्ववन्द्याय नमः।
ॐ गृध्रवाहनाय नमः।
ॐ गूढाय नमः।
ॐ कर्मांगाय नमः।
ॐ कुरूपिणे नमः।
ॐ कुत्सिताय नमः।
ॐ गुणाढ्याय नमः।
ॐ गोचराय नमः।
ॐ अविद्यामूलनाशनाय नमः।
ॐ विद्याऽविद्यास्वरूपिणे नमः।। (५०)

ॐ आयुष्यकारणाय नमः।

ॐ आपदुद्धर्ते नमः।
ॐ विष्णुभक्ताय नमः।
ॐ वशिने नमः।
ॐ विविधागमवेदिने नमः।
ॐ विधिस्तुत्याय नमः।
ॐ वन्द्याय नमः।
ॐ विरूपाक्षाय नमः।
ॐ वरिष्ठाय नमः।
ॐ गरिष्ठाय नमः।। (६०)

ॐ वज्रांकुशधराय नमः।
ॐ वरदाय नमः।
ॐ अभयहस्ताय नमः।
ॐ वामनाय नमः।
ॐ ज्येष्ठापत्नीसमेताय नमः।
ॐ श्रेष्ठाय नमः।
ॐ मितभाषिणे नमः।
ॐ कष्टौघनाशिने नमः।
ॐ आर्यपुष्टिदाय नमः।
ॐ स्तुत्याय नमः।। (७०)

ॐ स्तोत्रकामाय नमः।
ॐ भक्तिवश्याय नमः।
ॐ भानवे नमः।
ॐ भानुपुत्राय नमः।
ॐ भव्याय नमः।
ॐ पावनाय नमः।
ॐ धनुर्मंडलसंस्थिताय नमः।
ॐ धनदाय नमः।
ॐ धनुष्मते नमः।
ॐ तनुप्रकाशदेहाय नमः।। (८०)

ॐ तामसाय नमः।
ॐ अशेषजनवंद्याय नमः।
ॐ विशेषफलदायिने नमः।
ॐ वशीकृतजनेशाय नमः।
ॐ पशूनां पतये नमः।
ॐ खेचराय नमः।
ॐ घननीलांबराय नमः।
ॐ काठिन्यमानसाय नमः।
ॐ आर्यगणस्तुताय नमः।
ॐ नीलच्छत्राय नमः।। (९०)

ॐ नित्याय नमः।
ॐ निर्गुणाय नमः।
ॐ गुणात्मने नमः।
ॐ निरामयाय नमः।
ॐ निन्द्याय नमः।
ॐ वन्दनीयाय नमः।
ॐ धीराय नमः।
ॐ दिव्यदेहाय नमः।
ॐ दीनार्तिहरणाय नमः।
ॐ दैन्यनाशनाय नमः।। (१००)

ॐ आर्यजनगण्याय नमः।
ॐ क्रूराय नमः।
ॐ क्रूरचेष्टाय नमः।
ॐ कामक्रोधकाराय नमः।
ॐ कळत्रपुत्रशत्रुत्वकारणाय नमः।
ॐ परितोषितभक्ताय नमः।
ॐ परभीतिहराय नमः।
ॐ भक्तसंघमनोभीष्टफलदाय नमः।। (१०५)

इति शनैश्चरशतनामावलिः।।

VIII

WORSHIP OF RĀHU

राहुग्रहावाहनम्।।

कयानो वामदेवो राहुर्गायत्री।
वामदैवऋषिः। राहुर्देवता। गायत्री छंदः। राहु ग्रहप्रसादसिध्यर्थे राहुग्रहावाहने विनियोगः।
ॐ कयानश्चित्र आभुव दूती सदा वृधस्सखा।
कया शचिष्टया वृता।।
आयं गौस्सार्पराज्ञिस्सर्पो गायत्री।
ॐ आयं गैः पृष्नीरक्रमीदसदन्मातरं पुरः।
पितरं च प्रयन्त्स्वः।।
परं मृत्युस्संकुशको मृत्युः त्रिष्टुप्।
ॐ परं मृत्यो अनु परेहि पन्थां यस्ते स्व इतरो देवयानात्। चक्षुष्मते श्रुण्वते ते ब्रवीमि मानः प्रजां रीरिषो मोत वीरान्।।

भगवान् राहुग्रहं नीलवर्णं नीलगंधं नीलपुष्पं नीलमाल्यांबरधरं नीलच्छत्र ध्वजरथपताकादिशोभितं दिव्यरथ समारूढं मेरुं अप्रदक्षिणी कुर्वाणं सिंहासने निऋतिमुखं शूर्पासनस्थं चतुर्भुजं कराळवक्त्रं खड्गचर्मवरकरं

पैठीनसगोत्रं बर्बरदेशाधिपं राक्षससंवत्सरे भाद्रपद कृष्ण चतुर्दश्यां हस्तानक्षत्रे जातं भानुवासरे सिंहराशिप्रयुक्तं किरीटिनं पत्नीपुत्रपरिवारसमेतं ग्रहमडंले प्रविष्टं आस्मिन्नधिकरणे सूर्यग्रहस्य निऋतिदिग्भागे शूर्पाकारमंडले

भूः राहुग्रहमावाहयामि।
भुवः राहुग्रहमावाहयामि।
सुवः राहुग्रहमावाहयामि।

भूर्भुवस्सुवः राहुग्रहमावाहयामि। स्थापयामि। पूजयामि।।

राहुग्रहस्य दक्षिणदिग्भागे सर्प देवतामावाहयामि स्थापयामि । पूजयामि।

राहुग्रहस्य उत्तरदिग्भागे मृत्युं आवाहयामि स्थापयामि। पूजयामि।।

राहु जपम्।।

अस्य श्री राहुमहामन्त्रस्य वामदेव ऋषिः। गायत्री छन्दः। राहुर्देवता। राहुग्रहप्रसादसिध्यर्थे जपे विनियोगः धूम्रवर्णाय अंगुष्टाभ्यां नमः हृदयाय नमः। कराळवदनाय तर्जनीभ्यां नमः शिरसे स्वाहा। खंडवराय मध्यमाभ्यां नमः शिखायै वषट्। महाशूराय अनामिकाभ्यां नमः कवचाय हुं। त्रिशूलधराय कनिष्ठिकाभ्यां नमः नेत्रत्रयाय वौषट्। नीलसिंहासनस्थाय करतलकरपृष्ठभ्यां नमः अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्बन्धः।।

ध्यानम्-

कराळवदनं खड्गचर्मशूलवरान्वितम्
नीलसिहांसनं राहुं ध्यायेद्रोगोपशांतये।।

समित्यादि पंचोपचार पूजां कृत्वा। कयान......वृता

यथाशक्ति जपं कृत्वा। पुनः अंगन्यास करन्यासं कृत्वा। दिग्विमोचनं कुर्यात्।।

राहुकवचम्।।

अस्य श्री राहुकवचस्तोत्रमहामन्त्रस्य। चन्द्र ऋषिः। अनुष्टुप् छन्दः। राहुर्देवता। राहुग्रह प्रसादसिध्यर्थे जपे विनियोगः-

रं इत्यादि अंगन्यास करन्यासं कुर्यात्।

भूर्भुवस्सुवरोमिति दिग्बन्धः।

ध्यानम्।

प्रणमामि सदा राहुं सर्पाकारं किरीटिनं।
सैंहिकेयं कराळास्यं भक्तानामभयप्रदं।।

राहुं चतुर्भुजं चर्मखड्गशूलवरांकितम्।
कृष्मामाल्यांबरधरं कृष्मगंधानुलेपनम्।।

गोमेधकविभूषं च विचित्रमकुटोज्वलम्।
कृष्णसिंहरथं यान्तं मेरुं चैव प्रदक्षिणम्।।

नीलांबरो शिरः पातु ललाटं लोकवंदितः।
चक्षुषी पातु मे राहुः श्रोत्रमर्धशरीरवान्।।

नासां पातु कराळास्यः शूलपाणिर्मुखं मम।
जिह्वां मे सिहिंकासूनुः कंठं मे कष्टनाशनः।।

भुजंगेशो भुजौ पातु नीलमाल्यः करौ मम।
पातु वक्षः तपोमूर्तिः पातु नाभिं विदुंतुदः।।

कटिं मे विकटः पायात् ऊरू मे सुरपूजितः।
स्वर्भानुर्जानुनी पातु जंघे मे पातु चाव्यथः।।

गुल्फौ ग्रहाधिपः पातु नीलचंदनभूषितः।
पादौ नीलांबरः पातु सर्वांगं सिहिंकासुतः।।

प्रातः भुजंगमः पातु संगवे सिहिंकासुतः।
मध्यान्हे पातु मां राहुः सायं सप्ताश्वमर्दनः।।
प्रदोषे पन्नगः पायात् अर्धरात्रे अर्धविग्रहः।।
सुरारिस्सर्वदा पायात् दुर्गान्मां दानवोऽवतु।।
राहोरिदं कवचं ईप्सितदायकं यः
भक्त्या पठेदनुदिनं नियतांतरात्मा।
प्राप्नोति कीर्तिममलं सममृद्धिमिष्टाम्
आरोग्यमायुरतुलं विरुजं शरीरम्।।
-इति राहुकवचम् संपूर्णम्-

राहुस्तोत्रम्।।

अस्य श्री राहुस्तोत्रमहामन्त्रस्य वामदेव ऋषिः। अनुष्टुप् छदः। राहुर्देवता। मम राहुग्रहप्रसाद सिध्यर्थे जपे विनियोगः

काश्यप उवाच

श्रुण्वन्तु मुनयस्सर्वे राहुप्रीतिकरं स्तवं।
सर्वरोगप्रशमनं विषभीतिहरं परम्।।

सर्वसंपत्करं चैव गुह्यमेतदनुत्तमम्।
आदरेण प्रवक्ष्यामि श्रूयतामवधानतः।।

राहुस्सूर्यरिपुश्चैव विषज्वाली भयाननः।
सुधांशुवैरी श्यामात्मा विष्णुचक्रांकितो बली।।

भुजंगेशः तीक्ष्णदंष्ट्रः क्रूरकर्मा ग्रहाधिपः।
द्वादशैतानि नामानि नित्यं यो नियतः पठेत्।।

जप्त्वाऽतु प्रतिमां रम्यां सीसजां माषसुस्थितां।
नीलगन्धाक्षतैः पुष्पैः भक्त्या संपूज्य यत्नतः।।

विधिना वह्निमादाय दूर्वानाज्याहुतिः क्रमात्।
तन्मन्त्रेण जुहुयात् यावदष्टोत्तरं शतं।।
हुत्वैनं भक्तिमान् राहुं प्रार्थयेद्ग्रहनायकं।
सर्वापद्विनिवृत्यर्थं प्रांजलिः प्रणतो नरः।।

राहो कराळवदन रविचन्द्रभयंकर।
तमोरूप नमस्तुभ्यं प्रसादं कुरु सर्वदा।।

सिहिंकासुत सूयरि सिद्धगंधर्वपूजित।
सिंहवाह नमस्तुभ्यं सर्वान् रोगान् निवारय।।

कृपाणफलकाहस्त त्रिशूलिन् वरादायक।
करालातिकरालास्य गदान्मे नाशयाखिलान्।।

स्वर्भानो सर्पवदन सुधाकरविमर्दन।
सुरासुरवरस्तुत्य सर्वदा त्वं प्रसीद मे।।

इति संप्रार्थितो राहुः दुष्टस्थानगतोऽपि वा।
सुप्रीतो जायते तस्य सर्वान् रोगान् विनाशयेत्।।

विषात् जायते भीतिः महाभीतस्य का कथा।
सर्वान् कामान् अवाप्नोति नष्टं राज्यमवाप्नुयात्।।

एवं पठेदनुदिनं स्तवराजमेतं मर्त्यः प्रसन्नहृदयः विजितेन्द्रियो यः।
आरोग्यमायुरतुलं लभते सुपुत्रान् प्राप्ताचरं च विषमाश्च ग्रहाः प्रसन्नाः।।

इति राहुस्तोत्रं संपूर्णम्।।

राह्वष्टोत्तरशतनामावलिः।।

ॐ राहवे नमः।
ॐ सैंहिकेयाय नमः।
ॐ विदुन्तुदाय नमः।
ॐ सुरशत्रवे नमः।
ॐ तमसे नमः।
ॐ प्रणये नमः।
ॐ गार्ग्याननाय नमः।
ॐ सुरागवे नमः।
ॐ नीलजीमूतसंकाशाय नमः।
ॐ चतुर्भुजाय नमः।। (१०)

ॐ खग्डखेटकधारिणे नमः।
ॐ वरदायकहस्ताय नमः।
ॐ शूलायुधाय नमः।
ॐ मेघवर्णाय नमः।
ॐ कृष्णध्वजपताकवंते नमः।
ॐ दक्षिणाशामुखरथाय नमः।
ॐ तीक्ष्णदंष्ट्राकराय नमः।
ॐ शूर्पाकारासनस्थाय नमः
ॐ गोमेदाभरणप्रियाय नमः।
ॐ माषप्रियाय नमः।।२०।।

ॐ काश्यपर्षिनन्दनाय नमः।
ॐ भुजगेश्वराय नमः।
ॐ उल्कापातयित्रे नमः।
ॐ शूलनिधिपाय नमः।
ॐ कृष्णसर्पराज्ञे नमः।
ॐ वृषत्वलाव्रतास्याय नमः।
ॐ अर्धशरीराय नमः।
ॐ जाड्यप्रदाय नमः
ॐ रवीन्दुभीकराय नमः।
ॐ छायास्वरूपिणे नमः ।।३०।।

ॐ कठिनांगाय नमः।
ॐ द्विषचक्रभेदकाय नमः।
ॐ करालास्याय नमः।
ॐ भयंकराय नमः।
ॐ क्रूरकर्मणे नमः।
ॐ तमोरूपाय नमः।
ॐ श्यामात्मने नमः।
ॐ नीललोहिताय नमः।
ॐ किरीटिने नमः।
ॐ नीलवसनाय नमः।।४०।।

ॐ शनिसामन्तवर्त्मगाय नमः।
ॐ चण्डालवर्णाय नमः।
ॐ आत्मर्क्षभवाय नमः।
ॐ मेषभवाय नमः।
ॐ शनिवत्फलदाय नमः।
ॐ शूलाय नमः।
ॐ अपसव्यगतये नमः।
ॐ उपरागकराय नमः।
ॐ सूर्येन्दुच्छविह्लादकराय नमः।
ॐ नीलपुष्पविहाराय नमः।।५०।।

ॐ ग्रहश्रेष्ठाय नमः।
ॐ अष्टमग्रहाय नमः।

Sūrya (stone sculpture by Syama-Sundar Bhatt)

RĀŚI CHAKRA

ॐ कबन्धमात्रदेहाय नमः।
ॐ यातुधानकुलोद्भवाय नमः।
ॐ गोविन्दवरपात्राय नमः।
ॐ देवजतिप्रविष्टकाय नमः।
ॐ क्रूराय नमः
ॐ घोराय नमः
ॐ शनेर्मित्राय नमः
ॐ शुक्रमित्राय नमः ॥६०॥
ॐ अगोचराय नमः
ॐ मौनये नमः
ॐ गंगास्नानदात्रे नमः
ॐ स्वगृहे भूबलाढ्याय नमः
ॐ स्वगृहेऽन्यबलहृते नमः।
ॐ मातामहकारकाय नमः।
ॐ चंद्रयुतचांडालजन्मसूचकाय नमः।
ॐ जन्मसिंहाय नमः।
ॐ राज्यदात्रे नमः।
ॐ महाकायाय नमः॥७०॥
ॐ जन्मकर्त्रे नमः।
ॐ राज्यधात्रे नमः।
ॐ मत्तकाज्ञानदाय नमः।
ॐ जन्मकान्याराज्यदात्रे नमः।
ॐ जन्महानिदाय नमः।
ॐ नवमे पित्ररोगाय नमः।
ॐ पंचमे शोकदायकाय नमः।
ॐ द्यूने कळत्र हन्त्रे नमः।
ॐ सप्तमे कलहप्रदाय नमः।
ॐ षष्ठे वित्तदार्त्रे नमः॥८०॥
ॐ चतुर्थे वेरदात्रे नमः।
ॐ नवमे पापदात्रे नमः।
ॐ दशमे शोकदात्रे नमः।
ॐ आदौ यशःप्रदात्रे नमः।
ॐ अंते वैरप्रदात्रे नमः।
ॐ कलात्मने नमः।
ॐ गोचराचराय नमः।
ॐ धने ककुत्प्रदाय नमः।
ॐ पंचमे दृषणश्रृंगदाय नमः।
ॐ स्वर्भानवे नमः॥९०॥
ॐ बलिने नमः।
ॐ महासौख्यप्रदात्रे नमः।
ॐ चन्द्रवैरिणे नमः।
ॐ शाश्वताय नमः।
ॐ सूरशत्रवे नमः।
ॐ पापग्रहाय नमः।
ॐ पूज्यकाय नमः।
ॐ पाठीरपुरनाथाय नमः।
ॐ पैठीनसकुलोद्भवाय नमः।
ॐ भक्तरक्षाय नमः॥१००॥
ॐ राहुमूर्तये नमः।
ॐ सर्वाभीष्टफलप्रदाय नमः।
ॐ दीर्घाय नमः।
ॐ कृष्णाय नमः।
ॐ अशिरसे नमः।
ॐ विष्णुनेत्रारये नमः।
ॐ देवाय नमः।
ॐ दानवाय नमः॥१०८॥

-इति राहु अष्टोत्तर शतनामावलिः॥

IX

WORSHIIP OF KETU

केतुग्रहावाहनम्।।

केतुं कृण्वन् मधुच्छन्दा केतुर्गायत्री।
मधुच्छन्द ऋषिः। केतुर्देवता। गायत्री छन्दः।
केतुग्रहप्रसादसिध्यर्थे केतुग्रहावाहने विनियेगः।
ॐ केतुं कृण्वन्न केतवे पेशोमर्या अपेशसे।।
समुषद्भिराजा यथाः।
ब्रह्मजज्ञानं नकुलो ब्रह्मात्रिष्टुप्।
ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आ वः। स बुध्न्या उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः।।
सचित्रचित्रं भरद्वाजः चित्रगुप्तः त्रिष्टुप्।
ॐ सचित्रचित्रं चितयंतमस्मे चित्रक्षत्र चित्रतमं वयोधाम्। चन्द्रं रयिं पुरू वीरं बृहन्तं चन्द्र चन्द्राभिगृहणते युवस्व।
भगवन्तो केतगणं चित्रवर्णं चित्रगंधं चित्रपुष्पं चित्रमाल्यांबरधरं चित्रच्छत्रध्वजरथपताकादिशोभितं दिव्यरथसमारूढं मेरुं अप्रदक्षिणीकुर्वाणं ध्वजासनस्थं दक्षिणाभिमुखं अंतर्वेदिदेशाधिपं द्विबाहुं गदाधरं जैमिनिगोत्रं राक्षसचैत्रकृष्ण चतुर्दश्यां रेवतीनक्षत्रे जातं इन्दुवासरे कर्कटराशिप्रयुक्तं सिंहासनासीनं ग्रहमंडले प्रविष्टम् आस्मिन्नधिकरणे सूर्यग्रहस्य वायाव्य दिग्भागे ध्वजाकारमंडले।
भूः केतुग्रहमावाहयामि।
थुवः केतुग्रहमावाहयामि।
सुवः केतुग्रहमावाहयामि।
भूर्भुवस्सुवः केतुग्रहमावाहयामि।
स्थापयामि।

पूजयामि।

केतुग्रहस्य दक्षिणे ब्रह्माणमावाहयामि। स्थापयामि।
पूजयामि।
केतुग्रहस्य उत्तरदिग्भागे चित्रगुप्तं आवाहयामि। स्थापयामि। पूजयामि।।

केतुजपम्।।

अस्य श्री केतुमहामन्त्रस्य जयछन्द ऋषिः। गायत्री छन्दः। केतुर्देवता। केतुग्रहप्रसाद सिध्यर्थे जपे विनियोगः।

धूम्रवर्णाय अंगुष्ठाभ्यां नमः हृदयाय नमः द्विबाहवे तर्जिनीभ्यां नमः शिरसे स्वाहा। केतवे मध्यमाभ्यां नमः शिखायै वषट्।

विकृताननाय अनामिकाभ्यां नमः कवचाय हुं। गृध्रासानाय कनिष्ठिकाभ्यां नमः नेत्रत्रयाय वौषट्।

लंबकाय करतलकरपृष्ठाभ्यां नमः अस्त्राय फट्।

भूर्भुवस्सुवरोमिति दिग्वंधः।।

ध्यानम्।

धूम्रवर्णं द्विबाहुं च केतुं च विकृताननम्।
गृध्रासनगतं नित्यं ध्यायेत्सर्वफलावाप्तये।।

लमित्यादि पंचोपचारपूजां कृत्वा। ऊँ केतुं..... अजायथाः। यथाशक्ति जपित्वा पुनः अंगन्यास करन्यासं कृत्वा दिग्विमोचनं कुर्यात्।।

केतुकवचम्।।

अस्य श्री केतुकवचस्तोत्रमहामन्त्रस्य पुरंदर ऋषिः। अनुष्टुप् छन्दः। केतुर्देवता। केतुग्रहप्रसादसिध्यर्थे जपे विनियोगः। धूम्रवर्णायादि स्तोत्रवत्।।

ध्यानम्।।

धूम्रवर्णं ध्वजाकारं गदावरकरद्वयं।
चित्रांबरं भजे केतुं चित्रगंधानुलेपनम्।।

वैडूर्यरत्नाभरणं वैडूर्यमकुटोज्वलम्।
चित्रं कपोतमारुह्य मेरुं यान्तं अदक्षिणम्।।

केतुं करालवदनं किरीटकटकोज्वलम्।
प्रणमामि सदा देवं ध्वजाकारं ग्रहेश्वरं।।

चित्रवर्णः शिरः पातु फालं मे धूम्रवर्णकः।
पातु नेत्रे पिंगळाक्षः श्रुती मे रक्तलोचनः।।

घ्राणं पातु सुवर्णाभः वदनं सिंहिकासुतः।
पातु कंठं सदा केतुः स्कन्धौ पातु ग्रहाधिपः।।

बाहू पातु सुरश्रेष्ठो कुक्षिं पातु महोदरः।
कटिं कपोतवाहो मे नाभिं नतजनावनः।।

ऊरू पातु महाशीर्षः जानुनी च प्रकोपनः।
पातु पादौ पापहारी सर्वांगं सूर्यमर्दनः।।

प्रातः पातु ग्रहाधीशः संगवे सिंहिकासुतः।
मध्यान्हे मुनिवन्द्यो मां सायं सुरनतोऽवतु।।

प्रदोषे पूर्वदेवो मां निशीथे च निशाकरः।
संध्यायां सुरशत्रुर्मां सदा केतुश्च पातु मां।।

य इदं कवचं केतोः सर्वरोगविनाशनं।
भक्तियुक्तः पठेन्नित्यं सर्वदुःखैः प्रमुच्यते।।

इति केतुकवचम् संपूर्णम्।।

केतुस्तोत्रम्।।

अस्य श्री केतुस्तोत्रमहामन्त्रस्य वामदेव ऋषिः। अनुष्टुप् छन्दः। केतुर्देवता। केतुप्रसादसिध्यर्थे जपे विनियोगः।।

गौतम उवाच।

मुनीन्द्र सूत सर्वज्ञ सर्वशास्त्रविशारद।
सर्वरोगहरं ब्रूहि केतोः स्तोत्रमनुत्तमम्।।

सूत उवाच।

श्रुणु गौतम वक्ष्यामि स्तात्रमेतदनुत्तमम्।
गुह्याद् गुह्यतमं केतोः ब्रह्मणा कीर्तितं पुरा।।

आद्यः करालवदनो द्वितीयः रक्तलोचनः।
तृतीयः पिंगळाक्षश्च चतुर्थो ज्ञानदायकः।।

पंचमः कपिलाक्षश्च षष्ठः कालाग्निसन्निभः।
सप्तमो हिमगर्भश्च धूम्रवर्णोऽष्टमस्तथा।।

नवमः कृत्तकंठश्च दशमो नरपीठगः।
एकादशस्तु श्रीकंठः द्वादशस्तु गदायुधः।।

द्वादशैते महाक्रूराः सर्वोपद्रवकारकाः।
पर्वकाले पीडयंति दिवाकरनिशाकरौ।।

नामद्वादशकं स्तोत्रं केतोरेतन्महात्मनः।

पठंति ये त्वहः भक्त्या तेभ्यः केतुः प्रसीदति।।

कुलुत्थधान्ये विलिखेत् षट्कोणं मंडलं शुभं।
पद्ममष्टदळं तत्र विलिखेच्च विधानतः।।

स्तोत्रमेतत्पठित्वा च ध्यायन् केतुं वरप्रदं।
ब्राह्मणं श्रोत्रियं शांतं पूजयित्वा कुंटुबिनम्।।

नीलं घठं ज संस्थाप्य दिवाकरनिशाकरौ।
केतुं च तत्र निक्षिप्य पूजयित्वा विधानतः।।

केतोः करालवक्त्रस्य प्रतिमां वस्त्रसंयुतां।
कुंभादिभिश्च संयुक्तां चित्रा तारे प्रदापयेत्।।

दानेनानेन सुप्रीतः केतुः स्यात्तस्य सौख्यदः।
वत्सरं प्रयतोभूत्वा पूजयित्वा विधानतः।।

मूलमष्टोत्तरशतं ये जपंति नरोत्तमाः।
तेषां केतुः प्रसादेन न कदाचित् भयं भवेत्।।

इति केतुस्तोत्रं संपूर्णम्।।

केत्वष्टोत्तरशतनामावलिः।

ॐ केतवे नमः।
ॐ स्थूलशिरसे नमः।
ॐ शिरोमात्राय नमः।
ॐ ध्वजाकृतये नमः।
ॐ नवग्रहयुताय नमः।
ॐ सिंहिकागर्भसंभवाय नमः।
ॐ महाभीतिकराय नमः।
ॐ चित्रवर्णाय नमः।
ॐ पिंगळाय नमः।
ॐ फलधूम्रसंकाशाय नमः॥१०॥

ॐ तीक्ष्णदंष्ट्राय नमः।
ॐ महोरगाय नमः।
ॐ रक्तनेत्राय नमः।
ॐ चित्रकारिणे नमः।
ॐ महासुराय नमः।
ॐ तीव्रकोपाय नमः।
ॐ पापकंटकाय नमः।
ॐ क्रोधनिधये नमः।
ॐ छायाग्रहविशेषकाय नमः।
ॐ अंत्यग्रहाय नमः॥२०॥

ॐ महाशीर्षाय नमः।
ॐ सूर्यारये नमः।
ॐ पुष्पवत्ग्रहिणे नमः।
ॐ वरहस्ताय नमः।
ॐ गदापाणये नमः।
ॐ चित्रशुभ्रधराय नमः।
ॐ चित्रध्वजपताकाय नमः।
ॐ घोराय नमः।
ॐ चित्ररथाय नमः।
ॐ शिखिने नमः॥३०॥

ॐ कुलुत्थभक्षकाय नमः।
ॐ वैडूर्याभरणाय नमः।
ॐ उत्पातजनकाय नमः।
ॐ शुक्रमित्रायन नमः।
ॐ मंदसखाय नमः।
ॐ शिखिनेनापकाय नमः।
ॐ अंतर्वेदिने नमः।
ॐ ईश्वराय नमः।
ॐ जैमिनिगोत्रजाय नमः॥४०॥

ॐ चित्रगुप्तात्मने नमः।
ॐ दक्षिणमुखाय नमः।
ॐ मुकुन्दवरपात्राय नमः।
ॐ असुरकुलोद्भवाय नमः।
ॐ घनवर्णाय नमः।
ॐ लंबदेहाय नमः।
ॐ मृत्युपुत्राय नमः।
ॐ उत्पातरूपधराय नमः।
ॐ अदृश्याय नमः।
ॐ कालग्निसन्निभाय नमः।
ॐ नरपीठकाय नमः॥५०॥

ॐ ग्रहकारिणे नमः।
ॐ सर्वोपद्रवकारकाय नमः।

ॐ चित्रप्रसूताय नमः।
ॐ अनलाय नमः।
ॐ सर्वव्याधिनाशनाय नमः।
ॐ अपसव्यप्रचारिणे नमः।
ॐ नवमे पापदाय नमः।
ॐ पंचमे शोकदाय नमः।
ॐ उपरागगोचराय नमः।
ॐ पूरुषकर्मणे नमः॥६०॥

ॐ तुरीये सुखप्रदाय नमः।
ॐ तृतीये वैरदाय नमः।
ॐ पापग्रहाय नमः।
ॐ स्फोटकारकाय नमः।
ॐ प्राणनाथाय नमः।
ॐ पंचमे श्रमकारकाय नमः।
ॐ द्वितीये स्फुटवाक्दात्रे नमः।
ॐ विषाकुलितवक्त्रकाय नमः।
ॐ कामरूपिणे नमः।
ॐ सिंहदंताय नमः॥७०॥

ॐ सत्येप्यनृतवते नमः।
ॐ चतुर्थे मातृनाशनाय नमः।
ॐ नवमे पितृनाशनाय नमः।
ॐ अंते वैरप्रदाय नमः।
ॐ सुता नन्दन बंधकाय नमः।
ॐ सर्पाक्षिजाताय नमः।
ॐ अनंगाय नमः।
ॐ कर्मराश्युद्भयाय नमः।
ॐ उपान्ते कीर्तिदाय नमः।
ॐ सप्तमे कलहप्रियाय नमः॥८०॥
ॐ अष्टमे व्याधिकर्त्रे नमः।

ॐ धने बहुसुखप्रदाय नमः।
ॐ जनने रोगदाय नमः।
ॐ ऊर्ध्वमूर्धजाय नमः।
ॐ ग्रहनायकाय नमः।
ॐ पापदृष्टये नमः।
ॐ खेचराय नमः।
ॐ शांभवाय नमः।
ॐ अशेषजनपूजिताय नमः।
ॐ शाश्वताय नमः॥९०॥

ॐ नटाय नमः।
ॐ शुभाशुभफलप्रदाय नमः।
ॐ धूम्राय नमः।
ॐ सुधापयिने नमः।
ॐ अजिताय नमः।
ॐ भक्तवत्सलाय नमः।
ॐ सिंहासनाय नमः।
ॐ केतुमूर्तये नमः।
ॐ रविन्दुद्युतिनाशकाय नमः।
ॐ अमराय नमः॥१००॥

ॐ पीडकाय नमः।
ॐ अमर्त्याय नमः।
ॐ विष्णुदृष्टाय नमः।
ॐ असुरेश्वराय नमः।
ॐ भक्तरक्षाय नमः।
ॐ वैचित्र्यकपोतस्यन्दनाय नमः।
ॐ विचित्रफलदायिने नमः।
ॐ भक्ताभीष्टफलप्रदाय नमः॥१०८॥

इति श्री केत्वष्टोत्तरशतनामावळिः॥

X

WORSHIP OF THE GUARDIANS OF DIRECTIONS

दिक्पालादीनां पूजा।।

क्रतुसंरक्षकाः अष्टदिक्पालदेवता-
आवाहनम्।।

(1) INDRA

इन्द्रं वो मधुच्छन्दा इन्द्रो गायत्री।
ॐ इन्द्रं वो विश्वतस्परि हवामहे जनैभ्यः।
अस्माकमस्तु केवलः।
पूर्वदिशि इन्द्रं लोकपालकमावाहयामि।।१।।

(2) AGNI

अग्निमीळे मधुच्छन्दा अग्निर्गायत्री-
ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्।।
आग्नेयदिशि अग्निं लोकपालकमावाहयामि।।२।।

(3) YAMA

यमाय सोमं यमो यमोऽनुष्टुप्।
ॐ यमाय सोमं सुनत यमाय जुहुता हविः।
यमं ह यज्ञ्योगच्छत्यग्निदूतो अरंकृतः।।
दक्षिणदिशि यमं लोकपालकमावाहयामि।।३।।

(4) NIṚRTI

मोषुणः परापरेत्यघोरः कण्वो निऋतिर्गायत्री।
ॐ मोषुणः परापरा निऋतिर्दुर्हणावधीत्।
पदीष्ट त्रष्णया सह।।
नैऋत्यदिशि निऋतिं लोकपालकमावाहयामि।।४।।

(5) VARUṆA

तत्त्वायामीत्यस्य शुनश्शोफो वरुणस्त्रिष्टुप्।
ॐ तत्वायामि ब्रह्मण वन्दमानः तदाशास्ते
यजमानो हविर्भिः। अहेळमानो वरणेह
बोध्युरुशं समान आयुः प्रमोषीः।।
पश्चिमदिशि वरुणं लोकपालकमावाहयामि।।५।।

(6) VĀYU

तव वायो व्यश्वोवायुर्गायत्री।
ॐ तव वाय वृतस्पते त्वष्टुर्जामातुरद्भुत।
अवांस्या वृणीमहे।।
वायुदिशि वायुं लोकपालकमावाहयामि।।६।।

(7) SOMA

सोमो धेनुं गोतमः सोमः त्रिष्टुप्।
ॐ सोमो धेनुं सोमो अर्वन्तमाशुं सामो
वीरं कर्मण्यं ददाति। सादन्यं विदथ्यं
सथेयं पित्रश्रवणं यो ददाशदस्मै।।
उत्तरदिशि सोमं लोकपालकमावाहयामि।।७।।

(2) ĪŚĀNA

तमीशानो आंगीरस ईशानो गायत्री।
ॐ तमीशानं जगतस्तस्थुषस्पतिं धियं
जिन्वमवसे हूमहे वयम्। पूषानो यथा
वेदसामसद्वधे रक्षिता पाथुरदब्ध स्वस्तये।।
ऐशान्यां दिशि ईशनं लोकपालकमावाहमामि।।८।।

XI

WORSHIP OF DEITIES OF KARMA-SĀDGUṆYA

कर्मसाद्गुण्यदेवतावाहनम्।।

(1) Gaṇapati

गणानां त्वा गृत्समादो गणाधिपतिर्जगती।

ॐ गणानां त्वा गणपतिं हवामहे कविं कविनामुप मश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नश्रृण्वन्नूतिभिःसीद सादनम्। अस्मिन्मंडल मध्ये भूः महगणपतिमावाहयामि।।१।।

भुवः महागणपतिमावाहयामि।

सुवः महागणपतिमावाहयामि।

भूर्भुवस्सुवः महागणपतिमावाहयामि।।

(2) Kshetra-pālaka

क्षेत्रस्य पतिनेत्यस्य वामदेवो क्षेत्रपतिरनुष्टुप्।

ॐ क्षेत्रस्य पतिना वयं हितेनेव जयामसि। गामश्वं पोषयित्वा स नो मृडातीदृशे।।

अस्मिन् मंडलमध्ये भूः भुर्वस्सुवः क्षेत्रपालकमावाहयामि।।२।।

(3) Vāstu-purusha

वास्तोष्पते वास्तोष्पति वसिष्ठः त्रिष्टुप्।

ॐ वास्तोष्पते प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः। यत्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे।।

अस्मिन्मंडलमध्ये भूर्भुवस्सुवः वास्तुपुरुषमावाहयामि।।३।।

(4) Abhayamkara

यत इन्द्र भर्गो इन्द्र प्रगाथः।

ॐ यत इन्द्र भयामहे ततो नो अभयं कृधि। मघवञ्छग्घि तव तन्न ऊतिभिर्विद्विषो विमृधो जहि।। अस्मिन् मंडलमध्ये भूर्भुवस्सुवः अभयंकरमावाहयामि।।४।।

(5) Śrīh

श्रिये जातः काण्वो श्रीरग्नि त्रिष्टुप्।

ॐ श्रिये जातः श्रिय आनिरियाय श्रियं वयो जरितृभ्यो दधाति। श्रियं वसाना अमृतत्वमायन् भवन्ति सत्या समिधा मितद्रौ।। अस्मिन् मंडलमध्ये भुर्भुवस्सुवः

श्रियमावाहयामि।।५।।

(6) Tryambaka

त्र्यंबकं वसिष्ठो त्रियंबकोऽनुष्टुप्।

ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनात् मृत्योर्मुक्षीय मामृतात्।।

अस्मिन् मंडलमध्ये भुर्भुवस्सुवः त्र्यंबकमावाहयामि।।६।।

XII

VARUṆA

तथा वरुणः तत्वायामि शुनश्शेफो वरुणः त्रिष्टुप्।

ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते

यजमानो हविर्भिः। अहेळमानो वरणेह बोध्युरषं समान आयुः प्रमोषीः।।

-भूर्भुवस्सुवः वरणदेवतावाहयामि।।

आदित्यादि नवग्रहदेवतान् क्रतुसंरक्षणदेवतान् यज्ञसाद्गुण्यदेवतान् तथा वरुणदेवताः आवाहयामि।

XIII
COMPOSITE WORSHIP OF THE NINE GRAHAS

(Samashṭi-pūjā)

आदित्यादि नवग्रहदेवताभ्यो नमः समष्टि पूजां करिष्ये।

आसनानि समर्पयामि।

पादयोः पाद्यं पाद्यं समर्पयामि।

हस्तयोः अर्घ्यं अर्घ्यं समर्पयामि।

मुखे आचमनमाचमनं समर्पयामि।

स्नपयामि।

ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे।। यो वः शिवतमो रसः तस्य भाजयते ह नः। उशतीरिव मातरः तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः।। शुद्धोदकस्नानं समर्पयामि। अथ पंचामृतस्नानम्।

ॐ आ प्यायस्व समेतु ते विश्वतः साम वृष्ण्यम्। भवा वाजस्य संगथे।। क्षीरेण स्नपयामि।।

ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखाकरत्प्रण आयूंषि तारिषत्। दध्ना स्नपयामि।। घ्रतं मिमिक्षे घृतमस्य योनिः घृते श्रितो घृतमस्य धाम। अनुष्वधमावहमादयस्व स्वाहाकृतं वृषभ वक्षि हव्यं।। घृतेन स्नपयामि।।

ॐ मधुवाता ऋतायते मधु क्षरन्ति सिंधवः। माध्वीर्नस्संत्वोषधीः। मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता। मधुमान्नो वनस्पतिः। मधु माँ अस्तु सूर्यः। माध्वीर्गावो भवंतु नः।। मधुना स्नपयामि।।

ॐ स्वादुःपवस्व दिव्याय जन्मने स्वादुरिन्द्राय सुहवीतनाम्ने। स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ अदाभ्यः।। शर्करेण स्नपयामि।।

पुनः शुद्धोदकस्नानं आपोहिष्ठेति। तदनंतरं नवग्रहप्रतिमां अन्यदेवताप्रतिमां च पुरुषसूक्त, श्री सूक्त, श्री रूद्रनमक चमक इत्यादि मन्त्रैः अभिषेकं कुर्यात्।।

आदित्यादिनवग्रहदेवताभ्यो नमः

अमृताभिषेको अस्तु।

शान्तिः पुष्टिः तुष्टिश्चास्तु।।

ॐ युवं वस्त्राणि पीवस वसाथे युवोरच्छिद्रा मन्तवो हसर्गाः। अवातिरत ममृताति विश्व ऋतेन मित्रा वरुणा सचेथे।।

आदित्यादि नवग्रहदेवताभ्यो नमः। वस्त्रयुग्मानि समर्पयामि।।

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं

पुरस्तात्।। आयुष्यमग्र्यं प्रति मुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः।। आदित्यादि नवग्रहदेवताभ्यो नमः।। यज्ञोपवितान् धारयामि।।

ॐ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्।। अदित्यादि नवग्रहदेवताभ्यो नमः।। दिव्यपरिमळ गन्धान् धारयामि।।

ॐ आयनेते परायणे दुर्वा रोहन्तु पुष्पिणीः। ह्रदाश्च पुण्डरीकाणि समुद्रस्य ग्रहा इमे।। आदित्यादि नवग्रहदेवताभ्यो नमः।। अक्षतान् समर्पयामि।। माल्यानि च सुगंधीनि मालत्यादीनि वै प्रभो मयाहृतानि पूजार्थं पुष्पाणि प्रतिग्रह्यताम्।। आदित्यादि नवग्रहदेवताभ्यो नमः।। पुष्पमालिकानि समर्पयामि।। अथ नवग्रहणां अष्टोत्तरशतनामपूजां कुर्यात्।। आदित्यादि नवग्रहदेवताभ्यो नमः।। अष्टोत्तरशतनाम पूजां समर्पयामि।। दशांगं गुग्गुलो धूपं सुगंधिं च मनोहरं। कपिलागरुसंयुक्तं धूपोऽयं प्रतिगृह्यताम्।। आदित्यादि नवग्रहदेवताभ्यो नमः। धूपमाघ्रापयामि।। साज्यं त्रिवर्तिसंयुक्तं वन्हिना योजितं मया। ग्रहाण मंगळं दीपं त्रैलोक्य तिमिरापह।। भक्त्या दीपं प्रयच्छामि देवाय परमात्मने। त्राहि मां नरकाद्घोरात् दिव्यज्योतिर्नमोऽस्तु ते।। आदित्यादि नवग्रहदेवताभ्यो नमः। दीपं दर्शयामि।। धूपदीपानंतरं आचमनं समर्पयामि।। आचमनानन्तरं पत्रपुष्पाणि समर्पयामि।। -मंडलं कृत्वा तदुपरि नैवेद्यं निधाय-

विश्वामित्र ऋषिः। सविता देवता। गायत्री छन्दः।। नैवेद्यशुध्यर्थे प्रोक्षणे विनियोगः।

ॐ भूर्भुवस्सुवः।
ॐ तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि।। धियो यो नः प्रचोदयात्।।
सत्यं त्वर्तेन परिषिंचामि। कामधेनो स्मरामि। धेनुमुद्रां प्रदर्श्य।
अमृतमस्तु - अमृतोपस्तरणमासि स्वाहा।
ॐ प्राणाय स्वाहा।
ॐ अपानाय स्वाहा।
ॐ व्यानाय स्वाहा।
ॐ उदानाय स्वाहा।
ॐ समानाय स्वाहा।
ॐ ब्रह्मणे स्वाहा।

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत।। आदित्याति नवग्रहदेवताभ्यो नमः। महानैवेद्यं परमान्नं निवेदयामि।। मध्ये मध्ये स्वादोदकं समर्पयामि। अमृतापिधानमसि स्वाहा। उत्तरापोशनं समर्पयामि।।
हस्तप्रक्षाळनं समर्पयामि।
पादप्रक्षाळनं समर्पयामि।
पुनराचमनीयं समर्पयामि।
पूगीफलसमायुक्तं नागवल्लीदळैर्युतं।
कर्पूरचूर्णसंयुक्तं तांबूलं प्रतिगृह्यताम्।।
आदित्यादि नवग्रहदेवताभ्यो नमः। पूगीफलतांबूलं समर्पयामि।।
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलदं अतश्शान्तिं प्रयच्छ मे।।
आदित्यादि नवग्रहदेवताभ्यो नमः। सुवर्णपुष्पं

समर्पयामि।।

ॐ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो हस्त उत विश्वतस्पात्। सं बाहुभ्यां धमति संपतत्रै द्यावापृथिवी जनयन्देव एकः।। आदित्यादि नवग्रहदेवताभ्यो नमः।। कर्पूरमंगळ निराजनं दर्शयामि।। नीराजनानन्तरं आचमनं समर्पयामि। आचमनानन्तरं पत्रपुष्पाणि समर्पयामि।।

मन्त्रपुष्पम्।

ॐ तद्विष्णोः परमं पदम्। सदा पश्यन्ति सूरयः। दिवीव चक्षुराततं। तद्विप्रासो विपन्यवो जागृवांसस्समिंधते। विष्णोर्यत्परमं पदम्।।

आदित्यादि नवग्रहदेवताभ्यो नमः मन्त्रपुष्पं समर्पयामि

प्रदक्षिणनमस्कारः। यानि कानि च पापानि जन्मान्तरकृतानि च। तानि तानि विनश्यंति प्रदक्षिण पदेपदे।।

पापोऽहं पापकर्माऽहं पापात्मा पापसंभवः।
त्राहि मां कृपया देव शरणागतवत्सल।।

अन्यथा शरणं नास्ति त्वमेव शरणं मम।
तस्मात् कारुण्यभावेन रक्ष रक्ष सुरेश्वर।।

नमस्सूर्याय चंद्राय मंगळाय बुधाय च
गुरुशुक्रशनिभ्यश्च राहवे केतवे नमः।।

आदित्यादि नवग्रहदेवताभ्यो नमः। प्रदक्षिणनमस्कारान् समर्पयामि। ऋण रोगादि दारिद्र्य पाप क्षुत् अपमृत्यवः मम शोक मनस्तापा नश्यंतु मम सर्वदा।।

इदमर्घ्यं समर्पयामि।

आधारे प्रथमं सहस्रकिरणं ताराधिपं स्वाश्रये
माहेयं मणिपूरके हृदि बुधं कंठे च वाचस्पतिं।
भ्रूमध्ये भृगुनन्दनम् दिनमणेः सूनुं प्रकूटस्थले
नाडी कर्मसु राहुकेतुगुळिकान् नित्यं नमाम्यायषे।।

आदित्यादि नवग्रहदेवताभ्यो नमः। प्रार्थनां समर्पयामि।।

पुनः पूजा।

पुनः पूजां करिष्ये। छत्रं समर्पयामि। चामरं समर्पयामि। नृत्यं समर्पयामि। नाट्यं समर्पयामि। अश्वारोहणं समर्पयामि। गजा- रोहणं समर्पयामि। आन्दोलिकारोहणं समर्पयामि। समस्तराजोपचार देवोपचार शक्त्योपचार भक्त्योपचार पूजान् समर्पयामि।। नमस्करोमि।। यस्य स्मृत्या च नामोक्त्या तपःपूजाक्रियादिषु। न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम्।। मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वराः यत्पूजितं मया देवाः परिपूर्णं तदस्तु मे। अनेन मया कृतेन आदित्यादिनवग्रहपूजाराधनेन भगवान् श्री वासुदेवः प्रीणातु।। मध्ये मन्त्र तन्त्र ध्याननियम स्वरवर्ण पदवृत्त न्यूनातिरेक लोपदोष प्रायश्चित्तार्थं नामत्रय

मन्त्रजपं करिष्ये-

अच्युताय नमः। अनन्ताय नमः। गोविन्दाय नमः। त्रिवारं। अच्युतानन्तगोविन्देभ्यो नमः।।
कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मना वा प्रकृतेः स्वभावात्। करोमि यद्यत् सकलं परस्मै श्रीमन्नारायणायेति समर्पयामि।।
ॐ तत्सत् ब्रह्मार्पणमस्तु।
समस्त सन्मंगळानि भवन्तु।
आदित्यादि नवग्रहप्रसाद सिद्धिरस्तु।

अथ नवग्रहदानानि। प्राणानायम्य देशकालौ संकीर्त्य आदित्यादिनवग्रहपूजा सादगुण्यार्थं नवग्रहधान्यकलशवस्त्रप्रतिमा दानानि करिष्ये-

प्रयतपाणिः शरणं प्रपद्ये। स्वस्ति संबाधेष्वभयं नो अस्तु इति उच्चरन् किंचिज्जलं अक्षतान् विसर्ज्य ब्राह्मणपूजां कारयेत्।

आदित्यादिनवग्रहदेवताब्राह्मणस्य इदमिदं आसनं - ब्राह्मणश्च - सुखासनं इमे गंधाः - ब्राह्मणश्च - सुगंधाः इमे अक्षताः। अलंकरणार्थं - ब्राह्मणश्च - सन्त्वक्षताः इमानिमानिः पुष्पाणि - ब्राह्मणश्च - सुपुष्पाणि धूपदीपसकलाराधनैः स्वर्चितमस्तु - ब्राह्मणश्च - अर्चितम् यजमानः। इदं नवग्रहधान्यकलशवस्त्रप्रातिमा दानं आदित्यादिनवग्रहप्रीतिं कामयमानः तुभ्यं अहं संप्रददे। न मम न मम। इत्युच्चुर्य दद्यात्। भार्या किंचित् जलं दानसामग्रं विसृजति।।

ब्राह्मणः हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरागवि अनामयित्नुभ्यं त्वाताभ्यां प्रतिगृण्हामि इत्युक्त्वा गृह्णीयात्। अनंतरं आशीर्वचनं कुर्यात्

अथ दानश्लोकाः। गोधूमाः तण्डुलाः। तुवरी। मुद्गाः। चणकाः। निष्पावाः। तिलाः। माषाः। कुलुत्थाः।। एकैकमपि-

एकैकमपि सर्वजंतूनां बलपुष्टिविवर्धनाः
तस्मादेषां प्रदानेन अतः शांतिं प्रयच्छ मे।।

इत्युक्ता दद्यात्।। आदित्यादिनवग्रहदेवता सुप्रीताः सुप्रसन्ना वरदा भवन्तु।।

तीर्थप्राशनम्:-

अकालमृत्युहरणं सर्वव्याधिनिवारणं
सर्वपापोशमनम्
आदित्यादिनवग्रहपादोदकं पावनं शुभम्।।

ॐ या फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः।
बृहस्पतिप्रसूतास्ता नौ मुंचंत्वंहसः।।

आदित्यादिनवग्रहप्रसादसिध्दिरस्तु। इत्युक्त्वा किंचितुष्पं देवतासान्निध्यात् प्रसादरूपेण धारयेत्।।

-समस्तसन्मंगळानि भवन्तु।

-नवग्रहपूजाराधनम् समाप्तम्।।

पूर्वजन्मकृतं पापं व्याधिरूपेण बाधते।

तच्छांतिरौषधैर्दानैः जपहोमार्चनादिभिः॥
ग्रहणं नवधान्यानि सद्विप्राय निवेदयेत्।
ग्रहदोषं निहन्त्याशु गार्गेयवचनं तथा॥

XI

ARTICLES FOR WORSHIP OF THE NINE GRAHAS

नवग्रहपूजादानद्रव्याणि॥

(1) Gifts during pūjā

नवग्रहग्रहप्रीत्यर्थं दानादिपदार्थाः॥

१. माणिक्य गोधूम धेनु रक्तवस्त्र गुड हेम ताम्र रक्तचंदनकमलानि रवेः;

२. वंशपात्रस्थ तंडुल कर्पूर मौक्तिक श्वेतवस्त्र पूर्णकुंभ वृषभाश्च चंद्रस्य;

३. प्रवाळ गोधूम मसूरिका रक्तवृषभ गुड सुवर्ण रक्तवस्त्र ताम्राणि भौमस्य;

४. नीलवस्त्र सुवर्ण कांस्य मुद्ग गारूत्मत हस्तिदन्त पुष्पाणि बुधस्य;

५. पुष्यराग हरिद्रा शर्कराश्च पीतधान्य पीतवस्त्र लवण सुवर्णानि सुरगुरोः;

६. चित्रवस्त्र श्वेताश्व धेनु वज्र सुवर्ण रजत गंध तन्डुलाः शुक्रस्य;

७. इन्द्रनील माष तैल तिल कुळुत्थ महिषी कृष्णछाग धेनु लोहाः शनेः;

८. गोमेधाश्च नीलवस्त्र कंबळ तैल तिल लोहाः राहोः;

९. वैडूर्य तैल तिल कंबळ कस्तूरी छाग वस्त्राणि केतोः॥

(2) Prescribed Number of Japa, Tarpaṇa and Homa

जपतर्पणहोमसंख्या॥

जपसंख्या तत् दशांशं तर्पणं कारयेत् सुधीः।
तद्दशांशं तु जुहुयात् दशंशं विप्रभोजनम्॥

(3) Gifts to obviate the evils caused by phases of the grahas

नवग्रहदशाभुक्तिअरिष्टनिवाराणार्थं दानानि

रविदशायां स्वर्णपद्म

रविभुक्ति रक्तधेनु

चंद्रभुक्ति गोदानम्

कुजभुक्ति अनडुह

राहुभुक्ति महिषी

गुरुभुक्ति स्वर्ण

शनिभुक्ति छाग

बुधभुक्ति रजत
केतुभुक्ति छाग
शुक्रभुक्ति श्वेतधेनु
चंद्रदशायां रजत पद्म
चंद्रभुक्ति श्वेतधेनु
कुजभुक्ति नाग
राहुभुक्ति छाग
गुरुभुक्ति दुर्गा
शनिभुक्ति महिषी
बुधभुक्ति लक्ष्मीनारायण प्रतिमा
केतुभुक्ति छाग
शुक्रभुक्ति महिषी
सूर्यभुक्ति दुर्गा प्रतिमा
कुजदशायां ताम्रपद्म
कुजभुक्ति अनडुह
राहुभुक्ति महिषी या कृष्णधेनु
गुरुभुक्ति स्वर्ण
शनिभुक्ति तिलपिष्ट मृत्यु प्रतिमा
बुधभुक्ति अश्व
केतुभुक्ति छाग
शुक्रभुक्ति दुर्गा
सूर्यभुक्ति पद्म
चंद्रभुक्ति दुर्गा प्रतिमा

राहुदशायां स्वर्णलोह
राहु नाग प्रतिमा
गुरु स्वर्ण
शनि छाग
बुध श्रीमूर्ति
केतु नाग प्रतिमा
शुक्र दुर्गा प्रतिमा
सूर्य तिलपद्म
चंद्र वह्नि
कुज नाग
गुरुदशायां स्वर्णपद्म
गुरुभुक्ति सुवर्णप्रतिमा
शनिभुक्ति कृष्णमृग
बुधभुक्ति मकर
केतुभुक्ति मेष
शुक्रभुक्ति लक्ष्मीनारायण प्रतिमा
सूर्यभुक्ति छाग
चंद्रभुक्ति छाग
कुजभुक्ति स्वर्ण
राहुभुक्ति महिषी
शनिदशायां स्वर्णयुक्त अयःपात्रदानम्
शनिभुक्ति तिल
बुधभुक्ति महिषी

केतुभुक्ति सुवर्णतिल

शुक्रभुक्ति छागादि पंचक

सूर्यभुक्ति स्वर्णगर्भितकूष्मांड

चंद्रभुक्ति श्वेतधेनु

कुजभुक्ति महिषी

राहुभुक्ति नाग

गुरुभुक्ति स्वर्णछाग

बुधदशायां स्वर्णपात्र

बुधभुक्ति लक्ष्मीनारायण प्रतिमा

केतुभुक्ति महिषी

शुक्रभुक्ति श्वेतधेनु

सूर्यभुक्ति सुर्यप्रतिमा

चंद्रभुक्ति रजत

कुजभुक्ति अनडुह

राहुभुक्ति छाग

गुरुभुक्ति कांचनप्रतिमा

शनिभुक्ति महिषी

केतुदशायां रजतपात्र

केतुभुक्ति उमामहेश्वर प्रतिमा

शुक्रभुक्ति दुर्गा प्रतिमा

सूर्यभुक्ति छाग

चंद्रभुक्ति रजताश्व

कुजभुक्ति तैलकुंभ

राहुभुक्ति महाकूष्माण्ड

गुरुभुक्ति तिल

शनिभुक्ति महिषी

बुधभुक्ति मृग

शुक्रदशायां रजतपात्र

शुक्रभुक्ति श्वेत धेनु

सूर्यभुक्ति छाग

चंद्रभुक्ति मृग

कुजभुक्ति अनडुह

राहुभुक्ति महाकूष्माण्ड

गुरुभुक्ति स्वर्णगर्भितकूष्मांड

शनिभुक्ति महिषी

बुधभुक्ति लक्ष्मीनारायण प्रतिमा

केतुभुक्ति दुर्गा प्रतिमा।।

पिप्पलादेन कृतं शनिस्तोत्रम्

नमस्ते कोणसंस्थाय पिंगलाय नमोऽस्तु ते ।
नमस्ते बभ्रूरूपाय कृष्णाय च नमोऽस्तु ते।।

नमस्ते रौद्रदेहाय नमस्ते चान्तकाय च।
नमस्ते यमसंज्ञाय नमस्ते सौरये विभो।।

नमस्ते मंदसंज्ञाय शनैश्चर नमोऽस्तु ते।
प्रसादं मम देवेश दीनस्य प्रणतस्य च।।

शुभकालेषु सर्वेषु पुण्यकाले विशेषतः।
चतुरस्त्रां समां भूमिं गोमयेनानुलेपयेत्।।
रेखाः प्रच्य उदीच्यश्च स्युश्चतरस्त्रस्तथा समाः।
समकोष्ठेषु पद्मानि विन्यसेत् श्वेततण्डुलैः।।
आदित्याश्चन्द्रमा भौमो बुधजीवसिताकेजाः।
राहुः केतुरिति प्रोक्ता ग्रहा लोकसुखावहाः।।
एषां हिरण्यरूपाणि कारयित्वा यथाविधि।
त्रिनिष्केणार्थ वा कुर्यात् यथाशक्ति पृथक्पृथक्।।
ग्रहस्य दक्षिणे भागे स्थापयेदधिदेवताम्।
ग्रहस्योत्तरपार्श्वे तु न्यसेत् प्रत्यधितेवताम्।।

ग्रहयागप्रकरणम्।।

ग्रहमन्त्राः।

आकृष्णेन इमं देवा अग्निर्मूर्धा दिवः ककुत्।
उद्बुध्यस्वेति च ऋचो यथासंख्यं प्रकीर्तिताः।।
बृहस्पते अति यदर्यस्तथादृष्ट्वा परिस्नुतः।
शंनोदेवीस्तथाकांडात् केतुं कृण्वन्निमांस्तथा।।

होमे समिधः।

अर्कः पालाशः खदिरः अपामार्गोऽथ पिप्पलः।
उदुम्बरश्शमी दूर्वा कुशश्च समिधः क्रमात्।।

होमसंख्या।

एकैकस्य त्वष्टशतमष्टाविंशतिरेव वा।
होताव्या मधु सर्पिर्भ्यां दध्ना क्षीरेण वा युताः।।

नैवेद्यार्थं ब्राह्मण भोजनार्थं च द्रव्याण्याह
गुडोदनं पायसं च हविष्यं क्षीरपैष्टिकं।।

दध्योदनं हविश्चूर्णमासं चित्रान्नमेव च।।
दद्यात्क्रमादेव द्विजेभ्यो भोजनं बुधः।।

शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकं॥

गुण्डमिश्रमन्नं गुडोदनं।

हविष्यं उत्पन्नादि। क्षीरपैष्टिकं क्षीरमिश्रं पैष्टिकं।

हविः घृतोदनः।

चूर्णं तिलमिश्र वोदनः। मांसं भक्ष्य मांसमिश्र ओदनः। चित्रान्नं नानाविधान्नं।

गुडोदनादीनामभावे यथालाभमोदनानि।

संमानपूर्वकं नैवेद्यार्थं ब्राह्मणभोजनार्थं च दद्यादित्यर्थः॥

दक्षिणा।

धेनुश्शंखस्तथाऽनड्वान् हेमवासो हयः क्रमात्।
कृष्णगौरायसं छाग एता वै दक्षिणाः क्रमात्॥

यश्च यश्च यथा दुस्थ्यस्तं तं यत्नेन पूजयेत्।
ब्रह्मणैषां वरो दत्तः पूजिताः पूजयिष्यथ॥

ग्रहाधीना नरेन्द्राणामुच्छ्रयाः पतनानि च।
भावाभावौ च जगतः तस्मात्पूज्यतमा ग्रहाः॥

इति याज्ञ्यवल्क्यप्रोक्त ग्रहशान्तिः॥

प्रयोगः।

शुभे दिने नित्यकर्मानन्तरममुकप्रयोजनसिद्ध्यर्थं नवग्रहमखेन यक्ष्ये। इति संकल्प्य। स्वगृह्योक्त विधानेन स्वस्तिवाचनं विधाय आचार्यवरणानंतरं ब्रह्माणं वृणीत। अथवा चतुर ऋत्विजो वृणीत॥

नवग्रहमखे कुर्यादृत्विजश्चतुरश्शुभान्।
अथवा चैकमभ्यर्चेद्विधिना ब्रह्मणा सहेति॥

अत एवाष्टोत्तरसहस्रसंख्यया होमं कर्तुं यदि चिकीर्षति तर्हि कर्मणो निर्वाहाय ग्रहसंख्याकानृत्विजो वृणीत। सर्वत्राऽचार्यब्राह्मणौ नियतौ॥

वरणप्रयोगः।

वरणकाले एकऋत्विग्देयवस्त्रालंकरणादि द्विगुणमुदङ्मुखोपवेशिताय गुणवत्तरायै कस्मै ब्राह्मणाय दत्वा स्वयं पूर्वाभिमुखस्सन्नवग्रहयज्ञेन यक्ष्ये। तत्रैभिश्चन्दनपुष्पतांबूलहेमालंकारवासोभिरहं वृण इति- ततः वृतोऽस्मीत्याचार्यो ब्रूयात्। तदर्धालंकारान्नीत्वा हीतरेभ्यो दत्वाऽस्मिन्कर्मणि ऋत्विक्त्वेन त्वामहं वृण इति वृणीत। तत आचार्यादयः कर्म कुर्युः॥

कुंडादि निर्माणप्रकारः।
(स्कान्दे।)

नवग्रहमखे कुंडं हस्तमात्रं समंततः।
चतुरश्रमधोहस्तं योनिवक्त्रं समेखलं॥

चतुरंगुलविस्तारा मेखला तद्वदुच्छ्रिता।
मानहीनाधिकं कुंडमनेकभयदं भवेत्।
चतुर्दिक्ष्वपि कुंडस्य हस्तमात्रं समं भवेत्॥

चतसृष्वपि दिक्षु कुंडस्य हस्तमात्रं कुंडं भवतीत्यर्थः।

अधोहस्तं खातमपि हस्तमात्रं भवतीति यावत्॥

योनिवक्त्रं कुंडस्य पश्चिमदिग्भागे उपरि मेखलाया मध्ये वक्ष्यमाणलक्षणयोपेता योनिः। सैव वक्त्रं

Śiva-Sūrya
(Colombo Museum)

यस्य तत्तादृग्गजोष्ठसन्निभं। योनिप्रमाणं। वक्त्रं वा। पिप्पलपत्राकृतिः योनिः वक्त्रं वा कण्ठं भवति। तद्वदुच्छ्रिता॥

द्विरंगुलोच्छ्रिता कार्या प्रथमा मेखला बुधैः।
त्रिरंगुलोन्नता कार्या द्वितीया समुदाहृता।
उच्छ्रायविस्ताराभ्यां च तृतीया चतुरंगुला।
द्व्यंगुलस्तत्र विस्तारः पूर्वयोरपि शस्यते॥

पूर्वयोः प्रथमद्वितीयमेखलयोः॥

योनिलक्षणम्
(मात्स्ये।)

वितस्तिमात्रा योनिस्स्यात्षट्सप्तांगुलिविस्तृता।
षड्वा सप्त वेति विकल्पः।
कूर्मपृष्ठोन्नता मध्ये पर्श्वयोश्चांगुलोच्छ्रिता॥

गजोष्ठसदृशी तद्वदायता छिद्रसंयुता॥

एतत्सर्वेषु कुंडेषु योनिलक्षणमुच्यते। शारदातिलके। कुंडमेवं विधं तत्स्यात् स्थंडिलं वा समाश्रयेदिति। स्कांदे च।
मेखलोपरि सर्वत्र अश्वत्थदलसन्निभा॥

गजोष्ठसदृशी अश्वत्थदलसदृशी वा योनिर्भवतीत्यर्थः।
लक्षणलक्षित कुंडकरणासक्तौ स्थंडिलं चतुरश्रं हस्तपरिमितं कल्पयेत्।
नित्यं नैमित्तिकं होमं स्थंडिले वा समाचरेदिति स्थंडिलं वा कृत्वा तस्योपरि पूर्वभागे ग्रहादिस्थापनार्थं स्थंडिलं वेदिं वा विदधीत॥ तथा च स्कान्दे॥
तस्यैवोत्तरपूर्वेण स्थंडिलं हस्तमात्रकं।
द्विवप्रं चतुरश्रं च वितस्त्युच्छ्रायसम्मितं॥

द्विवप्रमित्यनेन वेदिकानिर्माणमुच्यते॥ अत एव मात्स्ये॥ गर्तस्योत्तरपूर्वेण वितस्तितद्वय विस्तृतां। वप्रद्वययुतां वेदिं वितस्त्युच्छ्रायसम्मितं॥

स्थापनार्थं च देवानां चतुरश्रामुदक्प्लवां।
गर्तस्य कुंडस्य उत्तरपूर्वेण ईशानदिग्भागे॥

वप्रो मेखला॥ वप्रद्वयं मेखलाद्वयं।
तत्र द्व्यंगुलोच्छ्रायः प्रथमवप्रः त्र्यंगुलोच्छ्रायो द्वितीयः।
विस्तारस्तु। द्वयोरपि द्व्यंगुलिपरिमितः।

उदक्प्लवां उदाङ्निम्नां एवं स्थंडिलं वेदिं वा निर्माय फलपुष्पादिविततं वितानं तत्रोपरि, कुर्वीत।

तदधिष्ठाने अग्निं प्रणीय ग्रहायतने ग्रहादीन् देवान् स्थापयेत्॥

तथा च मत्स्यपुराणे॥ अग्निं प्रणयनं कृत्वा तस्यामावाहयेत्सुरान्। तस्यां वेदिकायां संख्या सुराणां विज्ञेया विंशतिर्द्वादशाधिका॥

सूर्यादीनामधिष्ठानकल्पनम्।

(१) तत्र शुक्लतण्डुलैस्समंततः पूरयित्वा ततो मध्ये ताम्रवर्णैश्च तंडुलैः सूर्यस्य मंडलाकारमधिष्ठानं कुर्वीत॥

(२) तस्मान्मण्डलादाग्नेयदिग्भागे शुक्लतषैरक्षतैश्चतुरश्रमधिष्ठानं सोमाय॥

(३) सूर्यमंडलाद्दक्षिणतो रक्तचन्दनलिप्तैस्तंडुलैस्त्रिकोणाकारमधिष्ठानं मंगलाय॥

(४) सूर्यमंडलादैशान्यां सुवर्णवर्णैरक्षतैर्बाणाकारमधिष्ठानं बुधाय॥

(५) सुवर्णवर्णैरिवाक्षतैस्सूर्यमंडलादुत्तरतो दीर्घं चतुष्कोणमधिष्ठानं गुरवे॥

(६) मध्यमंडलात्पूर्वे शुद्धतमैरक्षतैः पंचकोणमधिष्ठानं भार्गवाय॥

(७) पश्चिमायां कृष्णवर्णैस्तंडुलैर्धनुराकृत्यधिष्ठानं शनैश्चराय॥

(८) मध्यमंडलान्निरऋतिकोणे सीसाख्य द्रव्यवर्णैरक्षतैः कृष्णवर्णैर्वा शूर्पाकृत्यधिष्ठानं राहवे॥

(९) मध्यमंडलादेव वायव्यदिग्भागे शुभैस्तंडुलैर्धूम्रवर्णैर्ध्वजाकृत्यधिष्ठानं केतवे कुर्वीत॥

मंडलाद्याकाराः।

मंडलाकार चतुरश्र त्रिकोण बाणाकृति दीर्घचतुष्कोण पंचकोण चापाकृति शूर्पाकृति ध्वजाकारेषु॥

प्रतिमाद्रव्याणि।

ताम्र स्फटिक रक्तचंदन सुवर्ण रजत लोह सीस कांस्यमयेषु। मध्यमांगुलि मध्यपर्व प्रमाणोन्नतेषु सूर्यादि प्रतिमा निर्माणद्रव्येषु॥

दिग्व्यवस्थाः।

वक्ष्यमाण प्रकारेणोल्लिखितान् सूर्यादीन्मध्य माग्निदक्षिणेशानोत्तरपूर्वपश्चिमनिर्ऋतिवायु दिग्भागेषु निदधीत॥

तत्रापरो विशेषः- स्कान्दपुराणे उक्तः।
शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरुसौम्यावुदङ्मुखौ।
प्रत्यङ्मुखश्शनिस्सोमश्शेषा दक्षिणतो मुखाः॥

आदित्यादि मुखानेव तान्ग्रहादीन् स्थापयेत्।
तथा च चिंतामणौ॥

आदित्यादिमुखास्सर्वे साधिप्रत्याधिदेवताः।
स्थापनीया मुनिश्रेष्ठ नान्तरेण पराङ्मुखाः॥

नान्तरेणेति - आदित्यस्यान्यस्य च स्थापितस्य ग्रहस्य मध्ये अन्ये ग्रहा न स्थापनीया इति। न पराङ्मुखा स्थापनीया इत्यर्थः॥

मंडलाद्याकारः।
(स्कान्दे।)

भानुं तु मंडलाकारं सोमं तु चतुरश्रकं।
अंगारकं त्रिकोणं च बुधं बाणाकृतिं तथा॥

दीर्घं गुरुं चतुरश्रं पंचाश्रं भार्गवं तथा।
धनुस्तुल्यं शनिं विद्याद्राहुं शूर्पाकृतिं तथा॥

ध्वजाकारं केतुमेवमादित्यादीन्ग्रहान्विदुः।

भानुं तु मंडलाकारमित्यादि - अत्र भान्वादि ग्रहशब्दा त्तत्तद्वर्णाक्षितविरचितग्रहायतनादि वर्तुल, चतुरश्रदीतन्यपि वस्तूनि दीर्घ गुरुं चतुरश्रं।

गुरुं तदुल्लेखनादिकरण तथायतनं च दीर्घं चतुष्कोणं च कुर्वीत॥

(पंचाश्रं पंचकोणं॥)

याज्ञवल्क्यः।

ताम्रकात् स्फटिकाद्रक्तचन्दनात् स्वर्णकादुभौ।
रजतादयसस्सीसात्कांस्यात्कार्या ग्रहाः क्रमात्॥
स्ववर्णैर्वा पटे लेख्या गन्धैर्मंडलकेषु वा॥

स्ववर्णैः ताम्रादिवर्णैः। वर्णकाभावे रक्तवर्णेन वा सूर्यमूर्तिर्लेख्या। गन्धैसूक्ततत्तद्वर्णैः तत्तन्मंडले तत्तद्ग्रहा स्थापनीयाः॥

ग्रहस्थापनदेशं स्थंडिलं वेदिं वा।

शुक्लतंडुलैः परिपूर्य तत्तद्वर्णतंडुलैरुपलक्षितेषु प्रदेशेषु आदित्यादीन् ग्रहान् स्वस्वायतनानतिक्रमेण स्थापयेत्। अथवा तत्तद्वर्णतंडुलोपलक्षितेषु प्रदेशेषु ग्रहप्रतिरूपकान्वा शुक्ततंडुलैः कृत्वा स्थापयेत् प्रतिष्ठां कुर्यात्॥

ग्रहलक्षणानि।
(मात्स्ये।)

पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः।
सप्ताश्वरथसंस्थश्च द्विभुजस्स्यात्सदा रविः॥

श्वेतः श्वेतांबरधरो दशाश्वः श्वेतभूषणः।
गदापाणिर्द्विबाहुश्च कर्तव्यो वरदश्शशी॥
रक्तमाल्यांबरः शक्तिशूलगदाधरः।

चतुर्भुजो मेषगमो वरदस्स्याद्धरासुतः॥

पीतमाल्यांबरधरः कार्णिकारसमद्युतिः।
खड्गचर्मगदापाणिः सिह्मस्थो वरदो बुधः॥

गुरुशुक्रयोर्लक्षणम्।

देवदैत्यगुरू तद्वत् पीतश्वेतौ चतुर्भुजौ।
दंडिनौ वरदौ कार्यौ साक्षसूत्रकमंडलू॥

इन्द्रनीलद्युतिश्शूली वरदो गृध्रवाहनः।
बाणचापासनधरः कर्तव्योऽर्कसुतस्तथा॥

करालवदनः खड्गचर्मशूली वरप्रदः।
नीलस्सिह्मासनस्थश्च राहुस्तत्र प्रशस्यते॥

धूम्रा द्विबाहवस्सर्वे गदिनो विकृताननाः।
गृध्रासनगता नित्यं केतवस्स्युर्वरप्रदाः॥

नवग्रह साधारण धर्मान् पादत्रयेण चतुर्थ चरणेन च केतोस्संख्या।

सर्वे किरीटिनः कार्या ग्रहा लोकहिताऽऽवहाः।
द्वादशांगुलं लिखेदर्कं सोमं तु द्विगुणं लिखेत्॥

भृगुं नवांगुलं चैव गुरुश्चैव षडंगुलं॥

बुधं भूमिसुतं सौरिं चतुस्त्रिद्व्यंगुलं लिखेत्।
सोमादर्धांगुलं राहुं केतुमद्ध्यर्धमंगुलम्॥

एवमग्निप्रणयनानन्तरं ग्रहवेदिकायामुक्तस्थानेषु सूर्यादि प्रतिमा निधाय व्याहृतीभिरावाह्य स्थापयेत्।।

प्रयोगः।

प्रणवस्य ब्रह्म ऋषिः। देवी गायत्री छन्दः। परमात्मा अग्निर्देवता। व्याहृतीनां क्रमेण जमदग्नि भरद्वाज भृगवो महर्षयः। अग्नि वायु सूर्या देवताः। सूर्याद्यावाहनार्थे विनियोगः।।

ॐ भूर्भुवस्सुवः, कलिंगदेशोद्भव काश्यपगोत्र आदित्य इहाऽऽगच्छेत्यावाह्य इह तिष्ठेति रक्तपुष्पाक्षतैः स्थापयेत्।।

ॐ भूर्भुवस्सुवः यमुनादेशोद्भव आत्रेयगोत्र सोम इहाऽगच्छेत्यावाह्य श्वेतपुष्पाक्षतैरिह तिष्ठेति स्थापयेत्।

ॐ भूर्भुवस्सुवः अवंतीदेशोद्भव भारद्वाजगोत्र भौम इहाऽऽगच्छेत्यावाह्य रक्तपुष्पाक्षतैः स्थापयेत्।

ॐ भूर्भुवस्सुवः मगधदेशोद्भव आत्रेयगोत्र बुध इहाऽऽगच्छे त्यावाह्य पीतपुष्पाक्षतैस्स्थापयेत्।।

ॐ भूर्भुवस्सुवः सैन्धवदेशोद्भव आंगीरसगोत्र बृहस्पते इहाऽऽगच्छेत्यावाह्य पीतपुष्पाक्षतैः स्थापयेत्।।

ॐ भूर्भुवस्सुवः भोजकटदेशोद्भव भार्गवगोत्र शुक्र इहाऽगच्छेत्यावाह्य श्वेतपुष्पाक्षतैः स्थापयेत्।।

ॐ भूर्भुवस्सुवः सौराष्ट्रदेशोद्भव काश्यपगोत्र शनैश्चर इहाऽऽगच्छेत्यावाह्य कृष्णपुष्पाक्षतैः स्थापयेत्।।

ॐ भूर्भुवस्सुवः विराटदेशोद्भव पैठीनसिगोत्र राहो इहाऽऽगच्छेत्यावाह्य कृष्णपुष्पाक्षतैस्थापयेत्।।

ॐ भूर्भुवस्सुवः अन्तर्वेदिसमुद्भव जैमिनिगोत्र केतो इहाऽगच्छेत्यावाह्य धूम्रपुष्पाक्षतैरिह तिष्ठेति स्थापयेत्।।

यथोक्त कुसुम तंडुलाभावे यथोपपन्नैः कुसुमतंडुलैः स्थापयेत्।।

स्कान्दपुराणे जन्मभूगोत्रमेतेषां जन्मस्थानसुखानि च।
यो ज्ञात्वा कुरुते शान्तिं ग्रहास्ते नावमानिताः।।

उत्पन्नोर्कः कलिंगेषु यमुनायां हि चन्द्रमाः।
अंगारकस्त्ववंत्यां च मगधेषु हि हिमांशुजः।।

सैन्धवेषु गुरुर्जातः शुक्रो भोजकटे तथा।
शनैश्चरस्तु सौराष्ट्रे राहुर्वैराधिके पुरे।।

अंतर्वेद्यां तथा केतुः इत्येता ग्रहभूमयः।
आदित्यः काश्यपे गोत्रे आत्रेयाश्चन्द्रमा भवेत्।
भारद्वजो भवेद्भौमस्तथाऽऽत्रेयश्शाशांकजः।।
सुरपूज्योः गिरो गोत्रश्शुक्रो वै भार्गवस्तथा।
शनिः काश्यपगोत्रोद्भवो राहुः पैठीनसीस्तथा।।
केतुर्जैमिनिगोत्रश्च ग्रहा लोकहिताऽवहाः।।
भानुरंगारको रक्तौ शुक्लौ शुक्रनिशाकरौ।
सोमपुत्रो गुरुश्चैव तावुभौ पीतकौ स्मृतौ।।
कृष्णं शनैश्चरं विद्याद्राहुश्चित्राश्च केतवः।
कृष्णरूपगुणैर्युक्तान् व्याहृत्याऽऽवाहयेत्तु तान् ।।
एवं सूर्यादीनावाह्य संस्थाप्य अंगदेवताः।।

Sūrya (Sun God)
Sūrya-nārāyaṇa Kovil, Tanjore District

अधिदेवता दक्षिणतो वामे प्रत्याधिदेवता।।
स्थापनीयाः प्रयत्नेन व्याहृतीभिः पृथक्पृथक्।।
इति संग्रहकारः।।

एवं सूर्यादीनावाह्य नाममन्त्रैः अथवा तत्तद्देवता प्रकाशकैर्वैदिकमन्त्रैरासनाद्युपचारान्कुर्वीत।।

तत्र पंचामृतानि-दुग्धदध्याज्यशर्करा मधूनि।

एवं पंचामृतस्नानान्तरं वस्त्रादि सर्वां सपर्यां विधाय शिष्टाचारात् इन्द्रादिप्रकाशकैर्मन्त्रैः।।

अथवा इन्द्राय नमः इत्यादि तत्तद्देवतानाममंत्रै र्लोकपालान् पूजयेत् - (याज्ञवल्क्यः)
धूपो देयश्च गुल्गुलुरिति।
चिन्तामणौ।।

गुडोदनं रवेर्दद्यात् सोमाय घृतपायसं।
लोहिताय हविष्यान्नं बुधाय क्षीरपैष्टिकं।
दध्योदनं गुरोर्दद्याच्छुक्राय च घृतोदनं।।

मिश्रितं तिलमाषैश्च नैवेद्यं च शनैश्चरे।
राहोर्मांसौदनं दद्यात्केतोश्चित्रोदनं तथेति।
हविष्यान्नं मुन्यन्नं नीवारादि।
क्षीरमिश्रः षाष्टिकोदनः।।

पूर्वोक्तविधाना नैवेद्याभावे यथोपपन्नमोदनादि निवेदयेत्।।

यथाह याज्ञवल्क्यः।

शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकमिति।।
एवमधिप्रत्याधिदेवतानामपि।। एवं नैवेद्यं दत्वा तांबूलदानानन्तरं ग्रहवेदिकायामीशानदिग्भागे अव्रणं

Sūrya-nārāyana (Tri-mūrti), with Sūrya-maṇḍala behind the head
(Modern stone-sculpture by Syama-Sundar Bhatt of Bangalore)

कोमलं बहिर्गन्धाक्षतादिभूषितं चूतादि पल्लव संपन्नं चूताश्वत्थवटौदुम्बर पल्लवसंयुक्तं फलवस्त्रयुगान्वितमन्तःप्रक्षिप्त पंचरत्नं शुभनिर्मल जलपूर्णं दृढं कलशमक्षतामुपरि स्थापयेत्।

तत्र कलशे वरुणमावाहयेत्। तथा गंगादीनि तीर्थानि च।।

तथा च मत्स्यपुराणे।

प्रागुत्तरेण तस्याश्च दध्यक्षतविभूषितं। चूतपल्लवसंपन्नं फलवस्त्रयुगान्वितं।।

पंचरत्नसमायुक्तं पंचवर्णयुतं तथा। स्थापयेदव्रणं कुम्भं वरुणं तत्र विन्यसेत्।। गंगाद्यास्सरितश्चैव समुद्राश्च सरांसि च।

पंचगंगाश्च पूर्वोक्ताः पूर्वोक्ताः पंचपल्लवाः।
गजाश्वरथवल्मीकसंगमाद्ह्रदगोकुलात्।।

मृदमानीय विप्रेन्द्र सर्वौषधिसमन्विताम्।
स्नानार्थं विन्यसेत्तत्र यजमान्यस्य शास्त्रवित्।।
जटामासि वचा कुष्ठं शैलेयं रजनीद्वयं।

(शमी) जटी चंपक मुस्ता च सर्वौषधिगणः स्मृतः।। वरुणमन्त्रैर्नाममन्त्रैर्वा वरुणमावाहयति।।

गंगाद्यावाहनमन्त्रः।

सर्वे समुद्राः सरितस्तीर्थानि च ह्रदा नदाः।
आयान्तु यजमानस्य दुरितक्षयकारकाः।
इत्यावाह्य संपूज्य।।

एवमादित्यदेवताऽऽवाहनादि वरुणस्थापनान्तं कर्म निर्वर्त्य पूर्वप्रतिष्ठापिताग्नौ वक्ष्यमाणविधिना होमकर्म समारभेत्।।

कर्तव्याः प्रतिदेवतं मन्त्रवन्तश्च रवः। प्रतिष्ठिताभिघारणान्तं कृत्वा। केचन गृहे पाकादोदनमुद्धृत्य ग्रहानुद्दिश्य जुह्वति। तत्र शिष्टाचार एव प्रमाणम्। एवं चरुश्रपणानन्तरं यथागृह्यं आज्यभागान्तं मुखान्तं वा कृत्वा।।

यजमानोऽपि द्रव्यत्यागमेवं कुर्वीत।

जप्य देवतोद्देशेन होमद्रव्यत्यागं कुर्वीत। याजम्या कत्वात् यागस्य। युगपदनेकर्त्विक्साध्ये कर्मणि प्रत्याहुतिस्वस्वत्यागस्य कर्तुमशक्यत्वात्।। उद्दिष्टसूर्यादि देवताभ्यः समिच्चर्वाज्यतिलव्रीहि यवादिमहं त्यजामीत्याभिलपेत्।।

होम संख्याः समिधश्च।

प्रतिग्रहमष्टोत्तर सहस्रमष्टोत्तरशतमष्टाविंशतिरष्टौ वा होमः कार्यः।

तत्रापि समिच्चर्वाज्यतिलादय इति क्रमः अधि प्रत्यधिदेवतानां प्रधानत्वाद्धोमे न्यूनसंख्यास्वकरणम्। असां च समिधः फलाशा एव।।

अर्कः पलाशः खदिरस्त्वपामार्गोऽथ पिप्पलः।
उदुंबरश्शमी दूर्वा कुशश्च समिधः क्रमात्।।
एकैकस्याप्यष्टशतमष्टाविंशतिरेव वा। होतव्या

मधुसर्पिभ्यां दध्ना चैव समन्विताः॥

अनेन वाक्यान्तरेण च मध्वादीनि समिदंजसे विकाल्पितानि॥

चिन्तामणौ॥

समिधश्चात्र कर्तव्या अष्टोत्तरसहस्त्रकाः।
अष्टोत्तरशतं वाऽपि अष्टाविंशतिरेव वा॥
समिधां लक्षणं वक्ष्ये संख्यामासां तथैव च॥
विशीर्णा विदला ह्रस्वा वक्रास्ससुक्षीराः कृशाः॥
अस्थूला अतिह्रस्वाश्च समिधः कार्यनाशनाः॥
विशीर्णाऽयुःक्षयं कुर्याद्विदला पुत्रनाशिनी।
सुषिरा व्याधिजननी कृशा च रिपुवर्धनी॥
दीर्घा विदेशगमनी स्थूला चात्मविनाशिनी।
अकृशाः सुसमा स्थूला आर्द्रा च सुपलाशिनी।
प्रादेशान्नाधिकाऽन्यूनाः समिधस्सर्वकर्मणि॥
अर्को नाशयते व्याधीन् पलाशः सर्वकामदः॥
खदिरश्चार्थलाभश्च ह्यपामार्गस्तु पुत्रदः।
अश्वत्थस्सर्वकामोऽ यं सौभाग्योऽदुम्बरस्तथा।
शमी शमयते पापं दूर्वाऽयुष्यविवर्धनी।
कुशा धर्मार्थकामानां रक्षणं रक्षको विदुः।
अष्टोत्तरं तु साहस्त्रं शतमष्टाधिकं तथा॥
अष्टाविंशतिरष्टौ वा एकैकस्य तु होमयेत्॥
होमान्ते दक्षिणां दद्याच्छांत्यर्थं पुष्टिवर्धनं॥
देवानमपि सर्वेषामुपांशुपरमार्थवित्॥

स्वेन स्वेनैव मन्त्रेण होतव्यास्समिधः पृथक्॥
होतव्यं च घृताद्यत्र चरुभक्तादिकं पुनः॥
मन्त्रैर्दशाहुतीर्दद्याद्धोमो व्याहृतिभिः पुनः॥

मन्त्रैर्दशाहुतीरित्यादि होमार्थं संपादितेन समिदादिना ग्रहेभ्यः प्रत्येकं दशाहुतीर्दद्यात्॥

अधिदेवतादीनां प्रत्येकं तिस्त्रस्तिस्त्रकां वा दद्यादित्यर्थः।

होमे व्याहृतिभिः पुनरिति भू स्वाहेत्यादिभिश्च त्रिभिस्त्रिभिस्समा आहुतयः॥ उदङ्मुखाः प्राङ्मुखा वा कुर्युर्ब्राह्मणपुंगवाः॥ मन्त्रवन्तश्च आदध्याच्चरवः प्रतिदैवतं॥

कृत्वा ततश्चरून् सम्यक्कृतहोमस्तदारभेत्॥

आसत्येनेति सूर्यस्य।
आप्यायस्वेति सोमस्य।
अग्निर्मूर्धेनित्यंगारकस्य।
उद्बुध्यस्वेति बुधस्य।
बृहस्पते अतियदर्य इति गुरोः।
दृष्ट्वा परिसृतो रसं इति शुक्रस्य।
शन्नोदेवीरिति शनैश्चरस्य।
कयान इति राहोः।
केतुं कृण्वन्निति केतूनां॥
अधिप्रत्यधिदेवतानां च तत्तन्मन्त्रैरेवं हुत्वा।
मूर्धानं दिव इति पूर्णाहुतिं जुहोति।
जयं च। पूर्णाहुतिः फलसंहिता भवति।

केचन स्विष्टकृद्धोममिच्छन्ति। ततः स्विष्टकृद्धोमपक्षे प्रायश्चित्ताहुतिभ्यः पूर्वं जयादि होममान्त स्विष्टकृद्धोमः। जयादि होमाकरणपक्षे प्रायश्चित्ताहुतिभ्यः पूर्वमेव स्विष्टकृत् इति गोभिलः॥

प्राक्स्विष्टकृत आवाप इति। अस्यार्थः आवापः प्रक्षेपः। ग्रहयज्ञे च समिदादिहोमा विहिताः। जयादयो हि कर्मसमृद्धिकामेन हूयन्ते॥ अतः समृद्धि - कामेन तत्र प्रक्षिप्यन्त इत्यावापो जयादयः॥

एवमन्यत्राप्यावापशब्दास्यार्थो ज्ञेयः। आवापः स्विष्टकृतः स्विष्टकृद्धोमात्प्रभवति। अग्नये स्विष्टकृते स्वाहेति स्विष्टकृद्धोममन्त्रः। अथवा कूष्मांड होमप्रकरणोक्तो ग्राह्यः। हव्यवाहग्ं स्विष्टमिति। अतश्च स्विष्टकृद्धोमाप्राक् स्वशाखोक्तप्रकारेण जयादिहोमप्रभृतीन् उपहोमान् हुत्वा।

अथ बर्हि रंजन परिधि प्रहरणादि प्रायश्चित्तान्तं कर्म निर्वर्त्य फलभूयस्त्वकामो वसोर्धारां जुहोति॥

घृतकुम्भं वसोर्धारां पातयेदनलोपरि। औदुम्बरीमथा र्द्रां च ऋज्वींकोपरवर्जितां। बाहुमात्रां सृचं कृत्वा ततः स्तम्भद्वयोपरि॥

घृतधारां ततः सम्यगग्नेरुपरि पातयेत्। जापयोत्सूक्तमाग्नेयं वैष्णवं रौद्रमैन्दवं॥ महावैश्वानरं सम्यग्ज्येष्ठसाम च पाठयेत् वह्नेरुपरि स्तम्भद्वय विधृतामौदुम्बरीमुक्तप्रमाणां सृचं निधाय तदुपरि श्रृंखला विधृतेन निर्मलघृतकुम्भेन यवमात्रच्छिद्रेणाज्यं मुंचन्नग्नेरुपरि वसोर्धारां पातयेत्॥

तस्यां घृतधारायां स्रुक् प्रलिकया अग्नौ निपतन्त्यां आग्नेयादीनि सूक्तानि जापयेत्। तत्राग्नेयं-अग्निमीळे पुरोहितमित्यादि वैष्णवं तु विष्णोर्नुकमित्यादि षड्ऋचः। रौद्रं आ ते पितरिति पंचदशर्चं। ऐंदवं स्वादिष्ठयेत्यादि दशर्चं गायत्रम्। महावैश्वानरं महावैश्वानराख्ये आरण्यके षष्ठप्रणवके सामद्वयं। ज्येष्ठ साम च मूर्धानं दिवि इत्यस्यामृचीगिगीतम्॥ वसुधाराया विहिताश्चमकानुवाका रुद्रविधानप्रकरणेदर्शिताः॥

तेजोभूयिष्ठत्वादुद्बुध्यस्वेति। अस्मिन्। पदे बुधवर्णश्रुतेर्वा अप्यक्षरसाम्यानि ब्रूयादिति श्रुतेः। यथा काश्यपः पश्यको भवतिति श्रुतिः। शुक्रं ते अन्यदिति मन्त्रे शुक्रपदं वा। शन्नो देवीरिति मन्त्रे शनिनामस्मारकस्य वर्णद्वयस्य विद्यमानत्वात् सः मन्त्रः शनिद्योतकः। कयानश्चित्र आभुवदिति चित्रपदं श्रूयते चित्रश्च राहुः यतः शिरसा लक्ष्यते अनयैवदिशाऽन्यत्राप्यूहः। एवं तत्तद्देवता प्रकाशकत्वमवगंतव्यम्। यातो नोच्यते सा देवतेति। सर्वानुक्रमणिकापरिभाषायामभिधानात्। अन्यथा। अन्या पूज्या अन्याभिधेयेति विरोधः स्यात्॥

एवं पूर्णाहुत्यनन्तरं वसोर्धारां विधाय। गृह्योक्त प्रकारेण पूर्णपात्रविमोकादि कर्म कृत्वा पूर्वस्थापित कलशमादाय वक्ष्यमाणैर्मन्त्रैः वक्ष्यमाणलक्षणोपेतैः द्विजैः पत्नीपुत्रादिपरीतस्य यजमानस्याभिषेकः कार्यः॥

(मात्स्ये)।

अथाभिषेकमन्त्रेण वाद्यमंगलगीतकैः।
पूर्णकुम्भेन तेनैव होमान्ते प्राङ्मुखैर्द्विजैः।।
अप्यंगावयवैर्हेमि हेमस्रग्दामभूषितैः।
यजमानस्य कर्तव्यं चतुर्भिः स्नापनं द्विजैः।।
अभिषेकमन्त्रेणेत्येकवचनं मन्त्रविदुपाध्यायाभिप्रायेण। वाद्या मंगलगीतकैरिति सहार्थे तृतीया।। कुम्भेन ते सैवेत्येवकारेण कलशान्तरेण तदुदकस्याभिषेको निषिध्यते। प्राङ्मुखैरिति स्नपनकर्तृ द्विजविशेषणम्।।

यदि यजमानः पूर्वाभिमुखः तर्हि ऋत्विगुत्तराभिमुखः। ईशानाभिमुखो वा। यदि यजमान उत्तराभिमुखः तदा ऋत्विक्पूर्वाभिमुखः। ईशानाभिमुखो वेति द्वित्रिकस्याऽमंगलत्वाच्चतुरिति। एकर्त्विगुपलक्षणार्थम्।।

अथाभिषेकमन्त्राः।

तत्र वैदिकाः स्वस्वशाखोक्ता ग्राह्याः।। स्मार्तमन्त्रास्तु।। सुरास्त्वामभिषिंचन्तु ब्रह्मविष्णु महेश्वराः।। वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः।।
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते।।

आखंडलोऽग्निर्भगवान् यमो वै निरृतिस्तथा।।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्रह्मणा सहिताः सर्वे दिक्पालाः पान्तु ते सदा।।

कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिश्रद्धा क्रिया मतिः
बुद्धिर्लज्जा वपुश्शन्तिस्तुष्टिः श्रीर्विश्वमातरः।।
एतास्त्वामभिषिंचंतु देवपत्नस्समागताः।।

आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः।।

ग्रहास्त्वामभिषिंचन्तु राहुः केतुश्च पर्पिताः।
देवदानव गन्धर्वा यक्षराक्षसपन्नगाः।।

ऋषयो मातरो गावो देवमातर एव च।।

देवपत्न्यो द्रुमा नागा देव्यश्चाऽप्सरसां गणाः।।

अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च।।

औषधानि च रत्नानि कलाश्चावयवाश्च ये।।

सरितस्सागराः शैलास्तीर्थानि जलदा नदाः।।

एते त्वामभिषिंचन्तु सर्वकामार्थसिद्धये।

एवं स्नपयित्वा पूर्वोपकाल्पितैस्सर्वौषधिभिर्गन्धादिभिस्सपत्नीकं यजमानं स्नापयेत्।।

सर्वौषधिभिः स्नानं नाममन्त्रैर्मस्तकप्रभृति गात्राण्यनुलिप्य यथा निर्मलोदकेन स्नानं ततः शुक्लमाल्यांबरधरस्सर्व अग्नेः पश्चादवस्थितेभ्य ऋत्विग्भ्यो दक्षिणां दद्यात्।।

(मात्स्ये)।

ततः शुक्लमाल्यांबरधरः शुक्लगन्धानुलेपनः।
सर्वौषधैः सर्वगन्धैः स्नापितो देवपुंगवैः।।
यजमानस्सपत्नीक ऋत्विजश्च समाहितः।।

दक्षिणभिः प्रयत्नेन पूजयेद्गतविस्मयः।।

दक्षिणाप्रकारः।

वर्णक्रमेणोदङ्मुखोपविष्टाय ऋत्विजे प्रत्यङ्मुखोपविष्टो यजमानः कुशजलयवपाणिस्सन् वक्ष्यमाणतत्तद्देवतामन्त्रान् पठित्वा कृतस्तैतस्य कर्मणः साद्गुण्यार्थं अमुकगोत्रायामुकशर्मणे अमुकदेवस्वरूपायामुकद्रव्यं दक्षिणात्वेन दानमुत्सृजामि चाददेति।।

(मात्स्ये)।

सूर्याय कपिलां धेनुं दद्याच्छंखं तथेन्दवे।
रक्तं धुरंधरं दद्याद्भौमाय ककुदादिकं।।

बुधाय जातरूपं च गुरवे पीतवाससी।
श्वेताश्वं भृगवे चैव कृष्णा गौरर्कसूनवे।।

आयसं राहवे दद्यात्केतवे छागमुत्तमम्।।

सुवर्णेन समा कार्या यजमानेन दक्षिणां धेनोः कपिलामूल्येन मायादक्षिणां न्यूना भवति तावन्मूल्यं सुवर्णं तस्याः पूरणाय तत्समकालमेव दातव्यम्। न तु सुवर्णमन्त्रः पृथक्पठनीयः।।

सुवर्णमथवा दद्यात् गुरुर्वा येन तुष्यति।
स्वमन्त्रेण प्रदातव्याः सर्वास्सर्वत्र दक्षिणा इति।।

चिन्तामणौ दर्शनात्

एतच्चाल्पधनविषयं प्रभूतधनेन मूल्यसमं स्वर्णं दातव्यं। गावाद्यभावे तन्मूल्यस्वर्णं दातव्यं। तत्राप्यल्पधनेन प्रथमोपलगोमूल्यं। तत्राप्यशक्तत्वे। गवामभावे निष्कं वा तदर्धं पादमेव वा। इति दशा सर्वत्र परिकल्पनीया।।

तत्र क्रमेण दानमन्त्रा मत्स्यपुराणे।

कपिलादानमन्त्रः।

कपिले सर्वदेवानां पूजनीयाऽसि रोहिणी।
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे।।

शंखदानमन्त्रः।

पुण्यस्त्वं सर्वपुण्यानां मंगलानां च मंगलम्।
विष्णुना विधृतो यस्मादतः शन्तिं प्रयच्छ मे।।

वृषभदानमन्त्रः।

धर्मस्त्वं वृषरूपेण जगदानन्दकारक।
अष्टमूर्तेरधिष्ठानमतः शान्तिं प्रयच्छ मे।।

हिरण्यस्य।

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे।।

पीतवस्त्रस्य।

पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभं।
प्रदानतोऽस्तु मे विष्णुरतः शन्तिं प्रयच्छ मे।।

अश्वदानस्य।

विष्णुरश्वस्वरूपेण यस्मादश्वं न सम्भवं।
चंद्रार्कवाहनं नित्यमतः शन्तिं प्रयच्छ मे।।

ŚANAIŚCHARA (sculpture by Syama-Sundara Bhatt of Bangalore)

धेनुदानमन्त्रः।

धेनुस्त्वं पृथिवी सर्वा यस्मात्केशवसन्निभा।
सर्वपापहरा नित्यमतः शन्तिं प्रयच्छ मे।।

लोहदानस्य।

यस्मादायसकर्माणि त्वदाधाराणि सर्वदा।
हे लोह लांगलादीनि अतः शान्तिं प्रयच्छ मे।।

छागदानमन्त्रः।

छागस्त्वं सर्वयज्ञानामाहुतित्वे व्यवस्थितः।
पानं विभावसोर्नित्यमतः शन्तिं प्रयच्छ मे।।
तत्र ग्रहोक्तादि दक्षिणाभावे सर्वेभ्य आदित्यादिभ्यो यथाशक्त्यलंकृतामेकैकां गां दद्यात्।।

गोदानमन्त्रः।

गवामंगेषु तिष्ठन्ति भुवनानि चतुर्दश।
यस्मात्तस्माच्छुभं मे स्यादिहलोके परत्र च।।

सर्वेष्वपि दक्षिणापक्षेषु पूर्वोक्तदक्षिणाव्यतिरेकेण शय्यारत्नानि भूमिः ऋत्विग्भ्यो वाऽन्योभ्यो ब्राह्मणेभ्यो दक्षिणा देयाः। एतच्च सति संभवे।।

यस्मादशून्यं शयनं केशवस्य शिवस्य च।
शय्यामावाप्य शून्यास्तु तस्माज्जन्मनि जन्मनि।।

इति शय्यादानमन्त्रः।।

रत्नदानमन्त्रः।

यथा रत्नेषु सर्वेषु देवास्सर्वे प्रतिष्ठिताः।
तथा शन्तिं प्रयच्छन्तु रत्नदानेन मे सुराः।।

भूदानमन्त्रः।

यथा च भूमिदानस्य कलां नार्हन्ति षोडशिम्।
दानान्यन्यानि मे शान्तिः भूमिदानाद्भवंत्विह।।
एवं संपूजयेद्भक्त्या वित्तशाठ्यविवर्जितः।
वस्त्र कांचन रत्नाद्यैर्गन्धमाल्यानुलेपनैः।।

एवं ग्रहादीन् संपूज्य दक्षिणादानान्तं कर्म कृत्वा वह्निं प्रदक्षिणीकृत्य ग्रहवेदिसमीपं गत्वा सूर्यादींश्च प्रदक्षिणीकृत्य नमस्कृत्य तेभ्यः पुष्पांजलिं दत्वा विसर्जयेत्।।

विसर्जनमन्त्रः।

यान्तु देवगणास्सर्वे पूजामादाय पार्थिवान्।
इष्टकामप्रदानार्थं पुनरागमनाय च।।

पार्थिवान् प्रदेशानित्यन्वयः।।

अथवा पार्थिवान् राज्ञः पार्थिव इत्यधिकार्युपलक्षणं।।

अनेन विधिना यस्तु ग्रहपूजां समाचरेत्।
सर्वान्कामानवाप्नोति प्रेत्य स्वर्गे महीयते।।

यस्तु पीडाकरो नित्यमल्पवित्तस्य वा ग्रहः।
तं तु यत्नेन संपूज्य शेषानभ्यर्चयेद्बुधः।।

तं तु यत्नेनेति पीडाकरं ग्रहं यत्नेन प्रयत्नेन पूर्वोक्तरीत्या अधिप्रत्यधिदेवतासहितं पूजयित्वा शेषानपि ग्रहान् मुख्यमाल्यादिभिर्यथाशक्ति संपूजयेत्। इयं च प्रतिकूलग्रहपूजा तद्वासरे कर्तव्या। राहुकेत्वोः पृथग्वाराभावात् मन्दवारो ग्राह्यः। शन्यादीन् मन्दवारे तु पूजयेत्प्रयतो नरः।।

इति बोधायनकारिकाः।

ग्रहा गावो नरेन्द्राश्च ब्राह्मणाश्च विशेषतः।
पूजिताः पूजयंत्येते निर्दहन्त्यवमानिताः॥

तस्मान्न दक्षिणाहीनं कर्तव्यं भूतिमिच्छता॥
विवाहोत्सवयज्ञेषु प्रतिष्ठादिषु कर्मसु।
निर्विघ्नार्थं मुनिश्रेष्ठ तथोद्वेगो(गा)द्भुतेषु चेति॥

इति नवग्रह यज्ञः समाप्तः॥

कर्ता स्नात्वा नित्यकर्म निर्वर्त्य मौहूर्तिकोक्ते काले
आचम्य, प्राणानायम्य, देशकालौ संकीर्त्य करिष्यमाणाऽमुककर्मणि ग्रहानुकूल्य
सिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्ये।
इति उपनयनादि कर्म प्रारंभेषु नौमित्तिक ग्रहयज्ञसंकल्पः।।

त्रिजन्म नक्षत्रायन विषुवोपरगेषु त्रिजन्मनक्षत्रे ग्रहयज्ञं करिष्ये।।

अयने विषुवे उपएगे वा ग्रहयज्ञं करिष्ये।। इति नित्यग्रहयज्ञसंकल्पः।।

नवग्रहयज्ञप्रयोगः

नवग्रहदेवतानां दिङ्मंडल समिधः

अथ ग्रहमखं वक्ष्ये श्रीदं कर्मसमृद्धिदम्।
नवग्रहात्मा विघ्नेशः तेन तुष्टोऽस्तु सर्वदा।।१।।

शौनकः।

अश्रद्दधानमशुचिं अजपं त्यक्तमंगलम्।
ग्रहा न यन्ति सुव्यक्तं पुरुषं यमसादनम्।।२।।

ग्रहाणामुग्रचोष्टानां नक्षत्रपथचारिणाम्।
उपचारान् प्रवक्ष्यामि शान्त्यर्थं तु यथाविधि।।३।।

स्मृतिचंद्रिका।

शरीरेष्वासते देवाः ग्रहाः सूर्यादयो नव।
तस्मात्तेषु प्रशान्तेषु देहशान्तिर्भवेन्नृणाम्।।१।।

पूजया जपहोमैश्च पूजिताः शान्तिमिच्छुभिः।
शान्तास्तृप्ताः प्रदास्यन्ति ह्योतेषामभिवाञ्छितान्।।२।।

ग्रहा गावो नृपा विप्रः नार्यः स्वस्वपतिप्रियाः।
पूजिता पूजयिष्यन्ति निर्दहन्त्यवमानिताः॥३॥

एते वसन्ति भूतेजु चरेषु स्थावरेष्वपि।
सर्वापद्भ्यो विमुक्त्यर्थं नित्यं पूज्या नवग्रहाः॥४॥

बोधायनः।

यश्च यश्च यथा दुःस्थः तं तं यत्नेन पूजयेत्।
ब्रह्मणैषां वरो दत्तः पूजिताः पूजयिष्यथ॥१॥

ग्रहाधीना नरेन्द्राणां उच्छ्रायाः पतनानि च।
भावाभावौ च जगतः तस्मात्पूज्यतमा ग्रहाः॥२॥

देवता ग्रहरूपेण दर्शयन्ति शुभाशुभम्।

मध्ये वर्तुलमंडलमर्कसमिधमादित्यादिभ्यः।
आग्नेय्यां चतुरश्रं पालाशं सोमादिभ्यः।
दक्षिणे त्रिकोणं खादिरमंगारकादिभ्यः।
ऐशान्यां बाणाकारमपामार्गं बुधादिभ्यः।
उत्तरे दीर्घचतुरश्रमश्वत्थं बृहस्पत्यादिभ्यः।
प्राच्यां पंचकोणमौदुम्बरं शुक्रादिभ्यः।
पश्चिमे धनुराकारं शमीमयं शनैश्चरादिभ्यः।
नैरऋत्यां शूर्पाकारं दूर्वा राह्वादिभ्यः।
वायव्यां ध्वजाकारं कुशाः केत्वादिभ्यः।

प्रधानाधिप्रत्यधिदेवतानां मन्त्राः।

आ सत्येनाग्निं दूतं कद्रुदायेत्यदित्याग्निरुद्रेभ्यः।
आप्यायस्वाप्सु मे गौरीमिमायेति सोमाब्गौरीभ्यः।
अग्निर्मूर्धा स्योनापृथिवी क्षेत्रस्य पतिनेत्यंगारक पृथिवीक्षेत्रपतिभ्यः।

उद्बुध्यस्वेदं विष्णुर्विष्णोरराटमसीति बुधविष्णु विष्णुभ्यः।

बृहस्पते अतीन्द्र मरुत्वो ब्रह्मजज्ञानमिति बृहस्पतीन्द्र ब्रह्मभ्यः।

शुक्रन्ते अन्यदिन्द्राणीमिन्द्रं व इति शुक्रेन्द्राणीन्द्रेभ्यः।
(शमग्निः) शन्नो देवीः प्रजापत इमं यमेति शनैश्चरप्रजापतियमेभ्यः।
कया न आ यंगौर्यत्तेदेवीति राहुसर्पनिरऋतिभ्यः।
केतुं कृण्वन्ब्रह्मा देवानां सचित्र चित्रमिति केतुब्रह्म चित्रगुप्तेभ्यः।

धान्यानि बोधायनोक्तानि।

यवाः श्यामाका आढक्यो मुद्गाश्चणकतंडुलाः।
गोधूमास्तंडुलाढक्या मुद्गाश्चणकबर्बराः।
तिलमाषकुलुत्थाश्च ग्रहधान्यं क्रमात् क्षिपेत्॥
(नवधान्यान्यनुक्रमात्)॥

नवग्रहाद्यावाहनम्।

प्राणानायम्य देशकालौ संकीर्त्य नक्षत्रे राशौ जातस्यास्य कुमारस्य करिष्यमाणामुककर्मणि ग्रहानुकूल्यतासिद्ध्यर्थं नवग्रहदेवतापूजां करिष्ये॥

ग्रहस्येशानदिग्भागे ग्रहाराधनं कुर्यात्॥

सूर्यग्रहावाहनं॥

आ सत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।

हिरण्मयेन सविता रथेना देवो यति भुवना वि पश्यन्।
अग्निं दूतं वृणीमहे होतारं विश्ववेदसं।
अस्य यज्ञस्य सुक्रतुं।।

कद्रुद्रादाय प्रचेतसे मीढुष्टमायतव्यसे। वोचेम शन्तमगं् हृदे।।

ॐ भूर्भुवस्सुवः- भगवन् ग्रहाधिपते किरीटिन् कलिंगदेशोद्भव काश्यपगोत्र सूर्य इहागच्छ मध्ये (यव) गोधूम धान्यस्योपरि वर्तुलमंडले अधिप्रत्याधिदेवताग्निरुद्रसहितं त्वां पूजार्थमावहयामि। अत्राधितिष्ठ।।

इति रक्तपुष्पाक्षतैः स्थापयेत्।।

चन्द्रग्रहावाहनम्।।

आप्यायस्व समेतु ते विश्वतः स्सोम वृष्णियं। भवा वाजस्य संगथे।।

अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा। अग्निं च विश्वशंभुवमापश्च विश्वभेषजीः।।

(गौरीमिमाय)

ॐ भूर्भुवस्सुवः- भगवन्नक्षत्राधिपते किरीटिन् यमुनातीरोद्भव आत्रेयगोत्र सोम इहागच्छ सूर्यस्याग्नेय दिग्भागे (श्यामक) तंडुल धान्यस्योपरि चतुरश्रमंडले अधिप्रत्याधिदेवताब्गौरी सहितं त्वां पूजार्थमावाहयामि।।

इति श्वेतपुष्पाक्षतैः स्थापयेत्।।

अंगारकग्रहावाहनम्

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं। अपागं् रेतागंसि जिन्वति।।

स्योना पृथिवी भवानृक्षरानिवेशनी। यच्छानशर्मसप्रथाः।

क्षेत्रस्य पतिना वयगं् हितेनेव जयामसि।
गामश्वं पोषयित्वा स नो मृडाती दृशे।।

ॐ भूर्भुपस्सुवः- भगवन्नग्न्याकृते किरीटिन् अवन्ती समुद्भव भारद्वाजगोत्र अंगारक इहागच्छ सूर्यस्य दक्षिण दिग्भागे आढकधान्यस्योपरि त्रिकोणमंडले अधिप्रत्याधिदेवता पृथिवीक्षेत्रपतिसहितं त्वां पूजार्थमावाहयामि।।

इति रक्तपुष्पाक्षतैः स्थापयेत्।।

बुधग्रहावाहनम्।

उद्बुध्यस्वाग्ने प्रतिजागृह्येनमिष्टापूर्ते संग् सृजेथा मयं च।
पुनः कृण्वगं्स्त्वा पितरं युवानमन्वातागं्सी त्वयि तन्तुमेतं।।

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं।
समूळ्हमस्य पागंसुरे।।

विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोश्श्नप्त्रेस्थो विष्णोस्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा।।

ॐ भूर्भुवस्सुवः- भगवन् सौम्याकृते किरीटिन् मगधदेशोद्भव आत्रेयगोत्र बुध इहागच्छ सूर्यस्येशानदिग्भागे मुद्गधन्यस्योपरि बाणाकारमंडले अधिप्रत्याधिदेवता विष्णु सहितं त्वां पूजार्थमावाहयामि।।

इति पीतपुष्पाक्षतैः स्थापयेत्।।

बृहस्पतिग्रहावाहनम्।

बृहस्पते अति यदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु।
यद्दीदयच्छवसर्त प्रजात तदस्मासु द्रविणं धेहि चित्रम्।।

इन्द्र मरुत्व इह पाहि सोमं यथ शार्या ते अपिबस्सुतस्य।

तव प्रणीती तव शूर शर्मन्ना विवासन्ति कवयस्सुयज्ञाः।।

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आ वः।
सबुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः।।

ॐ भूर्भुवस्सुवः- भगवन् सर्वदेवताचार्य किरीटिन् सिन्धुदेशोद्भव अंगीरसगोत्र बृहस्पते इहागच्छ सूर्यस्य उत्तरदिग्भागे चणकधान्यस्योपरि दीर्घचतुरश्रमंडले अधिप्रत्याधिदेवतेन्द्रब्रह्मसहितं त्वां पूजार्थमावाहयामि। अत्राधितिष्ठ।।

इति पीतपुष्पाक्षतैः स्थापयेत्।।

शुक्रग्रहावाहनम्

शुक्रं ते अन्यद्यजतंन्ते अन्यद्विषुरूपे अहनी द्यौरिवासि।
विश्वाहि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु।।

इन्द्राणी मा सुनारिषु सुपत्नी महमश्रवं।
नह्यस्या अपरं च न जरसामरतेपतिः।। इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः।
अस्माकमस्तु केवलः।।

ॐ भूर्भुवस्सुवः- भगवन् सर्वदैत्याचार्य किरीटिन् भोजकटदेशोद्भव भार्गवगोत्र शुक्र इहागच्छ सूर्यस्य पूर्वदिग्भागे (तंडुल) निष्पाव धान्यस्योपरि पंचाश्रमंडले अधिप्रत्याधिदेवतेन्द्राणीन्द्रसहितं त्वां पूजार्थमावाहयामि। अत्राधितिष्ठ।।

इति श्वेतपुष्पाक्षतैः स्थापयेत्।।

शनिग्रहावाहनम्।

शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभि स्रवन्तु नः।। (शमग्निरग्निभिस्करच्छन्नस्तपतु सूर्यः। शं वातो वात्वरपा अपस्त्रिधः।।) प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयगं स्याम पतयो रयीणां।

इमं यम प्रस्तरमहि सीदां गिरोभिः पितृभिस्संविदानः।
आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व।।

ॐ भूर्भुवस्सुवः- भगवन् क्रूराकृते किरीटिन् सौराष्ट्रदेशोद्भव काश्यपगोत्र शनैश्चर इहागच्छ सूर्यस्य पश्चिमदिग्भगे तिलधान्यस्योपरि धनुराकारमंडले अधिप्रत्याधिदेवता प्रजापति यमसहितं त्वां पूजार्थमावाहयामि। अत्राधितिष्ठ।।

इति कृष्णाक्षतैः स्थापयेत्।।

राहुग्रहावाहनम्

कया नश्चित्र आभुवदूती सदा वृधस्सखा।
कया शचिष्ठया वृता।। आयं गौः पृश्निरक्रमीदसदन्मातरं पुनः। पितरं च प्रयन्स्थुवः।।

यत्ते देवी निर्ऋतिराबबन्ध दामग्रीवास्व विचर्त्यर्थं।

इदन्ते तद्विष्याम्यायुषो न मध्यादथा जीवः पितुमद्धिः प्रमुक्तः॥

ॐ भूर्भुवस्सुवः- भगवन् क्रूराकृते किरीटिन् सिंहल (विराट) देशोद्भव पैठीनसिगोत्र राहो इहागच्छ सूर्यस्य निर्ऋति दिग्भागे माषधान्यस्योपरि शूर्पाकारमंडले अधिप्रत्यधिदेवता सर्प निर्ऋति सहितं त्वां पूजार्थमावाहयामि। अत्राधितिष्ठ।

इति कृष्णपुष्पाक्षतैः स्थापयेत्॥

केतुग्रहावाहनम्।

केतुं कृण्वन्न केतवे पेशीमर्या अपेशसे। समुषद्भिरजायथाः॥

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम्। श्येनो गृध्राणाग्ं स्वधितिर्वनाग्ं सोमः पवित्रमत्येतिरेभन्॥

सचित्र चित्रं चितयन्तमस्मै चित्रक्षत्र चित्रतमं वयोधाम्। चन्द्रं रयिं पुरुवीरं बृहन्तं चन्द्र चन्द्राभिर्गृणते युवस्व॥

ॐ भूर्भुवस्सुवः- भगवन् क्रूराकृते किरीटिन् अन्तर्वेदिसमुद्भव जैमिनिगोत्र केतो इहागच्छ सूर्यस्य वायव्यदिग्भागे कुलुत्थधान्यस्योपरि ध्वजाकारमंडले अधिप्रत्याधिदेवता ब्रह्म चित्रगुप्त सहितं त्वां पूजार्थमावाहयमि॥ अत्राधितिष्ठ॥

इति धूम्रपुष्पाक्षतैः स्थापयेत्॥

अत्र केचिद्गुडे लवणे वा॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनं। उर्वारुकमिव बन्धनान्मृत्योर्मृक्षीय मामृतात्॥

इति मन्त्रेण मृत्युंजयमावाह्य ग्रहैस्समं पूजां दानं च कुर्वन्ति॥

यथोक्तकुसुमाद्यभावे यथोपपन्नैः कुसुमाक्षतैः स्थापयेत्॥

ततो लोकपाल साद्गुण्य देवतावाहनादि। एवं ग्रहाधिदेवताः प्रतिष्ठाप्य॥

काण्डानुसमयेन पदार्थानुसमयेन वा षोडशोपचारपूजां कुर्यात्॥

अधिदेवताप्रत्यधिदेवतानां च एत एवोपचाराः।

ततः पीठादैशान्यामुदीच्यां वा पूर्वोक्तगुणयुक्तं कलशं संस्थाप्य पल इमं मे वरुण इति वरुणमावाह्य संपूज्य कर्मान्ते तेनोदकेनात्मानमभिषिच्य कलशं स्नानवस्त्रं चाचार्याय दद्यादिति संक्षेपः॥

लोकपालकावाहनम्।

प्रतिमासु अक्षतपुंजे प्रागाद्यष्टदलेषु वा लोक पालकानावाहयेत्॥

इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः। अस्माकमस्तु केवलः॥

इन्द्रं लोकपालकमावाहयामि॥

अग्निं दूतं वृणीमहे होतारं विश्ववेदसं।

अस्य यज्ञस्य सुक्रतुं।।

अग्निं लोकपालकमावाहयामि।।

यमाय सोमगं् सुनुत यमाय जुहुता हविः।
यमगंह यज्ञो गच्छत्यग्निदूतो अरंकृतः।।

यमं लोकपालकमावाहयामि।।

यत्ते देवी निर्ऋतिराबबन्ध दामग्रीवास्व विचर्त्यम्।
इदन्ते तद्विष्याम्यायुषो न मध्यादथाजीवः पितुमाद्धिः प्रमुक्तः।।

निर्ऋतिं लोकपालकमावाहयामि।।

इमं मे वरुण श्रुधी हवमध्या च मृडया त्वामवस्युराचके।।

वरुणं लोकपालकमावाहयामि।।

आ नो नि युद्भिश्शतिनिभरध्वरम्।
सहस्त्रिणीभिरुप याहि यज्ञं।।

वायो अस्मिन् हविषि मादयस्व।
यूयं पातस्स्वस्तिभिःसदानः।।

वायुं लोकपालकमावाहयामि।।

सोमो धेनुगं् सोमो अर्वन्तमाशु सोमो वीरं कर्मण्यं ददातु।। सादन्यं विदथ्यगं् सभेयं। पितुः श्रवणं यो ददाशदस्मै।।

सोमं लोकपालकमावाहयामि।।

सहस्राणि सहस्त्रधा बाहुवो स्तव हेतयः।
तासामीशानो भगवः पराचीना मुखा कृधि।।
ईशानं लोकपालकमावाहयमि।।

साद्गुण्यदेवतावाहनम्।।

अष्टदलान्तरेषु प्रागादिषु दुर्गादि साद्गुण्यदेवता आवाहयेत्।।

जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः।।

दुर्गामावाहयामि।।

गणानान्त्वा....इति गणपतिमावाहयामि।।

क्षेत्रस्य पतिना....इति क्षेत्रपालकमावाहयामि।।

त्र्यंबकं यजामहे....इति त्र्यम्बकमावाहयामि।।

वास्तोष्पते प्रति....इति वास्तोष्पतिमावाहयामि।।

यत इन्द्रा भयामहे ततो मो अभयंकृधि। मघवं छग्धितवतन्न ऊतये विद्विषो विमृधो जहि।।

स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी। वृषेन्द्रः पुर एतु नस्स्वस्तिदा अभयंकरः।।

अभयंकरमावाहयामि।।

ये ते सहस्त्रमयुत पाशा मृत्याय हन्तवे।
तान् यज्ञस्य मायया सर्वानिव यजामहे।।

मृत्युमावाहयामि।।

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानर मृताय जातमग्निम्। कविगं् सम्राजमतिथिं जनानामासन्नापात्रं जनयन्त देवाः।। अग्निं वैश्वानरमावाहयामि।।

अग्न्युत्तारणपूर्वकप्राणप्रतिष्ठा॥

प्रतिमासु पूजापक्षे पारिभाषिकाग्न्युत्तारणं प्रक्षाल्येत्यन्तं कृत्वा। तत्तद्दिगाननाः प्रतिमाः स्थापयित्वा सूर्यप्रतिमायाः कपोलौ स्पृष्ट्वा प्राणप्रतिष्ठां विदध्यात्॥

अस्य श्रीप्राणप्रतिष्ठापनमहामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः। ऋग्यजुस्सामानि च्छन्दांसि चिद्रूपा परा प्राणशक्तिर्देवता। आं बीजं, ह्रीं शक्तिः क्रों कीलकं। सूर्यप्रतिमायां प्राणप्रतिष्ठापने विनियोगः॥

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों हंस सो हं सूर्यप्रतिमायाः प्राणा इह प्राणाः।
ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों हंस सो हं सूर्यप्रतिमायाः जीव इह स्थितः।
ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों हंस सो हं॥

सर्वेन्द्रियाणि वाङ्मनश्चक्षुः श्रोत्रत्वग्जिह्वाघ्राणपाणि पादपायूपस्था इहैवागत्य स्वस्तये सुखं चिरं तिष्ठन्तु स्वाहा इति जपेत्॥ अस्यै प्राणाः प्र तिष्ठन्तु। अस्यै प्राणाः क्षरन्तु च। अस्यै देवत्वमचीयै स्वाहा। इति मन्त्रमुक्त्वा प्रतिमां सजीवां ध्यायेत्। एवं प्राणप्रतिष्ठां विधाय प्रतिमां पंचामृतैः संस्नाप्य शुद्धोदकेन स्नापयेत्॥

तत उदुत्यमित्यस्य, सोमः सूर्यो गायत्री। सूर्यप्रतिमा नेत्रोन्मीलने विनियोगः। ॐ उदु त्यं जातवेदसं........ सूर्यम् इति मन्त्रेण सुवर्णशलाकया दर्भशलाकया वा गोघृतं गृहीत्वा तेन प्रतिमाया दक्षवामनेत्रे मन्त्रावृत्या क्रमेणोन्मील्य। अंजंति त्वामित्यस्य विश्वेदेवा वानस्पतिस्त्रिष्टुप्। सूर्यप्रतिमा नेत्रयोर्मधुनाऽभ्यंजने विनियोगः।

अंजन्ति त्वामध्वरे देवयन्तः। वनस्पते मधुना दैव्येन।
यदूर्ध्वस्तिष्ठाद्द्रविणेह धत्तात्। यद्वाक्षयो मातुरस्या उपस्थे॥

इति मन्त्रावृत्या क्रमेण मधुना नेत्रे अभ्यज्योपहारं निवेदयेत्॥

नेत्रोन्मीलनमारभ्य प्रतिमायाः पुरतो न तिष्ठेत्। एवं सोमादि प्रतिमानामग्न्युत्तारणादिकमूहेत। प्रत्येकं कर्तुमशक्तौ सर्वासां सहैवोहेत। तत्र हंसः सो हमित्यनन्तरम् सूर्यादिप्रतिमासु प्राणप्रतिष्ठापने वि...... सूर्यादिप्रतिमानां प्राणा इत्यदिरूहो यथा यथम्॥

ततो ग्रहानावाहयेत्॥

तद्यथा- आ सत्येनेत्यस्य विश्वेदेवाः सूर्यस्त्रिष्टुप्। समस्तव्याहृतीनां प्रजापतिः प्रजापतिर्बृहती। सूर्यावाहने विनियोगः॥

ॐ आ सत्येन......विपश्यन् ॐ भूर्भुवस्सुवः। भगवन् ग्रहाधिपते किरीटिन् त्रिदेवतामय पद्मासन पद्माभयकर द्विभुजलोहितमाल्याम्बरधर लोहितगन्धानुलेपन माणिक्याभरणभूषित जपापुष्पो पमद्युते सप्ताश्वरथारूढ कलिंगदेशोद्भव काश्यपसगोत्र

सूर्य इहागच्छ इति मध्ये द्वादशांगुलवर्तुले आरक्ताक्षतापूरिते पीठे प्राङ्मुख्यां ताम् प्रतिमायां रक्ताक्षतैः सूर्यमावाह्येहाधितिष्ठेति स्थापयेत्।।

एवं क्रमेण चन्द्रादि सर्वग्रहाणामावाहनादि कर्तव्यमिति प्रथमः कल्पः।। अयं तु अध्येतृणां, अनुष्ठातृणां च गुरुभूतः, वसुकरः इति ग्रन्थकर्तृभिरेवेतरत्प्रमाणमनुसृत्य लघुभूतौ द्वितीय तृतीय कल्पावभिहितौ। तत्र व्याहृत्याऽवाहने प्रमाणमाह। हेमाद्रौ। वर्णरूपगुणैर्युक्तान्, व्याहृत्याऽवाहयेत्तु तानिति। मदनरत्ने संग्रहे। अधिदेवा दक्षिणे तु वामे प्रत्यधिदेवताः। स्थापनीयाः प्रयत्नेन व्याहृतीभिः पृथक्पृथक्।। सर्वन् किरीटिनः कुर्यादित्यादि।।

तत्र द्वितीयकल्पस्तु।

भूर्भुवस्सुवरित्यादि देवतापदान्तमुक्त्वा पूजार्थं त्वामावाहयामीत्यावाह्य इहाधितिष्ठेति स्थापयेदित्येवं वा सर्वत्र प्रयोग इति।।

अस्मिन्पक्षे आवाहनादिक्रमः।

ॐ भूर्भुवस्सुवः भगवन्, ग्रहाधिपते किरीटिन् पूजार्थं त्वामावाहयामि इहाधितिष्ठ। इति सूर्यस्य।।

ॐ भूर्भुवस्सुवः नक्षत्राधिपते किरीटिन् इत्यदि सोमस्य।।

ॐ भूर्भुवस्सुवः अग्न्याकृते किरीटिन् इत्यादि अंगारकस्य।।

ॐ भूर्भुवस्सुवः सौम्यकृते किरीटिन् इत्यदि बुधस्य।।

ॐ भूर्भुवस्सुवः सर्वदेवताचार्य किरीटिन् इत्यदि बृहस्पतेः।।

ॐ भूर्भुवस्सुवः सर्वदैत्याचार्य किरीटिन् इत्यदि शुक्रस्य।।

ॐ भूर्भुवस्सुवः क्रूराकृते किरीटिन् इत्यदि शनैश्चरस्य।।

ॐ भूर्भुवस्सुवः क्रूराकृते किरीटिन् इत्यदि राहोः
ॐ भूर्भुवस्सुवः क्रूराकृते किरीटिन् इत्यादि केतोः।।

तृतीयकल्पप्रमाणस्तु संस्काररत्नमालायां।
अथवा सर्वत्र देशगोत्रे एवोच्चार्ये असंभवे इतरस्याभि ध्यानमात्रं। इति।।

अस्मिन्कल्पे आवाहनादिक्रमः अत्रैव महार्णवकर्मविपाकोक्त ग्रहयज्ञप्रकरणे उक्तः इति तत्रैव द्रष्टव्यम्।।

तदिदं कल्पद्वयामाश्रित्य संप्रदायाविरोधेन ग्रहदेवताऽवाहनादि क्रमोऽभिहित इत्युक्तं।।

यथोक्त प्रतिमानामलाभे सर्वास्सुवर्णमय्यः तदलाभे (तदभावे) तंडुलपुंजादौ।। यथोक्ताक्षतालाभे सर्वा श्वेता एव। सर्वे ग्रहा अदित्यभिमुखा एव वा स्थापनीयाः। अस्मिन्पक्षेऽपि सूर्यः प्रसिद्ध प्राच्यभिमुख एव। बोधायनः।। लोकपालान् दुर्गा,

विघ्न, क्षेत्र, वास्तु त्र्यम्बकान्। अभयंकरमृत्यू च ह्यग्निं वैश्वानरं क्रमात्।। इति।।

बोधायन सत्याषाढोक्ताः लोकपालक्रतुसंरक्षण देवतामन्त्राः

(१) त्रातारमिन्द्रं......धात्विन्द्रः

(३) यमो दाधार पृथिवीं......वायुरक्षितं।।

(२) अग्निर्दाद्रविणं.....पुरुत्र।

(४) असुन्वन्तं......तुभ्यमस्तु।।

(५) सधमादोद्युम्निनीः।.......मातृतमा

(६) सोमो धेनुं.......ददाशदस्मै।।

(७) अनो नियुद्भिः.....सदानः।।

(८) सहस्राणि सहस्रधा......मुखा कृधि।।
इति लोकपालानाम्।।

(९) जातवेदसे........अत्यग्निः।।

(१०) गणानांत्वा.......सादनं।।

(११) यतइन्द्र......विमृधोजहि।।

(१२) स्वस्तिदाविशस्पतिः.......अभयंकरः।।

(१३) क्षेत्रस्य पतिना.......ईदृशे।।

(१४) येते सहस्रं........अव यजामहे।।

(१५) वास्तोष्पते........चतुष्पदे।।

(१६) मूर्धानं दिवः........देवाः।।

(१७) त्र्यम्बकं.......मामृतात्।।

इति दुर्गादीनां।।

इति नवग्रहदेवताः क्रतुसंरक्षणदेवताः लोकपाल देवताश्च आवाह्य, प्रतिष्ठाप्य कांडानुसमयेन पदार्थानु समयेन वा पूजयेत्।।

एकस्य कृत्स्नां पूजां समाप्य अन्यस्य कुर्यादित्येषः कांडानुसमयः।

पदार्थानुसमयस्तु सर्वेषामावाहनं कृत्वा क्रमणैकैकस्मै तं तमुपचारमर्पयेदिति।। ग्रहाणां यथोक्त तत्तद्वर्णवस्त्रगन्धपुष्पाणामलाभे श्वेतानि। सर्वासां देवतानां धूपो गुग्गुलुः।। रवये-गुडौदनं। सोमाय घृतयुक्तं पायसं। भौमाय हविष्यान्नं। बुधाय-षाष्टिकपायसं। गुरुवे-दध्योदनं। शुक्राय-घृतौदनं। शनये - तिलमाषमिश्रितमन्नं। राहवे-लवणमिश्रक्षीरयुक्तमोदनं। केतवे-आरक्तपिष्टयुक्त लवणमिश्राजाक्षीरयुततिलतंडुलमिश्रितमोदनं। एतेषामलाभे तत्तद्वर्णयुक्तौदनो नैवेद्यं घृतौदनं वा।।

रवये- द्राक्षाफलानि। सोमाय - इक्षवः। भौमाय-पूगीफलानि। बुधाय-नारिंगाणि। गुरुवे-जंबीराणि। शुक्राय बीजपूराणि। शनये- खर्जूरफलानि। राहवे-नारिकेलानि। केतवे-दाडिमानि।।

यथोक्त फलालाभे नारिकेलफलानि खर्जूरफलानि वा। सति संभवे फलपुष्पसमन्वितं वितानमप्यर्पणीयं।। अधिदेवता प्रत्यधिदेवतानां च एत एवोपचाराः।।

मात्स्ये।।

प्रागुत्तरेण तस्माच्च सुधा गन्धाक्षत विभूषितम्।
चूतपल्लव संयुक्तं फलवस्त्रयुगान्वितम्।।
पंचरत्नसमायुक्तं पंचपल्लवसंयुतं।

स्थापयेदव्रणं कुम्भं वरुणं तत्र विन्यसेत्।।
गंगाद्यास्सरितः सर्वाः समुद्राश्च सरांसि च।
गजाश्वरथ्या वल्मीकसंगमा ह्रद गोकुलात्।।
मृदमानीय विप्रेन्द्र सर्वौषधिसमान्वितं।
स्नानार्थं विन्यसेत्तत्र यजमानस्य धर्मवित्।।

स्कान्दे।
स्थापनमन्त्रा एव होममन्त्रा उक्ताः।।
अधिदेवादीनां चैवम्।। इति।।
नृसिंहपारिजाते।।
अष्टोत्तरसहस्रस्तु अष्टोत्तरशतं तु वा।
अष्टाविंशतिरष्टौ वा प्रधानाहुतयः क्रमात्।।
अधिप्रत्यधिदेवेभ्यः कुर्यात्तन्यूनसंख्यया।
चरुहस्तेन जुहुयान्नवग्रह विधाविति।।
लोकपालादीनामाज्येनैव होम इति केचित्।।
समिच्चर्वाज्यहोमक्रमः।।

समिधं मूलतो द्वयंगुलं विहाय तन्मध्यमानामिकांगुष्ठाभ्यां गृहीत्वा जुहुयात्। चरुं ग्राससमं पाणिनैव। आज्यं स्रुवेणैव। तदभावेऽश्वत्थपर्णेन वा। ततो व्यस्तसमस्तव्याहृतिभिः प्रभूततिलव्रीहीन् पाणिना हुत्वा।। इति।।
वासिष्ठेऽपि शेषाणां स्थापनं मन्त्रैः होमौ व्याहृतिभिस्तिलैः।।

स्कान्दे।। नैवेद्यं शेषं हुत्वा तु होममन्त्रैरनन्तरम्।
अथ व्याहृतिभिर्हुत्वा एकैकस्य यथाक्रमं।।
अष्टोत्तरं च साहस्रं शतमष्टाधिकं तथा।
अष्टाविंशतिरष्टौ वाऽप्येकैकस्य तु होमयेत्।।

नैवेद्यशेषहोमः केषांचिन्मतं।।

हेमाद्रौ।। ततोऽव दानधर्मेण स्रुचैव चुहुयाच्चरुं।
घृताक्तास्समिधश्च विप्रेणाज्यं च हावयेत्।।

तेन चरोः प्रत्याहुत्यव दानधर्मः।
केचिद्धस्तेन होममाहुः। तच्चिन्त्यम्।।

उदङ्मुखाः, प्राङ्मुखा वा कुर्युर्ब्राह्मणपुंगवाः।

अत्र व्याहृतिभिरिति द्वन्द्वापवादैकशेषावगत साहित्य बहुत्वयोः उपादेयगतत्वात्सर्वं व्याहृतिभिरेकाहुतिरित्येव युक्तम्।।

इति शान्तिकमलाकरे।।

प्रतिमासु अक्षतपुंजेषु वा प्रागादि दलाग्रेषु लोकपालानावाहयेत्।।

सदैवाऽयुतहोमोऽयं नवग्रहमखः स्मृतः।
विवाहोत्सव यज्ञेषु प्रतिष्ठादिषु कर्मसु।।
निर्विघ्नार्थं मुनिश्रेष्ठ तथोद्वेगाद्भुतेषु च।
वश्यकर्माभिचारादौ तथैवोच्चाटनादिके।।

नवग्रहमखं कृत्वा ततः कर्म समारभेत्।
अन्यथा फलदं पुंसां न कामं जायते क्वचित्।।

अद्भुतं भूकंपादि।।
प्रयोगपरिजाते वामनः।।
आचार्यप्रभृतिभ्यश्च ग्रहार्चनफलं ततः।

समिदाज्यचरूणां च तिलहोमफलं तथा।
तेषां जपफलं चैतद्गृण्हीयाज्जलपूर्वकम्।
ततस्तेभ्यो यथाशक्ति दातव्या दक्षिणाः पृथक्।।
ताश्च याज्ञवल्क्येनोक्ताः।।
धेनुःशंख इत्याद्याः।।

बलिप्रदानमन्त्रः

त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च।
ममैतान्यध्वरे रक्षां प्रकुर्वन्तु मुदा सदा इति।।
मात्स्ये एवं समग्रं निष्पाद्य सर्वदेवान्विसर्जयेत्।।
यान्तु देवगणास्सर्वे पूजामादाय पार्थिवीम्।
इष्टकाम समृद्ध्यर्थं पुनरागमनाय च।।
अनेन विधिना यस्तु ग्रहपूजां समचरेत्।
सर्वान्कामानवाप्नोति प्रेत्य स्वर्गे महीयते।।
यस्तु पीडांकरो नित्यं अल्पवित्तस्य वाऽग्रतः।।
तं तु यत्नेन संपूज्य शेषानप्यर्चयेन्नरः।।
इति ग्रहयज्ञप्रकारणम्।।

ग्रहतेवता मन्त्रजपक्रमः।।

(शान्तिकमलाकर ग्रन्थे।। यत्तु शिष्टाः ग्रहमन्त्राणामयुतसहस्रादिसंख्यया जपं कृत्वा तद्दशांशेन तिलादि द्रव्यैः होमं कुर्वन्ति। तत्कुत्रापि जपानुक्तेः किं मूलकमिति न विद्म इति। अथापीह केवलं प्राचीनसंप्रदायानु रोधेन याजुषप्रयेग पारिजातग्रन्थस्य मन्त्रविभाग क्रममनुसृत्य जपार्थमंगन्यासादिकमत्र लिखितम्।। पारिजातस्थमावाहनादिक्रमविशिष्टकाक्यस्तु अशुद्धमनन्वितमनृषिप्रोक्तामिति बोधायन कल्पोक्तमेव विशिष्ट वाक्यमावाहनार्थ मस्माभिर्निबद्धमिति।। न्यासार्थं कृत मन्त्रविभागक्रमे विपर्यासो यदि तद्दोषस्य नाहं पात्रमिति च सूच्यते।।)

प्राणानायम्य। देशकालौ संकीर्त्य। नक्षत्रे राशौ जातस्य अस्य शर्मणः अमुकग्रहबाधा निवृत्यर्थं ग्रहानुकूल्यसिद्ध्यर्थंर्थं अष्टेत्तरशतादिसंख्याकं आदित्यादि नवग्रहदेवतामन्त्रजपं करिष्ये।।

आदौ कलशपूजां, गणपतिपूजां, आदित्यादि नवग्रह पूजां च करिष्ये।।

१. सूर्यस्य

आ सत्येन, अग्निं दूतं, कद्रुद्राय, भास्करं, कलिगंदेशजं, काश्यपगोत्रजं, विश्वामित्रार्षं, विशाखानक्षत्रं, त्रिष्टुप्छन्दसं, कपिलाग्निकं, पद्मासनं, पद्मवर्णं, द्विभुजं, रक्तवस्त्रं, माणिक्यरत्नाभरण भूषितं, किरीटिनं, रक्तच्छत्रध्वज पताकिनं, छन्दोमयं, हरितसप्ताश्वं, सप्तरज्जुकमेकचक्रं, रक्तं रथमारुहा, दिव्यं मेरुं प्रदक्षिणीकुर्वाणं, ग्रहमंडले प्रविष्टं, अधिदेवताग्निं, प्रत्यधिदेवता रुद्रं मध्ये (यव)

गोधूमधान्यस्योपरि वर्तुलाकारमंडले प्राङ्मुखं, ॐ भूर्भुवस्सुवः, सूर्यग्रहमावाहयामि।। स्थापयामीत्यादि पूर्ववत् कांडानुसमयेन पदार्थानुसमयेन वा षोडशोपचारपूजां कुर्यात्।। मन्त्राणामृषिदेवतादिकं संस्काररन्तमालास्थं आ सत्येनेत्यस्य विश्वेदेवा ऋषयः - सूर्यो देवता। त्रिष्टुप्छन्दः - सूर्यग्रह मन्त्रजपे विनियोगः।।

आ सत्येन रजसा - अंगुष्ठाभ्यां नमः। वर्तमानो निवेशयन् - तर्जनीभ्यां नमः। अमृतं मर्त्यंच - मध्यमाभ्यां नमः। हिरण्मयेन सविता रथेन - अनामिकाभ्यां नमः। आ देवो याति - कनिष्ठिकाभ्यां नमः।। भुवना विपश्यन् - करतलकरपृष्ठाभ्यां नमः।।

एवं हृदयादि न्यासः। भूर्भुवस्सुवरोमिति दिग्बन्धः।।

ध्यानम्- वेदीमध्ये ललितकमले कर्णिकायां रथस्थः
सप्ताश्वोऽर्कोऽरुणरुचिवपुस्सप्तरज्जुर्द्विबाहुः।
गोत्रे रम्ये बहुविधगुणे काश्यपाख्ये प्रसूतः
कालिंगाख्ये विषयजनितः प्राङ्मुखः पद्महस्तः।।
पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरंगवाहः।
दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः।।

अष्टोत्तरशतादि जपः। अग्निं दूतं, कद्रुद्राय, अष्टाविंशतिरष्टौ वा।। पूर्ववद्धृदयादिन्यासो विमोकश्च।।

२. चन्द्रस्य

आप्यायस्व, अप्सु मे, गौरीमिमाय, निशाकरं, यमुनादेशजं, आत्रेयगोत्रजं, आत्रेयार्षं, कृत्तिकानक्षत्रजं, गायत्रीछन्दसं, पिंगलाग्निकं, अभयगदाधरं, द्विभुजं श्वेताम्बरगन्धमाल्यमुक्ताभरणभूषितं, किरीटिनं, श्वेतच्छत्रध्वजपताकिनं, वारिसंभूतदशाश्वं, त्रिचक्रं, श्वेतरथमारुह्य, दिव्यं मेरुं प्रदक्षिणी कुर्वाणं, ग्रहमंडले प्रविष्टं, अधिदेवताऽऽपं, प्रत्यधिदेवता गौरीं, सूर्यस्य आग्नेयदिग्भाग (श्यामाक) तंडुल धान्यस्योपरि, चतुरश्राकारमंडले, प्रत्यङ्मुखं, भूर्भुवस्सुवः, चन्द्रग्रहमावाहयामि।। स्थापयामीत्यादि सूर्यवत्।।

आप्यायस्वेत्यस्य - सोम ऋषिः, (विश्वेदेवा वा) सोमो देवता - गायत्रीच्छन्दः - चन्द्रग्रहमन्त्रजपे विनियोगः।

आप्यायस्व - अंगुष्ठाभ्यां नमः,
समेतु ते - तर्जनीभ्यां नमः।,
विश्वतः - मध्यमाभ्यां नमः।
सोमवृष्णियं - अनामिकाभ्यां नमः।।
भवा वाजस्य - कनिष्ठिकाभ्यां नमः।
संगथे - करतलकरपृष्ठाभ्यां नमः।।

एवं हृदयादिन्यासः।। भूर्भुवस्सुवरोमिति दिग्बन्धः।।

ध्यानम्।।

आग्नेयभागे सरथो दशाश्वश्चात्रेयजो यमुना देशजश्च।

प्रत्यङ्मुखस्थश्चतुरश्रपीठे गदाधरांगो हिमवत्स्वभावः॥
श्वेताम्बरः श्वोतविभूषणश्च श्वेतद्युतिर्दंडधरो द्विबाहुः।
चन्द्रोऽमृतात्या वरदः किरीटी श्रोयांसि मह्यं विदधातु देवः॥

आप्यायस्वेत्यादिभिः पूर्ववज्जपो विमोकान्तः॥

३. अंगारकेस्य

अग्निर्मूर्धा, स्योना पृथिवि, क्षेत्रस्य पतिना, धरासुतमवंतीदेशजं, भारद्वाजगोत्रजं, जमदग्न्यार्षं, गायत्रिछन्दसं, धूमकेत्वाग्निकं, खड्गशक्ति शूलगदाधरं चतुर्भुजं रक्तांबरधरं रक्तविद्रुमरत्नाभरणभूषितं, किरीटिनं रक्तच्छत्रध्वज घताकिनं रक्तमेषवाहनं अग्निजरक्ताष्टाश्वं कांचनंरथमारुह्य दिव्यं मेरुं प्रदक्षिणीकुर्वाणं। ग्रहमंडले प्रविष्टं अधिदेवता भूमिं प्रत्यधिदेवता क्षेत्रपालं सूर्यस्य दक्षिण दिग्भागे अढकधान्यस्योपरि त्रिकोणाकारमंडले दक्षिणाभिमुखं भूर्भुवसुवः अंगारकग्रहमावाहयामि। स्थापयामीत्यादि॥

अग्निर्मूर्धेत्यस्य - प्रजापतिर्‌ऋषिः (अग्निर्वा) अंगारको देवता - गायत्री छन्दः। अंगारकग्रहमन्त्रजपे विनियोगः॥

अग्निर्मूर्धा - अंगुष्ठाभ्यां नमः। दिवः ककुत् - तर्जनीभ्यां नमः। पतिः पृथिव्या - मध्यमाभ्यां नमः। अयं - अनामिकाभ्यां नमः। अपागं् रेतागंसि - कनिष्ठिकाभ्यां नमः। जिन्वति - करतलकरपृष्ठाभ्यां नमः। एवं हृदयादिन्यासः। भूर्भुवस्सुवरोमिति दिग्बन्धः॥

ध्यानम्॥ याम्ये गदा शक्तिधरश्च शूली वरप्रदो याम्यमुखोऽतिरिक्तः।
कुजस्त्ववन्ती विषयस्त्रिकोणस्तस्मिन् भरद्वाजकुले प्रसूतः॥
रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाभृत्।
धरासुतश्शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशान्तः॥

अग्निर्मूर्धेत्यादिभिः पूर्ववज्जपो विमोकान्तः॥

४. बुधस्य

उद्बुध्यस्व - इदंविष्णुः, विष्णोरराटमसि सोमात्मजं, मगधदेशजमात्रेयगोत्रजं, भारद्वाजार्षं, श्रविष्ठानक्षत्रजं, त्रिष्टुप्छन्दसं, जठराग्निकं, शक्तिखड्गचर्मगदाधरं, चतुर्भुजं पीतांबरगन्धमाल्य मरकतरत्नाभरण भूषितं, किरीटिनं, पीतच्छत्रध्वजपताकिनं, पीतसिहंवाहनं, वाय्वग्निज पीताष्टाश्वं, पीतं रथमारुह्य दिव्यं मेरुं प्रदक्षिणी कुर्वाणं ग्रहमंडले प्रविष्टं अधिदेवताविष्णुं, प्रत्यधिदेवता विष्णुं, सूर्यस्येशानदिग्भागे, मुद्गधान्यस्योपरि, बाणाकारमंडले प्राङ्मुखं (उदङ्मुखं) भूर्भुवस्सुवः बुधग्रहमावाहयामि। स्थापयामीत्यादि॥

उद्बुध्यस्वेत्यस्य - अग्निरृषिः - बुधो देवता - त्रिष्टुप्छन्दः - बुधमन्त्रजपे विनियोगः॥

उद्बुध्यस्वाग्ने - अंगुष्ठाभ्यां नमः। प्रतिजागृह्येनं - तर्जनीभ्यां नमः। इष्टापूर्ते सगंसृजेथामयं च - मध्यमाभ्यां नमः। पुनः कृण्वगंस्त्व - अनामिकाभ्यां नमः। पितरं युवानमन्वतागंसीत् - कनिष्ठिकाभ्यां नमः। त्वयि तन्तुमेतं - करतल करपृष्ठाभ्यां नमः। एवं हृदयादि न्यासः। भूर्भुवस्सुवरोमिति दिग्बंधः॥

ध्यानम्- उदङ्मुखो मागधजो हरिस्थश्चात्रेयगोत्रः शरमंडलस्थः।
सखड्गचर्मोरु गदाधरो ज्ञस्त्वीशानभागे वरदस्सुपीतः॥

पीतांबरः पीतवपुः किरीटी चतुर्भुजो दंडधरश्च हारी।
चर्मासिधृक्सोमसुतः सदा मे सिंहाधिरूढो वरदो बुधश्च॥

उद्बुध्यस्वेत्यादिभिः पूर्ववज्जपो विमोकान्तः॥

५. गुरोः

बृहस्पते अति - इन्द्रमरुत्वः - ब्रह्मजज्ञानं गुरुं, सिन्धुदेशजं, अंगीरसगोत्रजं, वसिष्ठार्षं, उत्तराफल्गुनी नक्षत्रजं, त्रिष्टुप्छन्दसं, शिख्यग्निकं, पीतमक्षसूत्रदंडकामंडलुवरदचतुर्भुजं, पीतांबरगन्धमाल्यपुष्परागरत्नाभरणभूषितं, किरीटिनं, पीतच्छत्रध्वजपताकिनं, विश्वरूपाख्य पांडुराष्टाश्वं, कांचनं रथमारुह्य दिव्यं मेरुं प्रदक्षिणी कुर्वाणं, ग्रहमंडले प्रविष्टं, अधिदेवतेन्द्रं, प्रत्यधितेवताब्रह्माणं, सूर्यस्योन्तरभागे चणक धान्यराश्योपरि दीर्घचतुरश्रमंडले, उदङ्मुखं, भूर्भुवस्सुवः बृहस्पतिग्रहमावाहयामि। स्थापयामीत्यादि॥

बृहस्पते अतीत्यस्य - विश्वेदेवा ऋषयः - बृहस्पतिर्देवता। - त्रिष्टुप्छन्दः - बृहस्पति ग्रह मन्त्रजपे विनियोगः॥

बृहस्पते अतियत्र - अंगुष्ठाभ्यां नमः।
अर्यो अर्हद्युमत् - तर्जनीभ्यां नमः।
विभाति क्रतुमज्जनेषु - मध्यमाभ्यां नमः।
यद्दीदयच्छवसा - अनामिकाभ्यां नमः।
ऋतप्रजात तदस्मासु - कनिष्ठिकाभ्यां नमः।
द्रविणं धेहि चित्रं - करतलकरपृष्ठाभ्यां नमः।
एवं हृदयादिन्यासः। भूर्भुवस्सुवरोमिति दिग्बन्धः॥

ध्यानम्॥ - सौम्ये सुदीर्घे चतुरश्रपीठे रथेंऽगिराः पूर्वमुखस्स्वभावः।
दंडाक्षमाल। जलपात्रधारी सिन्ध्वाख्यदेशे वरदस्सुदेशः॥

पीताम्बरः पीतवतुः किरीटी चतुर्भुजो देवगुरुः प्रशान्तः।
दधाति दंडं च कमंडलुं च तथाक्षसूत्रं वरदोऽस्तु मह्यं॥

बृहस्पते अतीत्यादिभिः - पूर्ववज्जपो विमोकान्तः॥

६. शुक्रस्य

शुक्रं ते अन्यत् - इन्द्राणीमासु नारिषु - इन्द्रं वः भृगुं भोजकटकदेशजं, भार्गवगोत्रजं, शौनकार्षं, तिष्यनक्षत्रजं, त्रिष्टुप्छन्दसं, हाटकाग्निकं, श्वेतमक्षसूत्रदंडकमंडलुवरदचतुर्भुजं, श्वेतांबर गन्धमाल्यवज्ररत्नाभरणभूषितं, किरीटिनं, श्वेतच्छत्रध्वजपताकिनं, श्वेताश्ववाहनं, भूसंभवश्वेतदशाश्वं, श्वेतं रथमारुह्य, दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टं, अधिदेवतेन्द्राणीं, प्रत्यधिदेवतेन्द्रं, सूर्यस्य पूर्वदिग्भागे (तंडुल) निष्पाव धान्यस्योपरि पंचकोणाकारमंडले, प्राङ्मुखं, भूर्भुवस्सुवः, शुक्रग्रहमावाहयामि, स्थापयामीत्यादि॥

शुक्रंत इत्यस्य - विश्वेदेवा ऋषयः - शुक्रो देवता त्रिष्टुप्छन्दः शुक्रग्रहमन्त्रजपे विनियोगः॥

शुक्रं ते अन्यत् - अंगुष्ठाभ्यां नमः।
यजतंते अन्यत् - तर्जनीभ्यां नमः।
विषुरूपे अहनी - मध्यमाभ्यां नमः।
द्यौरिवासि - अनामिकाभ्यां नमः।
विश्वाहि माया अवसि स्वधावः - कनिष्ठिकाभ्यां नमः।
भद्रा ते पूषन्निह रातिरस्तु - करतलकरपृष्ठाभ्यां नमः।
एवं हृदयादिन्यासः।
भूर्भुवस्सुवरोमिति दिग्बंन्धः॥

ध्यानम्:- प्रात्वां भृगुर्भोजकट प्रदेशः स भार्गवः पूर्वमुखस्वभावः।
सपंचकोणेश रथाधिरुढो दंडाक्षमाला वरदोऽबुंपात्रः॥
श्वेताम्बरः श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशान्तः।
तथाक्षसूत्रं च कमंडलुं च जयं च बिभ्रद्वरदोऽस्तु मह्यं॥
सुक्रन्ते अन्यदीत्यदिभिः पूर्ववज्जपो विमोकान्तः॥

७. शनैश्चरस्य

शन्नो देवीः (शमग्निः) प्रजापते, - इमं यम सूर्यपुत्रं काश्यपगोत्रजं, भृग्वार्षेयं, रेवतीनक्षत्रजं सौराष्ट्रदेशजं, गायत्रीछन्दसं, महातेजोग्निकं, नीलं, चर्मबाणधनुशूल चतुर्भुजं, नीलांबरगन्धमाल्य नीलरत्नाभरणभूषितं, किरीटिनं, नीलच्छत्र ध्वजपताकिनं, नीलगृध्रवाहनं, अकाशजजंबालाष्टाश्वं, नीलं, रथमारुह्य, दिव्यं मेरुं प्रदक्षिणीकुर्वाणं, ग्रहमंडले प्रविष्टं, अधिदेवता प्रजापतिं, प्रत्यधिदेवता यमं, सूर्यस्य पश्चिमदिग्भागे तिलधान्यस्योपरि धनुराकारमंडले, उदङ्मुखं, ॐ भूर्भुवस्सुवः, शनैश्चरमावाहयामि। स्थापयामीत्यादि॥

शं नो देवीरित्यस्य - अग्निर् ऋषिः, (प्रजापतिर्वा) शनैश्चरो देवता, गायत्री च्छन्दः। शनैश्चरग्रहमन्त्रजपे विनियोगः॥

शन्नोदेवीः - अंगुष्ठाभ्यां नमः।

अभिष्टये - तर्जनिभ्यां नमः।
आपो भवन्तु - मध्यमाभ्यां नमः।
शं सोः - कनिष्ठिकाभ्यां नमः।
अ भस्त्रवन्तु नः - करतलकरपृष्ठाभ्यां नमः।
एवं हृदयादिन्यासः। भूर्भुवस्सुवरोमिति दिग्बन्धः॥
ध्यानम्- चापासनो गृध्ररथस्सुनीलः प्रत्यङ्मुखः काश्यपजः प्रतीच्यां।
सशूलचापेषुवरप्रदश्च सौराष्ट्रदेशे प्रभवश्च सौरिः॥
नीलद्युतिः शूलधरः किरीटी गृध्रस्थितो बाणकरो धनुष्मान्।
चतुर्भुजस्सूर्यसुतः प्रशान्तः परप्रदो मेऽस्तु स मन्दगामी॥
शन्नोदेवीरित्यादिभिः पूर्ववज्जपो विमोकान्तः॥

८. राहोः

कया नश्चित्रः - आ यं गौः, - यत्ते देवी निर्ऋतिः॥ चन्द्रार्कवैरिणं, बर्बरदेशजं, पैठीनसिगोत्रजं, आंगिरसार्षं, अश्विनीनक्षत्रजं, गायत्रीछन्दसं, हुताशनाग्निकं, कृष्णं, खड्गचर्मधरं, द्विभुजं, कृष्णाम्बरगन्धमाल्यगोमेदरत्नाभरणभूषितं, किरीटिनं, कृष्णच्छत्रध्वजपताकिनं, करालवदनं, उरगालंकारं, कृष्णसिंहासने स्थितं, अष्टाश्वं, रथमारुह्य, दिव्यं मेरुं अप्रदक्षिणीकुर्वाणं, ग्रहमंडले प्रविष्टं, अधिदेवतासर्पं, प्रत्यधिदेवतानिरऋतिं, सूर्यस्य नैर्ऋति दिग्भागे, माषधान्यस्योपरि, शूर्पाकारमंडले, दक्षिणभिमुखं, भूर्भुवस्सुवः - राहुग्रहमावाहयामि, स्थापयामीत्यादि॥

कया न इत्यस्य - विश्वेदेवा ऋषयः - राहुर्देवता गायत्री छन्दः॥ राहुग्रहमान्त्रजपे विनियोगः॥

कया न - अंगुष्ठाभ्यां नमः।
चित्र आभुवत् - तर्जनीभ्यां नमः।
उती - मध्यमाभ्यां नमः।
सदवृधः - अनामिकाभ्यांनमः।
सखा कनिष्ठिकाभ्यां नमः।
कया शचिष्ठया वृता - करतलकरपृष्ठाभ्यां नमः।
एवं हृदयादिन्यासः
भूर्भुवस्सुवरोमिति दिग्बन्धः॥

ध्यानम्- पैठीनसो बर्बम्शजातः शूर्पासनः सिंहगतस्सधूम्रः।
याम्याननो नैर्ऋतदिक्करलो वरप्रदः शूलसचर्मखड्गः।
नीलाम्बरो नीलवपुः किरिटी करालवक्त्रः करवालशूली।
चतुर्भुजश्चर्मधरश्च राहुः सिंहासनस्थो वरदोऽस्त मह्यं॥
कयान इत्यादिभिः पूर्ववज्जपो विमोकान्तः॥

९. केतोः

केतुं कृण्वन् - ब्रह्मा देवानां - सचित्रचित्रं॥ सर्वफलप्रदं अंतर्वेदिदेशजं, जैमिनिगोत्रजं, रौद्राग्निकं, धूम्रं, वरदगदाधरं, द्विभुजं, चित्रांबरगन्धमाल्यवैडूर्यरत्नाभरणभूषितं, किरिटिनं, धूम्रच्छत्रध्वजपताकिनं, चित्रगृध्रवाहनं, धूमारुणाष्टाश्वं, धूम्ररथमारुह्य दिव्यं मेरुमप्रदक्षिणी कुर्वाणं, ग्रहमंडले प्रविष्टं, अधिदेवता ब्रह्माणं, प्रत्यधिदेवता चित्रगुप्तं॥

सूर्यस्य वायव्यदिग्भागे। कुलुत्थ धान्यस्योपरि, ध्वजाकारमंडले दक्षिणाभिमुखं, भूर्भुवस्सुवः केतुग्रहमावाहयामि॥ स्थापयामीत्यादि॥

केतुं कृण्वभित्यस्य - विश्वेदेवा ऋषयः - केतुर्देवता - गायत्री छन्दः - केतुग्रहमन्त्रजपे विनियोगः॥

केतुं कृण्वन् - अंगुष्ठभ्यां नमः।
अकेतवे - तर्जनीभ्यां नमः।
पेशोमर्याः - मध्यमाभ्यां नमः॥

अपेशसे - अनामिकाभ्यां नमः।
समुषद्भिः कनिष्ठकाभ्यां नमः।
अजायथाः - करतलकरपृष्ठाभ्यां नमः।
एवं हृदयादिन्यासः॥ भूर्भुवस्सुवरोमिति दिग्बन्धः॥

ध्यानम्- ध्वजासनो जैमिनि गोत्रजोऽन्तर्वेदिदेशेषु विचित्रवर्णः।
याम्याननो वायुदिशि प्रखड्गश्चर्मासिभिश्चाष्टसुतश्च केतुः॥

धूम्रो द्विबाहुर्वरदो गदाभृत् गृध्रासनस्थो विकृतानवश्च। किरीटी केयूर विभूषितंगः सदाऽस्तु मे केतुगणः प्रशान्तः॥

केतुं कृण्वान्नित्यादिभिः पूर्ववज्जपो विमोकान्तः॥

(अत्र केचित्, गुडे, लवणे वा, त्र्यंबकं यजामहे, इति मन्त्रेण, मृत्युंजयमावाह्य, ग्रहैस्समं पूजां दानं च कुर्वन्ति॥)

ततः तंडुलपुंजे, पूर्वाद्यष्टदलेषु, इन्द्रादि लोकपालानावाह्य अष्टदलान्तरालेषु दुर्गादि साद्गुण्य देवता आवाहयेत्॥

एवं यत्र कुत्र वा नवग्रह, लोकपाल, साद्गुण्यदेवता आवाह्यन्ते तदनन्तरं शास्त्रवित्कर्ता यजमानस्याभिषेकार्थं मात्स्य पुराणेक्तरीत्या, कुम्भे वरुणदेवतामावाह्य, यथाशक्ति कांडानुसमयादिना सर्वा अपि देवताः पूजयित्वा ऽन्ततः कलशोदकेनात्मानमभिषिच्य कलशं स्नानवस्त्रं चाचार्यायद द्यादिति सार्वत्रिकम्॥ प्राणानायम्य - देशकालै। संकीर्त्य, आदित्यादि नवग्रह प्रीत्यर्थं कलशवस्त्र प्रतिमादानं तत्तद्धान्यदानं च करिष्ये॥ इति संकल्प्य॥ तांबूल दक्षिणामादाय॥
प्रतिमां दक्षिणोपेतां कुम्भवस्त्रफलैर्युतां।
तुभ्यं दास्यामि विप्रेन्द्र उद्दिष्टफलदो भव॥

इमां सूर्यग्रहप्रीतिं कामयमानः संप्रददे (न मम)॥

एवं चन्द्रादीनां प्रतिमादानं, अथवा प्रतिमैकत्वपक्षे, आदित्यादि नवग्रहप्रीतिं कामयमान इति॥

गोधूम भास्करस्येष्टाः प्राणिनामपि सर्वदा।
यस्मादेते सर्वभक्ष्यास्तान्ददामीष्टसिद्धये॥

इदं गोधूमधान्यं दक्षिणा तांबूलसहितं आदित्यग्रहपीतये संप्रददे (न मम)
तंडुला वैश्वदेवत्याः पाकेनान्नं पचन्ति ये।
निघ्नन्ति तेषां क्षुद्व्याधिं तान्ददामीष्टसिद्धये॥

इदं तंडुलधान्यं दक्षिणातांबूलसहितं, चन्द्रग्रहप्रीतये

संप्रददे (न मम)॥

आढका मंगलस्येष्टा अन्नस्य रसदाः शुभाः।
प्राणिनां बलदा यस्मात्तान्ददामीष्टसिद्धये॥

इदं आढकधान्यं दक्षिणाताांबूलसहितं अंगारक ग्रहप्रित्यर्थे संप्रददे (न मम)॥

मुद्गा बुधग्रहस्येष्टा देवानामपि सर्वदा।
व्रतिनामुपकारा या तान्ददामीष्टसिद्धये॥

इदं मुद्गधान्यं दक्षिणाताांबूलसहितं बुधग्रहप्रीतये संप्रददे (न मम)॥

गुरोस्तु चणका इष्टा द्विपदां च चतुष्पदाम्।
सर्वभक्ष्याश्च ये केचित्तान्ददामीष्टसिद्धये॥

इदं चणकधान्यं दक्षिणाताांबूलसहितं बृहस्पतिग्रह प्रीतये संप्रददे (न मम)॥

निष्पावा भार्गवस्येष्टा तंडुला अपि सर्वदा।
शाकानां मेलने यस्मात्तान्ददामीष्टसिद्धये॥

इदं निष्पावधान्यं दक्षिणाताांबूलसहितं शुक्रग्रह प्रीतये संप्रददे (न मम)॥

तिलाः पापहरा नित्यं विष्णोर्देहसमुद्भवाः।
शनिग्रहप्रिया यस्मात्तान्ददामीष्टसिद्धये॥

इदं तिलधान्यं दक्षिणाताांबूलसहितं शनिग्रह प्रीतये संप्रददे (न मम)

माषाश्च पितृदेवत्याः प्राणिनां बलदायकाः।
राहोः प्रियतमा यस्मात्तान्ददामीष्टसिद्धये॥

इदं माषधान्यं दक्षिणाताांबूलसहितं राहुग्रह प्रीतये संप्रददे (न मम)॥

कुलुत्था गोऽश्वजन्तूनां बलदाः कायवर्धकाः।
केतोः प्रियतमा यस्मात्तान्ददामीष्टसिद्धये॥

इदं कुलुत्थधान्यं दक्षिणाताांबूलसहितं केतुग्रहप्रीतये संप्रददे (न मम)॥

गुडा इक्षुरसोत्पन्नाः सत्वमृत्युंजयप्रियाः।
यस्मात्सर्वप्रयत्नेन तान्ददामीष्टसिद्धये॥

इदं गुडं दक्षिणातंबूलसहितं मृत्युंजयप्रीतये संप्रददे (न मम)॥

इति नवग्रहावाहनदिमन्त्रजपक्रमः॥

नवग्रहमण्डले-

आदित्यं मध्यमे कोष्ठे दक्षिणेंऽगारकं न्यसेत्।
उत्तरे तु गुरुं विद्यात् बूधमुत्तरपूर्वके॥

भार्गवं पूर्वतो न्यस्य सोमं दक्षिणपूर्वके।
पश्चिमेऽर्कसुतं न्यस्य राहुं पश्चिमदक्षिणे॥

पश्चिमोत्तरतः केतुं संनिविश्य यथाविधि।
तद्वर्गं गन्धपुष्पाद्यैः अर्चयेत् स्व स्वमन्त्रकैः॥

सूर्य्यादिमंत्रानुष्ठानप्रकरणम्।।

हेमांभोजप्रवालाग्रतिमानिजरुचिं चारुखट्वांगपद्मौ चक्रं शङ्खं सपाशं शृणिमतिरुचिरामक्षमालां कपालम्।। हस्तांभोजैर्दधानं त्रिनयनविलसद्वेदवक्त्राभिरामं मार्तडं वल्लभाढ्यं मणिमयमुकुटं हारयुक्तं भजामि।।१ ।।

तत्र तावत्सर्वरोगदारिद्र्यनाशकाष्टाक्षरसूर्य्यमंत्रपुरश्चरणप्रयोगः।।

सुमुहूर्ते प्रातर्नित्यावश्यकं समाप्य। जपस्थानमागत्य कूर्म्मसंशोधिते स्वासने प्राङ्मुख उपविश्य।।

मूलेनाचम्य प्राणानायम्य देशकालौ संकीर्त्य। मम सर्वरोगदारिद्र्यादिविनाशनार्थमायुरारोग्यसुखश्रीसंपत्तिप्राप्त्यर्थे श्रीभगवत्सवितृसूर्य्यनारायणप्रीत्यर्थमष्टल क्षसंख्यात्मकमष्टाक्षरसूर्य्यमन्त्रजपपुरश्चरणं करिष्ये।।

तदंगत्वेन भूतशुद्धिमंतर्मातृका बहिर्मातृकान्यासं च कृत्वा

विष्णोरष्टाक्षरमंत्रोक्तं केशवादिकलामातृकान्यासं कुर्यात्।।

अथ मूलमन्त्रप्रयोगः-मूलमन्त्रो यथा।।ॐ घृणिः सूर्य आदित्यः'' इत्यष्टाक्षरो मन्त्रः। अस्य मंत्रस्य देवभाग ऋषिः। गायत्री छन्दः। आदित्यो देवता ममाभीष्टसाधने विनियोगः।

ॐ देवभागऋषये नमः शिरसि।।१।।

ॐ गायत्रीछन्दसे नमः मुखे।।२।।

ॐ आदित्यदेवतायै नमः हृदये।।३।।

ॐ रुद्राय तेजोज्वालामणे हुं फट् स्वाहा।
अनामिकाभ्यां नमः।।४।।

ॐ अग्नये तेजोज्वालामणे हुं फट् स्वाहा।
कनिष्ठिकाभ्यां नमः।।५।।

ॐ सर्वाय तेजोज्वालामणे हुं फट् स्वाहा।
करतलकरपृष्ठाभ्यां नमः।।६।।

ॐ भानवे नमो हृदये।।३।।

ॐ इँ भास्कराय नमो लिंगे।।४।।

ॐ ॐ सूर्याय नमः पादयोः।।५।।

इति पञ्चमूर्तिन्यासः।।

अथ मंत्रवर्णन्यासः।।

ॐ मनो मूर्ध्नि।।१।।

ॐ घृं नमो मुखे।।२।।

ॐ णिं नमः कंठे।।३।।

ॐ सूं नमः हृदये।।४।।

कृत्वा ध्यायेत्।।

अथ ध्यानम्।।

''रक्ताब्जयुग्माभयदानहस्तं केयूरहारांगद कुंडलाढ्यम्।।
माणिक्यमौलिं दिननाथमीडे।।
बंधूककांतिं विलसात्त्रिनेत्रम्।।१।।''

इति ध्यात्वा मानसोपचारैः संपूज्य पीठपूजादि कुर्य्यात्।।

तद्यथा पूर्वादिदिक्षु मध्ये च ।

ॐ प्रभूताय नमः।.१।।

ॐ विमलाय नमः।।२।।

ॐ साराय नमः।।३।।

ॐ समाराध्याय नमः।।४।।

मध्ये ॐ परमसुखाय नमः।।५।।

इति पूजयेत्।। तद्बहिः।

ॐ अं अंनताय नमः।।१।।

ॐ पृं पृथिव्यै नमः।।३।।

ॐ अं अमृतसागराय नमः।।३।।

ॐ रं रत्नद्वीपाय नमः।।४।।

ॐ हे हेमगिरये नमः।।५।।

ॐ नं नंदनोद्यानाय नमः।।६।।

ॐ कं कल्पवृक्षेभ्यो नमः।।७।।

ॐ मं मणिभूषितभूतलाय नमः।।८।।

इत्यष्टौ संपूज्य ।

ॐ सं सोममंडलाय नमः।।१।।

ॐ वं वह्निमण्डलाय नमः।।२।।

ॐ सं सूर्यमण्डलाय नमः।।३।।

इति पीठदेवताः संपूज्य पीठशक्तीः पूर्वादिक्रमेण पूजयेत्।।

ॐ राँ दीप्तायै नमः।।१।।

ॐ रीं सूक्ष्मायै नमः।।२।।

ॐ रूं जयायै नमः।।३।।

ॐ रें भद्रायै नमः।।४।।

ॐ रैं विभूत्यै नमः।।५।।

ॐ रों विमलायै नमः।।६।।

ॐ रौं अमोघायै नमः।।७।।

ॐ रं विद्युतायै नमः।।८।।

ॐ रः सर्वतोमुख्यै नमः।।९।।

इति पीठशक्तीः संपूज्य।

ॐ ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठात्मने नमः।।

इति पुष्पांजलिनाऽऽसनं दद्यात्।।

तत्र ॐ खं खषोल्काय नमः इति मनसा मूर्ति प्रकल्प्य (अथवा) ताम्रकलशोपरि सुवर्णमयीं सूर्य्यप्रतिमां संस्थाप्य प्राणप्रतिष्ठां कृत्वा तस्यां सर्वलोकसाक्षिणं सूर्य्यमावाह्य पाद्यादि पुष्पान्तैरुपचारैर्यथाविधि संपूज्य आवरणपूजां कुर्य्यात्।।

तद्याथा—षट्कोणे आग्नेयादि कोणकेसरेषु मध्ये दिक्षु च।

ॐ सत्याय तेजोज्वालामणे हुं फट् स्वाहा हृदयाय नमः।।१।।

ॐ ब्रह्मणे तेजोज्वालामणे हुं फट् स्वाहा शिरसे स्वाहा।।२।।

ॐ विष्णवे तेजोज्वालामणे हुं फट् स्वाहा शिखायै वषट्।।३।।

ॐ रुद्राय तेजोज्वालामणे हुं फट् स्वाहा कवचाय हुम्।।४।।

ॐ अग्नये तेजोज्वालामणे हुं फट् स्वाहा नेत्रत्रयाय वौषट् ।। ५।।

ॐ सर्वाय तेजोज्वालामणे हुं फट् स्वाहा इत्यस्त्राय फट्।।६।।

इति षंडगानि पूजयेत्।।

तद्बहिरष्टदलेषु।

(पूर्वदले) ॐ आदित्याय नमः।।१।।
(शर्वदले) ॐ आदित्याय नमः।।२।।
(दक्षिणदले) ॐ रवये नमः।।३।।
(पश्चिमदले) ॐ भानवे नमः।।४।।
(उत्तरदले) ॐ भास्कराय नमः।।५।।

इति संपूज्य। आग्नेयादि कोणदलेषु।

ॐ उं उषायै नमः।।१।।

ॐ प्रं प्रज्ञायै नमः।।२।।

ॐ प्रं प्रभायै नमः।।३।।

ॐ सं संध्यायै नमः।।४।।

इति शक्तीः पूजयेत्।।

ततो दलाग्रेषु पूर्वादिक्रमेण।

ॐ ब्रं ब्राह्म्यै नमः।।१।।

ॐ मां माहेश्वर्य्यै नमः।।२।।

ॐ कौं कौमार्यै नमः।।३।।

ॐ वैं वैष्णव्यै नमः।।४।।

ॐ वां वाराह्यै नमः।।५।।

ॐ इं इन्द्राण्यै नमः।।६।।

ॐ चां चामुंडायै नमः।।७।।

ॐ मं महालक्ष्म्यै नमः।।८।।

इति मातरः पूजयेत्।।

ततो देवस्य पुरतः ॐ अरुणाय नमः।। इत्यरुणं पूजयेत्।।

तद्बाह्ये पूर्वादिक्षु।

ॐ सों सोमाय नमः।।१।।

ॐ बुं बुधाय नमः।।२।।

ॐ गुं गुरवे नमः।।३।।

ॐ शुं शुक्राय नमः।।४।।

इति ग्रहान् पूजयेत्।। ततो भूपुरे पूर्वादि दिक्षु।

ॐ इन्द्राय नमः।।१।।

ॐ अग्नये नमः।।२।।

ॐ यमाय नमः।।३।।

ॐ निऋतये नमः।।४।।

ॐ वरुणाय नमः।।५।।

ॐ वायवे नमः।।६।।

ॐ कुबेराय नमः।।७।।

ॐ ईशानाय नमः।।८।।

(ऊर्ध्वम्) ॐ ब्रह्मणे नमः।।९।।

(अधः) ॐ अनंताय नमः ।।१०।।

इति दश दिक्पालान् पूजयेत्।।

(तद्बहिः)

ॐ वज्राय नमः।।१।।

ॐ शक्तये नमः।।२।।

ॐ दंडाय नमः।।३।।

ॐ खड्गाय नमः।।४।।

ॐ पाशाय नमः।।५।।

ॐ अंकुशाय नमः।।६।।

ॐ गदायै नमः।।७।।

ॐ त्रिशूलाय नमः।।८।।

ॐ पद्माय नमः।।९।।

ॐ चक्राय नमः।।१०।।

इत्यायुधानि पूजयेत्।।

एवमावरणपूजां कृत्वा धूपदीपनैवेद्यतांबूलदक्षिणानीराजनादिभिः सूर्यं संपूज्य स्तोत्रैः स्तुत्वा यथाविधि चित्तैकाग्रतया जपं कुर्यात्। (प्रत्यहं वक्ष्यमाणविधिना पूजांते अर्घ्यं दद्यात्)। अस्य पुरश्चरणमष्टलक्षमंत्रः।। जपान्ते अष्टसहस्रसंख्याकहोमः।

तद्दशांशेन तर्पणम्।। तद्दशांशेन मार्जनम्।। तद्दशांशेन ब्राह्मणभोजनं च कुर्यात्।।

तथा च (शारदातिलके)

वसुलक्षं जपेन्मंत्रं समिद्भिः क्षीरशाखिनाम्।
तत्सहस्रं प्रजुहुयात्क्षीराक्ताभिर्जितेंद्रियः।।१।।

एवं संपूज्य विधिवद्भास्करं भक्तवत्सलम्।
दद्यादर्घ्यं प्रतिदिनं वारे वा तस्य चोदिते ।।२।।

प्रभाते मंडलं कृत्वा पूर्ववत्पीठमर्चयेत्।
पात्रं ताम्रमयं प्रस्थतोयग्राहि मनोहरम् ।।३।।

विधाय तत्र मनुना पूरयेत्तच्छुभोदकैः।
कुंकुमं रोचनं राजीरक्तचन्दनवैणवान्।।४।।

करवीरजपालाशीकुशश्यामाकतंडुलान्।

निक्षिपेत्सलिले तस्मिन्नैक्यं संकल्प्य भानुना॥५॥

सांगमभ्यर्चयेत्तस्मिन्भास्करं प्रोक्तलक्षणम्॥
गंधपुष्पादि नैवेद्यैर्यथाविधि विधानवित्॥६॥

तद्विधाय जपेन्मंत्रं सम्यगष्टोत्तरं शतम्।
पुनः संपूज्य गंधाद्यैर्जानुभ्यामवनीं गतः॥७॥

आमस्तकं तदुद्धृत्य व्योम्नि सावरणे रवौ।
दृष्टिं विधाय स्वैक्येन मूलमंत्र धिया जपन्॥८॥

मूलमंत्रः- ॐ ह्रीं घृणिः सूर्य आदित्यः श्री इति।

दद्यादर्घ्यं दिनेशाय प्रसन्नेनांऽतरात्मना।
कृत्वा पुष्पाञ्जलिं भूयो जपेदष्टोत्तरं शतम्॥९॥

यावदर्घ्यामृतं भानुः समादत्ते निजैः करैः।
तेन तृप्तो दिनमणिर्दद्यात्तस्मै मनोरथान्॥१०॥

अर्घ्यदानमिदं पुण्यं पुंसामारोग्यवर्द्धनम्।
धनधान्यपशुक्षेत्रपुत्रमित्रकलत्रदम्॥११॥

तेजोवीर्ययशःकांतिविद्याविभवभाग्यदम्।
इत्यष्टाक्षरसूर्यमंत्रविधानं सार्घ्यम्॥

अथ त्र्यक्षरसूर्यमंत्रविधान्॥

मंत्रो यथा "ह्रां ह्रीं सः" इति त्र्यक्षरमंत्रः।

अस्य श्रीसूर्यमंत्रस्य अज ऋषिः। गायत्री छंदः। सूर्यो देवता। ह्रां बीजम्॥ ह्रीं शक्तिः। सः कीलकम्। सर्वेष्टसिद्धये जपे विनियोगः॥

ॐ अजऋषये नमः शिरसि॥१॥

ॐ गायत्रीछन्दसे नमः मुखे॥२॥

ॐ सूर्यदेवतायै नमः हृदि॥३॥

ॐ ह्रां बीजाय नमः गुह्ये॥४॥

ॐ ह्रीं शक्तये नमः पादयोः॥५॥

ॐ सः कीलकाय नमः सर्वाङ्गे। इति ऋष्यादिन्यासः॥

ॐ ह्रां नमः आधारादिपदाग्रान्तं विन्यसेत्॥

ॐ ह्रीं नमः कंठाद्याधारांतं विन्यसेत्॥

ॐ सः नमः मूर्द्धादिकंठपर्यंतं विन्यसेत्॥ अथांगन्यासः॥

ॐ आं ह्रीं अंगुष्ठाभ्यां नमः॥१॥

ॐ ईं तर्जनीभ्यां नमः॥२॥

ॐ ऊँ मध्यमाभ्यां नमः॥३॥

ॐ ऐं अनामिकाभ्यां नमः॥४॥

ॐ औं कनिष्ठिकाभ्यां नमः॥५॥

ॐ अः ह्रीं करतलकरपृष्ठाभ्यां नमः॥६॥

इति करन्यासः॥

एवं हृदयादि षंडगन्यासं कुर्य्यात्॥

एवं न्यासविधिं कृत्वा ध्यायेत्।
"रक्तांबुजासनमशेषगुणैकसिंधुं भानुं समस्तजगतामधिपं भजामि॥
पद्मद्वयाभयवरान्दधतं कराब्जैर्माणिक्यमौलि मरुणांगरुचिं त्रिनेत्रम्॥१॥

एवं ध्यात्वा पूर्वोक्ते पीठे पाद्यादि पुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात्॥

तद्यथा षट्कोणे आग्नेयादिकोणेषु मध्ये दिक्षु च

ॐ आं ह्रीं हृदयाय नमः॥१॥
ॐ ईं ह्रीं शिरसे स्वाहा॥२॥
ॐ ऊं ह्रीं शिखायै वषट्॥३॥
ॐ ऐं ह्रीं कवचाय हुम्॥४॥
ॐ औं ह्रीं नेत्रत्रयाय वौषट्॥५॥
ॐ अः ह्रीं अस्त्राय फट्॥६॥

इति षंडगानि पूजयेत्॥

ततो द्वितीयावरणे अष्टदले चन्द्राद्यष्टग्रहान् संपूजयेत्॥

तृतीयावरणे भूपुरे पूर्वादिक्रमेण इन्द्रादीन्दशदिक्पालान्। तद्बाह्ये बज्राद्यायुधानि च संपूजयेत्। इत्यावरणपूजां कृत्वा धूपादिनीराजनांतैरुपचारैः संपूज्य जपं कुर्यात्। अस्य पुरश्चरणं द्वादशलक्षजपः। तथा च

''भानुलक्षं जपेन्मंत्रमन्नाज्येन दशांशतः॥
तिलैर्वा मधुरासिक्तैर्जुहुयाद्विजितेद्रियः॥१॥

सोऽपिं रत्नं धनं धान्यं पुत्रपौत्रान्यशः पुशून्॥
वस्त्राणि भूषणादीनि दद्यात्तस्मै न संशयः॥२॥

इति संपूज्य निर्माल्यं तेजश्चंडाय दीयताम्॥
अर्घ्यं प्रागीरितं दद्याद्भानवे संयतेन्द्रियः॥३॥

इति त्र्यक्षरीसूर्यमंत्रप्रयोगः॥

अथ चन्द्रमंत्रप्रयोगः

(शारदायाम्) मंत्रो यथा॥ स्वौं सोमाय नमः॥ (मतांतरे सौ सोमाय नमः) इति षडक्षरो मंत्रः। अस्य सोममंत्रस्य भृगुर्ऋषिः। पंक्तिश्छन्दः। सोमो देवता। स्वौ बीजम्। नमः शक्तिः। मम सर्वेष्टसिद्धये जपे विनियोगः।

ॐ भृगुऋषये नमः शिरसि॥१॥
ॐ पंक्तिच्छन्दसे नमः मुखे॥२॥
ॐ सोमदेवतायै नमः हृदि॥३॥
ॐ स्वौं बीजाय नमः गुह्ये॥४॥
ॐ नमः शक्तये नमः पादयोः॥५॥

इति ऋष्यादिन्यासः॥

ॐ सां अङ्गुष्ठाभ्यां नमः ॥१॥
ॐ सीं तर्जनीभ्यां नमः॥२॥
ॐ सूं मध्यमाभ्यां नमः॥३॥
ॐ सैं अनामिकाभ्यां नमः॥४॥
ॐ सौं कनिष्ठिकाभ्यां नमः॥५॥
ॐ सः करतलकरपृष्ठाभ्यां नमः॥

इति करन्यासः॥

एवं हृदयादिन्यासं कृत्वा ध्यायेत्॥
कर्पूरस्फटिकावदातमनिशं पूर्णेन्दुबिंबाननं।
मुक्तादामविभूषितेन वपुषा निर्मूलयंतं तमः॥

हस्ताभ्यां कुमुदं वरं च दधतं। नीलालकोद्भासितं स्वीयांकस्थमृगोदिताश्रयगुणं

॥ मंगलयंत्रमिदम् ॥
निरंकपृष्ठ ३२६
वं वज्राय नमः
लं इन्द्राय नमः १
यमाय नमः
ब्रह्मणे नमः
त्रिशूलाय नमः
ईशानाय नमः ८
शक्तये नमः
अग्नये नमः २
ॐ वाराह्यै नमः ५
ॐ वैष्णव्यै नमः ४
ॐ इन्द्राण्यै नमः ६
ॐ कौमार्यै नमः ३
ॐ चामुण्डायै नमः ७
गदायै नमः ७
कुबेराय नमः
१२
ॐ कुजाय नमः
१३
ॐ रक्ताय नमः
११
ॐ धरात्मजायनमः
१४
ॐ भूमिपुत्रायनमः
ॐ सामगानां कृपाकरा १०
ॐ भूमिदाय नमः १५
९ ॐ लोहितांगायनमः
८ ॐ लोहितायनमः
१६ ॐ अंगारकायनम
ॐ सवकामविरोधकाय नमः ७
ॐ यमाय नमः १७
६ ॐ महाकायायनमः
१ ॐ मंगलाय नमः
१८ ॐ सर्व रोगप्रहारिणेनमः
ॐ धनप्रदायनमः ४
ॐ भूमिपुत्रायनमः २
२० ॐ सर्वकामफलप्रदायनमः
सृष्टिकर्त्रेनमः १९
५ ॐ स्थिरासनायनमः
३ ॐ ऋणहर्त्रेनमः
२० ॐ वृष्टिहर्त्रेनमः
अनन्ताय नमः
चक्राय नमः

लिखेदष्टदलं पद्मं तद् बाह्येऽष्टदलं लिखेत्।
चतुरस्रं ततो बाह्ये सूर्यमन्त्रमिदं स्मृतम्।।

सोमं सुधाब्धिं भजे॥

इति ध्यात्वा पीठे मंडूकादिसोमांतपीठदेवताः संपूज्य ततः पीठमध्ये सौं सोमाय नमः। इति मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पान्तैरुपचारैः संपूज्य आवरणपूजां कुर्यात्।

षट्कोणे केसरेषु पूज्यपूजकयोर्मध्ये दिक्षु च।

ॐ सां हृदयाय नमः।.१॥
ॐ सीं शिरसे स्वाहा॥२॥
ॐ सूं शिखायै वषट्॥३॥
ॐ सैं कवचाय हुम्॥४॥
ॐ सों नेत्रत्रयाय वौषट्॥५॥
ॐ सः अस्त्राय फट्॥६॥

इति षंडगानि पूजयेत्॥

ततोऽष्टदले पूर्वादिक्रमेण

ॐ रोहिण्यै नमः॥१॥
ॐ कृत्तिकायै नमः॥२॥
ॐ रेवत्यै नमः॥३॥
ॐ भरण्यै नमः॥४॥
ॐ रात्र्यै नमः ॥५॥
ॐ आर्द्रायै नमः ॥६॥
ॐ ज्योत्स्नायै नमः॥७॥
ॐ कलायै नमः॥८॥

इति पूजयेत्॥

ततोऽष्टदलाग्रेषु पूर्वादिक्रमेण

ॐ आं आदित्याय नमः॥१॥
ॐ मं मङ्गलायै नमः॥२॥
ॐ बुं बुधाय नमः ॥३॥
ॐ शं शनैश्चराय नमः ॥४॥
ॐ बृं बृहस्पतये नमः॥५॥
ॐ रां राहवे नमः॥६॥
ॐ शुं शुक्राय नमः ॥७॥
ॐ कें केतवे नमः॥८॥

इति पूजयेत्। ततोऽष्टदलाग्रेषु पूर्वादिक्रमेण

ॐ आं आदित्याय नमः॥
ॐ मं मङ्गलाय नमः ॥२॥
ॐ बुं बुधाय नमः॥ ३॥
ॐ शं शनैश्चराय नमः ॥४॥
ॐ बृं बृहस्पतये नमः॥५॥
ॐ रां राहवे नमः॥६॥
ॐ शुं शुक्राय नमः॥७॥
ॐ कें केतवे नमः॥८॥

इति पूजयेत्।

ततो भूपुरे पूर्वादिक्रमेण इन्द्रादि दशदिक्पालान् तद्बाह्ये वज्राद्यायुधानि च पूजयेत्। इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कर्यात्। अस्य पुरश्चरणं षट्लक्षजपः॥ तथा चरसलक्षं जपेन्मंत्रं साधको

विजितेंद्रियः।।

तत्सहस्रं प्रजुहुयात्पायसेन ससर्पिषा।।१।।

एवं सिद्धमनुर्मंत्री संपदां वसतिर्भवेत्।
हृत्पुंडरीकमसंख्यं ताराहारविभूषणम्।।२।।

तारापतिं स्मरन्मंत्री त्रिसहस्रं मनुं जपेत्।
राज्यैश्वर्ये दरिद्रोऽपि प्राप्नुयाद्वत्सरांतरे।।३।।

पूर्वोक्तसंख्यं प्रजपेच्छशिनं मूर्ध्नि चिंतयेत्।
रोगापमृत्युदुःखानि जित्वा वर्षशतं वसेत्।।४।।

ब्रह्मचर्यरतः शुद्धश्चतुर्लक्षमिदं जपन्।
निधानं भूगतं सद्यः प्राप्नुयाद्यत्नवर्जितम्।।५।।

जितेन्द्रियो जपेन्मंत्रं पौर्णमास्यां विशेषतः।
भवेत्सौभाग्यनिलयः संपदामपरो निधिः।।६।।

घोराज्ञवाराञ्शिरोरोगानभिचारानुपद्रवान्।
विद्विषामपि संघातं नाशयेन्मनुनाऽमुना।।७।।

पौर्णमास्यां निराहारो दद्यादर्घ्यं विधूदये।
प्राक्प्रत्यगायतं कुर्याद्भूतले मंडलत्रयम्।।८।।

निषण्णः पश्चिमं मंत्री मंडले विहितासने।
मध्यस्थे स्थापयेत्पश्चात्पूजाद्रव्याण्यशेषतः।।९।।

अन्यस्मिन्मंडले सोममर्चयित्वांबुजान्विते।
राजतं चषकं भद्रं स्थापयेत्पुरतः सुधीः।।१०।।

गोदुग्धेन समापूर्य्य स्पृष्ट्वा तं प्रजपेन्मनुम्।
अष्टोत्तरशतं पश्चाद्विद्यामंत्रेण देशिकः।।११।।

दद्यादर्घ्यं शशांकाय सर्वकामार्थसिद्धये।
अनेन विधिना कुर्वन्प्रतिमासमंतद्रितः।।१२।।

षण्मासाभ्यंतरे सिद्धिं साधकेन्द्रः समश्नुते।
श्रियमत्यूर्जितान्पुत्रान्सौभाग्यमतुलं यशः।।१३।।

कन्यामिष्टामवाप्नोति कन्याऽपि वरमीप्सितम्।
बहुना किमिहोक्तेन सर्वं दद्यान्निशापतिः।।१४।।

विद्ये विद्यामालिनि स्यांच्चंद्रिण्यंते ततो भवेत्।
पुनश्चन्द्रमुखि स्वाहा विद्यामंत्र उदाहृतः।।१५।।

''विद्ये विद्यामालिनि चंद्रिणि चंद्रमुखि स्वाहा''
इति विद्यामंत्रः।।

इति सोममंत्रप्रयोगः समाप्तः।।

(३) अथ मंगलमंत्रप्रयोगः

अथ तंत्रोक्तमंगलमंत्रप्रयोगः।। (मंत्रमहोदधौ) मंत्रो यथा-''ॐ हाँ हँ सः खंखः''।। इति षडक्षरो मंत्रः।। अस्य मंगलमंत्रस्य विरूपा ऋषिः। गायत्री छंदः। मंगलो देवता। सर्वेष्टसिद्ध्यर्थे जपे विनियोगः।

ॐ विरूपऋषये नमः शिरसि।।१।।
ॐ गायत्रीछंदसे नमः मुखे।।२।।
ॐ हं मध्यमाभ्यां नमः।।३।।
ॐ सः अनामिकाभ्यां नमः।।४।।
ॐ खं कानिष्ठिकाभ्यां नमः।।५।।
ॐ खः करतलकरपृष्ठाभ्यां नमः।।६।।
इति करन्यासः।।

एवमेव हृदयादिषडंगन्यासं कृत्वा ध्यायेत्।। ध्यानम्। ''जपाभं शिवस्वेदजं हस्तपद्मैर्गदाशूल शक्तिर्वरं धारयंतम्। अवंतीसमुत्थं सुमेषासनस्थं धरानंदनं रक्तवस्त्रं समीडे''।।१।।

इति ध्यात्वा पूर्वोक्ते शिवपीठे मूलेन मूर्तिं प्रकल्प्य। अथवा त्रिकोणं ताम्रयन्त्रं प्रतिमां वा संस्थाप्य प्राणप्रतिष्ठां कृत्वा। आवाहनादि पाद्यान्तैरुपचारैर्भैमं संपूज्य। आवरणपूजां कुर्य्यात्।।

षट्कोणे आग्नेयादिकोणेषु मध्ये दिक्षु च।

ॐ हृदयाय नमः।।१।।

ॐ हां शिरसे स्वाहा।।२।।

ॐ हं शिखायै वषट्।।३।।

ॐ सः कवचाय हुम्।।४।।

ॐ खं नेत्रत्रयाय वौषट्।।५।।

ॐ खः अस्त्राय फट्।।६।।

इत्यंगानि पूजयेत्।। तद्बाह्ये त्रिकोणे एकविंशतिकोष्ठेषु।

ॐ मंगलाय नमः।।१।।

ॐ भूमिपुत्राय नमः।।२।।

ॐ ऋणहर्त्रे नमः।।३।।

ॐ धनप्रदाय नमः।।४।।

ॐ स्थिरासनाय नमः।।५।।

ॐ महाकायाय नमः।।६।।

ॐ सर्वकामावरोधकाय नमः।।७।।

ॐ लोहिताय नमः।।८।।

ॐ लोहिताक्षाय नमः।।९।।

ॐ सामगानां कृपाकराय नमः।।१०।।

ॐ धरात्मजाय नमः।।११।।

ॐ कुजाय नमः।।१२।।

ॐ भीमाय नमः।।१३।।

ॐ भूमिदाय नमः।।१४।।

ॐ भूमिनंदनाय नमः।।१५।।

ॐ अंगारकाय नमः।।१६।।

ॐ यमाय नमः।।१७।।

ॐ सर्वरोगापहारकाय नमः।।१८।।

ॐ वृष्टिकर्त्रे नमः।।१९।।

ॐ वृष्टिहर्त्रे नमः।।२०।।

ॐ सर्वकामफलप्रदाय नमः।।२१।।

इत्येकविंशतिभौमान्संपूजयेत्।।

तद्बाह्ये चतुरस्रे भूपुरे पूर्वादिषु।

ॐ इं इन्द्राय नमः।।१।।

अं अग्नये नमः।।२।।

यं यमाय नमः।।३।।

निं निर्ऋतये नमः।।४।।

वं वरुणाय नमः।।५।।

वां वायवे नमः।।६।।

कुं कुबेराय नमः।।७।।

ईं ईशानाय नमः।।८।।

(ऊर्ध्वे) ब्रं ब्रह्मणे नमः।।९।।

(अधः) अं अंनताय नमः।।१०।।

इति दिक्पालान् पूजयेत्।।

तद्बहिः।

ॐ वज्राय नमः।।१।।

शक्तये नमः।।२।।

दंडाय नमः।।३।।

खड्गाय नमः।।४।।

पाशाय नमः।।५।।

अंकुशाय नमः।।६।।

गदायै नमः।।७।।

त्रिशूलाय नमः।।८।।

पद्माय नमः।।९।।

चक्राय नमः।।१०।।

इत्यायुधानि पूजयेत्।।

इत्थमावरणपूजां कृत्वा धूपदीपनैवेद्यतांबूलदक्षिणानीराजनैः संपूज्य। वक्ष्यमाणविधिना अर्घ्यं दत्वा साष्टंगं प्रणम्य यथाविधि जपेत्। अस्य पुरश्चरणं षट्लक्षजपः।। अन्यत्सर्वं पूर्ववत्। तथा च - रसलक्षं जपो समिद्भिः खदिरस्य च।।

इत्थं जपादिभिः सिद्धं स्वेष्टसिद्धौ प्रयोजयेत्।।१।।

इति षड्वर्णात्मकभौममंत्रविधाम्।।

धनपुत्रादिप्रदमंगलव्रतविधानम्।।

(स्कांदे मन्त्रमहोदधौ च)।

मार्गशीर्षे वैशाखे वा शुक्लपक्षे चंद्रतारादिबलान्विते भौमवासरे व्रतं प्रगृह्य वक्ष्यमाणविधिना संवत्सरपर्यंतं कार्य्यम्।। तद्यथा।।

मङ्गलवारे अरुणोदयवेलायामुत्थाय शौचविधिं विधाय। अपामार्गकाष्ठेन मौनपूर्वकं दंतधावनं कृत्वा नद्यादौ यथाविधि स्नात्वा सन्ध्यादिनित्यक्रियां समाप्य शिवालये गृहे वा रक्तवाससी परिधाय रक्तगोमयलिप्तमंडले स्वासने प्राङ्मुख उदङ्मुखो वा उपविश्य। दक्षिणपार्श्वे रक्तचन्दनपुष्पादीनि संपाद्य सपवित्रकरः आचम्य प्राणानायम्य। देशकालौ संकीर्त्य मम जन्मराशेः सकाशान्नामराशेः सकाशाज्जन्मलग्नाद्वर्षलग्नाद्गोचराद्वा चतुर्थाष्ट मद्वादशाद्यांनिष्टस्थानस्थितभौमसूचयिष्यमाण सर्वार्तिफलनिवृत्तिद्वारा तृतीयैकादशस्थानस्थितव दुत्तमफलप्राप्त्यर्थमायुरारोग्यसुखपुत्रधनप्राप्त्त्यर्थे श्रीभौमदेवताप्रीत्यर्थे भौमव्रतं करिष्ये।

तंदगत्वेन न्यासध्यानपूजार्घ्यदानादि च करिष्ये।

इति संकल्प्य (प्रारंभदिने गणपतिपूजनं पुण्याहवाचनं च कुर्यात्) ततः।

अथ देवेश ते भक्त्या करिष्ये व्रतमुत्तमम्।
ऋणव्याधिविनाशाय धनसंतानहेतवे।।

इति प्रार्थ्य कर्ता स्वदेहे न्यासान्कुर्य्यात्।।

ॐ मङ्गलाय नमः अंघ्रयोः।।१।।
ॐ भूमिपुत्राय नमः जानुनोः।।२।।
ॐ ऋणहर्त्रे नमः ऊर्वोः।।३।।
ॐ धनप्रदाय नमः कट्योः।।४।।
ॐ स्थिरासनाय नमः गुह्ये।।५।।
ॐ महाकालाय नमः उरसि।।६।।
ॐ सर्वकर्माविरोधकाय नमः वामबाहौ।।७।।
ॐ लोहिताय नमः दक्षिणबाहौ।।८।।
ॐ लोहिताक्षाय नमः गले।।९।।
ॐ सामगानां कृपाकराय नमः मुखे।।१०।।
ॐ धरात्मजाय नमः नासिकायाम्।।११।।
ॐ कुजाय नमः अक्ष्णोः।।१२।।
ॐ भौमाय नमः ललाटे।।१३।।
ॐ भूतिदाय नमः भ्रुवोर्मध्ये।।१४।।
ॐ भूमिनंदनाय नमः शिरसि।।१५।।
ॐ अङ्गारकाय नमः शिखायाम्।।१६।।
ॐ यमाय नमः सर्वांगे।।१७।।
ॐ सर्वरोगापहारकाय नमः बाहुद्वये।।१८।।
ॐ वृष्टिकर्त्रे नमः मूर्द्धादिपादपर्यंतम्।।१९।।
ॐ वृष्टिहर्त्रे नमः चरणादिमस्तकान्तंम्।।२०।।
ॐ सर्वकामफलप्रदाय नमः दिक्षु।।२१।।
ॐ आराय नमः नाभौ।।१।।
ॐ वक्राय नमः वक्षसि।।२।।
ॐ भूमिजाय नमः मूर्ध्नि।।३।।

एवं न्यासं कृत्वा ध्यायेत्।।

रक्तमाल्यांबरधरः शक्तिशूलगदाधरः। चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः।।

एवं ध्यात्वा अर्घ्यं संस्थाप्य पूजां कुर्यात्। तद्यथा त्रिकोणस्थांडिले यथाविधि ताम्रकलशं संस्थाप्य तत्र एकविंशतिकोष्ठाढ्यं त्रिकोणं ताम्रयंत्रमथवा रक्तचंदननिर्मितां शूलशक्तिगदाधरां मेषमारूढां भौमप्रतिमां संस्थाप्य पूर्ववत्प्राणप्रतिष्ठां कृत्वा आवाहनं कुर्यात्।।

ॐ एह्योहि भगवन्ब्रह्मन्नंगारक महा प्रभो।
त्वयि सर्वे समायातं त्रैलोक्यं सचराचरम्।।१।।

भौममावाहयिष्यामि तेजोमूर्तिं दुरासदम्।
रुद्ररूपमनिर्देश्यं वक्रं च रुधिरप्रियम्।।२।।

ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयं अपा रेतांसि जिन्वति।।१।।

ॐ अंगारकाय विद्महे शक्तिहस्ताय धीमहि तन्नो भौमः प्रचोदयात्।।

इति भौममावाह्य पाद्यदि रक्तपुष्पान्तैरुपचारैः संपूज्य आवरणपूजां कुर्यात्। षट्कोणे अग्नेयादिकोणकेसरेषु मध्ये दिक्षु च।

ॐ ह्रां हृदयाय नमः।।१।।
ॐ ह्रां शिरसे स्वाहा।।२।।

ॐ ह्रां शिखायै वषट्॥३॥

ॐ ह्रां ह्रं ह्रं कवचाय हुम्॥४॥

ॐ हंसः नेत्रत्रयाय वौषट्॥५॥

ॐ खंखः अस्त्राय फट्॥६॥

इति पूजयेत्। ततः एकविंशतिकोष्ठेषु।

ॐ मंगलाय नमः पादौ पूजयामि॥१॥

ॐ भूमिपुत्राय नमः जानुनी पूजयामि॥२॥

ॐ ऋणहर्त्रे नमः ऊरु पूजयामि॥३॥

ॐ धनप्रदाय नमः कटिं पूजयामि॥४॥

ॐ स्थिरासनाय नमः गुह्यं पूजयामि॥५॥

ॐ महाकायाय नमः उरः पूजयामि॥६॥

ॐ सर्वकर्मावरोधकाय नमः वामबाहुं पूजयामि॥७॥

ॐ लोहिताय नमः दक्षिणबाहुं पूजयामि॥८॥

ॐ लोहिताक्षाय नमः कंठं पूजयामि॥९॥

ॐ सामगानां कृपाकराय नमः मुखं पूजयामि॥१०॥

ॐ धरात्मजाय नमः नासिकां पूजयामि॥११॥

ॐ कुजाय नमः नेत्रद्वयं पूजयामि॥१२॥

ॐ भौमाय नमः ललाटं पूजयामि॥१३॥

ॐ भूतिदाय नमः भ्रुवोर्मध्यं पूजयामि॥१४॥

ॐ भूमिनंदनाय नमः मस्तकं पूजयामि॥१५॥

ॐ अंगारकाय नमः शिखां पूजयामि॥१६॥

ॐ यमाय नमः सर्वांगानि पूजयामि॥१७॥

ॐ सर्वरोगापहारकाय नमः बाहुद्वयं पूजयामि॥१८॥

ॐ वृष्टिकर्त्रे नमः मूर्धादिपादपर्यंतं पूजयामिं॥१९॥

ॐ वृष्ट्यपहर्त्रे नमः चरणादिमस्तकपर्यंतं पूजयामि।२०॥

ॐ सर्वकामफलप्रदाय नमः दिशः पूजयामि॥२१॥

इति पूजयेत्॥

ततः तद्बाह्यत्रिकोणेषु।

ॐ वक्राय नमः॥१॥

ॐ आराय नमः॥२॥

ॐ भूमिजाय नमः॥३॥

इति पूजयेत्। तद्बहिरष्टदले पूर्वादिक्रमेण।

ॐ ब्राह्म्यै नमः ॥१॥

ॐ माहेश्वर्यै नमः॥२॥

ॐ कौमार्यै नमः॥३॥

ॐ वैष्णव्यै नमः॥४॥

ॐ वाराह्यै नमः॥५॥

ॐ इन्द्राण्यै नमः॥६॥

ॐ चामुंडायै नमः॥७॥

ॐ महालक्ष्म्यै नमः॥८॥

मातृकाः पूजयामि इति पूजयेत्। तद्बाह्ये भूपुरे पूर्वादिक्रमेण।

ॐ इन्द्राय नमः॥१॥

ॐ अग्नये नमः॥२॥

एवमेव हृदयादिषडंगन्यासं कृत्वा ध्यायेत्।। ध्यानम्। ''जपाभं शिवस्वेदजं हस्तपद्मैर्गदाशूल शक्तिर्वरं धारयंतम्। अवंतीसमुत्थं सुमेषासनस्थं धरानंदनं रक्तवस्त्रं समीडे''।।१।।

इति ध्यात्वा पूर्वोक्ते शिवपीठे मूलेन मूर्तिं प्रकल्प्य। अथवा त्रिकोणं ताम्रयन्त्रं प्रतिमां वा संस्थाप्य प्राणप्रतिष्ठां कृत्वा। आवाहनादि पाद्यान्तैरुपचारैर्भैमं संपूज्य। आवरणपूजां कुर्य्यात्।।

षट्कोणे आग्नेयादिकोणेषु मध्ये दिक्षु च।

ॐ हृदयाय नमः।।१।।

ॐ हां शिरसे स्वाहा।।२।।

ॐ हं शिखायै वषट्।।३।।

ॐ सः कवचाय हुम्।।४।।

ॐ खं नेत्रत्रयाय वौषट्।।५।।

ॐ खः अस्त्राय फट्।।६।।

इत्यंगानि पूजयेत्।। तद्बाह्ये त्रिकोणे एकविंशतिकोष्ठेषु।

ॐ मंगलाय नमः।।१।।

ॐ भूमिपुत्राय नमः।।२।।

ॐ ऋणहर्त्रे नमः।।३।।

ॐ धनप्रदाय नमः।।४।।

ॐ स्थिरासनाय नमः।।५।।

ॐ महाकायाय नमः।।६।।

ॐ सर्वकामावरोधकाय नमः।।७।।

ॐ लोहिताय नमः।।८।।

ॐ लोहिताक्षाय नमः।।९।।

ॐ सामगानां कृपाकराय नमः।।१०।।

ॐ धरात्मजाय नमः।।११।।

ॐ कुजाय नमः।।१२।।

ॐ भीमाय नमः।।१३।।

ॐ भूमिदाय नमः।।१४।।

ॐ भूमिनंदनाय नमः।।१५।।

ॐ अंगारकाय नमः।।१६।।

ॐ यमाय नमः।।१७।।

ॐ सर्वरोगापहारकाय नमः।।१८।।

ॐ वृष्टिकर्त्रे नमः।।१९।।

ॐ वृष्टिहर्त्रे नमः।।२०।।

ॐ सर्वकामफलप्रदाय नमः।।२१।।

इत्येकविंशतिभौमान्संपूजयेत्।।

तद्बाह्ये चतुरस्रे भूपुरे पूर्वादिषु।

ॐ इं इन्द्राय नमः।।१।।

अं अग्नये नमः।।२।।

यं यमाय नमः।।३।।

निं निर्ऋतये नमः।।४।।

वं वरुणाय नमः।।५।।

वां वायवे नमः।।६।।

कुं कुबेराय नमः।।७।।

ईं ईशानाय नमः।।८।।

(ऊर्ध्वे) ब्रं ब्रह्मणे नमः।।९।।

(अधः) अं अंनताय नमः॥१०॥

इति दिक्पालान् पूजयेत्॥

तद्बहिः।

ॐ वज्राय नमः॥१॥

शक्तये नमः॥२॥

दंडाय नमः॥३॥

खड्गाय नमः॥४॥

पाशाय नमः॥५॥

अंकुशाय नमः॥६॥

गदायै नमः॥७॥

त्रिशूलाय नमः॥८॥

पद्माय नमः॥९॥

चक्राय नमः॥१०॥

इत्यायुधानि पूजयेत्॥

इत्थमावरणपूजां कृत्वा धूपदीपनैवेद्यतांबूलदक्षिणानीराजनैः संपूज्य। वक्ष्यमाणविधिना अर्घ्यं दत्वा साष्टंगं प्रणम्य यथाविधि जपेत्। अस्य पुरश्चरणं षट्लक्षजपः॥ अन्यत्सर्वं पूर्ववत्। तथा च - रसलक्षं जपो समिद्भिः खदिरस्य च॥

इत्थं जपादिभिः सिद्धं स्वेष्टसिद्धौ प्रयोजयेत्॥१॥

इति षड्वर्णात्मकभौममंत्रविधाम्॥

धनपुत्रादिप्रदमंगलव्रतविधानम्॥

(स्कांदे मन्त्रमहोदधौ च)।

मार्गशीर्षे वैशाखे वा शुक्लपक्षे चंद्रतारादिबलान्विते भौमवासरे व्रतं प्रगृह्य वक्ष्यमाणविधिना संवत्सरपर्यतं कार्य्यम्॥ तद्यथा॥

मङ्गलवारे अरुणोदयवेलायामुत्थाय शौचविधिं विधाय। अपामार्गकाष्ठेन मौनपूर्वकं दंतधावनं कृत्वा नद्यादौ यथाविधि स्नात्वा सन्ध्यादिनित्यक्रियां समाप्य शिवालये गृहे वा रक्तवाससी परिधाय रक्तगोमयलिप्तमंडले स्वासने प्राङ्मुख उदङ्मुखो वा उपविश्य। दक्षिणपार्श्वे रक्तचन्दनपुष्पादीनि संपाद्य सपवित्रकरः आचम्य प्राणानायम्य। देशकालौ संकीर्त्य मम जन्मराशेः सकाशान्नामराशेः सकाशाज्जन्मलग्नाद्वर्षलग्नाद्गोचराद्वा चतुर्थाष्ट मद्वादशाद्यांनिष्टस्थानस्थितभौमसूचयिष्यमाण सर्वार्तिफलनिवृत्तिद्वारा तृतीयैकादशस्थानस्थितव दुत्तमफलप्राप्त्यर्थमायुरारोग्यसुखपुत्रधनप्राप्त्त्यर्थे श्रीभौमदेवताप्रीत्यर्थे भौमव्रतं करिष्ये।

तंदगत्वेन न्यासध्यानपूजार्घ्यदानादि च करिष्ये।

इति संकल्प्य (प्रारंभदिने गणपतिपूजनं पुण्याहवाचनं च कुर्यात्) ततः।

अथ देवेश ते भक्त्यां करिष्ये व्रतमुत्तमम्।
ऋणव्याधिविनाशाय धनसंतानहेतवे॥

इति प्रार्थ्य कर्ता स्वदेहे न्यासान्कुर्य्यात्॥

ॐ मङ्गलाय नमः अंघ्रयोः॥१॥
ॐ भूमिपुत्राय नमः जानुनोः॥२॥
ॐ ऋणहर्त्रे नमः ऊर्वोः॥३॥
ॐ धनप्रदाय नमः कट्योः॥४॥
ॐ स्थिरासनाय नमः गुह्ये॥५॥
ॐ महाकालाय नमः उरसि॥६॥
ॐ सर्वकर्मावरोधकाय नमः वामबाहौ॥७॥
ॐ लोहिताय नमः दक्षिणबाहौ॥८॥
ॐ लोहिताक्षाय नमः गले॥९॥
ॐ सामगानां कृपाकराय नमः मुखे॥१०॥
ॐ धरात्मजाय नमः नासिकायाम्॥११॥
ॐ कुजाय नमः अक्ष्णोः॥१२॥
ॐ भौमाय नमः ललाटे॥१३॥
ॐ भूतिदाय नमः भ्रुवोर्मध्ये॥१४॥
ॐ भूमिनंदनाय नमः शिरसि॥१५॥
ॐ अङ्गारकाय नमः शिखायाम्॥१६॥
ॐ यमाय नमः सर्वांगे॥१७॥
ॐ सर्वरोगापहारकाय नमः बाहुद्वये॥१८॥
ॐ वृष्टिकर्त्रे नमः मूर्द्धादिपादपर्यंतम्॥१९॥
ॐ वृष्टिहर्त्रे नमः चरणादिमस्तकान्तम्॥२०॥
ॐ सर्वकामफलप्रदाय नमः दिक्षु॥२१॥
ॐ आराय नमः नाभौ॥१॥
ॐ वक्राय नमः वक्षसि॥२॥
ॐ भूमिजाय नमः मूर्ध्नि॥३॥

एवं न्यासं कृत्वा ध्यायेत्॥

रक्तमाल्यांबरधरः शक्तिशूलगदाधरः। चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः॥

एवं ध्यात्वा अर्घ्यं संस्थाप्य पूजां कुर्यात्। तद्यथा त्रिकोणस्थांडिले यथाविधि ताम्रकलशं संस्थाप्य तत्र एकविंशतिकोष्ठाढ्यं त्रिकोणं ताम्रयंत्रमथवा रक्तचंदननिर्मितां शूलशक्तिगदाधरां मेषमारूढां भौमप्रतिमां संस्थाप्य पूर्ववत्प्राणप्रतिष्ठां कृत्वा आवाहनं कुर्यात्॥

ॐ एह्येहि भगवन्ब्रह्मन्नंगारक महा प्रभो।
त्वयि सर्वे समायातं त्रैलोक्यं सचराचरम्॥१॥
भौममावाहयिष्यामि तेजोमूर्ति दुरासदम्।
रुद्ररूपमनिर्देश्यं वक्रं च रुधिरप्रियम्॥२॥

ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयं अपा रेतांसि जिन्वति॥१॥

ॐ अंगारकाय विद्महे शक्तिहस्ताय धीमहि तन्नो भौमः प्रचोदयात्॥

इति भौममावाह्य पाद्यादि रक्तपुष्पान्तैरुपचारैः संपूज्य आवरणपूजां कुर्यात्। षट्कोणे अग्नेयादिकोणकेसरेषु मध्ये दिक्षु च।

ॐ ह्रां हृदयाय नमः॥१॥
ॐ ह्रीं शिरसे स्वाहा॥२॥

ॐ ह्रां शिखायै वषट्।।३।।

ॐ ह्रां ह्रं ह्रं कवचाय हुम्।।४।।

ॐ हंसः नेत्रत्रयाय वौषट्।।५।।

ॐ खखः अस्त्राय फट्।।६।।

इति पूजयेत्। ततः एकविंशतिकोष्ठेषु।

ॐ मंगलाय नमः पादौ पूजयामि।।१।।

ॐ भूमिपुत्राय नमः जानुनी पूजयामि।।२।।

ॐ ऋणहर्त्रे नमः ऊरु पूजयामि।।३।।

ॐ धनप्रदाय नमः कटिं पूजयामि।।४।।

ॐ स्थिरासनाय नमः गुह्यं पूजयामि।।५।।

ॐ महाकायाय नमः उरः पूजयामि।।६।।

ॐ सर्वकर्माविरोधकाय नमः वामबाहुं पूजयामि।।७।।

ॐ लोहिताय नमः दक्षिणबाहुं पूजयामि।।८।।

ॐ लोहिताक्षाय नमः कंठं पूजयामि।।९।।

ॐ सामगानां कृपाकराय नमः मुखं पूजयामि।।१०।।

ॐ धरात्मजाय नमः नासिकां पूजयामि।।११।।

ॐ कुजाय नमः नेत्रद्वयं पूजयामि।।१२।।

ॐ भौमाय नमः ललाटं पूजयामि।।१३।।

ॐ भूतिदाय नमः भ्रुवोर्मध्यं पूजयामि।।१४।।

ॐ भूमिनंदनाय नमः मस्तकं पूजयामि।।१५।।

ॐ अंगारकाय नमः शिखां पूजयामि।।१६।।

ॐ यमाय नमः सर्वांगानि पूजयामि।।१७।।

ॐ सर्वरोगापहारकाय नमः बाहुद्वयं पूजयामि।।१८।।

ॐ वृष्टिकर्त्रे नमः मूर्धादिपादपर्यंतं पूजयामिं।।१९।।

ॐ वृष्ट्यपहर्त्रे नमः चरणादिमस्तकपर्यंतं पूजयामि।२०।।

ॐ सर्वकामफलप्रदाय नमः दिशः पूजयामि।।२१।।

इति पूजयेत्।।

ततः तद्बाह्यत्रिकोणेषु।

ॐ वक्राय नमः।।१।।

ॐ आराय नमः।।२।।

ॐ भूमिजाय नमः।।३।।

इति पूजयेत्। तद्बहिरष्टदले पूर्वादिक्रमेण।

ॐ ब्राह्म्यै नमः ।।१।।

ॐ माहेश्वर्यै नमः।।२।।

ॐ कौमार्यै नमः।।३।।

ॐ वैष्णव्यै नमः।।४।।

ॐ वाराह्यै नमः।।५।।

ॐ इन्द्राण्यै नमः।।६।।

ॐ चामुंडायै नमः।।७।।

ॐ महालक्ष्म्यै नमः।।८।।

मातृकाः पूजयामि इति पूजयेत्। तद्बाह्ये भूपुरे पूर्वादिक्रमेण।

ॐ इन्द्राय नमः।।१।।

ॐ अग्नये नमः।।२।।

ॐ विरूपाक्षऋषये नमः शिरसि॥१॥
ॐ गायत्रींछंदसे नमः मुखे॥२॥
ॐ भौमदेवतायै नमः हृदि॥३॥
ॐ ककुर्वांजाय नमः गुह्ये॥४॥
ॐ भौमप्रीतये जपे विनियोगाय नमः सर्वांगे॥५॥

इति ऋष्यादिन्यासः॥

ॐ अग्निर्मूर्द्धेत्यंगुष्ठाभ्यां नमः॥१॥
ॐ दिवः ककुदिति तर्जनीभ्यां नमः॥२॥
ॐ पतिः पृथिव्या अयमिति मध्यमाभ्यां नमः॥३॥
ॐ अपामित्यनामिकाभ्यां नमः॥४॥
ॐ रेतासीति कनिष्ठिकाभ्यां नमः॥५॥
ॐ जिन्वतीति। करतलकरपृष्ठाभ्यां नमः॥६॥

इति करन्यासः॥

ॐ अग्निर्मृर्द्धेति हृदयाय नमः॥१॥
ॐ दिवः ककुदिदि शिरसे स्वाहा॥२॥
ॐ पतिः पृथिव्या अयमिति शिखायै वषट्॥३॥
ॐ अपां कवचाय हुं॥४॥
ॐ रेतासीति नेत्रत्रयाय वौषट्॥५॥
ॐ जिन्वतीत्यस्त्राय फट्॥६॥

इति हृदयादिन्यासः॥

ॐ अग्निरिति शिरसि ॥१॥
ॐ मूर्धा ललाटे॥२॥
ॐ दिवो मुखे॥३॥
ॐ ककुदिति हृदये॥४॥
ॐ पतिर्नाभौ॥५॥
ॐ पृथिव्याः कट्याम्॥६॥
ॐ अयमूर्वोः॥७॥
ॐ अपां जानुनोः॥८॥
ॐ रेतासि गुल्फयोः॥९॥
ॐ जिन्वति पादयोः॥१०॥

इति न्यासविधिं कृत्वा ध्यायेत्॥

ॐ रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगतो गदाभृत्।

धरासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशांतः ॥१॥

इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात्॥

तत्र मंत्रः।

ॐ अग्निर्मूर्द्धा दिवः ककुत्पति पृथिव्या अयम्।

अपा रेतासि जिन्वति॥

इति मंत्रः॥ भौमे दशसहस्राणीति जपसंख्या १००००। जपांते खदिरसमित्तिलपायसघृतैर्दशांशहोमः। अन्यत्सर्वं पूर्ववत्।

अथ दानद्रव्याणि॥

प्रवालगोधूममसुरिकाश्च वृषोरुणाश्चापि गुडः सुवर्णम्।

आरक्तवस्त्रं करवीरपुष्पं ताम्रं च भौमाय वंदति दानम्।।

इति भौममंत्रप्रयोगः।।

(४) अथ बुधमंत्रप्रयोगः।।

ॐ उदबुध्यस्वेति मंत्रस्य परमोष्ठि ऋषिः। बृहतीछंदः। बुधो दवता। त्वमिष्टापूर्ते समिति बीजम्। बुधप्रीतये जपे विनियोगः।।

ॐ परमेष्ठीऋषये नमः शिरसि ।।१।।

ॐ बृहतीछंदसे नमः मुखे।।२।।

ॐ बुधदेवतायै नमः हृदये।।३।।

ॐ त्वमिष्टापूर्तेसमिति बीजाय नमः गुह्ये।।४।।

ॐ बुधप्रीतये जपे विनियोगाय नमः सर्वांगे।।५।।

इति ऋष्यादिन्यासः।।

ॐ उद्बुध्यस्वाग्नेप्रतिजागृहि अङ्गुष्ठाभ्यां नमः ।।१।।

ॐ त्वमिष्ठापूर्तेसं तर्जनीभ्यां नमः।।२।।

ॐ सृजेथामयंच मध्यमाभ्यां नमः।।३।।

ॐ अस्मिन्त्सधस्थेअध्युत्तरस्मिन् अनामिकाभ्यां नमः ।।४।।

ॐ विश्वेदेवा कनिष्ठिकाभ्यां नमः।।५।।

ॐ यजमानश्चसीदत करतलकरपृष्ठाभ्यां नमः।।६।।

इति करन्यासः।।

ॐ उदूबुध्यस्वाग्नेप्रतिजागृहि हृदयाय नमः।।१।।

ॐ त्वमिष्ठापूर्तेसं शिरसे स्वाहा।।२।।

ॐ सृजेथामयं च शिखायै वषट् ।।३।।

ॐ अस्मिन्त्सथस्थेअध्युत्तरस्मिन्कवचाय हुं।।४।।

ॐ विश्वेदेवा नेत्रत्रयाय वौषट्।।५।।

ॐ यजमानश्चसीदत अस्त्राय फट्।।६।।

इति हृदयादिन्यासः।।

ॐ उदबुध्यस्व शिरसि।।१।।

ॐ अग्नेप्रति ललाटे।।२।।

ॐ जागृहित्वं मुखे।।३।।

ॐ इष्टापूर्ते सं हृदये।।४।।

ॐ सचेथामयं च नाभौ।।५।।

ॐ अस्मिन्त्सधस्थे कट्याम्।।६।।

ॐ अध्युत्तरस्मिन्नूर्वो ।।७।।

ॐ विश्वेदेवा जानुनोः।।८।।

ॐ यजमानश्च पादयोः।।९।।

ॐ सीदत सर्वांगे।।१०।।

इति न्यासविधिं कृत्वा ध्यायेत्।। पीतांबरं पीतवपुः किरीटी चतुर्भुजो दंडधरश्च हारी। चर्मासिधृक् सोमसुतः सदा मे सिंहाधिरूढो वरदो बुधश्च।। इति ध्यात्वा मानसोपचारैः

संपूज्य जपं कुर्यात्।।

तत्र मंत्रः

ॐ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूतै सर्टसृजेथामयञ्च।। अस्मिन्त्सधस्थे अध्युत्तरस्मिनूविश्वेदेवा यजमानश्च सीदत।। इति मन्त्रः। बुधे चाष्टसहस्रकमिति जपसंख्या ८०००।। जपान्ते अपामार्गसमित्तिलपायसघृतैर्दशांशहोमः।।

अन्यत्सर्वं पूर्ववत् ।।

अथ दानद्रव्याणि।

चैल च नीलं कलधौतकांस्यं मुद्गाज्यगारुत्मकसर्वपुण्यम्। दासी च दन्तो द्विरदस्य नूनं वंदति दानं विधुनंदनाय।।

इति बुधमंत्रप्रयोगः।।४।।

(५) अथ बृहस्पतिमन्त्रप्रयोगः।।

ॐ बृहस्पते इति मन्त्रस्य गृत्समद ऋषिः। त्रिष्टुप्छन्दः। बृहस्पतिर्देवता।। बृहस्पतिप्रीत्यर्थे जपे विनियोगः।।

ॐ गृत्समदऋषये नमः शिरसि।।१।।

ॐ त्रिष्टुप्छन्दसे नमः मुखे।।२।।

ॐ बृहस्पतिदेवतायै नमः हृदये।।३।।

इति ऋष्यादिन्यासः।

ॐ बृहस्पते अति यदर्य्यौ इत्यंगुष्ठाभ्यां नमः।।१।।

ॐ अर्हाद्युमदिति तर्जनीभ्यां नमः।।२।।

ॐ विभाति कतुमदिति मध्यमाभ्यां नमः।।३।।

ॐ जनेषु अनामिकाभ्यां नमः।।४।।

ॐ यद्दीदयच्छवसऋतप्र जाततदस्मासु कनिष्ठिकाभ्यां नमः।।५।।

ॐ द्रविणंधेहिचित्रमिति करतलकरपृष्ठाभ्यां नमः।।६।।

इति करन्यासः।

ॐ बृहस्पते अतियदर्य्यो हृदयाय नमः।।१।।

ॐ अर्हाद्युमदिति शिरसे स्वाहा।।२।।

ॐ विभाति क्रतुमदिति शिखायै वषट्।।३।।

ॐ जनेषु कचवाय हुं।।४।।

ॐ यद्दीदयच्छवसऽऋतप्रजात तदस्मासु नेत्रत्रयाय वौषट्।।५।।

ॐ द्रविणं धेहि चित्रमित्यस्त्राय फट्।।६।।

इति हृदयादिन्यासः।।

ॐ बृहस्पते इति शिरसि।।१।।

ॐ अतियदर्यो ललाटे।।२।।

ॐ अर्हाद्युमन्मुखे ।।३।.

ॐ विभाति क्रतुमज्जनेषु नाभौ।।४।।

ॐ यद्दिदयत्कठ्याम्।।५।।

ॐ शवसऋतप्रजा ऊर्वो।।६।।

ॐ ततदस्मासुद्रविणं जानुनोः॥७॥

ॐ धेहि चित्रं पादयोः॥८॥

इति मंत्रन्यासः॥

एवं न्यासं कृत्वा ध्यायेत्॥

अथ ध्यानम्॥

पीताम्बरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशान्तः। दधाति दंडं च कमण्डलुं च तथाऽक्षसूत्रं वरदाऽस्तु मह्यम्॥

इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात्॥

ॐ बृहस्पतेऽअति यदर्योऽअर्हाद्युमद्विभाति क्रतुमज्जनेषु॥ यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणंधेहि चित्रम्॥

इति बृहस्पतिमन्त्रः॥ "एकोनविंशतिर्जीवे सहस्राणि १९००० विदुर्बुधाः" इति जपसंख्या। जपांते अश्वत्थसमित्तिलपायसघृतैर्दशांहोमः॥

अन्यत्सर्वे पूर्ववत्॥

अथ दानद्रव्याणि।

शर्करा च रजनी तुरंगमः पीतधान्यमपि पीतमम्बरम्। पुष्पराजलवणे च काञ्चनं प्रीतये सुरंगुरोः प्रदीयताम्॥

इति गुरुमंत्रप्रयोगः॥ त्रजपप्रयोगः॥

(६) अत शुक्रमंत्रजपप्रयोगः।

ॐ अन्नात्परिस्रुत इति मन्त्रस्य पराशर ऋषिः। शक्वरी छन्दः। शुक्रो देवता। रसं ब्रह्मणा इति बीजम्। शुक्रप्रीत्यर्थे जपे विनियोगः॥

ॐ पराशरऋषये नमः शिरसि॥१॥

ॐ शक्वरीछन्दसे न्यासः।

ॐ अन्नात्परिस्रुत इत्यङ्गुष्ठाभ्यां नमः॥१॥

ॐ रसंब्रह्मणा व्यपिबत् इति तर्जनीभ्यां नमः॥२॥

ॐ क्षत्रंपय इति मध्यमाभ्यां नमः॥३॥

ॐ सोमं प्रजापतिरित्यनामिकाभ्यां नमः॥४॥

ॐ ऋनेनसत्यमिंद्रियंव्विपानगं्शुक्रमंधसः कनिष्ठिकाभ्यां नमः॥५॥

ॐ इंद्रस्येंद्रियमिदंपयोमृतंमधु इति करतलकरपृष्ठाभ्यां नमः॥६॥

इति करन्यासः॥

ॐ अन्नात्परिस्रुतो हृदयाय नमः॥१॥

ॐ रंसब्रह्मणाव्यपिबत् शिरसे स्वाहा॥२॥

ॐ क्षंत्रपयः शिखायै वषट्॥३॥

ॐ सोमंप्रजापतिरिति कवचाय हुं॥४॥

ॐ ऋतेनसत्यमिद्रियंव्विपानगं्शुक्रमंधसो नेत्रत्रयाय वौषट्॥५॥

ॐ इन्द्रस्येंद्रियमिदंपयोमृतम्मधु इत्यस्त्राय फट्॥६॥

इति हृदयादिन्यासः॥

ॐ अन्नात्परिस्त्रुत इति शिरसि॥१॥

ॐ रंसब्रह्मणा ललाटे॥२॥

ॐ व्यापिबत्क्षंत्र मुखे॥३॥

ॐ पयः सोमं हृदये॥४॥

ॐ प्रजापतिर्नाभौ॥५॥

ॐ ऋतेनसत्यं कट्याम्॥६॥

ॐ इंद्रियंविपानम् गुदे॥७॥

ॐ शुक्रं वृषणयोः॥८॥

ॐ अन्धस ऊर्वोः॥९॥

ॐ इन्द्रस्येद्रियमिदंपयो जानुनोः॥१०॥

ॐ अमृतं पादयोः॥११॥

ॐ मधु सर्वशरीरे च॥१२॥

न्यसेत्। इति मन्त्रन्यासः॥

एवं न्यासं कृत्वा ध्यायेत्॥ अथ ध्यानम्॥

श्वेतांबरः श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशांतः। तथाऽक्षसूत्रं च कमंडलुं च दण्डं च बिभ्रद्वरदोऽस्तु मह्यम्॥ इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्य्यात्॥

तत्र मंत्रः

ॐ अन्नात्परिस्त्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रंपयः सोमं प्रजापतिः। ऋतेन सत्य मिद्रियंव्विपानगं्शुक्रमन्धस इंद्रस्येंद्रियमिदंपयोऽमृतंमधु॥ शुक्रे एकादशैव तु इति जपसंख्या ११०००॥

अथ दानद्रव्याणि।

चित्रांबरं शुभ्रतरङ्गमश्च धेनुश्च वज्रं रजतं सुवर्णम्। सुतंडुलानुत्तमगंधयुक्तान् वंदति दानं भृगुनन्दनाय ॥ इति शुक्रमन्त्रजपप्रयोगः॥

(७) अथ शनैश्चरमन्त्रजपप्रयोगः।

ॐ शन्नोदेवीरिति मंत्रस्य दध्यङाथर्वण ऋषिः। गायत्री छन्दः। शनिर्देवता॥ आपो बीजम्। वर्तमान इति शक्तिः। शनैश्चरप्रीत्यर्थे जपे विनियोगः॥

ॐ दध्यङ्ङाथर्वणऋषये नमः शिरसि॥१॥

ॐ गायत्रीछंदसे नमः मुखे॥२॥

ॐ शनैश्चरदेवतायै नमः हृदये॥३॥

ॐ आपोबीजाय नमः गुह्ये॥४॥

ॐ वर्त्तमानशक्तये नमः पादयोः॥५॥

इति ऋष्यादिन्यासः।

ॐ शन्नोदेवीरित्यङ्गुष्ठाभ्यां नमः ॥१॥

ॐ अभीष्ठये तर्जनीभ्यां नमः॥२॥

ॐ आपोभवंतु मध्यमाभ्यां नमः॥३॥

ॐ पीतये अनामिकाभ्यां नमः॥४॥

ॐ शंय्योरिति कनिष्ठिकाभ्यां नमः॥५॥

ॐ अभिस्त्रवंतुनः करतलकरपृष्ठाभ्यां नमः॥६॥

इति करन्यासः॥

ॐ शन्नोदेवीरिति हृदयाय नमः।।१।।
ॐ अभिष्ठये शिरसे स्वाहा।।२।।
ॐ आपो भवंतु शिखायै वषट्।।३।।
ॐ पीतये कवचाय हुं ।।४।।
ॐ शंय्योरिति नेत्रत्रयाय वौषट्।।५।।
ॐ अभिस्रवंतुनः अस्राय फट्।।६।।

इति हृदयादिन्यासः।।

ॐ शन्न इति शिरसि।।१।।
ॐ देवीरिति ललाटे।।२।।
ॐ अभीष्टये मुखे।।३।।
ॐ आपो हृदये।।४।।
ॐ भवन्तु नाभौ।।५।।
ॐ पीतये कटयाम्।।६।।
ॐ शंय्योरूर्वोः।।७।।
ॐ अभिस्रवन्तु जानुनोः।।८।।
ॐ नः पादयोः।।९।।

इति मन्त्रन्यासः।।

एवं न्यासं कृत्वा ध्यायेत्।

अथ ध्यानम्।।

नीलद्युतिः शूलधरः किरिटी गनस्थितस्त्रासकरो धनुष्मान्। चतुर्भुजः सूर्यसुतः प्रशांतः सदाऽस्तु मह्यं वरदो महात्मा।।

इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्य्यात्।

तत्र मंत्रः

ओं शन्नो देवीरभिष्टयआपो भवन्तु पीतये। शंय्योरभिस्रवन्तु नः।। त्रयोविंशतिर्मन्दे चेति जपसंख्या २३०००।। जपांते शमीसमित्तिलपायसघृतैर्दशांशहोमः।

अन्यत्सर्वं पूर्ववत्।

अथ दानद्रव्याणि।

माषांश्च तैलं विमलेन्द्रनीलं तिलाः कुलित्था महिषी च लोहम्।।

कृष्णा च धेनुः प्रवदन्ति नूनं दुष्टाय दानं रविनंदनाय।।१।। इति शनैश्चरमंत्रप्रयोगः।।७।।

(८) अथ राहुमन्त्रप्रयोगः।।

ओं कयान इति मन्त्रस्य वामदेव ऋषिः। गायत्रीछन्दः। राहुर्देवता। कयान इति बीजम्। शचिरिति शक्तिः। राहुप्रीत्यर्थे जपे विनियोगः।।

ओं वामदेवऋषये नमः शिरसि।।१।।
ओं गायत्रीछन्दसे नमः मुखे।।२।।
ओं राहुदेवतायै नमः हृदये।।३।।
ओं कयान इति बीजाय नमः गुह्ये।।४।।
ओं शचिरिति शक्तये नमः पादयोः।।५।।

इति ऋष्यादिन्यासः।

ओं कयान इत्यङ्गुष्ठाभ्यां नमः।।१।।

ओं चित्र इति तर्जनीभ्यां नमः॥२॥

ओं आभुव इति मध्यमाभ्यां नमः॥३॥

ॐ दूतीसदावृध इत्यनमिकाभ्यां नमः॥४॥

ॐ सखा कया इति कनिष्ठिकाभ्यां नमः॥५॥

ॐ शचिष्ठयावृता इति करतलकरपृष्ठाभ्यां नमः॥६॥

इति करन्यासः॥

ॐ कयान इति हृदयाय नमः॥१॥

ॐ चित्र इति शिरसे स्वाहा॥२॥

ॐ आभुव इति शिखायै वषट्॥३॥

ॐ दूतिसदावृध इति कवचाय हुं॥४॥

ॐ सखाकया इति नेत्रत्रयाय वौषट्॥५॥

ॐ शचिष्ठयावृता इत्यास्त्राय फट्॥६॥

ॐ कया शिरसि॥१॥

ॐ न इति ललाटे॥२॥

ॐ चित्र मुखे॥३॥

ॐ आभुव दूतीनाभौ ॥४॥

ॐ सदावृधः कटयाम् ॥८॥

ॐ सखा उर्षोः ॥६॥

ॐ कया जानुनोः ॥७॥

ॐ शचिष्ठयागुल्फयोः ॥८॥

ॐ वृता पादयोः ॥९॥

इति मन्त्रन्यासः।

एवं न्यासं कृत्वा।

ध्यायेत्।

अथ ध्यानम्।

नीलांबरो नीलवपुः किरीटी करालवाक्त्रः करवालशूली। चतुर्भुजश्चर्मधरश्च राहुः सिंहासनस्थो वरदोऽस्तु मह्यम्॥

इति ध्यात्वा मानसोपचरैः संपूज्य जपं कुर्य्यात्॥

सराहुमंत्रः॥ ॐ कयानश्चित्र आ भुवदूतीमदा व्वृधत्सखा कया शचिष्ठया वृता॥

राहोरष्टादशैव तु १८००० इति दूर्वासमित्तिलपायसघृतैर्दशांशहोमः॥

अन्यत्सर्वे पूर्ववत्॥

अथ दानद्रव्याणि॥

गोमेदरत्नं च तुरंगमश्च सुनीलचैलामलकंबलं च। तिलाश्च तैलं खलु लोहमिश्र स्वर्भानवे दानमिदं वंदति॥

इति राहुमन्त्रजपप्रयोगः॥८॥

(९) अथ केतुमंत्रजप विधानम्॥

केतुं कृण्वन्निति मंत्रस्य मधुऋषिः॥ गायत्री छंदः। केतुर्देवता। अपेशसे इति बीजम्। मर्य्या शक्तिः। केतुप्रीत्यर्थे जपे विनियोगः॥

ॐ मधु ऋषये नमः शिरसि॥१॥

ॐ गायत्री छन्दसे नमः मुखे॥२॥

ॐ केतुदेवतायै नमः हृदये॥३॥

ॐ अपेशसे इति बीजाय नमः गुह्ये॥४॥

ॐ मर्य्याशक्तये नमः पादयोः ॥५॥

इति ऋष्यादिन्यासः॥

ॐ केतुंकृण्वन् इत्यङ्गुष्ठाभ्यां नमः॥१॥

ॐ केतवे इति तर्जनीभ्यां नमः॥२॥

ॐ पेशोमर्य्या इति मध्यमाभ्यां नमः॥३॥

ॐ अपे शसे अनामिकाभ्यां नमः॥४॥

ॐ समुषद्भिः कनिष्ठिकाभ्यां नमः॥५॥

ॐ अजायया: करतलकरपृष्ठाभ्यां नमः॥६॥

इति करन्यासः॥

ॐ केतुकृण्वन्निति हृदयाय नमः॥१॥

ॐ अकेनवे शिरसे स्वाहा॥२॥

ॐ पेशोमर्य्या शिखायै वषट्॥३॥

ॐ अपेशसे कवचाय हुं॥४॥

ॐ समुषद्भिर्नेत्रत्रयाय वौषट्॥५॥

ॐ अजायथा इत्यस्त्राय फट्॥६॥

इति हृदयादिन्यासः॥

ॐ केतुं शिरसि॥१॥

ॐ कुण्वन् ललाटे॥२॥

ॐ अकेतवे मुखे॥३॥

ॐ पेशो हृदये॥४॥

ॐ मर्य्या नाभौ॥५॥

ॐ अपेशसे कट्याम्॥६॥

ॐ समूर्वोः॥७॥

ॐ उषद्भिर्जानुनोः॥८॥

ॐ अजायथाः पादयोः॥९॥

इति मंत्रन्यासः।

एवं न्यासं कृत्वा ध्यायेत्॥ अथ ध्यानम्॥ ''धूम्रो द्विबाहुर्वरदो गदाभृद्गृध्रासनस्थो विकृताननश्च॥ किरीटकेयूर विभूषितांबरः मदास्तु मे केतुगणः प्रशांतः॥१॥

इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात्। तत्र मन्त्रः॥

ॐ केतुकृण्वन्नकेतवेपेशोमर्य्याअपेशसे॥ समुषद्भिरजायथाः॥१॥ केतोः सप्त सहस्राणि ७००० जपंसख्या प्रकीर्तिता॥ ततो जपान्ते कुशसमित्तिलपायसघृतैर्दशांशहोमः॥ अन्यत्सर्वे पूर्ववत्॥

अथ दानद्रव्याणि॥

वैडूर्यरत्नं सतिलं च तैलं सुकंबलं चापि मदो मृगस्य॥

शस्त्रं च केतोः परितोषहेतोश्छागस्य दानं कथितं मुनीन्द्रैः॥

इति केतुमंत्रजपविधानं समाप्तम्॥

रव्यादिकल्प।।

RAVI-KALPA

(With mantras also of Angāraka, Bṛhaspati and Śukra)

The following is the extract from the popular and celebrated Ritual text known as **Mantra-Mahodadhi,** compiled by Mahīdhara. Details of worship of Sūrya and other grahas are given in the chapter fifteen (pañchadaśa-taranga), in one hundred and nine verses. This valuable manual has a commentary in Sanskrit known as 'Naukā', which provides particulars of nyāsa, mantra, mantroddhāra, and the vidhi of worship.

अथ वक्ष्ये रवेर्मन्त्र रोगदारिद्र्यनाशनम्।
प्राणवो भुवनेशानीमेधारेचिकयान्विता।।१ ।।

सूर्यमन्त्रः।।

उमाकान्तोक्षियुक्सर्गो सूर्यआदित्य इन्दिरा।
दशवर्णो मनुर्देवभागोस्य मुनिरीरितः।।२।।

गायन्त्रीछन्द उद्दिष्टं देवतादिवसेश्वरः।
मायाबीजं रमाशक्तिर्नियोगोऽभीष्टसिद्धये॥३॥

रवि मन्त्र : ॐ ह्रीं घृणिः सूर्य आदित्यः श्रीं।
सत्येतिहृदयं ब्रह्मशिरो विष्णुशिखा स्मृता।
रुद्रवर्माग्निनेत्रं स्यात्सर्वेत्यस्त्रमुदीरितम्॥४॥

तेजोज्वालामणेहुंफट्स्वाहान्तमनोवङ्गजाः।
भूयःषडग्ङं षड्वर्णैः कृत्वान्तःस्थैः शिवाश्रियोः॥५॥

शेषार्णैर्जठरे पृष्ठे ङेन्तनाम्ना तयोर्न्यसेत्।
आदित्यं च रविं भानुं भास्करं सूर्यमेव च॥६॥

मूर्ध्नि वक्त्रे हृदि शिवे पादयोश्व प्रविन्यसेत्।
सद्यादिपञ्चह्रस्वाद्यांश्चतुर्थीनमसान्वितान्॥७॥

न्यास विधिः॥ ॐ लं आदित्याय नमः मूर्ध्नि। ॐ ऋं रवये नमः मुखे। ॐ उं भानवे नमः हृदि। ॐ ई भास्कराय नमः लिङ्गे। ॐ अं सूर्याय नमः पादयोः।

माया रमागनष्टौ वार्णमूर्धमुखे गले।
हृत्कुक्षिनाभिजंघे च पादायोश्च प्रविन्यसेत्॥८॥

स्वरान्सबिदूनुच्चार्य्य ङेन्तं शीतांशुमण्डलम्।
शिखादिकण्ठपर्य्यन्तं विन्यसेत्संस्मरन्विधुम्॥९॥

स्पर्शान्सेन्दून्समुच्चार्य्य ङेंतं भास्करामण्डलम्।
कण्ठादिनाभिपर्य्यन्तं न्यसेदध्यायन्प्रभाकराम्॥१०॥

यादीन्सेन्दूश्चतुर्थ्यन्तं वह्निमण्डलमुच्चरन्।
नाभ्यादिपादपर्य्यन्तं विन्यसेत्पावकं स्मरन्॥११॥

मण्डलत्रयविन्यासः प्रोक्तस्तेजोविधायाकः।
अकारादिठकारान्तवर्णाढ्यं सोममण्डलम्॥१२॥
ङेनमोंतं न्यसेन्मन्त्री मूर्द्धादिचराणावधि।
डकारादिक्षकारान्तं वर्णाद्यं वह्निमण्डलम्॥१३॥

हृदादिपादपर्य्यन्तं विन्यसेन्ङेनमोन्वितम्।
अग्नीषोमात्मको न्यासः कथितः सर्वसिद्धिदः॥१४॥

सबिन्दून्मातृकावार्णानजपांपुरुषात्मने।
नमोंतं व्यापकं न्यस्येद्धंसन्यासोऽयमीरितंः॥१५॥

अष्टावष्टौस्वरान्पञ्चपञ्चशः शेषवर्णकान्।
उक्तादित्यमुखान्यस्येच्चतुर्भिश्चग्रहात्रव॥१६॥

आधारलिंगनाभीहृत्कण्ठे च मुखमध्यतः।
भ्रूमध्ये भालदेशे च ब्रह्मरन्ध्रे क्रमान्न्यसेत्॥१७॥

वदेत्खेचरनामान्ते पदं भगवते नमः।
हंसाख्यमग्नीषोमाख्यं मण्डलत्रयसंज्ञकम्।
पुनर्न्यासत्रयं कुर्य्यान्मूलेन व्यापाकं चरेत्॥१८॥

शोणाम्भेरुहसंस्थितं त्रिनयनं वेदत्रयीविग्रहं
दानाम्भोजयुगाभयानि दधतं हस्तैः प्रवालप्रभम्।
केयूराङ्गदहारकंकणधरं कर्णोल्लसत्कुण्डलं
लोकेत्पत्तिविनाशपालनकरं सूर्य्यं गुणाब्धिं भजे॥१९॥

एवं ध्यायञ्जपेल्लक्षदशकं तद्दशांशतः।
पद्मैस्तिलैर्वा जुहुयात्तर्पयेद्भोजयेद्द्विजान्॥२०॥

प्रयजेत्पीठपूजायां धर्माद्यष्टस्थलेष्विमान्।
प्रभूतं विमलं सारं समाराध्यं विदिक्ष्वथ॥२१॥

परमादिसुखं मध्येनंतादीन्पूर्ववद्यजेत्।
सोमाग्निमण्डले प्रोच्य रविमण्डलमर्चयेत्॥२२॥

ततोऽष्टदिक्षु मध्ये च पीठशक्तीरिमान्नव।
दीप्ता सुक्ष्मा जया भद्रा विभूतिर्विमला तथा॥२३॥

अमोघाविद्येता सर्वतो मुखी पीठशक्तयः।
ह्रस्वत्रयक्लीबहीनस्वरान्वह्नीन्दुसंयुतान्॥२४॥

बीजानि पीठशक्तीनां तदाद्यास्ताः प्रपूजयेत्।
ब्रह्माविष्णुशिवात्मांतेकायासौराय यो स्मृतिः॥२५॥

पीठात्माने नमस्तारपूर्वः पीठमनुः स्मृतः।
तारसेन्दुवियत्कान्तौ बिन्दुमद्विन्दुवर्जितौ॥२६॥

खोल्कायहृदयं मन्त्रो नवार्णो मूर्तिकल्पने।
अनेन मूर्तौ क्लृप्तायां यजेत्प्रद्योतनं प्रभुम्॥२७॥

प्राग्वत्षडङ्गं सम्पूज्य दिक्ष्वष्टाङ्गं प्रपूजयेत्।
आदित्यं मध्यतोऽभ्यर्च्य रविं भानुं च भास्करम्॥२८॥

सूर्यं दिशासु सद्यादिपञ्चह्रस्वादिकान्यजेत्।
उषां प्रज्ञां प्रभां सन्ध्यामाद्यर्णाद्याविदिक्ष्वपि॥२९॥

ब्राह्म्याद्यादिग्दलेष्वर्चेन्महालक्ष्मीस्थलेरुणम्।
सोमं बुधं गुरुं शुक्रं दिक्ष्वाध्यर्णादिकान्यजेत्॥३०॥

अङ्गारकं शनिं राहुं केतुं कोणेषु पूजयेत्।
इन्द्राद्यानायुधैर्युक्तान्पार्षदानर्चयेद्रवेः॥३१॥

इत्थं सिद्धे मनौ दद्याद्भानवेऽर्घ्यं च तद्दिने।
प्राणायामं षडङ्गं च कृत्वा न्यासान्पुरोदितान्॥३२॥

स्वमण्डले यजेदर्कं मानसैरुपचारकैः।
सुताम्रघटितं प्रस्थतोयग्राहिमनोहरम्॥३३॥

मण्डले स्थापयेत्पात्रं रक्तचन्दनचर्चितम्।
विलोमां मातृकां मूलं विलोमं च पठेज्जलैः॥३४॥

रविमण्डलनिर्गच्छत्सुधाबुद्धिविभावितैः।
त्रयोदशैव वस्तूनि प्रक्षिपेन्मूलमुच्चरन्॥३५॥

तिलतण्डुलदर्भाग्रशालिश्यामाकराजिका।
हयारिकुसुमं रक्तं चन्दनं रक्तचन्दनम्॥३६॥

गोरोचनं कुंकुमं च जयां वेणुयवानिति।
तज्जले पीठमभ्यर्च्य बाह्यभानुं स्वमण्डलात्॥३७॥

अखिलैरुपचारैस्तं पूजयेदाबृतीरपि।
प्राणायामत्रयं कृत्वा षडङ्गन्यासमाचरेत्॥३८॥

चन्दनेन सुधाबीजं दक्षे करातले न्यसेत्।
आच्छादयेदर्घ्यपात्रं वामाक्रान्तेन तेन च॥३९॥

अष्टोत्तरशतावृत्त्या मूलेनाम्भोभिमन्त्रयेत्।
पुनः पञ्चोपचारैस्तं पूजयेन्मूलमन्त्रतः॥४०॥

पाणिभ्यां पात्रमादाय जानुनी भूतले न्यसेत्।
आमूर्धं पात्रमुद्धृत्य दृष्टिं चाधायामण्डले॥४१॥

मनसा पूजयेत्तत्र भानुमावारणान्वितम्।
अर्घ्यं दद्याद्रविं ध्यायन्रक्तचन्दनमण्डले॥४२॥

ततः पुष्पञ्जलिं दद्यान्मण्डलस्थाय भानवे।
अष्टोत्तरशतं मूलं जपेदासनसंस्थितः॥४३॥

प्रत्यर्कं प्रातरेवं यो दद्यादर्घ्यं विवस्वते।
लक्ष्मी यशः सुतान्विद्यामैश्वर्यं सोऽधिगच्छति॥४४॥

गायत्र्युपासनासक्तः सन्ध्यावन्दनतत्परः।
दशवर्णं जपन्विप्रो नैव दुःखमवाप्नुयात्॥४५॥

मंगलमन्त्रः॥

अथ वच्मि धरासूनुमन्त्रं सुतधनप्रदं।
तारो वियद्दीर्घबिन्दुयुक्तं चन्द्रांकितं पुनः॥१॥

भृगुविंसर्गीचण्डोशौ क्रमाद्रात्रीशसर्गिणौ।
षड्वर्णो मनुराख्यातोऽभीष्टदायी ऋणापहः॥२॥

मुनिर्विरूपा गायत्री छन्दो देवो धरात्मजः।
षड्भिर्कर्णैःषडङ्गानि मनोःकुर्वीत साधकः॥३॥

जपाभं शिवस्वेदजं हस्तपद्मे
गदाशूलशक्तीर्वरं धारयान्तम्।
अवन्तीसमुत्थं सुमेषासनस्थं
धरानन्दनं रक्तवस्त्रं समीडे॥४॥

रसलक्षं जपो होमःसमिद्भिःखदिरस्य च।
शैवे पीठे यजेद्भौमं प्रागङ्गानि प्रपूजयेत्॥५॥

एकविंशतिकोष्ठेषु मङ्गलादीन्प्रपूजयेत्
तद्बहिःककुभां नाथान्कुलिशादींस्ततोऽर्चयेत्॥६॥

इत्थं जपादिभिः सिद्धं स्वेष्टसिद्धौ प्रयोजयेत्।

नारीपुत्रमभीप्सन्ती भौमाहे तद्व्रतं चरेत्।।७।।
मार्गशीर्षेऽथ वैशाखे तस्यारम्भः प्रशस्यते।
अरुणोदयवेलायामुत्थाय शुचिविग्रहा।।८।।
दन्तान्धावेरपामार्गसमिधा मौनसेविनी।
नद्यादिसलिले स्नान्वा धारयेद्रक्तवाससी।।९।।
बैवेद्यकुसुमालेपान्रक्तान्सम्पाद्य संयता।
विधिज्ञं विप्रमाहूय भौममर्चेत्तदाज्ञया।।१०।।
रक्तगोगोमयालिप्तंदेशे पीठनिषेविणी।
मग्ङलादोनि नामानि स्वप्रतीकेषु विन्यसेत्।।११।।
मण्डलं विन्यसेदंघ्र्योर्भूमिपुत्रं तु जानुनोः।
ऊर्ध्वोश्च ऋणहर्तारं कटिदेशे धनप्रदम्।।१२।।
स्थिरासनं गुह्यदेशे महाकायमथोरसि।
वामबाहौ ततो न्यस्येत्सर्वकर्माविरोधकम्।।१३।।
लोहितं दक्षिणे बाहौ लोहिताक्षं गले न्यसेत्।
वदने विन्यसेत्साध्वीं सामगानं कृपाकरम्।।१४।।
धरात्मजं नसोरक्ष्णोः कुजं भौमं ललाटतः।
भूतिदं तु भ्रूवोर्मध्ये मस्तके भूमिनन्दनम्।।१५।।
अङ्गारकं शिखादेशे सर्वाङ्गे विन्यसेद्यमम्।
ततो बाहुद्वये न्यस्येत्सर्वरोगापहारकम्।।१६।।
मूर्द्धादिपादपर्यन्तं वृष्टिकर्तारमङ्गके।
विन्यसेद् वृष्टिहर्तारं मूर्धान्तं चरणादितः।।१७।।
दिक्षु प्रविन्यसेदंत्यं सर्वकामफलप्रदम्।
आरं वक्रं भूमिजं च नाभौ वक्षसि मूर्द्धनि।।१८।।
एवं न्यस्तशरीरोऽसौ ध्यायेद्धरणिनन्दनम्।
अर्धं संस्थाप्य विधिवत्पूजयेदुपचारकैः।।१९।।
एकविंशतिकोष्ठाढ्ये त्रिकोणे ताम्रपात्रगे।
आवाह्य धरणीपुत्रं शोणैः पुष्पैश्च चन्दनैः।।२०।।
अङ्गानि पूजयेत्प्राग्वदेकविंशतिकोष्ठके।
मण्डलांदींस्त्रिकोणेषु वक्रमारं च भूमिजम्।।२१।।
ब्राह्म्याद्या मातृका बाह्ये शक्रादीनायुधान्यपि।
धूपदीपौ विधायाथ गोधूमान्नं निवेदयेत्।।२२।।
जलपूर्णे ताम्रपात्रे गन्धपुष्पाक्षतान्विते।
फलं निधाय मन्त्राम्यां भौमायार्घ्यं निवेदयेत्।।२३।।
भूमिपुत्र महातेजः स्वेदोद्भवपिनाकिनः।
सुतार्थिनि प्रपन्ना त्वां गृहाणार्घ्यं नमोऽस्तुते।।२४।।
सक्तप्रवालसङ्काशजपाकुसुमसन्निभ।
महीसुतमहाबाहो गृहाणार्घ्यं नमोस्तुते।।२५।।
एकविंशतिकृत्वोथ प्रणमेत्पूर्वनामभिः।
प्रदक्षिणा विधातव्यास्तावत्यो वसुधात्मजे।।२६।।
खदिराङ्गारके नाथ कुर्याद्रेखात्रिकं समम्।
वामपादेन मन्त्राभ्यामेताभ्यां तत्प्रमार्जयेत्।।२७।।
दुःखदौर्भाग्यनाशाय पुत्रसन्तानहेतवे।

कृतरेखात्रयं वामपादेनैतत्प्रमार्ज्यहम्।।२९।।
ऋणदुःखविनाशाय मनोभीष्टार्थसिद्धये।
मार्जयाम्यासिता रेखास्तिस्रो जन्मत्रयोद्भवाः।।३०।।

ततःपुष्पाञ्जलिकरा स्तुवीत धरणीसुतम्।
ध्यायान्ती चरणाम्भोजं पूजासाङ्गत्वसिद्धये।।३१।।

धरणीगर्भसम्भूतं विद्युत्तेजसमप्रभम्।
कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम्।।३२।।

ऋणहर्त्रे नमस्तुभ्यं दुःखदारिद्र्यनाशिने।
नभसि द्योतमानाय सर्वकल्याणकारिणे।।३३।।

देवदानवगन्धर्वयक्षराक्षसपन्नगाः।
सुखं यान्ति यतस्तस्मै नमो धरणिसूनवे।।३४।।

यो वक्रगतिमापन्नो नृणां दुःखं प्रयच्छति।
पूजितः सुखसौभाग्यं तस्मै क्ष्मासूनवे नमः।।३५।।

प्रसादं कुरु मे नाथ मङ्गलप्रद मङ्गल।
मेषवाहन रुद्रात्मन्पुत्रान्देहि धनं यशः।।३६।।

एवं संस्तूय सम्पूज्य गृहणीयाद् ब्राह्मणाशिषः।
गुरवे दक्षिणां दत्त्वा भुञ्जीतान्नं निवेदितम्।।३७।।

प्रतिभौमदिने कुर्यादेवं संम्वत्सरावधि।
तिलैः संजुहुयाद्धोमं शतार्द्धं भोजयेद्द्विजान्।।३८।।

माहेयमूर्तिं सौवर्णीमाचार्याय निवेदयेत्।
मण्डलस्थे घटेऽश्यर्च्य सुतसौभाग्यसिद्धये।।३९।।

एवं व्रतपरा नारी प्राप्नुयास्तुभगात्सुतान्।
धन्याप्त्यै ऋणनाशाय व्रतं कुर्यात्पुमानपि।।४०।।

अग्निर्मूर्द्धेत्यपि मनुं वैदिकं ब्रह्मणो जपेत्।
तथाङ्गाराकगायत्रीं सर्वाभीष्टस्य सिद्धये।।४१।।

अङ्गारकाय शब्दान्ते विद्महे पदमुच्चरेत्।
शक्तिहस्ताय च पदं धीमहीति ततो वदेत्।।४२।।

तन्नो भोमःप्रचोवर्णान्दयादिति च कीर्तयेत्।
एषाङ्गारकगायत्री जप्ताभीष्टप्रदायिनी।।४३।।

गुरुमन्त्रः।।

माहेयोपासनं प्रोक्तं गुरुमन्त्र उदीर्यते।
खङ्गीशौभारभूतिस्थौ तत्राद्यः क्रूरसंयुतः।।१।।

नभोभृगुर्लेहितस्थोहरिर्वायुर्भगान्वितः।
हृदयान्तोऽष्टवर्णोऽयं मनुर्ब्रह्मा मुनिःस्मृतः।।२।।

रत्नाष्टापदवस्त्रराशिममलं दक्षात्किरन्तं-
करादासीनं विपणौ करं निदधतं रत्नादिराशौ
परम्।
पितालेपनपुष्पवस्त्रमखिलालङ्कारसम्भूषितं
विद्यासागरपारगं सुरुगुरुं वन्दे सुवर्णप्रभम्।।३।।

जपित्वाशीतिसाहस्त्रं हुत्वान्नेन घृतेन वा।
धर्माधर्मादिपीठे तं पूजयेदङ्गदिग्भवैः।।४।।

सिद्धे मनौ प्रकुर्वीत प्रयोगानिष्टसिद्धये।

हरिद्राकुंकुमैर्हुत्वा घृताक्तैर्दिवसत्रयम्।।५।।
सविंशतिशतं मन्त्रो वासांसि लभते मणीन्।
शत्रुरोगादिपीडासु स्वजने कलहोद्भवे।।६।।

शुक्रमन्त्रः।।

जुहुयात्पिप्पलोत्थाभिःसमिद्भिस्तन्निवृत्तये।
तारो वस्त्रं भगी सूर्ये देहि शुक्राय ठद्वयम्।।१।।

एकादशाक्षरो मन्त्रो हेमवस्त्रप्रदायकः।
ब्रह्मा मुनिर्विराटछन्दो देवतादैत्यपूजितः।।२।।

बीजं तारोऽग्निभार्या तु शक्तिरस्य प्रकीर्तिता।
एकद्विचन्द्रनेत्राग्निनेत्रवर्णैःषडङ्गकम्।
मन्त्रवर्णैस्तु कृत्वाथ ध्यायेद्विद्यानिधिं सितम्।।३।।

श्वेताम्भोजनिषण्णमापणतटे श्वेताम्बरालेपनं
नित्यं भक्तजनाय सम्प्रददतं वासोमणीन्हाटकम्।
वामेनैव करेण दक्षिणकरे व्याख्यानमुद्रांकितम्
शुक्रं दैत्यवरार्चितं स्मितमुखं वन्दे सिताङ्गप्रभम्।।४।।

अयुतं प्रजपेन्मन्त्रं दशांशं जुहुयाद्घृतैः।
यजेद्धर्मादिपीठे तमगेन्द्रादितदायुधैः।।५।।

सुगन्धैःश्वेतकुसुमैर्जुहुयाच्छुक्रवासरे।
एकविंशतिवारं यो लभते सोंशुकं मणीन्।।६।।

बालः पवनदीर्घेन्दुयुक्तौ झिण्टीशयुग्जलम्।
अत्रिर्व्यासाय हृदयं मनुरष्टाक्षरो मतः।।७।।

ब्रह्मानुष्टुम्मुनिश्छन्दो देवःसत्यवतीसुतः।
आद्यबीजं नमः शक्तिदीर्घाढ्यनादिनाङ्गकम्।।८।।

व्यासमन्त्रः।।

व्याख्यामुद्रिकया लसत्करतलं सद्योगपीठस्थितं
वामे जानुतले दधानमपरं हस्तं सुविद्यानिधिम्।
विप्रव्रातवृतं प्रसन्नमनसं पाथोरुहाङ्गद्युतिं
पाराशर्य्यमतीवपुण्यचरितं व्यासं स्मरेत्सिद्धये।।१।।

जपेदष्टसहस्राणि पायसैर्होममाचरेत्।
पूर्वेक्तपोठे व्यासस्य पूर्वमङ्गानि पूजयेत्।।४।।

प्राच्यादिषु यजेत्पैलं वैशम्पायनजैमिनी।
सुमन्तुं काणभागेषु श्रीशुकं रोमहर्षणम्।।३।।

उग्रश्रवसमन्यांश्चमुनीन्सेन्द्रादिकायुधान्।
एवं सिद्धमनुर्मन्त्री कवित्वं शोभनाःप्रजाः।।४।।

व्याख्यानशक्तिं कीर्तिं च लभते सम्पदां चयम्।
मृत्युञ्जयेन पठितं यो व्यासस्य मनुं जपेत्।।५।।

सर्वोपद्रवसंत्यक्तो लभते वांछितं फलम्।
तारःशूली वामकर्णबिन्दुयुक्तःससर्गसः।।६।।

मृत्युञ्जयस्य मन्त्रोऽयं त्रिवर्णो मृत्युनाशनः।
जप्तोऽयं केवलो नृणामिष्टसिद्धिं प्रयच्छति।
किंपुनस्तेन पुटितो वेदव्यासमनूत्तमः।।७।।

SŪRYA-KALPA

*The Vaikhānasa Āgama recognizes the worship of Sūrya and Nava-grahas as an important detail. The following excerpts have been taken from **Khilādhikāra** (Bhṛgu-prokta), Chapter 40, Sūrya-kalpa, and from **Kriyādhikāra** (Bhrgu-samhitā) Chapter-15, Surya-Kalpa, and Chapter 5, verses 143-189.*

श्रीवैखानसभगवच्छास्त्रे भुगुप्रोक्तः

सूर्यकल्पः

(खीलाधिकारे)

सूर्यस्य स्थापनं वक्ष्ये इहामुत्र फलप्रदम्।
पूर्वेक्तेन विधानेन कर्षणादीन् समाचरेत्॥१॥

विज्ञाय वास्तुशास्त्रोक्तं सूर्यसंस्थापनोचितम्।
विमानं विधिर्वत्कुर्याद्यथावित्तानुसारतः॥२॥

प्राङ्मुखं स्थापयेन्मुख्यमथवा दक्षिणामुखम्।
न कदापि रविं कुर्याद्दक्षिणोत्तरदिङ्मुखम्॥३॥

सूर्यबिम्बलक्षणम्

नवार्धतालमानेन कारयेत्प्रतिमां रवेः।
देवीभ्याञ्च समायुक्तं द्विपादं द्विभुजं विभुम्॥४॥

हस्तौ पद्मधरौ कुर्यात्स्थितं पद्मासने तथा।
कारयेन्मण्डलं मूर्ध्नि प्रवालसदृशप्रभम्॥५॥

सूर्यपरिवारः

पूजकौ च ऋषी चोमौ शैषिकं वाहनं तथा।
भूतस्थाने च भूतेशं कृत्वा स्थापनामाचरेत्॥६॥

ग्रामस्य यजमानस्य चानुकूले दिने शुभे।

प्रतिष्ठाप्रयोगः

अङ्कुरानर्पयित्वा तु पुर्वोक्तविधिना ततः॥७॥

प्रतिष्ठोक्तदिनात्पूर्वं सप्तमेऽह्न्यक्षिमोचनम्।
अङ्गहोमञ्च कृत्वा तु 'उदुत्यं चित्र' मित्यपि॥८॥

द्वाभ्यां तदुक्तमन्त्राम्यां कारयेदक्षिमोचनम्।
अधिवासादिकं सर्वं विष्णोरिव समाचरेत्॥९॥

आग्नेय्यां प्रमुखे वाथ यज्ञशालां प्रकल्पयेत्।
तत्र चाहवनियादींश्चतुरोऽग्नीन् प्रकल्पयेत्॥१०॥

चतुर्ष्वपि च कोणेषु कुर्यादौपासनानलान्।
मध्ये शयनवेदिं च यथाविधि प्रकल्पयेत्॥११॥

पूर्वेद्युरेव सायाह्ने भूमियज्ञं यजेत्क्रमात्।
कुम्भमादाय विधिवत् कुम्भपूजनमाचरेत्॥१२॥

निक्षिपेद्वर्णचिह्नानि तथोऽष्टौ मङ्गलानि च।
निक्षिपेन्नव रत्नानि कूर्चान् कुम्भजले ततः॥१३॥

वेष्टयेद्वस्त्रयुग्मेन पल्लवैरपि भूषयेत्।
आचार्यः सुप्रसन्नात्मा त्रयीमयमनामयम्॥१४॥

विश्वबोधात्मकं ध्यात्वा भानुमावाहयेज्जले।
अधिवासैस्सुसंकृत्य बेरं तद्भास्करस्य वै॥१५॥

संस्नाप्य सप्तकलशैः वासोभिः परिधाय च।
रक्तवर्णैः शालिधान्यास्तीर्य शयानमण्डपे॥१६॥

क्षिप्त्वा तु निम्बफलकां अण्डजादीनि पञ्च वै।
शयनानि समास्तीर्य संस्थाप्य शयने रविम्॥१७॥

बन्धीयात्कौतुकं पश्चाच्छाययेद्विधिना प्रभुम्।
रक्तवस्त्रेण चाच्छाद्य पश्चात् कर्म समाचरेत्॥१८॥

आचम्य होता शुद्धात्मा कूर्चहस्तस्समाहितः।
अन्वाहार्यस्य पुरतः स्थित्वा हौत्रं समुच्चरेत्॥१९॥

अध्वर्युरावाह्य देवं परिवारैस्सहैव तु।
जुष्टाकारेण निर्वाप्य जुहुयादाहुतीः क्रमात्॥२०॥

जुहुयाद्याहुतीः पश्चात् गायत्र्या भास्करस्य च।

सहस्राहुतिः

'भास्करायाथ सूर्याय मार्ताण्डाय विवस्वते॥२१॥

त्रिलेकमण्डनायाथ तमोघ्नाय विवस्वते।
सर्वात्मने भगवते त्रिधाम्ने चण्डरोचिषे॥२२॥

त्रिगुणेशाय रुचये ज्योतिष्मत' इतीरयन्।
एतैस्सहस्रशो हुत्वा परिस्तीर्य च वै पुनः॥२३॥

होममन्त्राः

'मित्रस्य चर्षणी'ति त्रीन् त्रीन् मन्त्रा'नुद्वयादि' कान्।
'यच्चिद्धी'ति च मनून् पञ्च जुहुयात्क्रमाविद्गुरुः॥२४॥

हुत्वा चैवं प्रधानाग्नौ सर्वेष्वग्निषु वै पृथक्।
'मित्रस्य चर्षणी' त्यादीन् षण्मन्त्रान् जुहुयात्तथा॥२५॥

अर्कापामार्गपालाशसमिद्भिश्च ततः परम्।
जुहुयात्पौरुषं सूक्तं सर्वेष्वग्निषु वैष्णवम्॥२६॥

जुहुयाल्लोकपालानां मन्त्रैस्सर्वेषु चाग्निषु।
मिन्दाहुती तथा हुत्वोपरीष्टात्तन्त्रमाचरेत्॥१७॥

सर्वदेवार्चनम्

आवाहयेत्तत्र देवान् सर्वदेवार्चनाविधौ।
भास्करं मध्यमेऽभ्यर्च्य दक्षिणे च सुवर्चलाम्॥२८॥

वामे वै रेणुकां देवीं पार्श्वयोस्तु समर्चयेत्।
स्थूलदण्डं शङ्खपालं पूजकौ दक्षकामयोः॥२९॥

द्वारदेवांश्च पूर्वोक्तान् सन्ध्ये द्वे द्वारपालिके।
गायत्रिञ्चैव सावित्रीं द्वितीये द्वारि चार्चयेत्।।३०।।

अरुणञ्चानुजस्थाने तपनं शैषिकालये।
न्यक्षादीन् लोकपालांश्च हरेरिव समर्चयेत्।।३१।।

तृतीयेऽभ्यन्तरद्वारे वसूनष्टौ समर्चयेत्।
शक्राग्न्योर्मध्यमे स्थाने आदित्यान् पचने तथा।।३२।।

एकादश तथा रुद्रान् यामाग्न्योर्मध्यमेऽर्चयेत्।
यमनैर्ऋतयोर्मध्ये ग्रहान् नव समर्चयेत्।।३३।।

नीलवारुणयोर्मध्ये पर्जन्यं श्याममर्चयेत्।
वरुणानिलयोर्मध्ये नलिनीं सम्यगर्चयेत्।।३४।।

कुबेरानिलयोर्मध्ये ध्रुवं सप्त ऋषींस्तथा।
सोमशैषिकयोर्मध्ये अश्विनौ सम्प्रपूजयेत्।।३५।।

तथेन्द्रेशानयोर्मध्ये पञ्च भूतानि चार्चयेत्।
पृष्ठतश्चारुणस्यापि स्यन्दनाश्वान् समर्चयेत्।।३६।।

भूतस्थाने तु भूतेशमेवं देवांन्समर्चयेत्।
वैदाध्ययानगानाद्यैः रात्रिशेषं नयेत्क्रमात्।।३७।।

प्रतिष्ठा

प्रभाते तु विशुद्धात्मा यजमानयुतो गुरुः।
स्नात्वा स्नानविधानेन रत्नन्यासं समाचरेत्।।३८।।

श्वभ्रे तत्रोत्तरे रौक्मप्रतिमां स्थापयेद्रवेः।
मुहूर्ते समनुप्राप्ते स्थापकैस्सहितो गुरुः।।३९।।

कुम्भं बिम्बं समादाय स्वस्तिसूक्तसमन्वितम्।
देवागारं परीत्यैव प्राणस्थानं प्रविश्य च।।४०।।

स्थापकैस्सहितो देवं देवीभ्यां स्थापयेत्प्रभुम्।
कुम्भस्थां शक्तिमादाय बिम्बे चावाहयेद्गुरुः।।४१।।

अनुक्तमत्र यत्सर्वं हरेरिव समाचरेत्।

देवीभ्यां रहितं देवं केचिदिच्छन्ति स्थापितुम्॥४२॥

नित्यार्चनविधिः

अतः परं प्रवक्ष्यामि नित्यपूजाविधिं रवेः।
स्नात्वा सम्यग्विशुद्धात्मा आदित्यं सम्प्रणम्य च॥४३॥

'उदुत्यं जातवेदे'ति कुर्यात्स्थानप्रदक्षिणम्।
द्वारपालान् नमस्कृत्य कवाटोघ्दाटनं चरेत्॥४४॥

ततोऽभ्यन्तरमाविश्य प्रणमेज्ज्योतिषां पतिम्।
शुद्धमाधावमादाय समुत्पूय विनिक्षिपेत्॥४५॥

सम्माज्यभ्युिक्ष्य तोयेन निर्माल्यं संव्यपोह्य च।
'तपनं सूर्यदासञ्च तथा लोकप्रवर्तकम्॥४६॥

विघ्नहन्तार' मित्युक्त्वा शैषिकन्तु प्रपूजयेत्।
भास्करं सूर्यगायत्र्या स्नापयेद्गन्धवारिणा॥४७॥

'आया' त्विति समुच्चार्य पश्चादावाहनं चरेत्।
'एकाक्षरादि'ना चैव दद्यात्पुष्पैरथाऽसनम्॥४८॥

'वितत्य बाण' मित्युक्त्वा 'त्वमग्ने रुद्रं' इत्यपि।
स्वागतञ्चानुमानञ्च उपचारौ समर्पयेत्॥४९॥

'उद्वयं तमस' इत्युक्त्वा पाद्यं दद्यात्ततः परम्।
हस्ते दद्यादाचमनं 'हिरण्यवर्णां' समुच्चरन्॥५०॥

'पवित्रन्त' इति मन्त्रेण मूर्न्धि पुष्पाणि निक्षिपेत्।
'अप्सरस्सु - इमे धूपा' इति गन्धञ्च धूपकम्॥५१॥

'प्रवश्शुक्रा' येति दीपमर्घ्यमाचमनं ततः।
सर्वान् शेषोपचारांश्च विष्णोरिव समाचरेत्॥

चतुर्मूर्तिप्रकारः

'आदित्यं भास्करं सूर्यं मार्ताण्डञ्चेत्यतः परम्।
विवस्वन्त' मिति प्रोक्ताः मूर्तयः पञ्च वै रवेः॥५३॥

'सुवर्चलामुषाञ्चेति श्यामलां सुप्रभा' मिति।
अर्चयेद्दक्षिणे देवीं सूर्यार्धाङ्गीं सुवर्चलाम्॥५४॥
'रंणुकां रक्तवर्णाञ्च तथा चैव रविस्त्रियाम्।
श्वेतवस्त्रा' मिति वदान् रेणुकां वामतोऽर्चयेत्॥५५॥
'स्थूलदण्डं महानादं प्रवालाभं शुचिं' तथा।
'शङ्खपालं शङ्खनिभं कूर्चहस्तं जटाधरम्'॥५६॥
स्थूलदण्डं शङ्खपालं दक्षिणोत्तरपर्श्वयोः।
पूजकौ द्वौ समभ्यर्च्य द्वारे द्वारे हरेरिव॥५७॥
धात्रादीन् षड् द्वारदेवान् यथापूर्वं समर्चयेत्।
'प्राचीं सन्ध्यां तथा रक्तां
विश्वबोधां' इतीरयान्॥५८॥
प्राक्सन्ध्यां दक्षिणे चैव
तथा वामे 'जगद्धिताम्।
जगत्पूज्यां - धूम्रवर्णां -
तथा चैव निशामुखीम्'॥५९॥
इत्युक्त्वा पूजयेद्वामे देवीं सन्ध्यान्तु पश्चिमाम्।
'गायत्रीं पावनीं जप्यां वेदगर्भा' मुदीरयन्॥६०॥
गायत्रीं दक्षिणद्वारे सावित्रीं वेदमातरम्।
ब्रह्मपत्नी जगत्प्रियामिति द्वारे च वामके॥६१॥
गायत्रीञ्चैव सावित्रीमर्चयेत्पालिके उभै।
वामपार्श्वे मुनिं विद्वान् द्वितीयद्वारि चार्चयेत्॥६२॥
सोपानमध्ये 'सप्ताश्वान् - शुक्लवर्णान् - महाजवान्।
तथा रत्नखुरां' श्चेति सप्ताश्वान् सम्यगर्चयेत्॥६३॥
'उरुणं रश्मिहस्तञ्च काश्यपं सूर्यसारथिम्'।
अनुजस्थान आसीनं विश्रान्तं सम्यगर्चयेत्॥६४॥
तपनं शौषिकस्थाने उक्तैर्मन्त्रैस्समर्चयेत्।
न्यक्षादीन् लोकपालांश्च हरेरिव समर्चयेत्॥६५॥
तृतीये द्वारि पालांस्तु वसूनष्टौ समर्चयेत्।
'धरो ध्रुवश्च सोमश्च आपश्चेति तु दक्षिणे॥६६॥
अनिलश्चानलश्चैव प्रत्यूषश्च प्रभासकः'।
वामे चाभ्यर्चयेत्पश्चात् 'भूतनाथं वहिर्मुखम्॥६७॥
महोदरं महाभूत' मिति भूताधिपार्चनम्।
रक्तपुष्पाणि पुण्यानि संगृह्य रविमर्चयेत्॥६८॥
जपापुष्पञ्च कनकं पुष्पं श्वेतं विवर्जयेत्।
वर्जयेत्कृष्णपुष्पाणि गृण्हीयान्नीलमुत्पलम्॥६९॥
गन्धद्रव्येषु सर्वेषु श्रेष्ठं स्याद्रक्तचन्दनम्।
रवेः प्रियं ताम्रपात्रं तथां मृण्मयभाजनम्॥७०॥
यदपेक्ष्यमनुक्तञ्च हरेरिव समाचरेत्।
जपेञ्च सूर्यगायत्रीमर्चनान्ते समाहितः॥७१॥

स्नपनविधिः

अतः परं प्रवक्ष्यामि स्नपनं भास्करस्य वै।
कुर्याद्द्वादशभिर्द्रव्यैरुपस्नानसमन्वितैः॥७२॥
स्नपनं हरिदश्वस्य विष्णोरिव समीरितम्।

श्वभ्रमध्ये प्रतिष्ठाप्य शालायां स्नपनालये।।७३।।

तण्डुलैर्व्रीहिभिर्वापि
पङ्क्तिं कुर्याद्यथोचिताम्।
पूर्वेक्तेन विधानेन
पङ्क्तेः कुर्यादलंक्रियाम्।।७४।।

पञ्चगव्यादिकलशान् संसाध्याभ्यर्चयेत्क्रमात्।
तपनं पूर्वमभ्यर्च्य पङ्क्तीशञ्च समर्चयेत्।।७५।।

सर्वेषां कलशानाञ्च सावित्र्योऽऽहरणं चरेत्।
हरेरुक्तैरेव मन्त्रैस्स्नापयेद्भास्करं बुधः।।७६।।

निवेदयेद्यथालाभं शुद्धान्नानि हवींषि च।
पानीयादींस्ततो दद्याद्दक्षिणाञ्च समन्त्रकम्।।७७।।

निवेदितं यदन्नादि तोयं तत्पूजकैर्जनैः।
सूर्योपासनसिद्धैश्च भोज्यं पूज्यं विशेषतः।।७८।।

बल्युत्सवादिकं सर्वं विष्णोरिव समाचरेत्।
यत्र सम्पूज्यते सूर्यस्सप्तविंशतिविग्रहैः।।७९।।

देवालये तु तद्वास्तु वासिनां भगवान् रविः।
आयुरारोग्यमैश्वरं सकलं सम्प्रयच्छति।।८०।।

(गायत्री भास्करस्यैवमुद्धृता परमर्षिभिः।
आदित्याय समुच्चार्य ततो विद्महे इत्यपि।
मार्तण्डायेति चोक्त्वा तु धिमहीति ततः परम्।
सूर्यः प्रचोदयादित्थं जपहोमादिषु स्मृता।
सूर्यबीजमिदं प्रोक्तं पूजकानां हिताय वै।

यान्तारूढन्तु जीवान्तं षष्ठस्वरविभूषितम्।
चतुर्दशेन सम्भिन्नं बिन्दुमस्तकशोभितम्।
सूर्यबीजमिति प्रोक्तं सर्वतन्त्रविशारदैः)

(गद्यम्।।) यान्तो हकारः तेनारूढः हकारेणारूढ इत्यर्थः। जीवान्तः जीवः प्राणः इह शास्त्रे

सकार इत्यर्थः। षष्ठस्वरसमन्वितः षष्ठेन स्वरेण संयुतः चतुर्दशेन सम्भिन्नः बिन्दुना शिरसि भूषितः। एवं भूतं सूर्यबीजमिति विजानीयात्।

सूर्यकल्पः

(क्रियाधिकारे)

यदीच्छेद्भास्करस्यापि गृहे नित्यं समर्चनम्।
'भास्करञ्च महादेवं कदम्बकुसुमप्रभम्॥१९॥

नवार्धतालमानेन द्विभुजं पद्मधारिणम्।
देवीभ्याञ्च समायुक्तं राशिभिः परिवारितम्॥२०॥

(स्वस्वपीठे प्रतिष्ठाप्य स्वस्वदेवीसमायुतम्)।
कारयित्वा यथान्यायमक्ष्युन्मेषादनन्तरम्॥२१॥
अधिवासादिकं कर्म हरेरिव समाचरेत्।
'उदुत्यं चित्र' मित्येवं मूलमन्त्रं प्रचक्षते॥२२॥

औपासनाग्निमाधाय कुण्डे वा स्थण्डिलेऽथ वा।
संसाध्य पूर्ववत्कुम्भं रक्तवस्त्रद्वयान्वितम्॥२३॥

आचार्यस्सुप्रसन्नात्मा त्रयीमयमनामयम्।
विश्वबोधात्मकं भानुं ध्यायन्नावाहयेज्जले॥२४॥

संस्नाप्य सप्तकलशैः बिम्बं कुम्भसमन्वितम्।
अग्नेरुत्तरपार्श्वे तु धान्यराशिं प्रकल्प्य च॥२५॥

सन्न्यस्य बिल्वफलकं वस्त्राण्यास्तीर्य पञ्च च।
बिम्बं तत्र सुविन्यस्य बद्ध्वा प्रतिसरं ततः॥२६॥

विधिना शयने धीमान् छादयेद्रक्तवाससा।
हौत्रं प्रशंस्य चावाह्य निरूप्याज्याहुतीर्यजेत्॥२७॥

जुहुयात् सूर्यगायत्र्या भावयन्मनसा रविम्।
'भास्कराय च सूर्याय मार्ताण्डाय विवास्वते॥२८॥

त्रिलोकमण्डनाये' ति तथा चैव 'त्रिमूर्तये'।
'सर्वात्मने नम' इति जुहुया'च्चण्डरोचिषे'॥२९॥

'त्रिगुणेश्वराय' पश्चाद्वै 'सर्वज्योतिष्मते' तथा।
सहस्रकृत्वः शतशो दशकृत्वेऽथवा यजेत्॥३०॥

मैत्रमन्त्रद्वयं हुत्वा 'उद्वयं तमस' स्तथा।
'उदुत्यं जातवेदे' ति 'चित्रं देवे' ति हूयताम्॥३१॥

'यच्चिद्धि' ति ततो हुत्वा (यत्किञ्चे' ति ततः परम्।
'कितवासे' ति हुत्वा तु 'इमम्मे वरुणे' त्यपि॥३२॥

अर्कापामार्गपालाशसमिद्भिश्चैव हूयताम्।
वैष्णवं पौरुषं सूक्तं लोकपालकदैवतम्॥३३॥

मिन्दाहुति ततो हुत्वा होमकर्म समाचरेत्।
शतमष्टोत्तरं देव्योर्नामभिश्च जुहोति वै॥३४॥

प्रातः स्नात्वा विधानेन रत्नादीन्त्सन्न्यसेत्क्रमात्।
पश्चिमाभिमुखं देवं स्थापयेत्प्राङ्मुखं तु वा॥३५॥

न स्थाप्यो भास्करः क्वापि दक्षिणोत्तरदिङ्मुखः।
कुम्भस्थां शक्तिमादाय बिम्बे चावाहयेद् गुरुः॥३६॥

अनुक्तमत्र यत्सर्वं हरेरिव समाचरेत्।
'उदुत्यं चित्र' मित्युक्त्वा प्रणण्य ज्योतिषां पतिम्॥३७॥

समन्त्राभ्युक्षणं कृत्वा निर्माल्यं संव्यपोह्य च।
स्वागतञ्चानुमानञ्च 'त्वमग्ने रुद्र' इत्यपि॥३८॥

'उद्वयं तमस' श्चैति पाद्यं दद्यात्ततः परम्।
दद्यादाचमनं हस्ते 'हिरण्यवर्णा' इति ब्रुवन्॥३९॥

'पवित्रं त' इति प्रोच्य मूर्ध्नि पुष्पं विनिक्षिपेत्।
'इमे गन्धा' दिना गन्धं धूपं मन्त्रेण धूपयेत्॥४०॥

'प्रवश्शुक्रे' ति दीपं च अर्घ्यं दद्यात्समन्त्रकम्।
दद्यादन्योपचारांश्च 'उदुत्यं चित्र' मित्यपि॥४१॥

गुरूपदेशसंसिद्धैः कल्पमन्त्रैरथापि वा।
आसनाद्युपचारैस्तु पूजयेदिति केचन॥४२॥

'सावित्र्या वाऽर्चयेन्नित्यमिति पूर्वजशासनम्।
एष एव विशेषस्स्यादन्यत्सर्वं हरेरिव॥४३॥

'सुवर्चलामुषां चेति श्यामलां सुप्रभा' मिति।
सुवर्चलां दक्षिणेऽथ 'रेणुकां रक्तवर्णिनीम्'॥४४॥

प्रत्यूषां श्वेतवस्त्रामीत्यर्चेद्वामे च रेणुकाम्॥

मण्डलान्तर्गतं देवं कौस्तुभं कुसुमप्रभं
कारयेत्सकलं रवेः।

निम्बफलकं

ज्योतिस्त्रिमूर्तये

चित्राभासेऽर्चयेन्नित्यम्॥

इन्द्रादयो लोकपाला:

(From Adhyāya 5)

इन्द्रस्सस्यनिभः श्यामो द्विभुजः कुलिशायुधः।।१४३।।

शचीशः पीतवस्त्रश्च ज्येष्ठाजः श्रावणे तथा।
किरीटी मकुटी दण्डी चासीनश्चेन्निरायुधः।।१४४।।

कृत्तिकास्वनले जातो मार्गशीर्षे तु मासि वै।
किञ्जल्कपुञ्जसदृशो लोहिताक्षोऽजवाहनः।।१४५।।

देव्यौ स्वाहा स्वधा प्रोक्तौ शक्तिरायुधमस्य वै।
फाल्गुने भरणीजातो यमो नीलोत्पलप्रभः।।१४६।।

सत्यव्रतापतिर्दण्डी पाशी महिषवाहनः।
आरमभाधिप्रतिस्तैष्ये मूलजो भञ्जनीपतिः।।१४७।।

शार्दूलवाहनश्चैव शूलपाणिस्त्रिलोचनः।
चैत्रे शतभिषग्जातो वरुणो नीलवर्णकः।।१४८।।

दण्डपाशकरो रक्ताम्बरो द्विरदवाहनः।
कनकोशस्सिंहकेतुः प्रतिच्यं प्राङ्मुखः
स्थितः॥१४९॥

वायुः स्वच्छाम्बुसङ्काशश्शूलपाणिश्च खड्गधृत्।
स्वातिजः कार्तिके मासि देवी तस्याञ्जना
मता॥१५०॥

पीताम्बरधरो वीरः कृष्णसाररथध्वजः।
कुबेरो दण्डपाणिस्तु संहसरथवाहनः॥१५१॥

त्रिपाद्यवनलानाथः श्रविष्ठाजश्च कार्तिके।
श्यामो रक्ताम्बरधर उदीच्यां दक्षिणामुखः॥१५२॥

आर्द्रायां मार्गशीर्षे तु जात ईशान उच्यते।
पाटलीकुसुमाभस्तु वृषभध्वजवाहनः॥१५३॥

त्रिलोचनोऽम्बिकानाथः शूलपाणिश्च चर्मधृत्।

सूर्यः

मार्ताण्डः पद्महस्तश्च पृष्ठे मण्डलसंयुतः॥१५४॥

चतुर्बाहुर्द्विबाहुर्वा पलाशकुसुमप्रभः।
श्रावणे हस्तजो देव्यौ रेणुका च सुवर्चला॥१५५॥

सप्तसप्तिसमायुक्तरथो वाहनमुच्यते।
अनूरुस्सारथिस्सर्पो ध्वजस्तुरग एव वा॥१५६॥

विष्वक्सेनः

शान्तस्सोमेशयोर्मध्ये ह्यासीनो दक्षिणामुखः।
श्रीवत्सं ब्रह्मसूत्रं च विना सर्वं हरेरिव॥१५७॥

प्रलम्बसूत्रम्

प्रलम्बासुरसङ्गामे ह्युपवीतं तु शार्ङ्गिणः।
तदायुधपरिच्छिन्नमेकं सूत्रं प्रलम्बितम्॥१५८॥

तदभ्यर्थनया तच्च तथैव धृतमेव हि।

लम्बयज्ञोपवितित्वं ततः प्रभृति शार्ङ्गिणः।।१५९।।

तदसाधारणं नाम लोकेऽस्मिन् प्रथितं पृथु।
तत्सूत्रं लम्बितं छेदाद्गत्वाऽधो दक्षिणस्तनात्।।१६०।।

वामांसात्सव्यगुल्फान्तं लम्बितं तनुमध्यतः।
तद्ब्रह्मसूत्रमित्युक्तं तदासाधारणं हरेः।।१६१।।

आकुञ्च्य दक्षिणं पादं वामं पादं प्रसार्य च।
जयाया सार्धमासीनः पुष्पहस्तोऽग्निसन्निभः।।१६२।।

गदाशक्तिकरो वाऽथ पूज्यः स्थानाभिवृद्धये।
चतुर्भुजो यदि गदाशक्ती शङ्खं सुदर्शनम्।।१६३।।

सस्यश्यामनिमौ देव्यौ कुर्यादन्यच्च पूर्ववत्।
पूर्वाषाढासमुद्भूतो मासि भाद्रपते तथा।।१६४।।

ध्रुवकौतुकसंयुक्तमुत्तमं परिचक्षते।
मध्यमं चैकबेरं स्यादधमं पीठपूजनम्।।१६५।।

ग्रामस्य यजमानस्य चानुकुलप्रमाणतः।
विष्वक्सेनं प्रकुर्वीत मूलबेरवशात्तु वा।।१६६।।

आयादयो न द्रष्टव्या मूलवरबशाद्यदि।

गरुत्मान्

गरुडो वेदमूर्तिस्तु तप्तहाटकसन्निभः।।१६७।।

शुकपिञ्छाम्बरधरो झल्लरीमेखलायुतः।
किङ्किणीजालसंयुक्तः कुण्डलाङ्गदहारधृत्।।१६८।।

छन्नवीरोत्तराबद्धः कौबेरमकुटोज्वलः।
तैष्ये स्वातिदिने जातः तथा श्वसनवाहनः।।१६९।।

त्रिवृत्तस्य शिरस्साम गायत्रं चक्षुरेव च।
आत्मा स्तोमाह्वयं साम वामदेव्यं तनुस्तथा।।१७०।।
बृहद्रथन्तरे पक्षौ यज्ञायज्ञियपुच्छकः।

छन्दांस्यङ्गानि वै तस्य यजूंषि च शफाः स्मृताः॥१७१॥

एवं ध्यात्वाऽर्चयेद्वीशं वाहनानाञ्च वृद्धये।

वक्रतुण्डः

प्रवालाभश्चतुर्बाहुरेकदंष्ट्रे गजाननः॥१७२॥

चैत्रे मासे श्रविष्ठाजः कदलीमोदकेक्षुधृत्।

अनन्तः।

दक्षिणे गोपुराद्बाह्ये वामेऽनन्तस्सितप्रभः॥१७३॥

आश्रेषाजश्च वैशाखे द्विबाहुश्च सुरापतिः।
फणामण्डलमध्यस्थः प्राञ्जलिर्भुजगाधिपः॥१७४॥

भौमः

शक्तिपाणिस्तथा भौमः कदम्बकुसुमप्रभः।
देवी च कुमुदा तस्य वराहो वाहनं तथा॥१७५॥

पूर्वाषाढासमुद्भूतो ज्येष्ठमासे कुजस्तथा।

शनैश्चरः

सौरिं कृष्णानिभं कुर्यात् कुशचीराम्बरं तथा॥१७६॥

माघमासे तु रेवत्यां जातं नीलोत्पलप्रभम्।
स्यन्दनं वाहनं तस्य वराहध्वजसंयुतम्॥१७७॥

बृहस्पतिः

कुर्याद्बृहस्पतिं पीतं कदलीवनमध्यगम्।
कुशध्वजं हंसरथं पुष्पश्यामाम्बरोज्ज्वलम्॥१७८॥

आषाढे तिष्यसम्भूतं तारां देवीं च तस्य वै।

बुधः

बुधं सस्यनिभं कुर्याच्छरबाणासनान्वितम्॥१७९॥

सिद्धादेवीसमायुक्तं वामदेवाश्ववाहनम्।
श्रावणे च श्रविष्ठाजं दर्पणध्वजमेव च॥१८०॥

शुक्रः

शुक्रो रजतवर्णश्च जटाभृद्वल्कलाम्बरः।
जयाधीशोऽम्बुदरथो माघमासे तु भाग्यजः॥१८१॥

जाह्नवी

जाह्नवीं श्वेतरक्ताभां पीतवस्त्रां तथैव च।
विभज्यैकदलं हस्तैनाजिघ्रन्तीं सिताम्बुजम्॥१८२॥

अश्वयुङ्मासि रेवत्यां संजातां लोहितध्वजाम्।
सर्वभरणसंयुक्तां गङ्गां कुर्याद्विचक्षणः॥१८३॥

चन्द्रः

आत्रेयं हरिवत्कुर्यात्सितमण्डलमध्यगम्।
तत्र रुक्मनिभं श्वेतमिश्रमावार्तकं भवेत्॥१८४॥

राजानं द्विभुजं कुर्याद्रोहिणीवल्लभं तथा।
चैत्रे मृगशिरोजातं साश्वस्यन्दनवाहनम्॥१८५॥

श्रीः

पद्मपीठे समासीनां मण्डले चोर्ध्वकर्णिके।
ततप्रसृतके दिव्ये बाह्वोः धृतकुशेशयाम्॥१८६॥

शातकुम्भमयैः कुम्भैर्दिग्गजैरभीषेचिताम्।

क्रीडन्ती विष्णुना वाऽपि श्रीदेवीं कारयेद्बुधः॥१८७॥

सप्तरोहिण्यः

मयूरवाहा रोहिण्यः कृकलासध्वजप्रियाः।
पुष्पाम्बराः पुष्पहस्ताः शुक्लकञ्चुकसंयुताः॥१८८॥

रोहिणीसम्भवास्तैष्ये नित्यं लोकप्रसादकाः।

धात्री

कुर्याद्धात्रीं महारौद्रीं दंष्ट्राश्यामप्यलङ्कृताम्॥१८९॥

बालमौल्युत्तरासङ्गां सत्रिशूलाञ्च षड्भुजाम्।
रक्तोग्रनयानापाङ्गां भ्रूभङ्गविकटेक्षणाम्॥१९०॥

नरस्त्रीणामिव तनुमतिरौद्रीं समाचरेत्।

GRAHA-ŚĀNTI

Vaikhānasa-gṛhya-Sūtra contains an elaborate account of the pacification of the grahas (Khaṇḍas 13 and 14 of the First Praśna). The text is given here with the commentary of Śrinivāsa-makhin, known as *Sūtra tātparya-chintāmaṇi.* This text also provides interesting and informative details concerning the Sandhyā ritual which is the standard worship of Sūrya as the chief of the grahas (Khaṇḍas 3 and 4, of the First Praśna). This also has been reproduced here. The text has been reproduced here. The text has been edited by R. Pārthasarathi-bhāṭṭachārya in two volumes and published by Śrī Tirumala-Tirupati Devasthanams, (1967)

अथ ग्रहशान्तिं व्याख्यास्यामः।।१।।

अथेति। ग्रहकृतदोषशमनार्थं शान्तिं व्याख्यास्यामः।

ग्रहायत्ता लोकयात्रा।।२।।

तस्मादात्मविरुद्धे प्राप्ते ग्रहान् सम्यक् पूजयति।।३।।

ग्रहायत्तेत्यादि।

ग्रहायत्ता नरेंद्राणामुच्छ्रायाः पतनानि च।

ग्रहा गावो नरेन्द्राश्च ब्राह्मणाश्च विशेषताः।।

पूजिताः पूजयन्त्येनं निर्दहन्त्यवमानिताः।।

इति वचनात् ग्रहायत्ता लोकयात्रा। लोकयात्रा-लोकप्रवृत्तिः ग्रहाधीना।

तस्मादित्यादि। आत्मविरुद्धे-जन्मर्क्षादिषु स्थितेषु ग्रहेषु। तान् सम्यक् पूजयति।

आदित्यश्चन्द्रोंगारको बुधो बृहस्पतिः शुक्रः शनैश्चरो राहुः केतुश्चेत्येत् नवग्रहाः।।४।।

स्पष्टम्।

रक्तसितातिरक्तश्यामपीतसितासितकृष्णाधूम्रवर्णाः।।५।।

अनलाप्पतिगुहहरीन्द्रशचीप्रजापतिशेषयमाधिदेवत्याः।।६।।

मध्याग्नेयदक्षिणैशान्योत्तरपूर्वपश्चिमनैर्ऋतवायव्याश्रिताः।।७।।

तस्मात् शुद्धे देशे मनोरमे गोमयेनोपलिप्ते स्वे स्वे स्थाने शालिव्रीहिभिः सिकताभिर्वा चतुरश्रं वृत्तं तुट्याकारं त्रिकोणमष्टाश्रमर्धचन्द्राकारं वज्राकारं दंडाकृति ध्वजाकृतीति क्रमेण पीठान्युपकल्प्य तेषु कूर्चं निधाय तद्दक्षिणपार्श्वे तदधिदेवतामुद्दिश्य पीठान्युपकल्प्य आहवनीयान्वाहार्यगार्हपत्या वसत्थ्यसभ्यान् क्रमेणोपकल्प्य अग्निन् साधयित्वार्चयेत्।।८।।

तस्मादित्यादि। शुद्धे देशे। चतुर्दिशं चतुर्हस्तं गोचमेति प्रकीर्तितमिति परिमिते देशे। शालिव्रीहिभिः अलाभे सिकताभिर्वा प्रागुदक् चतुस्सूत्रैः नवपदं कृत्वा मध्ये चतुरश्रं आग्नेये वृत्तं दक्षिणे तुट्याकारं ऐशान्ये त्रिकोणं, उत्तरे अष्टाश्रं, पूर्वे अर्धचन्द्राकारं, पश्चिमे वज्राकारं, (यथा-दक्षिणोत्तरपार्श्वयोः अश्रिषट्कयुतं मूलाग्रयोः अश्रिद्वययुतमेवमष्टाश्रं

वज्राकारं अष्टाश्रिर्वज्र इति श्रुतिः,) नैऋते दण्डाकारं वायव्ये ध्वजाकारमेवमदित्यादीनां क्रमेण पीठानि प्रकल्पयेत्।

अथ शैनकः-

वेदिः प्रादेशमात्रा स्यात् पञ्चांगुलसमुन्नता।
तस्यामावाहयेद्देवान् नाम्ना व्याहृतिभिः क्रमात्॥
वज्रस्य दंडध्वजयोरर्धमात्रं हि विस्तरम्।
तदूर्णतंडुलैर्वापि कुर्यात्पीठानि यत्नतः॥ इति

तेषु प्रत्येकं कूर्चं दशांगुलमात्रं निधाय दक्षिणभागे तदधिदेवमुद्दिश्य अधिदेवार्थं तत्तदाकृतीनि तत्तत्प्रमाणानि पीठान्युपकल्पयेत्।

तथा प्रत्यधिदेवताश्च-

ईश्वरोमागुहा विष्णुः ब्रह्मा शक्रो यमस्तथा।
कलिंगश्चित्रप्तश्च ग्रहाणां देवताः क्रमात्॥
ग्रहाणामुत्तरे तेषां पीठान्यपि च कल्पयेत्॥

आहवनीयेत्यादि। अशाक्तस्य एककुंडे, अथ वा स्थंडिले। पंचाग्नि कुण्डपक्षे लौकिकाग्नावेव।
कुर्यात् श्रौतानि कर्माणि श्रौतेष्वेवाग्निषु त्रिषु।
गृह्ये गार्ह्याणि कर्माणि इतराणि तु पौरुषे॥
इति गौतमः। शान्तिकपौष्ठिकपुण्याहस्वस्त्ययनायुष्यंमगलसंयुक्तान्याभ्युदयिकानि संवपनाभिचारविषयवृद्धियुक्तानि लौकिकाग्नौ कुर्यादिति केचिदौपासनमिति।

स्मृतिः-

वैवाहिकाग्निः गृह्याग्निरावसत्थ्यस्तथैव च।
औपासनाग्निः शालाग्निश्चरितो विबुधैरिति॥
इति

शौनकः-

'यस्मिन् विवाहः क्रियेते सोग्निः गृह्य इति स्मृतः।
जातकर्मादिवृद्धिर्यर्थं यो व्याहृतीभिराहृतः॥
सोग्निः गृह्य इति प्रोक्तः शालाग्निलौकिकस्तथा॥
इति

गृह्यः-

औपासनाग्निकुंडे वा सर्वेषां लौकिके।
साग्निरौपासनेनग्निः सर्वमेतानि लौकिके'॥ इत्यादि।
स्मृतिकारैः ग्रहाणां रूपकल्पनमुद्दिश्योक्तम्।
'ताम्रकात् स्फाटिकात् रक्तचन्दनात् स्फाटिकादुभौ।
राजतादयसस्सीसात् कांस्यात् कार्या ग्रहाः क्रमात्॥
सुवर्णे वापि ते लेख्या गन्धैर्मण्डलकेऽपि वा।
आवाहनोक्तवद्रूपं कृत्वा ध्यात्वा समर्चयेत्'॥
ध्यानप्रकारः रवेः॥

किरिटिनं पद्मकरं पद्मगर्भसमद्युतिम्।
सप्ताश्वरथसंयुक्तं द्विभुजं कलिंगदेशजम्'॥

काश्यपगोत्रं विश्वामित्रार्षं त्रिष्टुप्छन्दसं रक्तमाल्यांबरधरं रक्ताभरणं रक्तगन्धानुलेपनं

रक्तध्वजपताकिनं किरीटहारकेयूरमुक्तामणिगणशोभितं सप्तरज्जुकमेकचक्रं रक्तं रथमारुह्य दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडलमध्यगंसागं सवाहनायुधपरिवारंचतुरश्रंमडले प्राङ्मुख ओंभूर्भुवस्सुवः' 'आदित्यमावाहयामि; अधिदेवतामनलमावाहयामि; प्रत्यधिदेवतामीश्वरमावाहयामि'। आसनपाद्याचमनपुष्प गन्धधूपदीपाद्यैः चतुर्नामभिरर्चयेत्।

चन्द्रस्य॥

'श्वेतवस्त्रधरं श्वेतदशाश्वरथवाहनम्।
द्विभुजं साभयगदमात्रेयं सामृतं विधुम्॥

शान्तं नक्षत्रनाथञ्च रोहिणीवल्लभं प्रभुम्।
कुन्दपुष्पोज्ज्वलाकारं आह्वयामि निशाकरम्'॥

किरीटिनं गदाभयपाणिं द्विबाहुं यमुनादेशजमात्नेयगोत्रं आत्रेयार्ष धेनुछन्दसं श्वेतमाल्यांबरधरं श्वेतगन्धानुलेपनं श्वेताभरणभूषितं श्वेतछत्रध्वजपताकिनं मकुटकेयूरहारमौक्तिकशोभितं श्वेतं रथमारुह्य दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टं वृत्ताकारमंडले प्रतिष्ठितं सांगं सवाहनायुधपरिवारं प्रत्यङ्मुखमासीनँ प्रत्यधिदेवतामुमामावाहयामि'।

अंगारकस्य -

'रक्तस्त्रंगबरालेपं गदाशक्त्यसिशूलिनम्।
चतुर्भुजं मेषगमं भारद्वाजं धरासुतम्॥

रक्तकाञ्चनसंकाशं रक्तकिञ्जल्कसन्निभम्।
आवाहयामि भूपुत्रं महाबलसमन्वितम्'॥

किरीटिनं त्रिरक्तं चतुर्भुजं शक्तिशूलगदाभयपाणिं मेषगमवन्तीदेशजं वसिष्ठगोत्रजं जामदग्नार्ष गायत्रीछन्दसं अतिरक्तमाल्यांबरधरं त्रिरक्ताभरणं त्रिरक्तमाल्यानुलेपनं त्रिरक्तछत्रध्वजपताकिनं अष्टाश्वं काञ्चनं रथमारुह्य दिव्यं मेरुं प्रदक्षिणीकुर्वणं दक्षिणे दक्षिणाभिमुखं ग्रहंमडले प्रविष्टं सांगं सवाहनायुधपरिवारं तुट्याकारमंडले 'ओं भूर्भुवस्सुवः' 'अंगारकमावाहयामि; अधिदेवता गुहमावाहयामि; प्रत्यधिदेवतां गुहमावाहयामि'
क्षेत्रपतिमिति केचित्।

बुधस्य -

'श्यामस्त्रगगन्धवस्त्राढ्यं स्वर्णभञ्च चतुर्भुजम्।
खड्गशूलाभयगदमात्रेयं सिंहवाहनम्'॥

चाम्पेयपुष्पसंकाशं विशुद्धकनकप्रभम्।
आवाहयामि सुमुखं बुधं सौम्यं महाप्रभुम्'॥

किरीटिनं श्यामवर्णं कर्णिकारसमद्युतिं चतुर्भुजं खड्गशूलगदाभयपाणिं सिंहस्थं मगधेशमात्रेयगोत्रं भारद्वाजार्षं बृहतीछन्दसं श्याममाल्यांबरधरं श्यामगन्धानुलेपनं श्यामछत्रध्वजपताकिनं मकुटकेयूरहारमौक्तिकमणिशोभितं अष्टाश्वं श्यामं रथमारुह्य दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टं ऐशान्ये त्रिकोणाकारमंडले प्राङ्मुखमासीनं 'ओं भूर्भुवस्सुवः 'बृहस्पतिमावाहयामि' अधितेवतां इन्द्रमावायामि; प्रत्याधिदेवतां ब्रह्माणमावाहयामि'।

शुक्रस्य-

'शुक्रं शुक्लतनुं श्वेतवस्त्राढ्यं दैत्यमन्त्रिणम्।
भार्गवं दंडवरदकमंडल्वक्षसूत्रिणम्।।
कुंदपुष्पसमानाभं मुक्ताफलसमप्रभम्।
आवाहयामि मनस शुक्रं दैत्यगुरुं प्रभुम्'।।

किरीटिनं श्वेतवर्णं चतुर्भुजं वरदं दंडिनं साक्षसूत्रकमंडलुं कटकदेशजं भार्गवगोत्रं भार्गवार्षं पंक्तिछन्दसं श्वेतमाल्यांबरधरं श्वेताभरणं श्वेतगन्धानुलेपनं भार्गवगोत्रं भार्गवार्षं पंक्तिछन्दसं श्वेतमाल्यांबरधरं श्वेताभरणं श्वेतगन्धनुलेपनं श्वेतछत्रध्वजपताकिनं मकुटकेयूरहारमौक्तिकमणिशोभितं दशाश्वं श्वेतं रथामारुह्य दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमण्डले प्रविष्टं पूर्वभागे अर्धचन्द्राकृतिमंडले प्राङ्मुखमासीनं 'ओं भूर्भुवस्सुवः' 'भगवन्तं शुक्रमावाहयामि; अधिदेवतां शचीमावाहयामि; प्रत्यधिदेवतां शक्रमावाहयामि'।

शनैश्चरस्य -

'इन्द्रनीलनिभं मन्दं काश्यपिं चित्रभूषणम्।
चापबाणधरं चर्मशूलिनं गृध्रवाहनम्।।
इन्द्रनीलसमानाभं नीलोत्पलदलप्रभम्।
आवाहयामि देवेड्यं सूर्यपुत्रं शनैश्चरम्'।।

किरीटिनमिन्द्रनीलद्युतिं चतुर्भुजं शूलचर्मधरं गृध्रवाहनं बाणबाणासनधरं सौराष्ट्रदेशजं काश्यपगोत्रं शौनकार्षं गायत्रीछन्दसं कृष्णमाल्यांबरधरं कृष्णाभरणं कृष्णगन्धानुलेपनं कृष्णछत्रध्वजपताकिनं मकुटकेयूरहारमौक्तिकमणिशोभितं अष्टाश्वं नीलं रथमारुह्य दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टं पश्चिमभागे वज्राकारमंडले प्रत्यङ्मुखमासीनं ओं भूर्भुवस्सुवः' 'शनैश्चरमावाहयामि; अधिदेवतां प्रजापतिमावाहयामि; प्रत्यधिदेवतां यममावाहयामि'।

राहोः-

'सैहिकेयं करालास्यं कौडिनेयं तमोमयम्।
खड्गचर्मधरं भीमं नीलसिंहासने स्थितम्।।
नीलांजनसमानाभं नीलमेघसमद्युतिम्।
आवाहयामि वरदं राहुं शूलधरं प्रभुम्'।।

किरीटिनं करालवक्त्रं खड्गचर्मशूलधरं वरदं नीलसिंहासने स्थितं पूर्वदेशजं वासिष्ठगोत्रं गौतमार्षं मनस्विछन्दसं कृष्णमाल्यांबरधरं कृष्णाभरणं कृष्णगन्धानुलेपनं कृष्णछत्रध्वजपताकिनं मकुटकेयुरहारमौक्तिकमणिशोभितं अष्टाश्वं स्थमारुह्यदिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टं नैर्ऋत्यां (कृष्ण) दंडाकारमंडले दक्षिणाभिमुखमासीनं 'ओं भूर्भुवस्सुवः' 'राहुमावाहयामि; अधिदेवतां शेषमावाहयामि; प्रत्यधिदेवतां निर्ऋतिकाली (कलिंग) माबाहयामि'।।

केतोः-

धूम्रं द्विबाहुं गदिनं विकृतास्यं शतात्मकम्।
गृध्रासनं नीलमेघसन्निभं ब्रह्मणः सुतम्।।
वरदं चित्रवर्णञ्च महाबलसमन्वितम्।
आवाहयामि पूजार्थं केतुं कामफलप्रदम्'।।

किरीटिनं धूम्रवर्णं द्विबाहुं विकृताननं गृध्रासनं मध्यदेशजं जैमिनिगोत्रजं समिच्छन्दसं कृष्णपिंगलमध्यांबरधरं कृष्णाभरणं कृष्णगन्धानुलेपनं कृष्णापिंगलछत्रध्वजपताकांकितं मकुटकेयूरहारमौक्तिकमणिशोभितं धूम्रारुणमष्टाश्वं रथमारुह्य दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टं वायव्ये ध्वजाकारमंडले दक्षिणाभिमुखमासीनं 'ओं भूर्भुवस्सुवः' 'केतुमावाहयामि; अधिदेवतां यममावाहयामि; प्रत्यधिदेवतां चित्रगुप्तमावाहयामि'। आसनाद्यैरुपचारैरभ्यर्चयेत्।

करवीरशंखपुष्पोत्पलनन्द्यावर्तचम्पकमल्लिकासितगीरिकर्णिका कल्हारतापिंछपुष्पैः तद्वर्णवर्णपुष्पैः गन्धैः पूर्ववदभ्यर्च्य शुद्धौदन पायम् गुडौदन दध्योदन गौलिक चित्रोदन कृसर माषौदन कणौदनानि क्रमेण निवेदयेत्।।९।।

इति श्रीमत्कौशिकवंश्येन गोविन्दाचार्यसूनुना वेदान्ताचार्यवर्येण श्रीनिवासाख्ययज्वना विरचिते श्रीवैखानससूत्रव्याख्याने तात्पर्यचिन्तामणौ चतुर्थप्रश्ने त्रयोदशः खण्ड।

तदधिपांस्तदर्हेणाभ्यर्च्य आद्यारं हुत्वा अर्कपलाशखदिरापामार्गाश्वत्थोदुंबरशमीदूर्वाकुशान् यथाक्रमेण 'आसत्येन- 'सोमो धेनुं-'अग्निर्मूर्धा- 'उदुबुध्यस्व-'बृहस्पते अतियत्-'शुक्रन्ते अन्यत्, 'शन्नो देवीः- 'कया नश्चित्रः- 'केतुं कृण्वन्' इति क्रमेण अष्टशतं सप्तविंशतिकं वा त्रिमधुनात्ताभिस्समिद्भिः चरुणा आज्येन च जुहुयात्।।१।।

तदधिपान्-अग्न्यादीन्। तदर्हेण-तत्तद्देवतार्हेण पुष्पादिनाभ्यर्च्य।
त्रिमधुना-क्षीराज्यमधुभिः।

अत्र शौनकः-

'समिदाज्यान्नहोमेषु संख्या पञ्चसहस्रकम्।
अष्टोत्तरशतं वापि अष्टाविंशतिरेव वा।।
तेषामलाभे शुद्धान्नं पालाश्यस्समिधोपि वा'।।
इति

आहवनीये शशिशुक्रयोः अन्वाहार्ये अंगारकराह्वोःगार्हपत्ये असितकेत्वोः आवसथ्ये गुरुबुधयोः सभ्ये सवितुरिति।।२।।

'सभ्ये तु सवितुश्चन्द्रशुक्रयोः पूर्वकुंडके।
दक्षिणाग्नौ राहुधरासुतयोर्गार्हपत्यके।।
मन्दकेत्वोरावसथ्ये बुधगुर्वोः क्रमाद्यजेत्'।।

अनाहिताग्नेराघारादिप्रधानकर्मसु सभ्ये अधिकाराभावात् औपासनाहवनीययोरत्यन्तभेदाभावात् औपासनस्य प्राधान्यमवगमयितुं आहवनीयादित्वेनोक्तम्।

'अग्निं दूतं-'ये ते शतं-'सुब्रह्मण्यः-'इदं विष्णुः-'इन्द्रं प्रणयन्तं-'गन्धद्वारां-'ब्रह्म जज्ञानं-'शन्नो निधत्तां-'यमो दाधार' इत्यधिदेवेभ्यः आज्येन तत्तत्स्थाने जुहुयात्।।३।।

अग्निं दूतमित्यादि। तत्तत्स्थाने। तत्तदर्थे तत्तत्कुंडेषु जुहुयात्। आज्यग्रहणं समिदन्नहोमज्ञापनार्थम्।

शौनकः-

'ग्रहाणामधिदेवानां सदेवानामपि क्रमात्।
तेषां पृथक् पृथक् होमः समिदन्नाज्यमेव च।।
अशक्तो यदि सर्वेषां ग्रहाणामेव कारयेत्'।।
इति।।

गुह्यः-

एषां 'गौरीमिमायेति क्षेत्रस्य पत इत्यपि।।
'विष्णोश्च 'ब्रह्म जज्ञानं' 'इन्द्रं वोथ' 'इमं' 'यमः'।।

'यत्ते देवी ति 'चित्र ति ग्रहदेवमनून् हुनेत्।
ग्रहदेवाधिदेवानां होमं पूर्वोक्तसंख्यया।।
अशक्तावेकवारं वा होतव्यं ग्रहदैवतम्।

अंगारकस्य वा भूमिः 'स्योना पृथिवी' ति तन्मनुः।। इति

विष्णोर्नुकादीन् मिन्दाहुत्याश्राविंतादीन् हुत्वा शुद्धोदनपायसगुडोदनाद्यैः पूर्वोक्तचरुभिः ब्राह्मणान् भोजयित्वा रक्तधेनुमादित्याय शंखं सोमाय ताम्रमंगारकाय हिरण्यं बुधाय शुक्लं वासो बृहस्पतये हयं शुक्राय कृष्णां गां शनैश्चराय राहोः छागं केतोरायसदंडमित्यात्मविरुद्धानां तदर्हं दद्यात्।।४।।

विष्णोर्नुकादीनीत्यादि। नक्षत्रदेवतायै वरुणाय च हुत्वा विष्णोर्नुकादीन् मिन्दाहुत्याश्राविंतादीन् नवाहुतीश्च सर्वाग्निष्वपि जुहुयात्।

अस्य सर्वेष्वन्तहोमं हुत्वा पुण्याहं वाचयित्वा पायसकृसरगौल्याद्यैः प्रधानैः पूर्वोक्तैः चरुभिश्शुद्धान्नेन च ब्राह्मणान् भोजयेत्।

तत्तद्ग्रहदेवतास्वरूपान् मुखवासान्ते उक्तैः दानैः सम्मानयेत्।

तत्प्रकारमाह रक्तधेनुमित्यादिना। रक्तं धेनुं सवत्सामादित्याय, शंखं-शंखमणिं सोमाय, ताम्रं तुलामात्रमंगारकाय, हिरण्यं निष्कं निष्कार्धं वा बुधाय, शुक्लं सूक्ष्मं वस्त्रं बृहस्पतये, श्वेतमयं शुक्राय, कृष्णां गां शनैश्चराय, राहोः कृष्णां छागं, केतोः पुरुषप्रमाणं चतुरंगुलनाहमायसं दंडम्। एता दक्षिणा होमादिकर्तृभ्यो दद्यात्।
सर्वेषामलाभे सुवर्णम्।।५।।

सर्वेषां यथोक्तानामलाभे सुवर्ण वा दद्यात्। जन्मकर्मादीनां काम्यविषयत्वात्।

शौनकः-

'काम्ये नैमित्तिके चैव लोपश्चेद्धन्ति तद्विदः'॥ इति॥

जन्म कर्म सांघातिक सामुदायिक वैनाशिकर्क्षसंस्थेषु क्रियाकालविरुद्धेषु ग्रहेष्वतच्छुभर्क्षेष्वारभेत॥६॥

जन्मकर्मेत्यादि। जन्मकर्म जन्मतो दशमं-सांघातिकं षोडशं सामुदायिकं अष्टादशं, वैनाशिकं त्रयोविंशं वा। 'वैनाशिकं तु जन्माशा दष्टाशीतितमोंशकः- 'तद्भञ्च कर्म नेष्ट मिति वचनात् पादभेदेन योजनीयम्।

'द्वादशाष्टमजन्मस्थाश्शन्यर्कांगारका गुरुः।
कुर्वन्ति प्राणसंदेह स्थानभ्रंशं धनक्षयम्'॥

इत्यादि ज्योतिश्शास्त्रोक्तविरुद्धस्थानेषु ग्रहेषु स्थितेषु, क्रियाकालविरुद्धेषु उपनयनादिक्रियालग्नस्य विरुद्धेषु, यद्वा- जन्मर्क्षवक्रजारादिक्रियाविरुद्धेषु आरभेत।

'आत्मनश्चानुकूलर्क्षे सप्तपञ्चत्रिवर्जिते।
अरिक्तायां शुभे तारे पूर्वाह्णे शान्तिमाचरेत्'॥ इति।

बोधायनः

'मासिमास्यृतावृतौ संवत्सरे संवत्सरे चन्द्रग्रहणे सूर्यग्रहणे विषुवे अयने जन्मनक्षत्रे शुभकर्माणि प्रयुञ्जानः सर्वान् कामानवाप्नोति' इति।

एतेन नवग्रहजा दुःखा व्याधयः शान्तिं यान्ति॥७॥

एतेन-शान्तिकर्मणा। ग्रहजाः-विरुद्धग्रहसंभवानि। दुःखाः राजतो देवतः प्राप्तकृच्छ्राणि मनःपीडा वा कार्याननुगृह्य वा । परिवेष स्कन्धापस्मारादयश्च व्याधयो ज्वरादयश्च। शान्तिं यान्ति॥

अन्यथा महत्तरो दोषो भवति॥८॥

अन्यथा-शान्तिनिमित्तेषु विषयेषु शान्त्यकरणं दुःखधनक्षयव्याध्यादयः संभवेयुः।

ग्रहपूजां पुरुस्कृत्य सर्वकर्म समारभेदिति विज्ञायते॥९॥

ग्रहपूजामित्यादि॥

याज्ञवल्क्यः-

'श्रीकामश्शान्तिकामो वा ग्रहयज्ञं समाचरेत्।
वृष्ट्यायुःपुत्रकामो वा तथैवाभिचरन् परान्॥
यस्य यस्तु यदा दुःस्थः स तं यत्नेन पूजयेत्'॥ इति॥

शौनकः-

'एषा स्वस्त्ययनी शान्तिरायुष्यं पुष्टिवर्धनम्।
सदा दुःखविनाशार्थं कर्तव्याहरहद्विजैः॥
होमेन वा जपेनापि पूज्या द्वाभ्यां स्वशक्तितः।

अशक्तो यदि सर्वेषां ग्रहाणामेव वा क्वचित्॥
तर्पणं वा जपं वापि कर्तव्यं श्रद्धया द्विजैः।
तदशक्तौ ते जप्यादौ विदुषे भूसुराय च॥
होमद्रव्याणि सर्वाणि दातव्यानीति वै स्थितिः।
दक्षिणाञ्च यथान्यायं शक्त्या दद्याद्विचक्षणः॥
सर्वेषामपि वर्णानां शान्तिः कार्या द्विजोत्तमैः।
काम्ये नैमित्तिके चापि सप्तव्याहृतिभिः पुनः॥
अन्या पुनः समस्तानि हुत्वा शेषं समापयेत्।
अमत्या चेदिदं लोपे मत्या चेन्निष्फलं भवेत्॥
पुण्याहांबु मृत्पल्लवत्वक् पूर्णकुंभं सवस्त्रकम्।
आधारिते पुण्यसूक्ते स्पृष्टान्ते स्नापयेत्तु तैः'॥
इति॥

चिन्तामणौ-

'सूर्यस्यैवोत्तरे शंभुमुमां सोमस्य दक्षिणे।
गुहमगारकस्यैव दक्षिणस्यां निवेशयेत्॥
सौम्यात्पश्चिमतो विष्णुं ब्रह्मा जीवस्य पूर्वतः।
इन्द्रमैन्द्र्यां तु शुक्रस्य मन्दस्याग्नेयतो यमः॥
राहोः पूर्वोत्तरे कालं सर्वभूतभयावहम्।
केतोर्नैर्ऋतदिग्भागे चित्रगुप्तं निवेशयेत्'॥

'श्रुतकामा इव हि देवा' इति 'हविर्देवानां प्रिय' मिति श्रूयमाणत्वाच्च अश्रुतद्रव्यात्वात् समिद्धोमे देवानां प्रीतिर्नास्तीति चेत्- सत्यम्। तत्पश्चादिविषयम्। समिद्धोमे तु 'अथाप्यृचमुदाहरन्ति यस्समिधा या आहुती यो वेदेनेति समिधमेवापीति श्रद्धाना आददन्मन्ये तव इदमिति नमस्तस्मै य आहुत्या अतो वेदेनेति विद्ययैवाप्यस्ति प्रीतिः तदेत्पश्यन् ऋषिरुवाच आगोरुधाय गविषे द्युषापदस्त्यं वाचर्वृतात्स्वदियो मधुनश्चावोचते' ति। अग्निहोत्रमन्त्रे च 'तदस्तु तुभ्यमिद्घृतं तज्जुषस्व यविष्ठ्य यदत्युपजुह्वावा यद्यत्रो असर्पाति सर्वं अतदस्तुते घृत' मित्यादि।

अथातः स्थालीपाकं-अथ सति व्रीहि- अथाष्टका-दक्षिणपश्चिमेऽग्नेः-अथातोमावास्यायां-यजमानः प्राचीनावीती-अथ श्राद्धं मासि मासि-अथ चैत्रीं-अथाश्वयुजीं-अथाग्नौ-कालविहीनं-अथ नित्यार्चनं-अथ ग्रहशान्ति-तदधिपांस्तदर्हेणेति चतुर्दश इति॥
इति चतुर्दशः खंडः

इति श्रीमत्कौशिकवंशयेन गोविन्दाचार्यसूनुना वेदान्ताचार्यवर्येण श्रीनिवासाख्ययज्वना विरचिते श्रीवैखानससूत्रव्याख्याने तात्पर्यचिन्तामणौ चतुर्थप्रश्ने चतुर्दशः खण्डः।

संध्यापद्धतिः।।

प्रणवस्य ब्रह्मा ऋषिः, गायत्री छन्दः, परमात्मा देवता। अं ब्रह्मात्मने हृदयाय नमः। ॐ विष्ण्वात्मने शिरसे स्वाहा। मं रुद्रात्मने शिखायै वौषट्। बं ब्रह्मात्मने कवचाय हुम्। ॐ विष्ण्वात्मने नेत्रत्रयाय वौषट्। मं रुद्रात्मने फट्।

प्रणवध्यानम्-

'विष्णुं भास्वत्किरीटाङ्गदवलयगलाकल्पहारोदरांध्रि-
श्रोणीभूषासुवक्षोमणिमकरमहाकुण्डलैर्मण्डिताङ्गम्।
हस्तोच्छङ्खचक्राम्बुजगदममलं पीताकौशेयमाशाः
विद्योतद्भासमुद्यद्दिनकरसदृशं पद्मसंस्थं नमामि।।
इति।।

'जपकाले त्रयी देवो होमकाले हुताशनः।
ध्यानकाले परं ब्रह्म विश्वेदेवास्ततोन्यथा।।'

।

अथ सप्तव्याहातीनाम्-

'अत्रिर्भृगुश्च कुत्सश्च वसिष्ठो गौतमस्तथा।
कश्यपश्चाङ्गिराश्चैते ऋषयस्स्युर्यथाक्रमम्।।

गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च।
त्रिष्टुप् च जगतीं चैव छन्दांस्येतानि सप्त वै।।

अग्निर्वायुस्तथार्कश्च वागीशो वरुणस्तथा।
इन्द्रश्च विश्वेदेवाश्च देवतास्समुदाहृताः।।'

प्राणायामे विनियोगः।

'स्वस्वोक्तवर्णतनवो रुपयौवनसंयुताः।
क्षौमवस्त्रपरीधानास्सर्वाभिणभूषिताः।।

दिव्यचन्दनलिप्ताङ्गा दिव्यमाल्यैरलङ्कृताः।
सितोपवीतहृदयास्सपवित्रचतुष्कराः।।

उन्निद्रवदनाम्भोजप्रभामण्डमण्डिताः।
जटाकलापपूर्णेन्दुप्रभापूरितदिङ्मुखाः।।

अभयाक्षस्त्रगप्पात्रवरहस्तसरोरुहाः।
एवं होमे जपारम्भे ध्येया व्याहृतयो द्विजैः।।'

गायत्र्याः विश्वामित्रऋषिः गायत्री च्छन्दः सविता देवता।

ब्राह्मी स्वाहा वाहिनी च तथा नित्या विलासिनी।
प्रमावती च लोला च सप्तव्याहृतिशक्तयः।।

श्वेतं श्यामञ्च पीतञ्च पिशङ्गं नीललोहितम्।
नीलं कनकवर्णञ्च वर्णान्येतान्यनुक्रमात्।।

प्रणवस्यैतयोर्वर्णः शुद्धस्फटिकसन्निभः।
तत्त्वमेषां त्रयाणान्तु सर्वतत्त्वमिति स्मृतः।।

इत्येवमुक्ता नत्वा च प्राणायामं समाचरेत्।
विश्वामित्रस्तु गायत्र्या ऋषिशछन्दःस्वयं स्मृतम्।।

देवता सविता प्रोक्ता ब्रह्मा तु शिरसो ऋषिः।
अनुष्टुप् चैव छन्दः स्यात् परमात्मा हि देवता।।

प्राणायामे विनियोगः।

भारद्वाजः-

'समाहितमनाः प्राणानायम्यैव तदाकृतिम्।
जपित्वैवं दशकृत्वः प्राग्गायत्रीं ततो जपेत्।।
जपक्रमोऽयमेव स्यात् सर्वपापप्रणाशनः।

स्मृत्यन्तरे-
सप्तव्याहृतिसंयुक्तां गायत्रीं शिरसा सह।
दशवारं जपित्वैव गायत्रीन्तु ततो जपेत्।।

॥

अत्र व्याहृतिन्यासः।

ब्रह्मा- 'पादयोर्जङ्घयोर्जान्वोस्तथैव जठरेऽपि च।
कण्ठे मुखे तथा मूर्ध्नि क्रमेण व्याहृतीर्न्यसेत्।।
एकाक्षरं परं ब्रह्म प्राणायामः परन्तपः।
सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते।।'

भारद्वाजः-

'आयात्वित्यनुवाकेन हृदये वार्कमण्डले।
देवमावाह्य गायत्रीं ततो ध्यायेद्द्विजोत्तमः।।

पितामहः-

'आयात्वित्यनुवाकस्य वामेदेव ऋषिः स्मृतः।
अनुष्टुप् जगती छन्दो गायत्री देवता स्मृता।।
अनेन चानुवाकेन त्वावाह्य च यथाविधि।
गायत्रीं विमलां देवीं हृदये सूर्यमण्डले।।
ध्यानयोगेन सम्पश्येत् वर्णरूपसमन्विताम्।।'

'देवासुरास्संयत्ता आसन् तेषां गायत्र्योजो बलमिन्द्रियं वीर्यं प्रजां पाशूसंगृह्यादायापक्रम्यातिष्ठन्ते देवा अमन्यन्त यतरान् वा इयमुपावर्त्स्यति त इदं भविष्यन्तीति तां व्यह्वयन्त विश्वकर्मन्निति देवा दाभीत्यसुरास्सानान्यतरांश्च नोपावर्तत ते देवा एतद्यजुरपश्यन्नोजोसि सहोसि बलमसि भ्राजोसि देवानां धाम नामासि विश्वमसि विश्वायुस्सर्वमसि। सर्वायुरभिभूरिति वा व देवा असुराणामोजो बलमिन्द्रियं वीर्यं प्रजां पशूनवृञ्जते' त्यादि।।

'विश्वामित्र ऋषिश्छन्दो गायत्री देवता रविः।
सावित्र्यास्तु त्रयः पादा चतुष्पादाः षडक्षराः।।

जपे तु त्रिपदा प्रोक्ता ह्यर्चने तु चतुष्पादाः षडक्षराः।।

जपे तु त्रिपदा प्रोक्ता ह्यर्चने तु चतुष्पदा।
प्रथमस्तु करन्यासो देहन्यासोऽप्यनन्तरम्।।
अङ्गन्यासस्ततः प्रोक्त एतन्न्यासत्रये क्रमात्।
हृन्मस्तकशिखागात्रनेत्रप्रहरणानि षट्।।

अङ्गान्यमूनि चोक्तानि वच्मि षट्पल्लवानि च।

चन्द्रिकायाम्-

अङ्गुष्ठे चैव गोविन्दं तर्जन्यान्तु महीधरम्।
मध्यमायां हृषीकेशमनामिक्यां त्रिविक्रमम्।।

कनिष्ठायां न्यसेद्विष्णुं करमध्ये तु माधवम्।
यत्कृतञ्च हुतं दत्तं जप्तमिष्टं तथैव च॥

व्यासः-

'भूरङ्गुष्टद्वये न्यस्य भुवस्तर्जनिकाद्वयोः।
ज्येष्ठाङ्गुनिद्वयोर्धीमान् स्वः पदं विनियोजयेत्॥

अनामिकद्वयोर्धीमान् न्यसेत्तत्पदमग्रतः।
कनिष्ठिकाद्वयोर्मर्गः पाण्योर्मध्ये धियः पदम्॥

भूः पदं हृदि विन्यस्य भुवः शिरसि विन्यसेत्।
शिखाया स्वः पंद न्यस्य कवचे तत्पदं न्यसेत्॥

अक्ष्णोर्नर्गपदं न्यस्य न्यसेद्दिक्षु धियः पदम्।'
'हृदि तत्सवितु र्न्यस्य न्यसेन्मूर्ध्नि वरेण्यकम्॥

भर्गो देवस्येति खण्डं शिखायान्तु ततो न्यसेत्।
धीमहीति न्यसेद्वर्म धियो योनश्च नेत्रयोः॥

प्रचोदयात्तु चास्त्रार्थे पदन्तु विनियोजयेत्'।

III

अथ ध्यानम्

'मुक्ताविद्रुमहेमनीलधवलच्छायैमुखैस्त्रीक्षणैः
युक्तामिन्दुनिबद्धरत्नमकुटां तत्त्वार्थवर्णात्मिकाम्
गायत्रीं वरदाभयाङ्कुशकशाः शुभ्रं कपालं गदां
(गुणं)

शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे'॥

अथ सन्ध्याभेदेन रूपभेदमाह।

'प्रातः काले तु गायत्री सायङ्काले सरस्वती।
मध्याह्ने च तु सावित्री उपास्या रूपभेदतः॥

गायत्री स्याद्ध्वेद्रक्ता सावित्री शुक्लवर्णिका।
सरस्वती तथा कृष्णा उपास्या रुपभेदतः॥

गायत्री ब्रह्मरुपा तु सावित्री रुद्ररुपिणी।
सरस्वती विष्णुरुपा उपास्या रुपभेदतः॥

विश्वामित्रः-

'आदित्यमण्डलान्तस्स्थं परब्रह्माधिदैवतम्।
छन्दो निचृत्स्याद्गायत्री मया दृष्टा सनातनी॥

सावित्रीमेतां पितामहः सवितृदेवत्यामाह, ब्रह्मदेवत्यामगस्त्य बोधायनौ। एतेषां सवित्रादिशब्दानां निखिलनिगमान्तसमाम्नातस्य परत्यैकयैव वाचकत्वात् न विरोधः।

तथाहि श्रुतिः-'एकं सद्विप्रा बहुधा वदन्ति' 'तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदुचन्द्रमाः। तदेव शुक्रममृतं तद्ब्रह्म तदापः स प्रजापतिः। तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनामित्यादिका।

मनुः-

'एनमेके वदन्त्यग्निं मरुतोन्ये प्रजापतिम्।
इन्द्रमेके परे प्राणानपरे ब्रह्म शाश्वतम्॥

विष्णुर्ब्रह्मा च रुद्रश्च विष्णुर्देवो दिवाकरः।
स एव चन्द्रश्चेन्दाग्नी सूर्यो वैश्रवणो यमः॥

वदन्ति नामभिश्चान्यैरनामानमरूपिणम्।

अथ ध्यानम्।

श्रीवैखानसभगवच्छास्त्रे मरीचिः-

अथातस्सावित्रीकल्पं वक्ष्ये। चतुर्विंशत्यक्षरा गायत्रीतिति श्रुतिः। सा गायत्री सवितृदेवत्या सावित्रीत्युच्यते। तस्या ऋषिच्छन्दोधिदैवंत पुरा चोक्तम्। अष्टाक्षरा त्रिपदा, चतुष्पदाषडुक्षरा, जपे त्रिपदा, अर्चने चतुष्पदा। अग्निवर्णा षट्कुक्षिः पञ्चशीर्षा शुक्लमुखी कमलेक्षणा। ऋग्वेदः प्रथमः पादः यजुर्वेदो द्वितीयः पादः, सामवेदस्तृतीयः पादः पृथिवी चरणम्। ऊरू पर्वतः अम्बरोस्थीनि, पूर्वः प्रथमः कुक्षिः, दक्षिणो द्वितीयः, पश्चिमस्तृतीयः, चतुर्थ उत्तरः, पञ्चम ऊर्ध्वः, अवरश्शष्टः, इतिहासपुराणानि (दिव्यागमनिगमा दिव्यारूपं) नाभिः, जगत् रूपम्, उदरान्तरमाकाशः, श्छन्दस्स्तनौ, धर्मशास्त्राम् हृत् न्यायो बाहू सिरिराट्, ग्रीवा, प्रथमं शिरश्शब्दशास्त्रं, द्वितीयं शीक्षा तृतीयं कल्पः, चतुर्थं निरुक्तं, पञ्चमं ज्यौतिषम्। अनलं मुखं, सोमो हारः, ताराः कुसुमानि, ग्रहाः रत्नविभूषणानि, ब्रह्मा मूर्धा शिखा रुद्रः, विष्णुरात्मा, वेदान्ताः विमलं मनः, वेदा प्राणाः, मीमांसा चित्तमित्येवं ज्ञात्वा त्रिसन्धिषु त्रिविधं ध्यानमाचरेत्। पूर्वा सन्ध्यां कौमारी रक्तवर्णां हंसवाहनां अक्षसूत्रयज्ञोपवीतकमण्डलुधारिणीं ब्रह्मदेवत्यां सावित्रीं नाम, सावित्र्या वासस्थानं भूमिः, साङ्ख्यायनगोत्र, अग्निर्गार्हपत्यम्, उपनयने, विनियोगः, सूत्रं कात्यायनमित्येवं ध्यायेत्।

मध्याह्नसन्ध्यायाम् यौवनवतीं रुद्राक्षार्धचन्द्रत्रिशूलवीरिणीं श्वेतवर्णां वृषभवाहनां रद्रदेवत्यां गायत्रीं नाम। गायत्र्या वासमन्तरिक्षम्, अन्यानि पूर्ववत्। सायं सन्ध्यायाम् सलक्षणां वृद्धां श्यामवर्णां सर्वाभरणभूषितां शङ्खचक्रधारिणीं गरुडवाहनां विष्णुदेवत्यां सरस्वती नाम । सरस्वत्या वासस्वर्गम्, अन्यानि पूर्ववत्। एवं ध्यात्वा जपमाचरेत्'। इति

तथा प्रत्यक्षरमृष्यादिकं तत्रैवोक्तम्। अथआतोक्षराणां ध्यानं वक्ष्ये। सर्वेशं वर्णानां त्रिसन्धिषु पूर्ववत् ब्रह्मविष्णुरुद्ररूपम्। वर्णं ऋषिच्छन्दो देवताः फलविशेष्य पृथग्वक्ष्ये तत्कारं पीताभं वसिष्ठऋषिः छन्दोगायत्रं ब्रह्मदेवत्यं महापातकनाशनम्. सकारं श्यामाभं भारद्वाजऋषिः उष्णिक् छन्दः, प्रजापतिर्देवता उपपातकनाशनम्, विकारं पिङ्गलाभं गौतमऋषिः अनुष्टुप् छन्दः सोमो देवता महापातकनाशनम्। तुकारं नीलाभं भृगुऋषिः बृहती छन्दः ईश्वरो देवता दुष्टपापग्रहरोगाद्युपद्रवनाशनम्, वकारं वह्निवर्णम् शण्डिलऋषिः पङ्क्तिश्छन्दः सूर्यो देवता भ्रुणहत्यादि विमोचनम्, रेकारं ज्वालारूपं लोहितऋषिः त्रिष्टुप् छन्दः बृहस्पतिर्देवता

अगम्यागमनपापविनाशनम्, णिकारं विद्युन्निभं गर्गऋषिः जगतीछन्दः इन्द्रो देवता अभक्ष्यभक्षणपापविनाशनम्, यकारं हेमाभं शातातपऋषिः जगतीछन्दः विष्णुर्देवता ब्रह्महत्यादिसर्वपापविनाशनम्, भकारं कृष्णवर्णं सनत्कुमारः ऋषिः पदपंक्तिछन्द अर्यमा देवता पुरुषहत्यादिपापविनाशनम्, गोकारं रक्ताभं कश्यपऋषिः विष्टारपंक्तिछन्दः सावित्रि देवता गोहत्यादिपापविनाशनम्, देकारं श्यामाभं अत्रिऋषिः विराट् पङ्क्तिश्छन्दः त्वष्टा देवता स्त्रीहत्यादिपापविमोचनम्, वकारं श्वेताभं भार्गवऋषिः विराट्छन्दः पूषादेवता गुरुहत्यादिपापविमोचनम्, स्यकारं काञ्चनाभं पराशरऋषिः अक्षपपङ्क्तिछन्दः महेन्द्रो देवता कूटकृतपापविनासनम्, धीकारं काञ्चनाभं पौण्डरीकऋषिः कात्यायनीछन्दः वायुर्देवता अभक्ष्यभक्षणदेषविनाशनम्, मकारं पद्मरागनिभं क्रतुऋषिः ज्योतिष्मतीछन्दः वामदेवो देवता जन्मान्तरपापविनाशनम्, हिकारं श्वेताभं दक्षऋषिः त्रिश्टुप् छन्दः मित्रावरुणौ देवता सर्वपापविनाशनम्, योकारं कपिलाभं आङ्गिरसऋषिः महाछन्दः विश्वेदेवा देवताः प्राणिहिंसापापविनाशनम्, द्वितीययोकारं अञ्जनाभं कात्यायनऋषिः महाछन्दः यमो देवता दुश्टग्रहनाशनम्, नकारं श्यामाभं मुद्गलऋषिः मूश्छन्दः विष्णुर्देवता भ्रूणहत्यादिपापविनाशनम्, प्रकारं शुद्धस्फटिकसङ्काशं मुवश्छन्दढ विष्णुर्देवता विष्णुलोकप्रदम्, चकारं कुङ्कुमाभं रोमशऋषिः सुवश्छन्दः सर्वेदेवा देवताः ब्रह्मलोकप्रदम्, तकारं शुक्लवर्णं भूर्भुवस्सुवश्छन्दः विष्णुर्देवता विष्णुलोकप्रदम्, यात्कारं हेमाभे विश्वमित्रऋषिः देवीगायत्री छन्दः ब्रह्मा देवता सर्वसिद्धिप्रदमिति। एवं ध्यात्वा ध्यानयुक्तः ओं भूर्भुवस्सुवस्तत्सवितुरिति सावित्रीं दशशताष्टकं त्रिसन्धिषु मनसा जपेत्। सावित्र्यध्यायनात् आयुः श्रीर्ब्रह्मवर्चसं प्रजासमृद्धिर्धनधान्यसमृद्धिश्च भवती' ति।

IV

(१) अथ तत्त्वानि

'पृथिव्यापस्तथा तेजो वायुराकाश एव च।
गन्धो रसश्च रूपञ्च शब्दः स्पर्शस्तथैव च॥

उपस्थः पायुपादौ च पाणी वागपि तच क्रमात्।
घ्राणं जिह्वा च चक्षुश्च त्वक् च श्रोत्रमतः परम्॥

मनो बुद्धिरहङ्कारश्चाव्यक्तश्च यथाक्रमम्।

(२)अथ वर्णाः-

क्रमाच्चम्पकपुष्पाभमतसीपुष्पसन्निभम्।
विद्रुमं स्फटिकाकारं पद्मपुष्पसमप्रभम्॥

तरुणादित्यसङ्काशं शङ्खकुन्देन्दुसन्निभम्।
प्रवालं पद्मपत्राभं पद्मरागसमप्रभम्॥
वज्रनीलमणिप्रख्यं मौक्तिकं कुङ्कुमप्रभम्॥
अञ्जनाभञ्च गाङ्गेयं वैदूर्यं क्षौद्रसन्निभम्॥

हारिद्रं कृष्णागन्धाभं रविकान्तिसमप्रभम्।
शुकपिञ्छसमाकारं क्रमेण परिकल्पयेत्।।

(३) अथ शक्तयः-

'प्रह्लादिनी प्रभा नि (स) त्या विश्वभद्रा विलासिनी।
प्रभावती जया शान्ता कान्ता दुर्गा सरस्वती।।
विद्रुमा च विशालोशा व्यापिनी विमला तथा।
तमोपहारिणी सूक्ष्मा विश्वयोनिर्जयावहा।।
पद्माल्या परा शोभा भद्ररूपा च शक्तयः।'

(४) अथाक्षरन्यासः।

अत्र मरीचिः-
'पादादिमूर्धान्तं क्रमेण चतुर्विंशतिस्थानेष्वक्षराणि न्यसेत्। पादाङ्गुठ गुल्फजङ्घजानुद्वयोरुद्वयगुह्यप्रदेश वृषणकटिनाभिज ठरस्तनहृदयकण्ठवदनतालुनासा चक्षुः भ्रूमध्यललाटाग्रमूर्धपूर्वभागदक्षिणोत्ततपश्चिम मूर्धतत्तन्मुखशिरोमध्यचतुमुखेश्वे वमक्षराणि ध्यात्वा विन्यसेत्। सोपि सर्वपापैर्मुक्तो भवतीति विज्ञायते' इति।

अगस्त्यश्च-

'वृषणे कटिदेशे च नाभौ चोदरमध्यतः।
स्तनयोर्हृदये कण्ठे वक्त्रे तालुनि घोणके।।
चक्षुषोश्च भ्रुवोर्मध्ये ललाटे पूर्ववक्त्रके।
दक्षिणे चोत्तरे वक्त्रे पश्चिमे मूर्ध्नि च क्रमात्।।' इति

न्यासप्रकारांश्च स एवाह-'ओं तत् प्रह्लादिन्यै चम्पकनिभायै नमः। ओं स प्रभायै अतसीपुष्पसन्निभायै नमः। ओं विं नित्यायै पिङ्गलवर्णायै नमः। ओं दुं विश्वभद्रायै इन्द्रनीलनिभायै नमः। ओं वें विलासिन्यै वह्निरूपायै नमः। ओं रें प्रभावत्यै नीलवर्णायै नमः। ओं णिं जयायै विद्युत्प्रभायै नमः। औं रं शान्तायै रक्तवर्णायै नमः। ओं भं कान्तायै जलवर्णायै नमः। ओं गों दुर्गारि रक्तवर्णायै नमः। ओं दें सरस्वत्यै मरकतनिभायै नमः। ओं वं विद्रुमायै जातिपुष्पनिभायै नमः। ओं यं विशालायै स्वर्णप्रभायै नमः। ओं यं विशालायै स्वर्णप्रभायै नमः। ओं धीं ईशानायै कुन्दप्रभायै नमः। ओं मं व्यापिन्यै पद्मरागनिभायै नमः। ओं हिं पिमलायै शङ्खनिभायै नमः। ओं धिं तमोपहारिण्यै पाण्डुरनिभायै नमः। ओं वै सूक्ष्मायै इन्द्रगोपनिभायै नमः। ओं यों विश्वयोन्यै क्षौद्रनिभायै नमः। ओं वं जयावहायै आदित्योदयसन्निभायै नमः। ओं प्रं पद्मालयायै नीलोप्तलनिभायै नमः। ओं चों परायै गोरोजनाभायै नमः। ओं दं शोभायै कुन्देन्तुशङ्खनिभायै नमः। ओं यात् भद्ररूपायै स्फटिकनिभायै नमः, इति।
बह्मा-'मूर्धादिपादपर्यन्तं संहारन्यास उच्यते।
पादादिनाभिपर्यन्तं शिरःप्रभृति वक्षसि।।

कर्तव्यः कामिभिर्न्यासो गृहस्थैः स्थितिसंज्ञक-।

V

अथ तत्तवन्यासः।।

अगस्त्यः-

'तत्तवन्यासमथो वक्ष्ये साधकानां हिताय वै।
यत्कृत्वा साधको गच्छेन्निर्वाणं पदमव्ययम्।।

भृगुः

'ओङ्कारमादावुच्चार्य मन्त्रबीजमनन्तरम्।
ततस्तत्त्वं नमोन्तञ्च जपन् न्यासं समाचरेत्।।

तद्यथश

'ओ तत् पृथिव्यात्मने नमः इति पादयोः। ओं सं उदकात्मने नमः जान्वोः। ओं विं तेजआत्मने नमः हृदये। ओं तुं वाय्वात्मने नमः मुखे। ओं वं आकाशात्मने नमः मूर्ध्नि। ओं रें गन्धतन्मात्रात्मने नमः चक्षुषोः। ओं दें उपस्थात्मने नमः लिङ्। ओं वं पाय्वात्मने नमः पायौ। ओं स्यं पादलने नमः पादयोः। ओं धीं पाण्यात्मने नमः हस्तयोः। ओं मं वागात्मने समः मुखे। ओं हिं घ्राणात्मने नमः घ्राणयोः। ओ धिं जिह्वात्मने नमः घ्राणयो। ओं धिं जिह्वात्मने नमः दियाम्। ओं यों चक्षुरात्मने नमः चक्षुषोः। ओं यों नमः त्वगात्मने नमः त्वचि। ओं नं श्रोत्रात्मने नमः श्रोत्रयोः। ओं प्रं मनआत्मने नमः हृदये। ओं चों बुद्ध्यात्मने नमः हृदि। ओं यात् अव्यक्तात्मने नमः हृदि।
एवं विन्यस्य सावित्रीं ध्यात्वा सम्यक् प्रयत्नतः।
यं यं पश्यति चक्षुर्भ्यां स्वयं स्पृशति पाणिना।
यं यं वा भाषते चैव सर्वे पूता भवन्ति ते।। '
इति

VI

अथ गायत्रीकवचम्-

'ओं इति हृदये भूरिति मुखे, भुव इति शिरसि, सुवरिति सर्वाङ्गे। एवं विन्यस्य यथाविधि मुद्राश्च प्रदर्शयेत्।

अगस्त्यः-'अथातो दर्शयेन्मुद्राः सम्मुखं तथा।
ततो विततविस्तीर्णे द्विमुखं त्रिमुखं तथा।।

चतुर्मुखं पञ्चमुखं षण्मुखाधोमुखे ततः।
व्यापकं चलिकारव्यञ्च शकटं तदनन्तरम्।।

यमपाशञ्च ग्रथितं ततस्स्यात्सम्मुखेन्मुखम्।
वि (प्र) लम्बमुष्टिकामीनाः ततः कूर्मवराहकौ।
सिंहाक्रान्तं महाक्रान्तं ततो मुद्गखल्लवौ।।

आसां मुद्राणां लक्षणमगस्त्यकल्ये स्मृतिचन्द्रिकायाञ्च द्रष्टव्यम्।
ग्रन्थान्तरेषक्तत्वात्केचिन्नेच्छन्ति। प्रत्यवायाभावात्।
'न जातु दर्शयेन्मुद्रा महायनसगमे।
क्षुभ्यन्ति देवतास्तस्य पिफलञ्च कृतं भवेत्।।'
इति

'यदधीतमविज्ञातं निगदेनैव शब्द्यते।

अनग्नाविवशुष्केधो न तज्ज्वलति कर्हिचित्।।'
इति शौनकस्मरणात्

'अविदित्वा ऋषिं च्छन्दो दैवतं योगमेव च।
योध्यापयेज्जपेद्वापि पापीयान् जायते तु सः।।

ऋषिछन्दोदेवताश्च ध्यात्वा मन्त्रार्थमेव च।
अनुष्ठानं ततः कुर्यादिति वेदविदो विदुः।।'
इति पितामहस्मरणाम् मन्त्रार्थचिन्तनपूर्वक जपः कार्यः।

ब्रह्माण्डे-

'मनःप्रह्लादनं शौचं मौनं मन्त्रार्थचिन्तनम्।
अव्यग्रत्वमनिर्वेदो जपसम्पतिहेतवः।।

भारद्वाजः-

'निष्ठीवजृम्भणक्रोधनिद्रालस्यक्षुधामदाः।
पतितश्चान्त्यजा लोको दशौते पजवैरिणः'।।

व्यासः-

'न प्रकम्पन्न च हसन्न पार्श्वमपलोकयन्।
नापाश्रितो न जल्पंश्च न प्रावृतशिरास्तथा।।

न पदा पदमाक्रम्य न चैव हि तथा करौ।
न चासमाहितमना न च संश्रावयम् जपेत्।।'

सुमन्तुः-

'खण्डवस्त्रावृतस्यैव वस्त्रार्धलम्बिनस्तथा।
उत्तरीयव्यतितस्य समस्ता निष्फलाः क्रियाः।।'

नारदः-

'श्वशूद्रपतितांश्चैव रासभञ्च रजस्स्वलाम्।
दृष्टा तोयमुपस्पृश्य भाष्य स्नात्वा पुनर्जपेत्।।'

चन्द्रिकायाम् -

जपकाले न भाषेत जपहोमादिकेष्विपि।
एतेष्वेवावसक्तस्तु यद्यागच्छेद्दिजोत्तमः।।
अभिवाद्य ततो विप्रं योगक्षेमञ्च कीर्तयेत्।।'

यमः-

नाभेरधः स्वकायं तु स्पृष्ट्वा प्रक्षालयेत्करौ।
दक्षिणं का स्पृशेत्कर्णं स्मरेद्वा विष्णुमव्ययम्।।

योगयाज्ञवल्क्यः:-

'यदि वाग्यमलोपः स्याज्जपादिषु कथञ्चन।
व्याहरेद्वैष्णवं सूक्तं स्मरेद्वा विष्णुमव्ययम्।।'

प्राणायाममेकवारं कृत्वा अष्टवारां सावित्रीमभ्यस्य 'मित्रस्ये, त्यादिभिः ऋग्भिस्तिसृभिस्तिष्टन् सन्ध्यामुपासीत।।९।।

सावित्रीमभ्यस्य-

विश्वामित्रः-

'देवस्य सवितुस्तस्य धियो यो नः प्रचोदयात्।
भर्गो वरेण्यं तद्ब्रह्म धीमहीत्यर्थ उच्यते।।'

अगस्त्यः-

'यो देवस्सवितास्माकं धियो धर्मादिगोचराः।
प्रेरयेत्तस्य यद्भर्गस्तद्वरेण्यमुपास्महे॥'

सवितुः-जगतां प्रसवितुः। 'सविता वै प्रसवानमाशे' 'उतेशिषे प्रसवात्य त्वमेक' इत्यादिश्रुतेः। वरेण्यं 'वृङ् सम्पत्तौ-एण्यप्रत्ययः'। सर्वेषां भजनीयं भर्गः-तेजः। भञ्जनात् भर्गः प्रकाशप्रदानेन जगतो बाह्यान्तरतमोभञ्जकत्वात्, भर्जनाद्वा। कालात्मतया सकलकर्मफलपाकहेतुत्वात्, धरणाद्वा वृष्टिप्रदानेन भूतानां भरणहेतुत्वात्।

मैत्रायणश्रुतिः-

एतत्सवितुर्वरेण्यं ध्रुवमचलममृतं भर्गाख्यं विष्णुसंज्ञं सर्वधारं धामे' ति।

योगयाज्ञवल्क्यः-

'ईदृशं पुरुषाख्यञ्च सत्यधर्माणमच्युतम्।
भर्गाख्यं विष्णुसंज्ञञ्च ध्यात्वामृतमुपाशनुते॥'

इति। देवस्य द्योतमानस्य। धीमहि। ध्यै चिन्तायाम्। देवत सवितुर्वरेण्यं यत् भर्गः परं धाम तत् ध्यायामः। आदित्यमण्डलान्तर्वर्तिनं तेजोम पुरुषमनुचिन्तयामः। 'येन सूर्यस्तपति तेजसेत्थः'। 'य एषोन्तरादित्ये हिरण्मन पुरुषः इत्याद्याः श्रुतयः। धियो यो नः यः सवितास्माकं धियः हालोपाद्यनादिविषयाणि ज्ञानानि प्रचोदयात् प्रवर्तयति। तस्य सवितुः, तत्भर्गः चिन्तयामः

तथा प्रपञ्चसारे -

'तदिति द्वितीयैकवचनम्। अनेनाशिलवस्तूनां सृष्ट्यादि कारणं तेजोरूपमादित्यमण्डलेभिध्येयं सदानन्दं परं ब्रह्माभिधीयते। तत्र वरेण्यं वरणीयत्वात्। तत्र पापस्य भंजनात् भर्गः। भक्तस्निग्धतया तत्र धीमहि-

'दृश्यो हिरण्मयो देवः आदित्ये नित्यसंस्थितः।
यस्सूक्ष्मस्सोहमित्येव चिन्तयामस्तदेव तु॥
इति।

VII

अथ देवताध्यानम्।

विश्वामित्रः-

'आदित्यमण्डलासीनं रुक्माभं पुरुषं परम्।
ध्यायन् जपेत्तदित्येतां निष्कामो मुच्यते द्विजः॥

स्वप्रभं नित्यमानन्दं हृदये मण्डलेपि च।
ध्यायन् जपेत्तदित्येतां निष्कामो मुच्यतेचिरात्॥'

'स यश्चायं पुरुषे यश्चासावादित्ये। स एकः इति ध्याय' न्नित्यर्थः।

तत्र ध्येयत्वेनोक्तः पुरुषः पुण्डरीकाक्ष इति छान्दोग्ये श्रुयते। यथाः-

'य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यशमश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः। तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी' इत्यादि।

'अन्तस्तद्धर्मोपदेशात्' इति सूत्रार्थोत्राणिप्रेतः। आदित्योपस्थानस्य सूत्रविहितत्वात्।

अगस्त्यः-

'आदित्यमण्डले ध्यायेत्परमात्मानमव्ययम्।
विष्णुं चतुर्भुजं रक्तपङ्कजासनमध्यगम्॥

किरीटहारकेयूरनूपुरैरुपशौभितम्।
हरिं पीताम्बरधरं शङ्खचक्रगदाधरम्॥

प्रसन्नवदनं रत्नकुण्डलैर्मन्डिताननम्।
सर्वरत्नसमायुक्तं सर्वाभरणभूषितम्॥

एवं ध्यात्वा जपेन्मन्त्रं नित्यमष्टोत्तरं शतम्।
सर्वपापविशुद्धात्मा जितकोधो जितेन्द्रियः॥

संसारार्णवमुत्तीर्य परां सिद्धिमवाप्नुयात्।

सनकस्मृतौ -

'रश्मिज्वालासहस्राढ्यं विपुलं मण्डलं रवेः।
स्फुरत् स्फुलिङ्गममलं ज्वालामालासहस्रकम्।
तस्य मध्ये सुखासीनं तप्तहाटकसन्निभम्॥

चतुरङ्गुलमात्रन्तु शुकपत्रनिभाम्बरम्।
रक्तनेत्रधरं रक्तपाणिपादनखं शुभम्॥

शङ्खचक्रगदापाणिं श्रीवत्साङ्कितवक्षसम्।
उद्दामविलसन्मुक्ताछन्नहारोपशोभितम्॥

किरीटकेयुरयुतं कटिसूत्रोपशोभितम्।
एवं ध्यात्वा जपेन्मन्त्रं गायत्रीं नियतश्शुचिः॥'

शौनकः-

कृत्वोत्तानौ करौ प्रातः सायञ्चावोमुखौ करौ।
मध्ये स्कन्धभुजाभ्यान्तु जप एवमुदाहृतः॥

अङ्गुली न वियुञ्जीत किञ्चिदाकुञ्चिते तले।
अङ्गुलीनां वियोगे तु भेदे तु स्रवते जपः॥

स्मृत्यन्तरे -

'अधोहस्तन्तु पैशाचमूर्ध्वहस्तन्तु दैवतम्।
बद्धहस्तन्तु गान्धर्वं मध्यहस्तन्तु राक्षसम्॥

जकारो जन्मविच्छेदः पकारः पापनाशनः।
जन्मकर्महरो यस्मात् तस्माज्जप इति स्मृतः॥

मकारो मन इत्याहुस्त्राकारस्कारणमेव च।
मनस्त्राणसमायुक्तो मन्त्र इत्यभिधीयते॥

गायत्री प्रोच्यते तस्मात् गायन्तं त्रायते यतः।
पुण्यस्य प्रसवात्सैव सावित्री परिकीर्तिता॥'

शातातपः-

'दर्भहीना तु या सन्ध्या यच्च दानं विनोदकम्।
असङ्ख्यातन्तु यज्जप्तं तत्सर्वं स्यान्निरर्थकम्॥

पराशरः-

'त्रिविधो जपयज्ञस्स्यात्तस्य भेदं निबोदत।
यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः॥

मन्त्रमुच्चारयेद्वाचा वाचिकोयं जपस्समृतः।
शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ प्रचारयेत्॥
अपरैश्श्रुतं किञ्चित्स उपांशुर्जपः स्मृतः।
धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदम्॥
शब्दार्थचिन्तनं भूयः कथ्यते मानसो जपः।
त्रयाणां जपयज्ञानां श्रेष्ठस्स्यादुत्तरोत्तरः॥

व्यासः-

'प्रणवव्याहृतियुतां गायत्रीञ्च जपेत्ततः।
समाहितमनास्तूर्णं मनसा वापि चिन्तयेत्'॥

योगयाज्ञवल्क्यः-

'ओङ्कारं पूर्वमुच्चार्य भूर्भुवस्स्वस्तथैव च।
गायत्रीं प्रणवञ्चान्तं जप एवमुदाहृतः'॥

एषा सम्पुटगायत्री 'उभयतः प्रणवां सव्याहृतिका' मिति बोधायनः।

स्मृत्यन्तरे -

'सम्पुटैकषडोङ्कारा गायत्री त्रिविधा मता।
तत्रैकप्रणवा ग्राह्या गृहस्थैर्जपकर्मणि॥
गृहस्थवत्तु जप्तव्या सदैव ब्रह्मचारिभिः।
सम्पुटा च षडोङ्कारा भवेतामूर्ध्वरेतसाम्॥
प्रणवव्याहृतियुता स्वाहान्ता होमकर्मणि।
शुद्धा वात्र प्रयोक्तव्या व्याहृतिप्रणेवैर्विना॥

स्मृतिरत्ने -

शुद्धयैव तु होतव्यं गायत्र्या होमकर्मणि।
त्रिकेणैव जपः कार्यो जपयज्ञप्रसिद्धये'॥

व्यासः-

'प्रणवव्याहृतियुतां गायत्रीञ्च जपेत्ततः।
समाहितमनास्तूर्णं मनसा वापि चिन्तयेत्'॥ इति।

शुद्धमनुः-

'षडोङ्कारां जपेद्विप्रो गायत्रीं मनसा शुचिः।
अनेकजन्मजैः पापैर्मुच्यते नात्र संशयः॥
तिस्रो व्याहृतयः पूर्वं पृथगोङ्कारसंयुताः।
पुनस्संहृत्य चोङ्कारं मन्त्रस्याद्यन्तयोस्तथा॥
सोङ्कारा चतुरावर्त्य विज्ञेया सा शताक्षरा।
शताक्षरां समावृत्य सर्ववेदफलं लभेत्॥
एतया ज्ञातया नित्यं वाङ्मयं विदितं भवेत्।
उपासितं भवेत्तेव स्वयं भुवनपञ्चकम्॥

याज्ञवल्क्यः-

'ब्रह्मचार्याहिताग्निश्च शतमष्टोत्तरं जपेत्।
वानप्रस्थो यतिश्चैव सहस्रादधिकं जपेत्॥
यद्वापत्सु जपेद्देवीमष्टाविंशतिमष्ट वा।
गृहस्थो ब्रह्मजारी च प्रणवाद्यामिमां जपेत्॥
अन्ते यः प्रणवं कुर्यान्नासौ वृद्धिमवाप्नुयात्।

भारद्वाजसंवर्त-'सहस्रपरमां देवीं शतमध्यां दशावराम्।।

गायत्रीं वै जपेद्विद्वान् प्राङ्मुखः प्रयतः स्थितः।
न कदाचिदपि प्राज्ञो गायत्रीमुदके जपेत्।।
गायत्र्यग्निमुखी प्रोक्ता तस्मादुत्तीर्य तां जपेत्'।

पराशरः-

'पूर्वां सन्ध्यां जपंस्तिष्ठेत्सावित्रीमार्कदर्शनात्।।
पश्चिमान्तु समासीनस्सम्यगर्क्षविभावनात्।
तथा मध्याह्नसन्ध्ययामासीनः प्राङ्मुखो जपेत्।।
अच्छिन्नपादा गायत्री ब्रह्महत्यां प्रयच्छति।
छिन्नपादा तु गायत्री ब्रह्महनत्या व्यापोहति।।
चतुर्थ्यान्तु चतुषष्टिं सप्तम्यान्तु तदर्धकम्।
शस्ता प्रदोषे दर्शे च गायत्री दशसङ्ख्यया।।
अष्टाविंशदनध्याये सुदिने तु यथाक्रमम्।

नारदः-

कुशबन्धैर्जपेद्विप्रः सुवर्णमणिभिर्नृपः।।
पुत्रचीवफलैर्वैश्यः पद्माक्षैस्सर्व एव वा।
पुष्ट्यर्थं पञ्चविंशत्या पञ्चदशयामिचारिकः।।
जपस्य गणनां प्राहुः पद्माक्षैर्भक्तिवर्धनीम्।
जपेत्तु तुलसीकाष्ठैः फलमक्षयमशनुते।।

भारद्वाजः-

मध्यमाङ्गुलिमूलेन यत्पर्वद्वितयं भवेत्।
तं वै मेरुं विजानीयाज्जपेत्तन्नातिलंधयेत्।।

नारदः-

'प्रारभ्यानामिकायास्तु मध्यमे पर्वणि क्रमात्।
तर्जनीमूलपर्यन्तं जपेद्दशसु पर्वसु।।
मध्याङ्गुलेर्मध्यरेखां समारभ्य प्रदक्षिणम्।
मध्यमामूलपर्यन्तमङ्गुष्ठेन यथाक्रमम्।।
स्पृष्टिः द्वादशसंख्या स्यादेकवारेण तन्नव।
वामहस्तेन सङ्ख्यातं शतमष्टोत्तरं स्मृतम्'।।

व्यासः-

'तुरीयं तु पदं तस्याः परे ब्रह्मणि संस्थितम्।
उपस्थाय तुरीयेण जपेत्तान्तु समाहितिः।।
जपित्वा त्रिर्नियम्यासून् गायत्रीमभिवाद्य च।
कृत्वा तुरीयोपस्थानं तामुद्वास्योपतिष्टते।।

तुरीयोपस्थानम्। 'गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि; न हि पद्यसे। नमस्ते तुरीयाय दर्शतायपदाय। परोरजसे। असावदोमा प्रापत्तदोम्। अस्य विमलऋषिः तुरीयश्छन्दः परमात्मा देवता मोक्षे विनियोगः।

पितामहः-

'एवं जप्त्वा यथाशक्ति ह्युदिते तु दिवाकरे।
उत्तमेत्यनुवाकेन उद्वास्येच्च यथागतम्।।
उत्तम इत्यनुवाकस्य वामदेव ऋषिः अनुष्टुप् छन्दः गायत्री देवता।
अनेनोद्वास्योपस्थानं कुर्यात्।

मित्रस्येत्यादिभिरित्यादि-

पितामहः-

'मित्रस्येति त्र्यृचस्येह विश्वामित्र ऋषिस्स्मृतः।
भवेद् गायत्रमादिस्तु त्रिष्टुभाविह पश्चिमौ॥

देवता चैव मित्रस्स्यादित्युवाच बृहस्पतिः'।

स्मृत्यन्तरे -

'अथोपतिष्ठेदादित्यमुदयन्तु समाहितः॥

मन्त्रैस्तु विविधैस्सौरैः ऋम्ययुस्सामसम्भवैः।
एताभिः प्राञ्जलिस्सम्यग्विसृष्टोदितमण्डलम्॥

सहस्रांशुं भगवन्तमुपतिष्ठेत भास्करम्।
अथ क्रमान्नामस्कुर्यात् चतुस्सन्ध्याधिदेवताः॥

सन्ध्यां पुरस्तात्सवित्रीं गायत्रीञ्च सरस्वतीम्।
एतास्सन्ध्यादयः प्रोक्ताश्चरस्रो देवताः क्रमात्॥

स्वं स्वं नाम चतुर्थ्यन्तं प्रणवादिनमेन्तकम्।
मन्त्रमासामिह प्रोक्तं प्रणमेत्स्वस्वमन्त्रतः॥

केचिद्धि मुरयः प्राहुः प्रतिमन्त्रं प्रदक्षिणम्।
कुर्वन् प्रणामं कुर्वीतित्येताभ्यो भक्तितो द्विजः॥

सर्वाभ्यो देवताभ्यश्चेत्येतत्प्रणवसपुटम्।
उक्ता नमो नम इति प्रणमेत्सर्वदेवताः॥

कामो कार्षीन्मन्युरकार्षीदित्येतत्पूर्वमन्त्रवत्।
उक्ता प्रदक्षिणेनैव नमस्कुर्यात्रयीतनुम्॥

प्राची च दक्षिणा चैव प्रतीची चोत्तरोर्ध्वका।
अधरा चान्तरिक्षा च एतास्सप्तोदिति दिशः॥

सन्ध्यादीनां यथाप्रोक्तं मन्त्रमासां तथैव च।
ज्ञात्वा प्रदक्षिणेनैताः प्रणमेत्स्वस्वमन्त्रतः॥

एवं सन्ध्यामुपास्याथ पितरावग्रजान् गुरून्।
त्रिवर्षपूर्वाञ्छिष्टांश्च पार्श्वस्थानमिवादयेत्॥

उदितार्कां पश्चिमार्कामिति सन्ध्ये यथादिशम्।

विश्वामित्रः-

तदित्युचस्समो नास्ति मन्त्रो वेदचतुष्टये॥

सर्वे वेदाश्च यज्ञाश्च दानानि च तपांसि च।
समानि कलयाप्याहुः मुनयो न तदित्युचः॥

परिहाप्यापि वेदांस्त्रीन् कर्माणि विहितानि च।
सावित्रीमन्त्रमाश्रित्य द्विजो भवति निर्भयः'॥

ब्राह्मकल्पे -

'सावित्रीं विस्तृतां दिव्यां यः पठेत् श्रृणुयात्तु वा।
मुच्यते सर्वपापेभ्यः परं ब्रह्माधिगच्छति'॥

सप्तव्याहृतिपूर्वाञ्चेदाद्यन्तप्रणवान्विताम्।
मनसा वा जपेच्चैव दशकृत्वोवरः स्मृतः'॥

विश्वामित्रः-

'षट्कृत्वस्त्वभ्यसेद्यद्वा प्राणापानौ समाहितः।
प्राणायामो भवेदेष सर्वपापप्रणाशनः॥

सहस्रकृत्वस्त्वभ्यस्य: बहिरेतत्तिकं द्विजः।
महतोप्येनसो मासात्तवचेवाहिविंमुच्यते॥

पितामह:-

'सहस्रकृत्वः सावित्रीं जपेदेकाग्रमानसः।
शतकृत्वोपि वा सम्यक् प्राणायामपरो यदि॥
सन्ध्यामुपासते ये तु सततं संशितव्रताः।
विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम्'॥
'ब्रह्मणोपासिति देवी विष्णुना शङ्करेण च।
कस्तं नोपासयेते देवीं श्रेयस्कामो द्विजोत्तमः'॥

बोधायन:-

'प्रणवो व्याहृतयस्सावित्री चेत्येते ब्रह्मयज्ञाः अहरहः ब्राह्मणं किल्बिषात्पापात्पावयन्ति; पूतः पञ्चभिः ब्रह्मयज्ञैरिति।'

विष्णुधर्मोत्तरे -

'जपेनैकेन गायत्र्या नाशयेदुपपातकम्।
जन्मत्रयार्जितं पापं दहेद्द्वयजपेन सः॥
सप्तजन्मार्जितं पापं हरते चाष्टभिर्जपैः।
तथैव विंशतिजपाद्गायत्री सर्वपापहा॥
कुलं तारयते तस्य सप्त सप्त च सप्त च।
जप्त्वा चाष्टशतं देवीं सर्वपापक्षयावहाम्॥
जन्मत्रयार्जितं पापं निर्धूय दिवि मोदते।
अष्टोत्तरसहस्रेण कुलसप्रतिसंयुतः॥
ब्रह्मलोक समासाद्य ब्रह्मवन्मोदते चिरम्।
एवंप्रभावा सा देवी गायत्री ब्रह्मवर्धनी॥
जिह्वाग्रे वर्तते यस्य तस्मात्कः पुरुषोधिकः'॥
इति

अथ एवाष्टावरामित्युक्तम्।

मध्याह्न आपः पुनन्त्वित्याचम्य तथा प्रोक्ष्य 'उदूय' मित्यादि भिस्तिष्ठन्नादित्यमुपस्थाय तथा करोति॥१०॥

मध्याह्ने विशेषः। आपः पुनन्त्वित्याचमनम्। ओपो हिष्ठेति प्रोक्षणम्।

पितामह:-

'आपः पुनन्त्वित्येतस्य आप एव भवेदृषिः।
ब्रह्मणस्पतिरित्येषा देवतेति च कीर्त्यते॥
अनुष्टुबिति छन्दः स्यात् पानेपां विनियुज्यते'॥
इति तथाप्रोक्ष्येत्युक्तत्वात् प्रातस्सन्ध्यावन्मार्जनादिकम्।
अर्ध्यमेक प्रदातव्यं मध्यह्ने भास्करं प्रति'॥
इति

उपसंहारः पूर्ववत्। उपस्थाने तु-

पितामह:-

'आसत्याद्यृक्षु पूर्वे द्वे त्रिष्टुभौ कवयो विदुः।
गायत्री तु तृतीया स्यात् चतुर्थी जगती मता॥
उष्णइक् तच्चक्षुराद्यस्य मन्त्रस्य छन्द उच्यते।

हिरण्यस्तूब इत्येव ऋषिर्देवोत्र भास्करः'॥

सायं 'अग्निश्चे' त्यादिनाचम्य तथा प्रोक्ष्य 'यच्चिद्धी' त्यादिभिः सामभिरुपास्यासीनस्तथा करोति॥११॥

सायं अग्निश्चेत्यादिना आचम्येति।
अग्निश्चेत्यनुवाकस्य छन्दो गायत्रमुच्यते।
ऋषिस्सूर्य इति ज्ञेयो देवता च हुताशनः'॥

एवं मन्त्राचमनं कृत्वा मार्जनादिकं पूर्ववत् कुर्यात्। उपस्थाने च 'इम मे वरुण' इत्यादि पञ्चनामादितस्तिसृणां शुनश्शोफऋषिः। चतुर्थ्याः वसिष्ठः। पञ्चम्या अत्रिः। प्रथमातृतीययोर्गायत्रं द्वितीयापञ्चम्योः त्रिष्टपूछन्दः। चतुर्थ्या जगती छन्दः। सर्वासां वरुणो देवता। एवमुपस्थाय प्रदक्षिणादिकं कुर्यात्।

बृहस्पतिः-

'वारुणीभिस्तथा दित्यमुपस्थाय प्रदक्षिणम्।
कुर्वन् दिशो नमस्कुर्यात् दिगीशांश्च पृथक्पृथक्॥

चन्द्रिकायाम् -

'वामहस्ते जल कृत्वा ये तु सन्ध्यामुपासते।
सा सन्ध्या वृषली ज्ञेया असुरास्तैस्तु तर्पिताः॥
ब्रह्मा- 'धाराच्युतेन तोयेन सन्ध्योपास्तिविर्गार्हिता॥
'उदितार्कां पश्चिमार्का मिति च सन्ध्ये यथादिशं तन्नामादिना दिग्दंवताः पितन् सापमव्यं ब्रह्माणञ्चोदङ्मुखो नारायणादीन् नमो न्तेनोपतिष्ठेत॥१२॥

VIII

अथ तर्पणम्

आश्वमेधिके-

उत्थाय तु नमस्कृत्य द्विजो दिग्देवता अपि।
ब्रह्माणञ्च ततश्चाग्निं पृथिवीमोषधीस्तथा॥
वाचं वाचस्पतिञ्चैव माञ्चैव सरितस्तथा'॥ इति नारायणशब्देन परमात्मध्यानम्।
'परमात्मानमात्मानं भावयित्वा द्विजोत्तमः।
आत्मानमात्मना ध्यात्वा ह्यात्मन्येवोपसंहरेत्॥
कर्णयुग्मे स्वहस्ताभ्यां स्पृष्टा जानुद्वयादिकम्।
चरणाङ्गुष्ठपर्यन्त सम्मृज्य तु शनैश्शनैः॥
दक्षिणश्रवणे बाहुं दक्षिणञ्च प्रसार्य च।
बाहूपरि शिरो नम्रमुक्तं तदभिवादने॥
सर्वतीर्थेषु तीर्थञ्च किं तीर्थ परमं नृणाम्।
यत्रोपस्पृश्य पूतात्मा नरो भवति नित्यशः॥'

नारदः-

'देवर्षिपितृतीर्थानि ब्राह्मं मध्येथ वैष्णवम्।
नृणां तीर्थानि पञ्चाहुः पाणौ सन्निहितानि वै॥
आद्यं तीर्थन्तु तीर्थानां वैष्णवो भाग उच्यते।
यत्रोपस्पृश्य वर्णानां चतुर्णां वर्धते कुलम्॥
पितृदैवतकार्याणि वर्धन्ते प्रेत्य चैव हि'। इति।

कूण्याभ्यस्स्वाहेत्यादिभिस्तर्पयति। श्रुतिः। 'कूप्याभ्यास्सवाहाद्भ्स्स्वाहेत्यपां होमं जुहोति' इति। नन्वत्र देवताद्रव्ययोरभेदावगमाद्विरोध इति चेद उच्यते। 'अप एव ससर्जादा' वित्यादिभिः- आपो वा इदँ सर्व मित्यादिभिश्च प्रमाणैः सर्वदेवतारूपत्वेन श्रुतानां अपां नानारूपसम्भवशक्तेः विद्यामानत्वात्र विरोधः। यद्वा अपासद्भिस्तर्पणं तदभिमानिदेवताया इति। यद्वा 'योप्सु तिष्टन् योपोन्तरे सञ्चरन् यमापो न वेद यस्यापः शरीर' मित्यादिभिः श्रुतिभिः तदन्तर्यामिणः परमात्मनो वेति न विरोधः।

भूपति तर्पयामि भुवनपति तर्पयामि भूतानां पति तर्पयामि प्रजापतिं तर्पयामि ब्रह्माणं तर्पयामि नारायणं तर्पयामि महादेवं तर्पयामि स्कन्दं तर्पयामि विघ्नं तर्पयामि विनायकं तर्पयामि।।२।।

यथादिशं तन्नामादिना दिग्देवतास्तर्पयति।।३।।

दिग्देवता इत्यनेन लोकपालानां निवृत्तिः।
श्रीविष्णुपुराणे- 'सुधन्वा शङ्खपालश्च कर्दमस्यात्मजा द्विज।
हिरण्यरोमा चैवास्य चतुर्थः केतुमानिति।।
निर्द्वंद्वा निरभिमाना निस्तन्द्रा निष्परिग्रहाः।
लोकपालाः स्थिता ह्येते लोकालोके चतुर्दिश मिति।।

इन्द्रं तर्पयामि यमं तर्पयामि वरुणं तर्पयामि कुबेरं तर्पयामि अग्निं तर्पयामि निर्ऋतिं तर्पयामि वायुं तर्पयामि ईशानं तर्पयामि।।४।।

दिग्देवता उपपादयति इन्द्र मित्यादिना।

आदित्यं तर्पयामि सोमं तर्पयामि अङ्गारकं तर्पयामि बुधं तर्पयामि वृहस्पतिं तर्पयामि शुक्रं तर्पयामि शनैश्चरं तर्पयामि राहुं तर्पयामि केतुं तर्पयामि इति ग्रहा स्तर्पयति।।५।।

नक्षत्राणि तर्पयामि ताराँ स्तर्पयामि विश्वान् देवा स्तर्पयामि मर्वाश्च देवतास्तर्पयामि वेदाँ स्तर्पयामि यज्ञाँ स्तर्पयामि छन्दाँ सि तर्पयामि।।६।।

स्वगोत्रादि सप्तऋषी स्तर्पयति।।७।।

विश्वामित्रं तर्पयामि जमदग्निं तर्पयामि भरद्वाजं तर्पयामि गौतमं तर्पयामि अत्रिं तर्पयामि वसिष्ठं तर्पयामि कश्यपं तर्पयामि सर्वान् ऋषीं स्तर्पयामि सर्वा ऋषिपत्नीं स्तर्पयामि।।८।।

ननु-अत्र स्वगोत्रस्यादिभूतेन सहेतरान् सप्तऋषीन् इति वा उत सप्तैवेति वा। प्रथमे शिरसि......। नवसंख्याकत्वेन विद्यामानत्वात्। द्वितीये तु प्रत्यक्षापलापः, इति चेत् सत्यम्। नात्र संख्या विवक्षिता। सप्तऋनित्यत्र वैखानसानां वंशकर्तारः विश्वामित्रादयः सप्तैव। भृगजमदग्न्योरेकत्वात्। पृथक्त्वेन जमदग्निप्रतिपादनं

प्राचीनावीती पित्र्याणि करोति।।९।।

तर्पणादीनीत्यर्थः। तत्र तत्र विशेषोवगन्तव्यः।

'ऊर्म्योदकान्त' इति पितृभ्यः तितामहेभ्यः प्रतितामहेभ्यः ज्ञातिवर्गेभ्यः पितृपत्नीभ्यः पितामहपत्नीभ्यः प्रतितामहपत्नीभ्यः ज्ञातिवर्मपत्नीभ्यः स्वधानमस्तर्पयामीति तर्पयति॥१०॥

अथ निवीती भौमाँ स्तर्पयामि भौमदिव्या स्तर्पयामि नागां स्तर्पयामि नागदिव्या स्तर्पयामि॥११॥
अथ पितृतर्पणान्तरं निवीती। यद्वा व्यवहितत्वात् ऋषितर्पणस्या निवीतित्वद्योतकः।
'पितरो मुनयो देवा भूतानि मनुजास्तथा।
कृमिकीटपतङ्गश्च वयांसि पशवो मृगाः॥
गृहस्थमुपजीवन्ति ततस्तृप्तिं प्रयान्ति च॥
इति मार्कण्डेयस्मरणात्।
'ससोमेग्रहनक्षत्रतारकं व्योममण्डलम्।
सशैलनिम्नगाम्मोधिकाननानि च तर्पयेत्॥

इत्याश्वमेधिकवचनाच्च मनुष्याणां प्राचीनावीतं पितणामुपवीप्तं देवान् मुपव्ययते' इति। 'अथ निवीतकार्याणां प्राचीनावीतं पितणामुपवीप्तं देवासा मुपव्ययते' इति। 'अथ निवीतकार्याणि-ऋषीणां तर्पण, व्यवायः, प्रजास्कारोन्यत्र होमात्. मूत्रपुरीषोत्सर्गः, प्रेतोद्वहनं यानि चान्यानि मुश्य कार्याणि कण्ठेपसक्तं निवीत' मिति बोधयनस्मरणात् ऋषिपत्नीं भौमत्वादिसम्भवाच्चात्र निवीतग्रहणं ऋषितर्पणादाप्वपि निवीतत्वद्योतकम्।
'यावन्तो जलार्थिनस्तायन्तः प्रतिगृह्लन्तु' इत्युदयानन्तरं श्रुयते

कात्यायनः-

'यश्च श्रुतिजपः प्रोक्तो ब्रह्मयज्ञस्स उच्यते।
स त्वर्वाक् तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः॥
इति॥

IX

अथ नित्य ब्रह्मयज्ञः

वैश्वदेवं हुत्वा अतिथिमाकांक्षे दित्यनतरं 'जघनेन गाईत्री मुपविश्योपासनं वा 'अधीहि भो' इति गार्हपत्यमुक्त्वा 'प्राणायामैः त्रिरायइत्युक्ता 'यदधीते......... स ब्रह्मयज्ञ' इति बोधायनः।

मनुः-

'पञ्च क्लप्ता महायज्ञाः प्रत्यहं गृहमेधिनः।
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्॥
होमो दैवो बलिभौंतोन्नयज्ञेतिथिपूजनम्'॥ इति॥

'अप आप्लुत्य यज्ञोपवी' तीत्यादिना 'माध्यन्दिनानन्तरं ब्रम्मयज्ञं तदनन्तरं पर्तणञ्चे' त्याश्वलायनस्मरणरीत्या बोधायनादिभिः श्रुतिविरुद्धकालान्तरे- दूक्तेरयुक्तत्वात्, श्रुत्युक्तमार्गेण सन्ध्योपासनानन्तरकालस्यैव न्याय्यत्वात्
'प्रातस्स्नात्वाथ सावित्रीं जप्त्वा सन्ध्यामुपास्य च।
सूक्तानि ब्रह्मयज्ञान्ते जपेत् द्वादश संयतः॥
अथानुदितहोमी चेद्धोमं कुर्यादथाग्निषु।

जुहोत्युदितहोमी चेत् प्रातस्सन्ध्यावसानके।।

इति क्रियाधिकारे भगवदाराधनविधौ भृगुणा प्रतिपादितत्वाञ्च सन्ध्योपासनानन्तरं ब्रह्मयज्ञः कर्तव्यः। यद्वा होमान्ते।।

शुद्धे देशे बर्हिराम्तीर्य ब्राह्ममासनमास्थाय पवित्रपाणिः ब्रह्मा ञ्जलिं कृत्वा प्राङ्मुखः सावित्रीपू नित्यं 'इपे त्वोर्जे त्वा' इत्यादि यथाकामम्।।१ ३।।

ब्रह्मयज्ञविधिरुच्यते शुद्धे देशे इत्यादिना। अनेध्यशवशूद्रान्त्यपति तान्तिके न कर्तव्यः। बर्हिरास्तीर्य। श्रुतिः। 'दर्भाणां महदुपस्तीर्योपस्थं कृत्वा प्राङासीनः स्वाध्यायमधीयीत- 'अपां वा एष ओषधीनाँ रसः यद्दर्भाः। सरसमेव ब्रह्म कुरुते' इति।

ब्राह्ममासनमास्थाय।

भृगुः-

'पादौ भूमिस्पृशौ कृत्वा स्वस्तिंकेनैव बन्धयेत्।
वाममुत्तानकं कुर्यात् करं पश्चाञ्च दक्षिणम्।।
एवं ब्रह्मासनं कुर्यात् देवदेवमनुस्मर' न्निति।

मरीचिः-

'दक्षिणपादमूर्ध्वं वामपादमधः कृत्वा जान्वन्तरेऽङ्गुष्ठौ निकुञ्चयाङ्के पाणिं सन्न्यस्य तदूर्ध्वं दक्षिणं पाणिमुत्तानं न्यस्य भ्रमध्येक्षण आसीत तद्ब्रह्मासन' मिति।

पवित्रपाणिः।

चन्द्रिकायाम् -

'यज्ञोपवीते मौञ्ज्याञ्च तथा कुशपवित्रके।
ब्रह्मग्रन्तिं विजानीयात् अन्यत्र तु यथारुचि।।

गावां वालपवित्रस्य सौवर्णस्य तथैव च।
न ब्रह्मग्रन्थिनियमो धारयेत्तु यथातथम्।।

जपकर्महरा ह्येते असुरा व्यक्तरूपिणः।
पवित्रकृतहस्तस्य विद्रवन्ति दिशो दश।।

आचम्य-ब्रह्माञ्चलिं कृत्वा।

मनुः-

'ब्रह्माञ्जलिकृतोध्याप्यो लघुवासा जितेन्द्रियः।
संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः।।

स्मृतिरत्नावल्याम् - 'सव्यस्य पाणेरङ्गुष्ठप्रदेशिन्योत्तु मध्यतः।
दक्षिणस्याङ्गुलीर्न्यस्य चतस्रोङ्गुष्ठवर्जिताः।।

तथा सव्यकराङ्गुष्ठं दक्षिणाङ्गुष्ठवेष्टितम्।
सदर्भहस्तो जानूर्ध्वे दक्षिणे दक्षिणोत्तरम्।।

कृत्वा जानुनि कर्तव्यमेतत्कर्म करोमि यत्।
तिथिवारादिकं स्मृत्वा सुसङ्कल्प्य यथाविधि।।

स्वमानसेन वाचा वा स तु सङ्कल्प उच्यते।
प्रणवं व्याहृतिश्चैव गायत्रीञ्च जपेत् क्रमात्।।

पच्छोर्धर्चस उच्छासात् वेदादींश्चतुरो जपेत्।
हरिरोमितिनिर्दिश्य यत्कर्म क्रियते बुवैः।।

अधीयते वा राजर्षे तद्धि वीर्योत्तरं भवेदिति। 'दक्षिणोत्तरौ पाणी कृत्वा सपवित्रावोमिति प्रतिपद्यते' 'ब्रह्मयज्ञेन यक्ष्ये- विद्दुदसि-प्राङासीनस्स्वाध्यायमधीयीत' इति श्रुतिः।

आश्वमेधिके -

भगवान्-

'सावित्रीञ्चैव वेदांश्च तुलयातुलयन् पुरा।
देवा ऋषिगाणाश्चैव सर्वे ब्रह्मपुरस्सराः।।

चतुर्णाणपि वेदानां सा हि राजन् गरीयसी।
यथा विकसिते पुष्पे मधु गृह्णति षट्पदः।।
समुत्सृज्य रसं सर्वं निरर्थकमसारवत्।
एवं हि सर्ववेदानां सावित्री प्राण उच्यते।।

निर्जीवा हीतरे वेदा विना सावित्रिया नृप'।। इति

तस्य क्रमः।

'ओं भूः तत्सवितुर्वरेण्यं-ओं भर्गो देवस्य धीमहि - ओं सुवः धियो यो नः प्रचोदयात्' इति पच्छः। ओं भूर्भुवः तत्सवितुर्वरेण्यम् भर्गो देवस्य धीमहि, ओं सुवः धियो यो नः प्रचोदयात्' इत्यर्वर्चशः। ओं भूर्भुवस्सुवः तत्सवितुवरेण्यम् भर्गो देवस्य धीमहि धियो यो नः प्रचोदयत् ' इति समस्ता। एवं जपत्वा अनन्तरं 'इषे त्वोर्जे त्वा-अग्निमीले- अग्न आयाहि शन्नो देवी' रित्यादि जपेत्।

पैठीनसिः-

'स्वशाखध्ययनं यत्तत् ब्रह्मयज्ञं प्रचक्षते।
ब्रह्मयज्ञपरो विप्रो ब्रह्मलोके महीयते'।। इति

वसिष्ठः-

'ऋवसामाथर्ववेदोक्तान् जपेन्मन्त्रान् यजूंषि च।
जपित्वैवं ततः कुर्याद्देवर्षिपितृतर्षणम्'।। इति

तलवकारोपनिषदि- ' कस्सविता का सावित्रीत्यारभ्य 'तस्या एष प्रथमः पादः भूः तत्सवितुर्वरेण्यम्, अग्निर्वै वै वरेण्यं चन्द्रमा वै वरेण्यं, तस्या एष दिवितीयः पादः भुवः भर्गो देवस्य धीमहि, अग्निर्वै भर्गः, चन्द्रमा वै भर्गः, तस्या एष तृतीयः पादः सुवः धियो यो नः प्रचोदयात्, यज्ञो वै प्रचोदयति, सी चैव पुरुषश्च प्रजनयतः। भूर्भुवस्सुवस्तत्सवितुवरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्' इति। यज्ञो वै प्रचोदयति स्त्री चैव पुरुषश्च प्रजनयतः यो वा एतां सावित्रीं वेद। अपपुनर्मृत्युं जयति गायत्र्या एव सलोकतां जयती ति द्विः।

मनुः-

'अकारञ्चप्युकारञ्च मकारञ्च प्रजापतिः।
वेदत्रयान्निरदुहत् भूर्भुवस्स्वरुदीर्य च।।

त्रिभ्य एव तु वेदेभ्यः पादं पादममूदुहत्।
तदित्यृचोस्यास्सावित्र्याः परमेष्ठी प्रजापतिः'॥
इति

बोधायनः-

'पच्छोर्धर्चचः समस्तां व्याहृतीः विहृता पादादिष्वन्तेषु' वेति।

'एकामप्यृंच यजुस्साम वा तद्ब्रह्मयज्ञस्सन्तिष्ठते' इति श्रुतिः।

यथाकामम्-यथोक्तम्।

मनुः-

'ब्रह्मयज्ञे जपन् सूक्तं पौरुषं चिन्तयन् हरिम्।
स सर्वान् वेदान् साङ्गोपाङ्गान् द्विजोत्तमः'॥ इति

श्रुतिः-

'नमो ब्रह्मण इति परिधानीयां त्रिरन्वाह' इति अप उपस्पृश्य गृहानेति ततो यत्किञ्चिद्ददाति सा दक्षिणा' वृष्टिरसि वृश्चमे पापनमृतात्सत्य मुपागा' मित्यप उपस्पृश्य काण्डर्षितर्पणञ्च कुर्यात्।

स्मत्यन्तरे च- 'अथ काण्डऋषीने तानुदकाञ्जलिभिश्शुचिः।
अव्यग्रस्तर्पयेन्नित्यं मन्त्रैर्वैष्णवनामभिः॥ इति

एवं नित्यब्रह्मयज्ञ उक्तः।

X

अथ नैमित्तिकम्

नैमित्तिकम्। 'ऋतञ्च सत्यञ्च - देवकृतस्य - यन्मे गर्भे परत्समन्दी- वसोः पवित्रं- जातवेदसे- विष्णोर्मुकं-सहस्रशीर्षा-एकाक्षरं-आ त्वा हार्षं-त्वमग्ने-पवस्वादीन् स्वाध्यायमधीयीत॥१४॥

सौरीभिः ऋग्भः यथाकाममादित्यञ्चोपतिष्ठेत॥१५॥

नैमित्तिकमृतञ्च सत्यञ्चेत्यादि- 'ऋतं च सत्यं च - देवकृतस्य - यन्मे गर्भेतरत्समन्दीति प्राजपत्ये, वसोः पवित्रं' इति सौम्ये इत्यादि तत्तद्दतेष्वधीयमानं सूक्तम्। यद्वा-

वसिष्ठः-

'अधमर्षण देवकृतं शुद्धवत्यस्तरत्समाः।
कूश्माण्ड्यः पावमान्यश्च विराजा मृत्युलाङ्गलम्॥
दुर्गा व्याहृतयो रुद्रा महापातकनाशनाः॥ इति

तत्र तरत्सभन्दी-

ब्राह्मणे-

'चतुर्ऋचो भवति प्रतिष्ठाया' इत्यारभ्य

'कथं नाविन्दमात्तमप्रतिगृहीतं स्यादिति तौ प्रत्येतं 'ध्वस्रयोः पुरुष सहस्राणि च दद्महे। तरत्समन्दी धावतीति। ततो वै तयारात्तमगृहीतमभवत्। आत्तमस्याप्रतिगृहीतं भवति। य एवं वेद' इति।

'बह्वप्रतिग्राह्यस्य वा प्रतिगृह्य अयाज्यं वा याजयित्वा नाश्यान्नस्य ऋशित्वा तरत्समन्दीयं जपे' दिति

'प्रतिगृहिप्यमाणश्य प्रतिगृह्य तथैव च।
ऋचस्तरत्समन्द्याद्याः चतस्रः परिवर्तयेत्।।
अमोज्यानान्तु सर्वेषां प्रजानां पावनं स्मृतम्'।।
इति।।

सौम्यत्वात् वसोः पावत्रमिति। जातवेदसे- ऋग्ब्राह्मणे- 'जातवेदसे तम सोम' मिति जातवेदस्यां पुरस्तात्सूक्तस्य शासति। स्वस्त्ययनं वै जातवेदस्याः ततायै। स्वस्त्ययनमेव तत्कुरुते। इति

मनुः-

'दुर्गमध्वान प्रपद्य जातवेदससहस्रेणादित्यम ुपतिष्टते। आसन्नभयो माच्छत्रुव्यवहारराजकुलव्यसने बद्धो वा शतं जपेदेतदेव दुस्सवन्पेषु उपेदेतदेवेति। विष्णोर्नुकमिति।

सर्वं तदाराधनमेव मत्वा ध्यायन् हरिं यज्ञपुमांसमीशम्।

जांश्च विष्णोर्नुकमित्यथान्ते सर्वेषु यज्ञेष्वपि हन्ति दोषान्'।। इति

सहस्रशीर्षा।

'वेदेषु पौरुषं सूक्तं धर्मशास्त्रंषु मानवम्।
भारते भगवद्गीता पुराणेषु च वैष्णवम्।।
श्रुतिषु प्रबला मन्त्रास्तेष्वप्यध्यात्मवाचिनः।
तत्रापि पौरुषं सूक्तं न तस्माद्विद्यते परम्'।। इति

शौनकः-

'प्रायश्चित्ते जपे चैव विष्णोराराधने तथा।
मोक्षे वश्येग्न्युपस्थाने सुपुत्रप्रापणेपि च।।
सर्वकामफलावाप्तावारोग्ये मृत्युनाशने।
एतेष्वर्थेष्विदं सूक्तं मुनिभिर्विनियुज्यते'।। इति।।

प्रायश्चिते- वाधूलसूत्रे।।

'यत्र यत्र कर्मभ्रेषो यज्ञकर्मभ्रेषो वा तत्र तत्र पुरुषं ध्यायता पुरुषसूक्तमुच्चरेत्' इति।

जपे-यमस्मृतौ योनूचानं द्विजं मत्यों हतवानर्थलोभतः।
स वदेत्पौरुषं सूक्तं जलस्थः चिन्तयन् हरिम्।।

जप्त्वा तु पौरुषं सूक्तं मुच्यते गुरुतल्पगः।

सकृज्जप्त्वास्यवामीयं शिवसङ्कल्पमेव च।। इति

आराधने- दद्यात् पुरुषसूक्तेन यः पुष्पाण्यप एव वा।
अर्चितं स्याज्जगादिदं तेन सर्वचराचरम्' ।।
इति।।

मैत्रे- वासिष्ठयोगरत्ने

संसारान्मोक्षमिच्छन् यः स सन्न्यस्येषणात्रयम्।
निः पृहस्सर्वकामेभ्यः समलोष्टाश्मकाञ्चनः।।

शुचौ देशे समासीनः वाग्यतो नियतेन्द्रियः।
ब्रह्मविद्यां ततो धीमान् गृह्णन् पादौ गुरोर्मुनिः'।।

इत्यारभ्य

'ध्यायेन्नारायण देवं हृदयाम्बुजमध्यगम्।
दिग्देशकालावस्थाद्यैरनवच्छेद्यवैभवम्॥

सर्वदा पौरुषं सूक्तं मनसैव जपेच्छुचिः'॥ इति
वश्ये- उत्तरागार्म्ये वश्याध्याये
'सर्वं जगन्मम भपोदिति सञ्चिन्तयन्मुनिः।
ध्यायेत्पुरुषसूक्ते न प्रतिपाद्य जनार्दनम्।

वशे भवति तस्यापि जगत्सर्वं मुनेरपि'॥ इति
इत्युपस्थाने- हुत्वाग्निं विधिवद्भक्तया ऋग्मिष्षोडशभिर्बुधः।
कृताञ्जलिपुटो भूत्वा स्तुवन्नाशीः प्रयोजये' दिति॥
आयुश्मत्पूत्रप्राप्तौ-ऋग्विधाने
'पुत्रीयन् ब्राहणश्शुद्धः सुप्रसन्नमना भवेत्।
पौरुषेणैव सूक्तेन जुहुयादाज्यमन्वहम्॥

पयसापि चरुं हुत्वा तेनापि जुहुयाच्छुचः।
हुतशिष्टं चरुं शुद्धमश्नीयाताञ्च दम्पती॥

एवं त्रिशद्दिनादूर्ध्वं गर्भो भवति सुस्थितः।
सर्वलक्षणसम्पन्नः पुत्रो भवति पावनः'॥ इति

'शुक्लपक्षे शुभे वारे पुंनक्षत्रे सुगोचरे।
द्वादश्यां पुत्रकामाय चरुं कुर्वीत वैष्णवम्॥

दम्यत्योरुपवासस्सयोदेकादश्यां सुरालये।
ऋग्भिः षोडशभिः सम्यगर्चयित्वा जनार्दनम्॥

चरुं पुरुषसूक्तेन प्राशयेत्पूत्रकाम्यया।
प्राप्नुयाद्वैष्णवं पुत्रमचिरात्सन्ततिक्षम' मिति॥

एकाक्षरमात्वाहार्षीमिति। फलं तत्रैवोक्तम् 'त्वमग्ने रुद्र इति।पयस्यादीनीति- 'पवस्व शतं वैखानसाः इति।

ब्राह्मणे-

'अथ खल्वयमार्ष उपदेशो भवति ऋषीणां नामधेयगोत्रोपधारणं त्व यशस्यं धन्यं पुण्यं पुत्र्यं पशव्यं ब्रह्मवर्चस्यं प्राक् प्रातराशकभित्याचक्षते य इदमुपधारयेदेकैकस्यर्षे दिव्यं सहस्रमतिथिर्भवति। अभिनन्दितः पूजितेमानितः ततः स्वाध्यायफलमुपजीवति' इति। आदिशब्देन पावमान्यादयः।

जपेद्वाप्यास्यवामीयं पावमानीरथापि वा।
कुन्तापं वालशिल्यांश्च निवित्प्रेषं वृषाकपिम्॥

होतॄन् रुद्रान् पितॄन् जप्त्वा मुच्यते सर्वपातकैः'॥
इति श्रौते- 'मापित्रेण तृचेनाहवनीयमुपतिष्टते। दूरं प्रवसन् स्वस्तिकामस्तदेशं तृचेन पश्येत् स्वस्ति पुनरागच्छेच्छुद्धिकामश्चैतं जपे' दिति।
जपविधौ नियमः

अङ्गिराः-

'प्रच्छन्नानि च दानानि ज्ञानञ्च निरहङ्कृति।
जप्यानि च सुगुप्तानि तेषां फलमनन्तकम्॥

यक्षराक्षसभूतानि सिद्धविद्याधरोरगाः।

हरन्ति प्रसमं यस्मात् तस्माद्गुप्तन्तु कारयेत्।।

गायत्रीमपि

व्यासः-

'यक्षरक्षःपिशायाश्च ग्रहास्सर्वे विभीषणाः।

जपिनं नोपसर्पन्ति दूरादेव प्रयान्ति ते'।। इति

एवं नैमित्तिकं स्वाध्यायमधीयीत।

एवं नैमित्तिकं स्वाध्यायमधीयीत।

याज्ञवल्क्यः- 'वेदधर्मपुराणानि सेतिहासानि शक्तितः।

जपयज्ञार्थसिद्ध्यर्थं विद्याञ्चाध्यात्मिकीं जपेत्'।।

इति

मनुः-

'अपां समीपे नियतो नैत्यक विधिमास्थितः।

सावित्रीमप्यधीयीत गत्वारण्यं समाहितः'।। इति

अर्शक्तस्य गायत्री। ब्रह्मजारिणोपि ब्रह्मयज्ञः

कर्तव्यत्वेन ब्रह्मयज्ञः, सर्वयज्ञानामादि, तस्मात्

उपनयनप्रभृत्येव द्विजैः कर्तव्यः तस्मात् ब्रह्मचारिभिः

गृहस्थैर्विधुरादिभिश्च कर्तव्य एव।

इति श्रीमत्कौशिकवश्येन गोविन्दाचार्यसूनुना वेदान्तचार्यवर्येण श्रीनिवासाख्ययज्वना विरचिते श्रीवैखानससूत्रव्याख्याने तात्पर्यचिन्तामणौ चतुर्थखण्डार्थविवरणं समाप्तम्।।

APPENDIX I

SAURA-UPANISHADS

(1)

Maṇḍala-brāhmaṇopanishat

मण्डलब्राह्मणोपनिषत्।।

ॐ याज्ञवल्क्यो ह वै महामुनिरादित्यलोकं जगाम। तमादित्यं नत्वा भो भगवन्नादित्यात्मतत्वमनुब्रूहीति। स होवाच नारायणः। ज्ञानयुक्त्यमाद्यष्टाङ्गयोग उच्यते। शीतोष्णाहारनिद्राविजयः सर्वदा शान्तिर्निश्चलत्वं विषयेन्द्रियनिग्रहश्चैते यमाः। गुरुभक्तिः सत्यमार्गानुरक्तिः सुखागतवस्त्वनुभवश्च तद्वस्त्वनुभवेन तुष्टिर्निःसङ्गता एकान्तवासो मनोनिवृत्तिः फलानभिलाषो वैराग्यभावश्च नियमाः।

सुखासनवृत्तिश्चीरवा साश्चैवमासननियमो भवति। पूरककुम्भकरेचकैः षोडशचतुःषष्टिद्वात्रिंशत्संख्यया यथाक्रमं प्राणायामः। विषयेभ्य इन्द्रियार्थेभ्यो मनोनिरोधनं प्रत्याहारः। सर्वशरीरेषु चैतन्यैकतानता ध्यानम्। विषयव्यावर्तनपूर्वकं चैतन्ये चेतःस्थापनं धारणं भवति। ध्यानविस्मृतिः समाधिः। एवं सूक्ष्माङ्गानि। य एवं वेद स मुक्तिभाग्भवति॥१॥

देहस्य पञ्च दोषा भवन्ति कामक्रोधनिःश्वासभयनिद्राः। तन्निरासस्तु निःसंकल्पमालध्वाहाराप्रमादतातत्वसेवनम्। निद्राभयसरीसृपं हिंसादितरङ्गं तृष्णावर्तं दारपङ्कं संसारवार्धिं परीतुं सूक्ष्ममार्गमवलम्ब्य सत्वादिगुणानतिकम्य तारक्रमवलोकयेत्। भ्रूमध्ये सच्चिदानन्दतेजः कूटरूपं तारकं ब्रह्म। तदुपायं लक्ष्यत्रयावलोकनम्। मूलाधारादारभ्य ब्रह्मरन्ध्रपर्यन्तं सुषुम्ना सूर्याभा। मृणालतन्तुसूक्ष्मा कुण्डलिनी। तत्र तमोनिवृत्तिः। तद्दर्शनात्सर्वपापनिवृत्तिः। तर्जन्यग्रोन्मीलितकर्णरन्ध्रद्वये फूत्कारशब्दो जायते। तत्र स्थिते मनसि चक्षुर्मध्यनीलज्योतिः पश्यति। एवं हृदयेपि। बहिर्लक्ष्यं तु नासाग्रे चतुःषडष्टदशद्वादशाङ्गुलीभिः क्रमान्नीलद्युतिश्यामत्वसदृग्रक्तभङ्गीस्फुरत्पीतवर्ण द्वयोपेतं व्योमत्वं पश्यति स तु योगी चलनदृष्ट्या व्योमभागवीक्षितुः पुरुषस्य दृष्ट्यग्रे ज्योतिर्मयूखा वर्तन्ते। तद्दृष्टिः स्थिरा भवति। शीर्षापरि द्वादशाङ्गुलिमाने ज्योतिः पश्यति तदामृतत्वमेति। मध्यलक्ष्यं तु प्रातश्चित्रादिवर्णसूर्यचन्द्रवह्निज्वालावलीवत्तद्वि हीनान्तरिक्षवत्पश्यति। तदाकाराकारी भवति। अभ्यासान्निर्विकारं गुणरहिताकाशं भवति। विस्फुरत्तारकाकारगाढतमोपमं पराकाशं भवति। कालानलसमकालानलसमं द्योतमानं महाकाशं भवति। सर्वोत्कृष्टपरमाद्वितीयप्रद्योतमानं तत्वाकाशं भवति। कोटिसूर्यप्रकाशं सूर्याकाशं भवति। एवमभ्यासात्तन्मयो भवति य एवं वेद॥२॥

तद्योगं च द्विधा विद्धि पूर्वोत्तरविभागतः। पूर्वं तु तारकं विद्यादमनस्कं तदुत्तरमिति। तारकं द्विविधम्- मूर्तितारकममूर्तितारकमिति। उभयमपि मनोयुक्तमभ्यसेत्। मनोयुक्तान्तरदृष्टिस्तारकप्रकाशाय भवति। भ्रूयुग्ममध्यबिले तेजस आविर्भावः। एतत्पूर्वतारकम्। उत्तरं त्वमनस्कम्। तालुमूलोर्ध्वभागे महाज्योतिर्विद्यते। तद्दर्शनादणिमादिसिद्धिः। लक्ष्येऽन्तर्बाह्यायां दृष्टौ निमेषोन्मेषवर्जितायां चेयं शाम्भवी मुद्रा भवति। सर्वतन्त्रेषु गोप्यमहाविद्या भवति। यज्ज्ञानेन संसारनिवृत्तिः। तत्पूजनं मोक्षफलदम्। अन्तर्लक्ष्यं चलज्योतिः स्वरूपं भवति। महर्षिवेद्यं अन्तर्बाह्येन्द्रियैरदृश्यम्॥३॥

सहस्रारे चलज्योतिरन्तर्लक्ष्यम्। बुद्धिगुहायां सर्वाङ्गसुन्दरं पुरुषरूपमन्तर्लक्ष्यमित्यपरे। शीर्षान्तर्गतमण्डलमध्यगं पञ्चवक्त्रमुमासहायं नीलकण्ठं प्रशान्तमन्तर्लक्ष्यमिति केचित्। अङ्गुष्ठमात्रः पुरुषोऽन्तर्लक्ष्यमित्येके। उक्तविकल्पं सर्वमात्मैव। तल्लक्ष्यं शुद्धात्मदृष्ट्या वा यः पश्यति स एव ब्रह्मनिष्ठो भवति जीवः पञ्चविंशकः

स्वकल्पितचतुर्विंशतितत्वं परित्यज्य षड्विंशः परमात्माहमिति निश्चयाज्जीवन्मुक्तो भवति। एवमन्तर्लक्ष्यदर्शनेन जीवन्मुक्तिदशायां स्वयमन्तर्लक्ष्यो भूत्वा परमाकाशाखण्डमण्डलो भवति॥४॥

इति मण्डलब्राह्मणोपनिषत्सु प्रथमं ब्राह्मणम्॥१॥

अथ ह याज्ञवल्क्य आदित्यमण्डलपुरुषं पप्रच्छ। भगवन्नन्तर्लक्ष्यादिकं बहुधोऽक्तम्। मया तन्न ज्ञातम्। तद्ब्रूहि मह्यम्। तदु होवाच पञ्चभूतकारणं तडित्कूटाभं तद्वच्चतुःपीठम्। तन्मध्ये तत्वप्रकाशो भवति। सोऽतिगूढ अव्यक्तश्च। तज्ज्ञानप्लवाधिरूढेन ज्ञेयम्। तद्बाह्याभ्यन्तर्लक्ष्यम्। तन्मध्ये जगल्लीनम्। तन्नादबिन्दुकलातीतमखण्डलम्। तद्विद्युल्लेशावच्छुक्लभास्वरम्। तदेव शाम्भवीलक्षणम्। तद्दर्शने तिस्रो मूर्तयः- अमा प्रतिपत् पूर्णिमा चेति। निमीलितदर्शनममादृष्टिः। अर्धोन्मीलितं प्रतिपत्। सर्वोन्मीलनं पूर्णिमा भवति। तासु पूर्णिमाभ्यासः कर्तव्यः। तल्लक्ष्यं नासाग्रम्। यदा तालुमूले गाढतमो दृश्यते। तदभ्यासादखण्डमण्डलाकारज्योतिर्दृश्यते। तदेव सच्चिदानन्दं ब्रह्म भवति। एवं सहजानन्दे यदा मनो लीयते तदा शान्तो भवी भवति। तामेव खेचरीमाहुः। तदभ्यासान्मनःस्थैर्यम्। ततो वायुस्थैर्यम्। तच्चिह्नानि-आदौ तारकवद्दृश्यते। ततो वज्रदर्पणम्। तत उपरि पूर्णचन्द्रमण्डलम्। ततो नवरत्नप्रभामण्डलम्। ततो मध्याह्नार्कमण्डलम्। ततो वह्निशिखामण्डलम् क्रमाद्दृश्यते॥१॥ तदा पश्चिमाभिमुखप्रकाशः स्फटिकधूम्रबिन्दुनाद कलानक्षत्रखद्योतदीपनेत्रसवर्णनवरत्नादिप्रभा दृश्यन्ते। तदेव प्रणवस्वरूपम्। प्रणापानयोरैक्यं कृत्वा धृतकुम्भको नासाग्रदर्शनदृढभावनया द्विकराङ्गुलिभिः षण्मुखीकरणेन प्रणवध्वनिं निशम्य मनस्तत्र लीनं भवति। तस्य न कर्मलेपः। रवेरुदयास्तमययोः किल कर्म कर्तव्यम्। एवंविधश्चिदादित्यस्यो दयास्तमयाभावात्सर्वकर्माभावः। शब्दकाललयेन दिवारात्र्यतीतो भूत्वा सर्वपरिपूर्णज्ञानेनोन्मन्यवस्थावशेन ब्रह्मैक्यं भवति। उन्मन्या अमनस्कं भवति। तस्य निश्चिन्ता ध्यानम्। सर्वकर्मनिराकरणमावाहनम्। निश्चयज्ञानमासनम्। उन्मनीभावः पाद्यम्। सदामनस्कमर्घ्यम्। सदा दीप्तिरपारामृतवृत्तिः स्नानम्। सर्वत्र भावना गन्धः। दृक्स्वरूपावस्थानमक्षताः। चिदाप्तिः पुष्पम्। चिदग्निस्वरूपं धूपः। चिदादित्यस्वरूपं दीपः। परिपूर्णचन्द्रामृतरसस्यैकीकरणं नैवेद्यम्। निश्चलत्वं प्रदक्षिणम्। सोऽहंभावो नमस्कारः। मौनं स्तुतिः। सर्वसंतोषो विसर्जनमिति य एवं वेद॥२॥

एवं त्रिपुट्यां निरस्तायां निस्तरङ्गसमुद्रवन्निवातस्थितदीप वदचलसंपूर्णभावाभाव विहीनकैवल्यज्योतिर्भवति। जाग्रन्निन्दान्तः परिज्ञानेन ब्रह्मविद्भवति। सुषुप्तिसमाध्योर्मनोलयाविशेषेपि महदस्त्युभयोर्भेदस्तमसि लीनत्वान्मुक्तिहेतुत्वाभावाच्च। समाधौ मृदिततमोविकारस्य तदाकाराकारि

ताखण्डाकारवृत्यात्मकसाक्षिचैतन्ये प्रपञ्चलयः संपद्यते प्रपञ्चस्य मनः कल्पितत्वात्। ततो भेदाभावात् कदाचिद्बहिर्गतेपि मिथ्यात्वभानात्। सकृद्विभातसदानन्दानुभवैकगोचरो ब्रह्मवित्तदैव भवति। यस्य संकल्पनाशः स्यात्तस्य मुक्तिः करे स्थिता। तस्माद्भावाभावौ परित्यज्य परमात्मध्यानेन मुक्तो भवति। पुनः पुनः सर्वावस्थासु ज्ञानज्ञेयौ ध्यानध्येयौ लक्ष्यालक्ष्ये दृश्यादृश्ये चोहापोहादि परित्यज्य जीवन्मुक्तो भवेत्। यः एवं वेद॥३॥

पञ्चावस्थाः जाग्रतस्वप्नसुषुप्तितुरीयातीताः। जाग्रति प्रवृत्तो जीवः प्रवृत्तिमार्गासक्तः। पापफलनरकादि मांस्तु शुभकर्मफलस्वर्गमस्त्विति काङ्क्षते। स एव स्वीकृतवैराग्यात्कर्मफलजन्माऽलं संसारबन्धनमलमिति विमुक्त्यभिमुखो निवृत्तिमार्गप्रवृत्तो भवति। स एव संसारतारणाय गुरुमाश्रित्य कामादि त्यक्त्वा विहितकर्माचरन्साधनचतुष्टयसंपन्नो हृदयकमलमध्ये भगवत्सत्तामात्रान्तर्लक्ष्यरूपमासाद्य सुषुप्त्यवस्थाया विस्मृतजाग्रद्वासनानुफलेन तैजसोऽस्मिति तादुभयनिवृत्या प्राज्ञ इदानीमस्मीत्यहमेक एव स्थानभेदादवस्थाभेदस्य परंतु नहि मदन्यदिति जातविवेकः शुद्धाद्वैतब्रह्माहमिति भिदागन्धं निरस्य स्वान्तर्विजृम्भितभानुमण्डलध्यानतदाकाराकारितपरंब्रह्मा कारितमुक्तिमार्गमारूढः परिपक्वो भवति। संकल्पादिकं मनो बन्धहेतु। तद्वियुक्तं मनो मोक्षाय भवति। तद्वांश्च क्षुरादिबाह्यप्रपञ्चोपरतो विगतप्रपञ्चगन्धः सर्वजगदात्मत्वेन पश्यंस्त्यक्ताहंकारो ब्रह्माहमस्मीति चिन्तयन्निदं सर्वं यदयमात्मेति भावयन्कृतकृत्यो भवति॥४॥

सर्वपरिपूर्णतुरीयातीतब्रह्मभूतो योगी भवति। तं ब्रह्मेति स्तुवन्ति। सर्वलोकस्तुतिपात्रः सर्वदेशसंचारशीलः परमात्मगगने बिन्दुं निक्षिप्य शुद्धाद्वैताजाड्यसहजामनस्कयोगानिद्राखण्डानन्दपदानुवृत्या जीवन्मुक्तो भवति। तच्चानन्दसमुद्रमग्ना योगिनो भवन्ति। तदपेक्षया इन्द्रादयः स्वल्पानन्दाः। एवं प्राप्तानन्दः परमयोगी भवतित्युपनिषत्॥५॥

इति मण्डलब्राह्मणोपनिषत्सु द्वितीयं ब्राह्मणम्॥२॥

याज्ञवल्क्यो महामुनिर्मण्डलपुरुषं पप्रच्छ। स्वामिन्नमनस्कलक्षणमुक्तमपि विस्मृतं पुनस्तल्लक्षणं ब्रूहीति। तथेति मण्डलपुरुषोब्रवीत्। इदममनस्कमतिरहस्यस्। यज्ज्ञानेन कृतार्थो भवति तन्नित्यं शांभवीमुद्रान्वितम्। परमात्मदृष्ट्या तत्प्रत्ययलक्ष्यणि दृष्ट्वा तदनु सर्वेशमप्रमेयमजं शिवं परमाकाशं निरालम्बमद्वयं ब्रह्मविष्णुरुद्रा दीनामेकलक्ष्यं सर्वकारणं परंब्रह्मात्मन्येव पश्यमानो गुहाविहरणमेव निश्चयेन ज्ञात्वा भावाभावदिद्वन्द्वातीतः संविदितमनोन्मन्यनुभवस्तदनन्तरमखि लेन्द्रियक्षयवशादमनस्कसुखब्रह्मानन्दसमुद्रे मनः प्रवाहयोगरूपनिवातस्थितदीपवदचलं परंब्रह्म प्राप्नोति। ततः शुष्कवृक्षवन्मूर्च्छानिद्रामयनिः श्वासोच्छ्वासाभावान्नष्टद्वन्द्वः सदाचञ्चलगात्रः परमशान्ति स्वीकृत्य मनः प्रचारशून्यं परमात्मनि

लीनं भवति। पयःस्रावानन्तरं धेनुस्तनक्षीरमिव सर्वेन्द्रियवर्गे परिनष्टे मनोनाशो भवति तदेवामनस्कम्। तदनु नित्यशुद्धः परमात्माहमेवेति तत्वमसीत्युपदेशेन त्वमेवाहमहमेव त्वमिति तारकयोगमार्गेणाखण्डानन्दपूर्णः कृतार्थो भवति॥१॥

परिपूर्णपराकाशमग्नमनाः प्राप्तोऽन्मन्यवस्थः संन्यस्तसर्वेन्द्रियवर्गोऽनेकजन्मार्जितपुण्यपुञ्जपक्वकैवल्यफलोऽखण्डानन्दनिरस्तसर्वक्लेशकश्मलो ब्रह्माऽहमस्मीति कृतकृत्यो भवति। त्वमेवाहं न भेदोऽस्ति पूर्णत्वात्परमात्मनः। इत्युच्चरन्त्समालिङ्ग्य शिष्यं ज्ञप्तिमनीनयत्॥२॥

इति मण्डलब्राह्मणोपनिषत्सु तृतीयं ब्राह्मणम्॥३॥

अथ ह याज्ञवल्क्यो मण्डलपुरुषं पप्रच्छ व्योमपञ्चकलक्षणं विस्तरेणानुब्रूहीति। स होवाचाकाशं पराकाशं महाकाशं सूर्याकाशं परमाकाशमिति पञ्च भवन्ति। बाह्याभ्यन्तरमन्धकारमयमाकाशम्। बाह्यस्याभ्यन्तरे कालानलसदृशं पराकाशम्। सबाह्याभ्यन्तरे परिमितद्युतिनिभं तत्वं महाकाशम्। सबाह्याभ्यन्तरे सूर्यनिभं सूर्याकाशम्। अनिर्वचनीयज्योतिः सर्वव्यापकं निरतिशयानन्दलक्षणं परमाकाशम्। एवं तत्तल्लक्ष्यदर्शनात्तत्तद्रूपो भवति। नवचक्रं षडाधारं त्रिलक्ष्यं व्योमपञ्चकम्। सम्यगेतन्न जानाति स योगी नामतो भवेत्॥३॥

इति मण्डलब्राह्मणोपनिषत्सु चतुर्थ ब्राह्मणम्॥४॥

सविषयं मनो बन्धाय निर्विषयं मुक्तये भवति। अतः सर्वजगच्चित्तगोचरम्। तदेव चित्तं निराश्रयं मनोन्मन्यवस्थापरिपक्वं लययोग्यं भवति। तल्लयं परिपूर्णे मयि समभ्यसेत्। मनोलयकारणमहमेव। अनाहतस्य शब्दस्य तस्य शब्दस्य यो ध्वनिः। ध्वनेरन्तर्गतं ज्योतिर्ज्योतिरन्तर्गतं मनः। यन्मनस्त्रिजगत्सृष्टिस्थितिव्यसनकर्मकृत्। तन्मनो विलयं याति तद्विष्णोः परमं पदम्। तल्लयाच्छुद्धाद्वैतसिद्धिर्भेदाभावात्। एतदेव परमतत्वम्। स तज्ज्ञो बालोन्मत्तपिशाचवज्जडवृत्या लोकमाचरेत्। एवममनस्काभ्यासेनैव नित्यतृप्तिरल्पमूत्रपुरीषमितभोजनदृढाङ्गाजाड्यनिद्रादृग्वायुचलनाभावब्रह्मदर्शनाज्ज्ञातसुखस्वरूपसिद्धिर्भवति। एवं चिरसमाधिजनितब्रह्मामृतपानपरायणोऽसौ संन्यासी परमहंस अवधूतो भवति। तद्दर्शनेन सकलं जगत्पवित्रं भवति। तत्सेवापरोऽज्ञोपि मुक्तो भवति। तत्कुलमेकोत्तरशतं तारयति। तन्मातृपितृजायापत्यवर्गं च मुक्तं भवतीत्युपनिषत्॥५॥

इति मण्डलब्राह्मणोपनिषत्सु पञ्चमं ब्राह्मणम्॥५॥

इति मण्डलब्राह्मणोपनिषत्समाप्ता॥

(2)

SŪRYOPANISHAT

सूर्योपनिषत्

सूदितस्वातिरिक्तारिसूरिनन्दात्मभावितम्।
सूर्यनारायणाकारं नौमि चित्सूर्यवैभवम्॥

ॐ भद्रं कर्णेभिरिति शान्तिः॥

हरिः ॐ॥ अथ सूर्याथर्वाङ्गिरसं व्याख्यास्यामः। ब्रह्मा ऋषिः। गायत्री छन्दः। आदित्यो देवता।

हंसः सोऽहमग्निनारायणयुक्तं बीजम्। हल्लेखा शक्तिः। वियदादिसर्गसंयुक्तं कीलकम्। चतुर्विधपुरुषार्थसिध्यर्थे विनियोगः। षट्स्वरारूढेन बीजेन षडङ्गं रक्ताम्बुजसंस्थितम्। सप्ताश्वरथिनं हिरण्यवर्णं चतुर्भुजं पद्मद्वयाभयवरदहस्तं कालचक्रप्रणेतारं श्रीसूर्यनारायणं य एवं वेद स वै ब्राह्मणः भूर्भुवःसुवः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। सूर्य आत्मा जगतस्तस्थुषश्च। सूर्याद्वै खल्विमानि भूतानि जायन्ते। सूर्याद्यज्ञः पर्जन्योऽन्नमात्मा नमस्ते आदित्य। त्वमेव प्रत्यक्षं कर्मकर्ताऽसि। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं विष्णुरसि। त्वमेव प्रत्यक्षं रुद्रोऽसि। त्वमेव प्रत्यक्षमृगसि। त्वमेव प्रत्यक्षं विष्णुरसि। त्वमेव प्रत्यक्षं सामासि। त्वमेव प्रत्यक्षमथर्वाऽसि। त्वमेव सर्वं छन्दोऽसि। आदित्याद्वायुर्जायते। आदित्याद्भूमिर्जायते। आदित्यादापो जायन्ते। आदित्याज्ज्योतिर्जायते। आदित्याद्व्योम दिशो जायन्ते। आदित्याद्देवा जायन्ते। आदित्याद्वेदा जायन्ते। आदित्यो वा एष एतन्मण्डलं तपति। असावादित्यो ब्रह्म। आदित्योऽन्तःकरणमनोबुद्धिचित्ताहंकाराः। आदित्यो वै व्यानः समानोऽदानोपानः प्राणः। आदित्यो वै श्रोत्रत्वक्चक्षूरसनघ्राणाः। आदित्यो वै वाक्पाणिपादपायूपस्थाः। आदित्यो वै शब्दस्पर्शरूपरसगन्धः। आदित्यो वै वचनादानागमनविसर्गानन्दाः। आनन्दमयो ज्ञानमयो विज्ञानमय आदित्यः। नमो मित्राय भानवे मृत्योर्मा पाहि। भ्राजिष्णवे विश्वहेतवे नमः। सूर्याद्भवन्ति भूतानि सूर्येण पालितानि तु। सूर्ये लयं प्राप्नुवन्ति। यः सूर्यः सोऽहमेव च। चक्षुर्नो देवः सविता चक्षुर्न उत पर्वतः। चक्षुर्धाता दधातु नः। आदित्याय विद्महे सहस्रकिरणाय धीमहि। तन्नः सूर्यः प्रचोदयात्। सविता पश्चात्तात्सविति पुरस्तात्सवितोऽत्तरात्तात्सविताऽधरात्तात्। सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्धमायुः। ओमित्येकाक्षरं ब्रह्म। घृणिरिति द्वे अक्षरे। सूर्य इत्यक्षरद्वयम्। आदित्य इति त्रीण्यक्षराणि। एतस्यैव सूर्यस्याष्टाक्षरो मनुः। यः सदाऽहरहर्जपति स वै ब्राह्मणो भवति स वै ब्राह्मणो भवति। सूर्याभिमुखो जप्त्वा महाव्याधिभयात्प्रमुच्यते। अलक्ष्मीर्नश्यति। अभक्ष्यभक्षणात्पूतो भवति। अगम्यागमनात्पूतो भवति। पतितसंभाषणात्पूतो भवति। असत्संभाषणात्पूतो भवति। मध्याह्ने सूर्याभिमुखः पठेत्। सद्योत्पन्नपञ्चमहापातकात्प्रमुच्यते। सैषा सावित्रीं विद्यां न किंचिदपि न कस्मैचित्प्रशंसयेत्। य एतां महाभागः प्रातः पठति स भाग्यवाञ्जायते। पशून्विन्दति। वेदार्थं लभते। त्रिकालमेतज्जप्त्वा क्रतुशतफलमबाप्नोति। यो हस्तादित्ये जपति स महामृत्युं तरति स महामृत्युं तरति य एवं वेद।। इत्युपनिषत्।।

इति सूर्योपनिषत्समाप्ता।।

(3)

AKSHYUPANISHAT

अक्ष्युपनिषत्॥

अथ ह सांकृतिर्भगवानादित्यलोकं जगाम। तमादित्यं नत्वा चाक्षुष्मतीविद्यया तमस्तुवत्॥ ॐ नमो भगवते श्रीसूर्यायाक्षितेजसे नमः। ॐ खेचराय नमः। ॐ महासेनाय नमः। ॐ तमसे नमः। ॐ रजसे नमः। ॐ सत्वाय नमः। ॐ असतो मा सत् गमय। तमसो मा ज्योतिर्गमय। मृत्योर्माऽमृतं गमय। हंसो भगवाञ्छुचिरूपः। विश्वरूपं घृणिनं जातवेदसं हिरण्मयं ज्योतीरूपं तपन्तम्। सहस्ररश्मिः शतधा वर्तमानः पुरुषः प्रजानामुदयत्येष सूर्यः। ॐ नमो भगवते श्रीसूर्यायादित्यायाक्षितेजसेऽहोवाऽहिनि वाहिनि स्वाहेति। एवं चाक्षुष्मतीविद्यया स्तुतः श्रीसूर्यनारायणः सुप्रीतोऽब्रवीच्चाक्षुष्मतिविद्यां ब्राह्मणो यो नित्यमधीते न तस्याक्षिरोगो भवति। न तस्य कुलेऽन्धो भवति। अष्टौ ब्राह्मणान्ग्राहयित्वाथ विद्यासिद्धिर्भवति। य एवं वेद स महान्भवति॥१॥

अथ ह सांकृतिरादित्यं पप्रच्छ भगवन्ब्रह्मविद्यां मे ब्रूहीति।

तमादित्यो होवाच। सांकृते श्रुणु वक्ष्यामि तत्वज्ञानं सुदुर्लभम्। येन विज्ञातमात्रेण जीवन्मुक्तो भविष्यसि॥२॥

सर्वमेकमजं शान्तमनन्तं ध्रुवमव्ययम्।
पश्यन्भूतार्थचिद्रूपं शान्त आस्व यथासुखम्॥३॥

अवेदनं विदुर्योगं चित्तक्षयमकृत्रिमम्।
योगस्थः कुरु कर्माणि नीरसो वाथ मा कुरु॥४॥

विरागमुपयात्यन्तर्वासनास्वनुवासरम्।
क्रियासूदाररूपासु क्रमते मोदतेऽन्वहम्॥५॥

ग्राम्यासु जडचेष्टासु सततं विचिकित्सते। नोदाहरति मर्माणि पुण्यकर्माणि सेवते॥६॥

अनन्योद्वेगकारीणि पेशलान्युचितानि च। देशकालोपपन्नानि वचनान्यभिभाषते॥७॥

मनसा कर्मणा वाचा सज्जनानुपसेवते। यतः कुतश्चिदानीय नित्यं शास्त्राण्यवेक्षते॥९॥

तदासौ प्रथमामेकां प्रासो भवति भूमिकाम्। एवं विचारवान्यः स्यात्संसारोत्तारणं प्रति॥१०॥

स भूमिकावानित्युक्तः शेषस्त्वार्य इति स्मृतः। विचारनाम्निमितरामागतो योगभूमिकाम्॥११॥

श्रुतिस्मृतिसदाचारधारणा ध्यानकर्मणः। मुख्यया व्याख्यया ख्याताच्छ्र्यति श्रेष्ठपण्डितान्॥१२॥

पदार्थकप्रविभागज्ञः कार्याकार्यविनिर्णयम्। जानात्यधिगतश्चान्यो गृहं गृहपतिर्यथा॥१३॥

मदाभिमानमात्सर्यलोभमोहा तिशायिताम्। बहिरप्यास्थितामीषत्यहिरिव त्वचम्॥१४॥

इत्थंभूतमतिः शास्त्रगुरुसज्जनसेवया। सरहस्यमशेषेण यथावदधिगच्छति ॥१५॥

असंसर्गाभिधामन्यां तृतीयां योगभूमिकाम्।
ततः पतत्यसौ कान्तः पुष्पशय्यामिवामलाम्॥१६॥

यथावच्छास्त्रवाक्यार्थे मतिमाधाय निश्चलाम्।
तापसाश्रमविश्रान्तैरध्यात्मकथनक्रमैः।
शिलाशय्यासनासीनो जरयत्यायुराततम्॥१७॥

वनावनिविहारेण चित्तोपशमशोभिना। असङ्गसुख
सौख्येन कालं नयति नीतिमान्॥१८॥

अभ्यासात्साधुशास्त्राणां करणात्पुण्यकर्मणाम्।
जन्तोर्यथावदेवेयं वस्तुदृष्टिः प्रसीदति॥१९॥

तृतीयां भूमिकां प्राप्य बुद्धोऽनुभवति स्वयम्॥२०॥

द्विप्रकारमसंसर्गं तस्य भेदमिमं शृणु।
द्विविधोऽयमसंसर्गः सामान्यः श्रेष्ठ एव च ॥२१॥

नाहं कर्ता न भोक्ता च न बाध्यो न च
बाधकः।
इत्यसञ्जनमर्थेषु सामान्यासङ्गनामकम्॥२२॥

प्राक्कर्मनिर्मितं सर्वमीश्वराधीनमेव वा।
सुखं वा यदि वा दुःखं कैवात्र तव कर्तृता॥२३॥
भोगाभोगा महारोगाः संपदः परमापदः।
वियोगायैव संयोगा आधयो व्यधयो धियाम्॥२४॥
कालश्च कलनोद्युक्तः सर्वभावाननारतम्।

अनास्थयेति भावानां यदभावनमान्तरम्।
वाक्यार्थलब्धमनसः सामान्योसावसङ्गमः॥२५॥

अनेन कर्मयोगेन संयोगेन महात्मनाम्।
नाहं कर्तेऽश्वरः कर्ता कर्म वा प्राक्तनं मम॥२६॥

कृत्वा दूरतरे नूनमितिशब्दार्थभावनम्।
यन्मौनमासनं शान्तं तच्छ्रेष्टासङ्ग उच्यते ॥२७॥

संतोषामोदमधुरा प्रथमोदेति भूमिका।
भूमिप्रोदितमात्रोऽन्तरमृताङ्कुरिकेव सा॥२८॥

एषा हि परिमृष्टान्तःसंन्यासा प्रसवैकभूः।
द्वितीयां च तृतीयां च भूमिकां प्राप्नुयात्ततः॥२९॥

श्रेष्ठा सर्वगता ह्येषा तृतीया भूमिकाऽत्र हि।
भवति प्रोज्झिताशेषसंकल्पकलनः पुमान्॥३०॥

भूमिकात्रितयाभ्यासादज्ञाने क्षयमागते।
समं सर्वत्र पश्यन्ति चतुर्थी भूमिकां गताः॥३१॥
अद्वैते स्थैर्यमायाते द्वैते च प्रशमं गते।
पश्यन्ति स्वप्नवल्लोकं चतुर्थी भूमिकां गताः॥३२॥
भूमिकात्रितयं जाग्रच्चतुर्थी स्वप्न उच्यते॥३३॥

चित्तं तु शरदभ्रांशविलयं प्रविलीयते।
सत्वावशेष एवास्ते पञ्चमीं भूमिकां गतः॥३४॥

जगद्विकल्पो नोदेति चित्तस्यात्र विलापनात्।

पञ्चमीं भूमिकामेत्य सुषुप्तपदनामिकाम्।
शान्ताशेषविशेषांशस्ति ष्ठत्यद्वैतमात्रकः॥३५॥
गलितद्वैतनिर्भासो मुदितोऽन्तः प्रबोधवान्।
सुषुप्तमन एवास्ते पञ्चमीं भूमिकां गतः॥३६॥
अन्तर्मुखतया तिष्ठन्बहिर्वृत्तिपरोऽपि सन्।
परिश्रान्ततया नित्यं निद्रालुरिव लक्ष्यते॥३७॥
कुर्वन्नभ्यासमेतस्यां भूमिकायां विवासनः।
षष्ठीं तुर्याभिधामन्यां क्रमात्पतति भूमिकाम्॥३८॥
यत्र नासन्नसद्रूपो नाहं नाप्यनहंकृतिः।
केवलं क्षीणमननमास्ते द्वैतेतिनिर्भयः॥३९॥
निर्ग्रन्थिः शान्तसंदेहो जीवन्मुक्तो विभावनः।
अनिर्वाणोऽपि निर्वाणश्चित्रदीप इव स्थितः॥४०॥
षष्ठ्यां भूमावसौ स्थित्वा सप्तमीं भूमिमाप्नुयात्॥४१॥
विदेहमुक्तताऽत्रोऽक्ता सप्तमी योगभूमिका।
अगम्या वचसां शान्ता सा सीमा सर्वभूमिषु॥४२॥
लोकानुवर्तनं त्यक्त्वा त्यक्त्वा देहानुवर्तनम्।
शास्त्रानुवर्तनं त्यक्त्वा स्वाध्यासापनयं कुरु॥४३॥
ओंकारमात्रमखिलं विश्वप्राज्ञदिलक्षणम्।
वाच्यवाचकताभेदाभेदेनानुपलब्धितः॥४४॥
अकारमात्रं विश्वः स्यादुकारस्तैजसः स्मृतः।
प्राज्ञो मकार इत्येवं परिपश्येत्क्रमेण तु॥४५॥
समाधिकालात्प्रागेव विचिन्त्यातिप्रयत्नतः।
स्थूलसूक्ष्मक्रमात्सर्वं चिदात्मनि विलापयेत्॥४६॥
चिदात्मानं नित्यशुद्धबुद्धमुक्तसदद्वयः।
परमानन्दसंदेहो वासुदेवोऽहमोमिति॥४७॥
आदिमध्यावसानेषु दुःखं सर्वमिदं यतः।
तस्मात्सर्वं परित्यज्य तत्वनिष्ठो भवानघ॥४८॥
अविद्यातिमिरातीतं सर्वभासविवर्जितम्।
आनन्दममलं शुद्धं मनोवाचामगोचरम्॥४९॥
प्रज्ञानघनमानन्दं ब्रह्मास्मीति विभावयेत्॥५०॥
इत्युपनिषत्॥ हरिः ॐ तत्सत्॥
इत्यक्ष्युपनिषत्समाप्ता॥

APPENDIX II

-अथ महाकवि कालिदासकृत-

-नवग्रह मंगळनवकम्-

भास्वान् काश्यपगोत्रजोऽरुणरुचिः यः सिंहपर्कस्समित्षद्त्रिस्थो दशगः शुभः शशिगुरुर्भौमश्च मित्रं सदा। शुक्रो मन्दरिपुः कळिंगजनपः चाग्नीश्वरौ देवते मध्येवर्तुलपूर्वदिग्दिनकरः कुर्यात् सदा मंगळम्॥१॥

चंद्रः कर्कटकप्रभुः सितनिभश्चात्रेयगोत्रोद्भवश्चाग्नेयः चतुरश्चारुणमुखः चापोद्युमाधीश्वरः। षट्सप्ताग्निदशैकशोभनकरो नारिर्बुधार्कप्रियः

स्वामी यामिनिपः पलाशसमिधो कुर्यात् सदा मंगळम्॥२॥

भौमो दक्षिणदिक् त्रिकोणनिलयो विन्ध्येश्वरः

खादिरः स्वामी वृश्चिकमेषयोः सुरगुरुश्चार्कश्शशी सौहृदः।

शौरिः षट्त्रिफलप्रदश्च वसुधस्कन्दक्रमात् देवते भारद्वाजकुलोद्भवोऽरुणरुचिः कुर्यात् सदा मंगळम्।।३।।

सौम्यः पीत उदङ्मुखः समिदपामार्गोऽत्रिगोत्रोद्भवो बाणेशानदिशि सुहृद्रविसुतो वैरीन्दुरन्ये समाः। कन्यायुग्मपतिः दशाष्टकचतुषण्णेत्रगः शोभनो विष्णुः पूरुषदेवतो मगधपः कुर्यात्सदा मंगळम्।।४।।

जीवश्चांगिरगोत्रजोत्तरमुखो दीर्घोत्तराशास्थितः पीतोऽश्वत्थसमित्पुरंदरविधिः कोदण्डमीनाधिपः। सूर्येन्दुक्षितिजप्रियो बुधसितौ शत्रू समस्सूर्यजः सप्तांकद्विगपंचगस्तु शुभदः कुर्यात् सदा मंगलम्।।५।।

शुक्रो भार्गवगोत्रजः सितनिभः पूर्वामुखः पूर्वदिक् पंचाश्रो वृषभस्तुलाधिपः महाराष्ट्राधिपोऽदुंबरः। इन्द्राणिमघवा च सौम्य रविजौ मित्रेऽर्कचंद्रावरी षड्भूभृद्दूशर्वार्जितो भृगुसुतः कुर्यात् सदा मंगळम्।।६।।

मन्दःकृष्णनिभस्तु पश्चिममुखः सौराष्ट्रपः काश्यपो नक्रेशो घटपः सुहृद्बुधभृगुः वैरीन्द्विनक्ष्मासुतः। स्थानं पश्चिमदिक् प्रजापतियमौ देवौ धनुस्त्वासनं षट्त्रिस्थश्शुभकृच्छमीरविसुतः कुर्यात् सदा मंगळम्।।७।।

राहुस्सिंहळदेशपो निर्ऋतिः कृष्णांग शूर्पासनो यः पैठीनसगोत्रजोऽस्य तु समिद्दूर्वामुखं दाक्षिणं। यः सर्पोऽप्यधिदैवतं निर्ऋतिः प्रत्याख्यदेवस्सदा षट्त्रिस्थः शुभकृच्च सिंहिकसुतः कुर्यात् सदा मंगळम्।।८।।

केतुर्जैमिनिगोत्रजः कुशसमिद्वायव्यकोणे स्थितः चित्रांकध्वजलांछनो हि भगवान् यो दक्षिणाशामुखः। ब्रह्मा चैव तु चित्रगुप्त अधिपः प्रत्याख्यदेवस्सदा षट्त्रिस्थशुभकृच्च बर्बरपतिः कुर्यात् सदा मंगळम्।।९।।

इत्येवं ग्रहमंगळाष्टकमिदं लोकोपकारप्रदम् पापौघप्रशमं महाऽऽभयकरं सौभाग्यसंवर्धनम्। यः प्रातः श्रुणुयात् पठेदनुदिनं श्री कळिदासोदितं भुक्तिं मुक्तिमसौ भजेच्च सततं विदेंत्सदा मंगळम्।।१०।।

इति नवग्रहमंगळाष्टकम्

APPENDIX III

ICONOGRAPHIC VERSES

(1) सूर्य प्रतिमा

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम्।
तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्॥

ग्रहाणामादिरादित्यो लोकरक्षणकारकः
विषमस्थानसंभूतां पीडां हरतु मे रविः॥

(2) चंद्र प्रतिमा

दधि शंख तुषाराभं क्षीरोदार्णवसंभवम्।
नमामि शशिनं सोमं शंभोर्मकुटभूषणम्॥

रोहिणीशः सुधामूर्तिः सुधागात्रः सुधाशनः।
विषमस्थानसंभूतां पीडां हरतु मे विधुः॥

(3) अंगारक प्रतिमा

धरणीगर्भसंभूतं विद्युत्कांतिसमप्रभं।

कुमारं शक्तिहस्तं च मंगळं प्रणमाम्यहम्।।

भूमिपुत्रो महातेजा जगतां भयकृत्सदा।

वृष्टिकृत् वृष्टिहर्ता च पीडां हरतु मे कुजः।।

(4) बुध प्रतिमा

प्रियंगुकलिकाश्यामं रूपोणाप्रतिमम् बुधम्।
सैम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम्।।

उत्पातरूपो जगतां चंद्रपुत्रो महाद्युतिः।
सूर्यप्रियकरो विद्वान् पीडां हरतु मे बुधः।।

(5) गुरु प्रतिमा

देवानां च ऋषीणं च गुरुं कांचनसन्निभम्।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम्।।

देवमन्त्री विशालाक्षः सदा लोकहिते रतः।
अनेकशिष्यसंपूर्णः पीडां हरतु मे गुरुः।।

(6) शुक्र प्रतिमा

हिमकुंदमृणाळाभं दैत्यानां परमं गुरुम्।
सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम्।।

दैत्यमंत्री गुरुस्तेषां प्राणदश्च महामतिः

प्रभुस्ताराग्रहाणां च पीडां हरतु मे भृगुः।।

(7) शनि प्रतिमा

नीलांजनसमाभासं रविपुत्रं यमाग्रजम्।
छायामार्तांडसंभूतं तं नमामि शनैश्चरम्।।

सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः।
मदंचारः प्रसन्नात्मा पीडां हरतु मे शनिः।।

(8) राहु प्रतिमा

अर्धकायं महादीर्घं चंद्रादित्यविमर्दनम्।
सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहम्।।

महाशिरा महावक्त्रो दीर्घदंष्ट्रो महाबलः।
अतनुश्चोर्ध्वकेशश्च पीडां हरतु मे तमः।।

(9) केतु प्रतिमा

पलाशपुष्पसंकाशं तारकाग्रहमस्तकम्।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम्।।

अनेकरूपवर्णाश्च शतशोभसहस्रशः।
उत्पातरूपो जगतां पीडां हरतु मे शिखी।।

नमस्सूर्याय चंद्राय मंगळाय बुधाय च।
गुरुश्शुक्रश्शनिभ्यश्च राहवे केतवे नमः।।

APPENDIX IV

PACIFICATION OF GRAHAS DURING ECLIPSE

श्री सूर्य-चंद्रग्रहणशान्तिः।।

योऽसौ वज्रधरो देवः आदित्यानां प्रभुर्मतः।
सहस्त्रनयनस्सूर्यो (चंद्रो) ग्रहपीडां व्यपोहतु।।१।।

मुख्यं सर्वदेवानां सप्तार्चिरमितद्युतिः।
सूर्यो (चंद्रो) परागसंभूतग्रहपीडां व्यपोहतु।।२।।

यः कर्मसाक्षी लोकानां धर्मो महिषवाहनः।
यमः (चंद्रो) सूर्योपरागोत्थग्रहपीडां व्यपोहतु।।३।।

रक्षोगणाधिपस्साक्षान्नीलांजनचयप्रभुः।
खड्गहस्तोऽ तितमश्र्च ग्रहपीडां व्यपोहतु।।४।।

नागपाशधरो देवः सदा मकरवाहनः।
सजलाधिपतिस्सूर्यः (चंद्रः) ग्रहपीडां व्यपोहतु।।५।।

प्राणरूपो हि देवानां सदा कृष्णमृगप्रियः।
वायुः सूर्यो(चंद्र)परागोत्थग्रहपीडां व्यपोहतु॥६॥

योऽसौ निधिपतिर्देवः खड्गशूलगदाधरः।
सूर्यो(चंद्रो)परागकलुषं धनदोऽत्र व्यपोहतु॥७॥

योऽसाविन्दुधरो देवः पिनाकी वृषवाहनः।
सूर्ये(चंद्रो)परागपापानि विनाशयतु शंकरः॥८॥

त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च।
विष्णुश्च रुद्रश्च हरन्तु मम पातकम्॥९॥

सर्वे समुद्राः सरितः तीर्थानि जलदा नदाः।
आयांतु ममशुध्यर्थं दुरितक्षयकारकाः॥१०॥

APPENDIX V

SŪRYĀTHARVAŚĪRSHA

अथ सूर्याथर्वशीर्षमुपनिषत्।।

अथ सूर्याथर्वाङ्गिरसं व्याख्यास्यामः।।

ब्रह्मा ऋषिः। आदित्यो देवता। गायत्री छन्दः। हंसाद्याग्निनारायणयुक्तं बीजम्। हृल्लेखा शक्तिः। द्विपदादिसर्गसंयुक्तं कीलकम्। धर्मार्थकाममोक्षेषु जपे विनियोगः।।

षट्स्वरारूढबीजेन षंडगं रक्ताम्बुजसंस्थं सप्ताश्वरथिनं हिरण्यवर्णं चतुर्भुजं पद्मद्वयाभयवरदहस्तं कालचक्रप्रणेतारं च श्रीसूर्यनारायणं य एवं वेद स वै ब्राह्मणः।।

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं

तत्सवितुं परो रजसे सावदोम् ॐ आपो ज्योतिरसो मृतं ब्रह्म भूर्भुवः स्वरोम्।

सूर्य आत्मा जगतस्तस्थुषश्च।

सूर्याद्दि खल्विमानि भूतानि जायन्ते।

सूर्याद्यज्ञाः पर्जन्यो न्नमात्मा।

नमस्ते आदित्याय त्वमेव केवलं कर्त्तासि।

त्वमेव प्रत्यक्षं विष्णुरसि।

त्वमेव प्रत्यक्षं ब्रह्मासि।

त्वमेव प्रत्यक्षं रुद्रोसि।

त्वमेव प्रत्यक्षमृगसि।

त्वमेव प्रत्यक्षं यजुरसि।

त्वमेव प्रत्यक्षं सामासि।

त्वमेव प्रत्यक्षमथर्वासि।

त्वमेव सर्व छन्दोऽसि।

आदित्याद्वायुर्जायते

आदित्याद्भूमिर्जायते।

आदित्यादापोजायते।

आदित्याज्ज्योतिर्जायते।

आदित्याद् व्योम दिशो जायंते।

आदित्याद्वेदा जायंते।

आदित्याद्देवा जायंते।

आदित्यो वा एष एतन्मंडलं तपति। असावादित्यो ब्रह्म। आदित्योऽन्तः करणमनोबुद्धिचित्ताहंकाराः।

आदित्यो वै व्यानसमानोदानापानप्राणाः।

आदित्यो वै श्रोत्रत्वक्चक्षुरसनानासाः।

आदित्यो वै वाक्पाणिपादोपस्थपायूनि।

आदित्यो वै शब्दस्पर्शरुपरसगंधाः।

आदित्यो वै वचनादानगमनानन्दविसर्गाः।

आनन्दमयो ज्ञानमयो विज्ञानमय आदित्यः।

नमो मित्राय भानवे मृत्योर्मा पाहि भ्राजिष्णवे विश्वहेतवे नमः।

सूर्यो नो दिवस्पातु वातो अंतरिक्षात् अग्निनः पार्थिवेभ्यः सूर्याद्वै भूतानि सूर्येण पालितानि तु।

सूर्ये लयं प्राप्नुवंति यः सूर्यः सोऽहमेव च।

चक्षुर्नो देवः सविता। चक्षुर्न उत पर्वतः। चक्षुर्धाता दधातु नः।

आदित्याय विद्महे सहस्रकराय धीमहि। तन्नः सूर्यः प्रचोदयात्।

सविता पश्चात्तात्। सवितापुरस्तात्। सवितोत्तरात्तात् सविताऽधरात्तात्। सविता नः सुवतुसर्वतातिम्।

सविता नो रासतां दीर्घमायुः॥

ओमित्येकाक्षरं ब्रह्म घृणिरिति द्वेअक्षरे सूर्य इत्यक्षरद्वयम्।

आदित्य इति। त्रीण्यक्षराणि

एतद्वैसूर्यस्याष्टाक्षरमनुम् "ओं घृणिः सूर्य आदित्य" इति मंत्रः।

यः सदा हरहर्जपति। सो ब्रह्मण्यो ब्राह्मणो भवति।

सूर्याभिमुखं जप्त्वा महाव्याधिभयात्प्रमुच्यते।

अलक्ष्मीर्नश्यति।।

अभक्ष्यमक्षणात् पूतो भवति। अपेयपानात्पूतोभवति। अगम्यागमनात्पूतोभवति। व्रात्यसंभाषणात्पूतो भवति।

मध्यान्हे सूर्याभिमुखः पठेत् सद्यः पंचमहापापात्प्रमुच्यते।

सैषा सावित्री विद्या न कस्यचित्प्रशंसेत्।

एतन्महाभागः प्रातः पठति स भाग्यवान् जायते। पशून् विंदति वेदार्थं लभते।

त्रिकालं जत्वा क्रतुशतफलं प्राप्नोति। हस्तादित्ये जपति स महामृत्युं तरति।

य एवं वेद। इत्युपनिषत्।।

इति सूर्याथर्वशीर्षम्।।

APPENDIX VI

SŪRYA-STAVA-RĀJA

(From Bhavishyottara-Purāṇa)

अथ सूर्यस्तोत्र प्रारंभः।।

सुमंतुरुवाच।। अस्तावीच्च ततः सांबः कृशो धमनिसंततः।
राजन्नामसहस्रेण सहस्रांशुं दिवाकरम्।।१।।

खिद्यमानं ततो दृष्टवा सूर्यः कृष्णात्मजं तदा।
स्वप्नेऽस्य दर्शनं दृष्टा पुनर्वचनमब्रवीत्।।२।।

श्रीसूर्य उवाच।।
सांबसांब महाबाहो श्रुणु जांब वतीसुत।
अलं नामसहस्रेण पठ चेमं शुभं स्तवम्।।३।।

यानि गुह्यानि नामानि पवित्राणि शुभानि च।
तानि ते कीर्तयिष्यामि प्रयत्नादवधारय।।४।।

वैकर्तनो विवस्वांश्च मार्तंडो भास्करो रविः।
लोकप्रकाराः श्रीमाँल्लोकचक्षुर्ग्रहेश्वरः॥५॥

लोकसाक्षी त्रिलोकेशः कर्ता हर्ता तमिस्रहा।
तपनस्तांपनश्चैव शुचिः सप्ताश्ववाहनः॥६॥

गभस्तिहस्तो ब्रह्मा च सर्वदेवनमस्कृतः।
एकविंशतिरित्येष स्तव इष्टस्सदा मम॥७॥

शरीरारोग्यदश्चैव धनवृद्धियशस्करः।
स्तवराज इति ख्यातस्त्रिषु लोकेषु विश्रुतः॥८॥

य एतेन महाबाहो द्वे संध्ये स्तमनोदये।
स्तौति मां प्रणतो भूत्वा सर्वपापैः प्रमुच्यते॥९॥

मानसं वाचिकं वऽपि कायिकं यच्च दुष्कृतम्।
एकजाप्येन तत्सर्वं प्रणश्यति ममाग्रतः॥१०॥

एष जप्यश्च होमश्च संध्योपासनमेव च।
बलिमंत्रोर्घ्यमंत्रोऽथ धूपमंत्रस्तथैव च॥११॥

अन्नप्रदाने स्नाने च प्रणिपाते प्रदक्षिणे।
पूजितोऽयं महामंत्रः सर्वपापहरः शुभः॥१२॥

एवमुक्तवा स भगवान्भास्करो जगतांपतिः।
आमंत्र्य कृष्णतनयं तत्रैवांतरधीयत॥१३॥

सांबोऽपो स्तवराजेन स्तुत्वा सप्ताश्ववाहनम्।
प्रीताऽत्मा नीरुजः श्रीमांस्तस्माद्रोगाद्विमुक्तवान्
॥१४॥

इति भविष्योत्तरपुराणे सूर्यस्तवराजः समाप्तः॥

APPENDIX VII

The sūrya-namaskāra as a praxis of physical exercises has been widely practised in India, and it is a standard sequence of twelve āsanas. The following illustrations are of the well-known yoga-exponent, āyurvedic physician, author and educationist, Sri Rāghavendra Svāmi of Mallāḍihaḷḷi in Karnātaka, who is a centenarian. The photographs are taken from his book on Sūrya-namaskāra in Kannaḍa, published by the Anātha-sevāśrama Trust Mallāḍihaḷḷi (Hoḷalkere tāluk, Karnātaka) (1971).

This posture must be assumed after each of the twelve succeeding āsanas, and the mantra of Sūrya must be recited in this posture only

POSTURE 1 (Namaskārāsana)

ॐ मित्राय नमः॥

(pūraka in prāṇāyāma)

POSTURE 2 (Ūrdhvāsana)

ॐ रवये नमः॥

(pūraka in prāṇāyāma)

POSTURE 3 (Hastapādāsana)

ॐ सूर्याय नमः॥

(rechaka in prāṇāyāma)

POSTURE 4 (Eka-pāda-prasaraṇāsana)

ॐ भानवे नमः।।

(pūraka in prāṇāyāma)

POSTURE 5 (Dvipāda-prasaraṇāsana)

ॐ खगाय नमः।

(pūraka in prāṇāyāma)

POSTURE 6 (Bhūdharāsana)

ॐ पूष्णे नमः॥

(rechaka in prāṇāyāma)

POSTURE 7 (Sāshṭānga-praṇipātāsana)

ॐ हिरण्यगर्भाय नमः॥

(pūraka in prāṇāyāma)

POSTURE 8 (Bhujaṅgāsana)

ॐ मरीचये नमः।।

(kumbhaka in prāṇāyāma)

The next four postures are repititions (in reverse) of the postures 6,4,3 and 1 (avarohaṇa):

POSTURE 9 (Bhūdharāsana)

ॐ आदित्याय नमः॥

(rechaka in prāṇāyāma)

POSTURE 10 (Ekapādāsana)

ॐ सवित्रे नमः॥

(pūraka in prāṇāyāma)

POSTURE 11 (Hastapādāsana)

ॐ अर्काय नमः॥

(rechaka in prāṇāyāma)

POSTURE 12 (Namaskārāsana)

ॐ भास्कराय नमः॥

(pūraka and rechaka in prāṇāyāma)

Appendix VIII

THREE HYMNS TO SŪRYA

The following stotra relates to the twelve forms of the Solar deity, and hence is called Dvādaśāditya-stotra. The stotra, consisting of fourteen verses indentifies the Sun-god with pure consciousness (mahā-samvit), the essence of Vedāntic wisdom and with ātma-vidyā. He is described as Hiraṇya-garbha, the primordial god and as the material cause of the universe; he is also he Buddha, the pure and the free spirit. The Sun-god is to be meditated upon for obtaining ones own pristine and essential nature (svarūpopalabdhyai). This hymn was published in the Journal of Sri Venkateswara Research Institute, Tirupati (6, 1).

मौनिस्वान्ताब्जभानुः परमचिदयनं विघ्नशैलौधभेद
क्रीडादम्भोलिधुर्यस्वचरणयुगलो दन्तिवक्त्रो गणेशः।
पाशं हस्तैश्चतुर्भिः सृणिमभयवरौ संदधानोऽष्टमूर्तेः
पाकोऽस्माकं हृदब्जे निवसतु सततं विघ्नराडेकदन्तः॥

सूर्योऽस्माकं हृदब्जे विलसतु नितरां सूर्यनारायणोऽसौ
च्छायादेव्या समेतः सकलबुधजनैः सेव्यमानः प्रभाते।
लोकानन्दं वितन्वन्सरसिजनिलयानाथवासास्पदं यो
भक्तानां शोकमोहव्यसनगदहरः सप्तसप्तिर्बुधेशः॥१॥

पायान्मामेकचक्रे हरितहरिवरैः सप्तभिर्भोगिरश्मि-
स्यूतास्यैः प्रोह्यमाने ह्यरुणकरकशाप्रेरितैः स्यन्दनेऽन्तः।
रत्नाब्जस्थश्चतुर्दोर्धृतकमलयुगाभीतिमुद्रावराङ्कः
सञ्चिन्त्यो मण्डलान्तर्द्रुतकनकनिभः कालचक्रप्रणेता॥२॥

मित्रं विश्वस्यमित्रं प्रणमदभयदं प्राणिनां प्राणभूतं
रक्ताम्भोजासनस्थं कमलयुगधरं स्वर्णवर्णं सुरेशम्।
तेजोवृन्दं दिनेशं दुरितशमकरं सच्चिदानन्दकन्दं
देवं नित्यं प्रपद्येऽभयवरदकरं सर्वहृत्तापशान्त्यै॥३॥

देवं देदीप्यमानं रविमखिलगुरुं सर्वलोकप्रदीपं
सन्तापघ्नं नतानां तिमिरकुलमहादन्तिसंहारसिंहम्।
ब्रह्मानन्दैकसिन्धुं सुरनरखगगोप्राणिरूपं परेशं
वन्दे कारुण्यराशिं विमलतरमहाज्ञानसिद्ध्यै सदाहम्॥४॥

सूर्यं सूर्यालिहृद्यं निरतिशयमहादिव्यतेजोज्ज्वलन्तं
तत्त्वातीतं तुरीयं प्रणवमुखमहामन्त्रयन्त्रस्वरूपम्।
कालातीतं स्वमात्रं कमलभवमुखैः सेन्द्रदेवैः सदेड्यं
भक्तानां सर्वकालं शरणदचरणद्वमीडे विमुक्त्यै॥५॥

भानुं भानुत्रभिन्नाखिलहिमनिवहं स्वात्ममात्रे रमन्तं
देवानामादिदेवं चिदमृतजलधिं निस्तरङ्गं सुपूर्णम्।
लोकानामादिहेतुं जनिलयरहितं भक्तरक्षाधुरीणं
सर्वज्ञं सर्वशक्तिं विभुमहमनिशं भावये मोहशान्त्यै॥६॥

प्रातर्गन्तव्यमृक्तो यजुषि दिवसतो मध्यतस्तस्थिवांसं
सायाह्ने सामतोऽमुं खगपतिमहितं वेदवेदान्तवेद्यम्।
सेवे त्रेताग्निरूपं त्रिदशपरिषदां हव्यदंभूर्भुवः स्व।
र्लोकानां स्वात्मभूतं श्रुतिषु समुदितं ज्ञानहेतोः पवित्रम्॥७॥

वृष्टिं सृष्ट्वा स्वकीयैर्ङ्टति बहुतरं घृष्टिभिर्विष्टपानां
अन्नं प्राणं बलं यत्तप इति च सुविज्ञानतः स्वात्मसौख्यम्।
पुष्णन्तं लोकबन्धुं मनसि सुकलये पूषणं भूषणं स्वः
पद्मान्युद्बोधयन्तं मुनिहृदयगृहं स्वात्मसौख्यानुभूत्यै॥८॥

भूतानामग्रजातं सुरवरमभयं स्वर्णगर्भं सुसूक्ष्मं
सूत्रात्मानं प्रपञ्चे पयसि धृतमिव व्यासमन्तर्बहिश्च।
एकं नित्यं विशुद्धं विमलतरहमाज्ञानगम्यं मुनीन्द्रै-
र्विश्वाधिष्ठानभूतं हृदयसरसिजे चिन्तये चित्प्रसूत्यै॥९॥

बुद्धं मुक्तं मरीचिं बहिरिव भजतामान्तराण्यब्जवृन्दा-
न्यातन्वानं विबुद्धान्यघहरणचणैश्छान्दसैरुस्त्रवृन्दैः।
तेजोबिम्बान्तरस्थं पुरुषमतिदयापूर्णकर्णान्तिनेत्रं
ध्यायाम्यस्यांघ्रिभक्त्यै सततममृतदं दिव्यकल्याणमूर्तिम्॥१०॥

सावित्राष्टार्णमन्त्रप्रकटितविभवं ह्यादिजं विश्वसृष्टे-
रादित्यं रश्मिमालाकवचितवपुषं योगियोगैकलभ्यम्।
आधिव्याधिप्रणुन्नाखिलजनभिषजं सर्वलोकैकचक्षुः
संज्ञाच्छायाप्रियाभ्यामनिशमनुसृतं संश्रये रुक्प्रशान्त्यै॥११॥

देवो यः प्रेरयेन्नः सततमिह धियो मौनिहृद्वेद्यभूमा
वेदान्तानां सुसारं सवितुरनुपमं तस्य देवस्य यद्वै।
कल्याणानां निदानं सुमहतिमहसां मण्डले सन्निषण्णं
ध्यायेम ह्यात्मविद्याविवरणविषये चिन्महस्तद्वरेण्यम्॥१२॥

अर्कं हित्त्वान्यतर्कं स्वमनसि विबुधैश्चिन्त्यमानस्वरूपं
सत्राजिन्नामभाजे स्वचरणयुगलध्यानशीलाय राज्ञे।
योऽष्टौ भारान्वमन्तं मणिवरमदिशद्धर्मणां स्वात्मभासां
घस्रे धस्रे महान्तं पुरुषसमुचितान्प्राप्तुमर्थान्भजेहम्॥१३॥

स्तोष्येहं भास्काराख्यं विमलतरमहासंविदेकायनं यः
चाक्षुष्मत्त्या प्रतुष्टो निजपदमदिशत्सांकृतेर्विद्ययर्षेः।
देवं तं विप्रमुख्यास्त्रिषवणमुदकैर्वैधमर्घ्यं क्षिपन्तो
ध्यायन्तः प्राप्तभद्रा विमलधिषणया स्युः स्वरूपोपलब्ध्यै॥१४॥

The following Stotra, called Āditya-stotra was composed by Appaya-dīkshita (about 1520-1592) consists of twelve verses in Sragdharā metre followed by two more verses in the nature of Phala-Stuti. The Stotra is a comprehensive and elaborate description of the mythological, astrological and iconographic details of the Sun-god.

विस्तारायाममानं दशभिरुपगतो योजनानां सहस्रैः
चक्रे पञ्चारनाभित्रितयवति लसन्नेमिषट्के निविष्टः।
सप्तच्छन्दस्तुरंगाहितवहनधुरो हायनांशत्रिवर्ग-
व्यक्त्या क्लृप्ताखिलांगः स्फुरतु मम पुरः स्यन्दनश्चण्डभानोः॥१॥

आदित्यैरप्सरोभिर्मुनिभिरहिवरैर्ग्रामणीयातुधानैः
गन्धर्वैर्वालखिल्यैः परिवृतदशमांशस्य कृत्स्नं रथस्य।
मध्यं व्याप्याधितिष्ठन्मणिरिव नणसो मण्डलश्चण्डरश्मेः
ब्रह्मज्योतिर्विवर्तः श्रुतिनिकरघनीभावरूपः समिन्धे॥२॥

निर्गच्छन्तोऽर्कबिम्बान्निखिलजनिमतां हार्दनाडीः प्रविष्टाः
नाड्यो वस्वादिबृन्दारकगणमधुनः तस्य नानादिगुत्थाः।
वर्षन्तस्तोयमुष्णं तुहिनमपि जलान्यापिबन्तः समन्तात्
पित्रादीनां स्वधौषध्यमृतरसकृतो भान्ति कान्तिप्ररोहाः॥३॥

श्रेष्ठास्तेषां सहस्रे त्रिदिववसुधयोः पञ्चदिग्व्याप्तिभाजां
शुभ्रांशुं तारकौघं शशितनयमुखान्पञ्च चोद्भासयन्तः।
आरोगभ्राजमुख्यास्त्रिभुवनदहने सप्त सूर्या भवन्तः
सर्वान्व्याधीन्सुषुम्नप्रभृतय इह मे सूर्यपादाः क्षिपन्तु॥४॥

आदित्यानाश्रिताः षण्णवतिगुणसहस्रिन्विता रश्मयोस्तान्ये
मासे मासे विभक्तास्त्रिभुवनभवनं पावयन्तः स्फुरन्ति।

येषां भुव्यप्रचारे जगदवनकृतां सप्तरश्म्युत्थितानां
संसर्पे चाधिमासे व्रतयजनमुखाः सत्क्रिया न क्रियन्ते॥५॥

आदित्यं मण्डलान्तः स्फुरदरुणवपुस्तेजसा व्याप्तविश्वं
प्रातर्मध्याह्नसायंसमयविभजनादृग्यजुस्सामसेव्यम्।
प्राप्यं च प्रापकं च प्रथितमधिपथि ज्ञानिनामुत्तरस्मिन्
साक्षाद्ब्रह्मेत्युपास्यं सकलभयहराभ्युद्गमं संश्रयामि॥६॥

यच्छक्त्याधिष्ठितानां तपनहिमजलोत्सर्जनादिर्जगत्या-
मादित्यानामशेषः प्रभवति नियतस्वस्वमासाधिकारः।
यः प्राधान्यं व्यनक्ति स्वयमपि भगवान्द्वादशस्तेषु भूत्वा
तं त्रैलोक्यस्य मूलं प्रणमत परमं दैवतं सप्तसप्तिम्॥७॥

स्वः स्त्रीगन्धर्वयक्षा मुनिवरभुजगा यातुधानाश्च नित्यं
नृत्तैर्गीतैरभीशुग्रहनुतिवहनैरग्रतः सेवया च।
यस्य प्रीतिं वितन्वन्त्यमितपरिकरा द्वादश द्वादशैते
हृद्याभिर्वालखिल्याः सरणिभणितिभिस्तं भजे लोकबन्धुम्॥८॥

ब्रह्माण्डे यस्य जन्मोदितमुषसि परब्रह्ममुक्त्यात्मजस्य
ध्येयं रूपं शिरोदोश्चरणपदजुषां व्याहृतीनां त्रयेण।
तत्सत्यं ब्रह्म पश्यान्यहरहमभिधं नित्यमादित्यरूपं
भूतानां भूर्भुवः स्वः प्रभृतिषु वसतां प्राणसूक्ष्मांशमेकम्॥९॥

आदित्ये लोकचक्षुष्यवहितमनसां योगिनां दृश्यमन्तः
स्वच्छस्वर्णाभमूर्ति विदलनलनोदारदृश्याक्षियुग्मम्।
ऋक्सामोद्गानगेयं निरतिशयलसल्लोककामेशभावं
सर्वाविद्योतितत्वादुदिति समुदितं ब्रह्म शुम्भुं प्रपद्ये॥१०॥

ओमित्युद्गीथभक्तेरवयवपदवीं प्राप्तवत्यक्षरेऽस्मिन्
यस्योपास्तिः समस्तं दुरितमपनयत्यर्कबिम्बे स्थितस्य।
यत्पूजैकप्रधानान्यघमखिलमपि घ्नन्ति कृच्छ्रव्रतानि

ध्यातः सर्वोपतापान्हरतु परशिवः सोऽयमाद्यो भिषङ्मे॥११॥

आदित्ये मण्डलार्चिः पुरुषविभिदयाऽद्यन्तमध्यागमात्म-
न्यागोपालाङ्गनाभ्यो नयनपथजुषा ज्योतिषा दीप्यमानम्।
गायत्रीमन्त्रसेव्यं निखिलजनधियां प्रेरकं चित्स्वरूपं
नीलग्रीवं त्रिणेत्रं शिवमनिशमुमावल्लभं संश्रयामि॥१२॥

अब्दाकल्पः शतांगः स्थिरभणितिमयं मण्डलं रश्मिभेदाः
साहस्रास्तेषु सप्तश्रुतिभिरभिनुताः किञ्चिदूना च लक्षा।
एकैकेषां चतस्रस्तदनु दिनमणेरादिदेवस्य तिस्रः
प्रोक्तास्तत्तत्प्रभावप्रकटनमहिताः स्रग्धरा द्वादशैताः॥१३॥

दुःस्वप्नं दुर्निमित्तं दुरितमखिलमप्यामयानप्यसाध्यान्
दोषान्दुः स्थानसंस्थग्रहगणजनितान्दुष्टभूतग्रहादीन्।
निर्धुनोति स्थिराञ्च श्रियमिह लभते मुक्तिमभ्येति चाग्रे
संकीर्त्य स्तोत्ररत्नं सकृदपि मनुजः प्रत्यहं पत्युरह्नाम्॥१४॥

The following hymn in twelve verses in Ārya metre is supposed to have been recited by Bṛhaspati in adoration of Sūrya, and fallen from the Solar orb on the earth for the benefit of mankind.

कायिकं वाचिकं पापं मानसं वा मया कृतम्।
तस्य सर्वस्य शुध्यर्थं सूर्यस्यार्याः पठाम्यहम्॥

ॐ यस्योदयास्तसमये सुरमुकुटनिघृष्टचरणकमलोऽपि।
कुरुतेञ्जलिं त्रिनेत्रः स जयति धाम्नां निधिः सूर्यः॥

उदयाचलतिलकाय प्रणतोऽस्मि विवस्वते ग्रहेशाय।
अम्बरचूडामणये दिग्वनिताकर्णपूराय॥१॥

जयति जनानन्दकरः करनिकरनिरस्ततिमिरसंघातः।
लोकालोकालोकः कमलारुणमण्डलः सूर्यः॥२॥

उद्बोधितकमलवनः कृतघटनश्चक्रवाकमिथुनानाम्।
दर्शितसमस्तभुवनः परहितनिरतो रविर्जयति॥३॥

अपनयति सकलकलिमलपटलममलप्रतप्तकनकाभः।
अरविन्दवृन्दविघटनपटुतरकिरणोत्करः सविता॥४॥

स्फुरितचलचारुचामरहरिखुरपरिवृतरेणुकृतरागः।
हरितहयनिकरभास्करगगनांगणदीपक नमस्ते॥५॥

उदितवति त्वयि विकसति मुकुलीयति समस्तमस्तमितबिम्बे।
नह्यन्यस्मिन्दिनकर सकलं कमलायते भुवनम्॥६॥

जयति रविरुदयसमये बालातपः कनकसन्निभो यस्य।
कुसुमाञ्जलिरिव जलधौ तरन्ति रथसप्तयः सप्त॥७॥

शुकतुण्डच्छविः सवितुश्चण्डरुचः पुण्डरिकवनबन्धोः।
मण्डलमुदितं वन्दे कुण्डलमाखण्डलाशायाः॥८॥

आर्याः सप्त सदा यस्तु सप्तम्यां सप्तधा पठेत्।
तस्य देहं च गेहं च पद्मा सत्यं न मुञ्चति॥९॥

आर्याः शिवपुरे जाता आकाशात्पतिता भुवि।
यस्य कण्ठे गृहे वापि न स लक्ष्म्या विमुञ्चति॥१०॥

कण्ड्वादिसर्वपीडानां नाशनं परमं महत्।
निधिरेष दरिद्राणां रोगिणां परमौषधम्॥११॥

सिद्धिः परमकार्याणां गाथेऽयं संस्तुता रवेः।
साम्बस्यानुग्रहार्थाय पतिता रविमण्डलात्।
उधृत्य सर्वलोकैस्तु लोकोपकृतिहेतवे॥१२॥

KALPATHARU RESEARCH ACADEMY

BANGALORE

The Kalpatharu Research Academy, established in 1981, was inaugurated by the then Minister for Tourism and Civil Aviation, Government of India. It has strided across the horizon of indological research and publication with giant - steps since then. An institution dedicated to the cause of preservation of ancient heritage in India, it has encouraged research in the fields of Agama, Veda, Tantra, Jyothisha, Mantra-sastra, Vastu, Yoga, Silpa, Ayurveda, etc.

Among its prestigious publications (numbering more than fifty till now), are six Vols of Pratima-Kosha, Twelve Vols of Agama-Kosha, Three Vols of the Art and Architecture of Indian Temples, and several Koshas like Ganesha-Kosha, Lalitha-Kosha and Navagraha-Kosha, Oshadhi-Kosha, etc.

The Academy has plans of undertaking intensive research in the field of Veda and Vedanga, and intends publishing Bharatiya-Samskriti-Sarvasva-Kosha, an encyclopaedic work in several volumes dealing with all aspects of Indian Culture. It seeks to promote education, culture, science, art, and learning in all its branches. The approach will be broad-based and multi-disciplinary.

An extensive, comprehensive and specialist reference library has been built up, to assist the research workers engaged by the Academy, and also other workers in the indological disciplines. A valuable collection of palm-leaf manuscripts relating to Veda, Vedanta, Vedanga and allied subjects has already been made; the collection work is continuing.

The Academy has been running a Guru-Kula type of Institution, on ancient lines to impart Vedic education to selected boys in a rural-set-up since 1988.

The intention of the Academy is to develop as a national centre for higher learning in Veda and Vedanga and facilitate the founding of a unique Sanskrit and Vedic University of national and international stature.

This publication is the Fifty-First of its achievement in this field.

।। नवग्रह मंत्र, जप, कवच, स्तोत्र ।।

॥ सूर्य ग्रह ॥

सूर्य कलिंग देश में उद्भव। कश्यप गोत्र। जाति क्षत्रिय। माता अदिति। जन्म समय नाम मार्तण्ड। प्रथम पत्नी संज्ञा जिससे वैवस्वत मनु, यम, यमी उत्पन्न हुए। दूसरी पत्नी छाया जिससे सावर्णिकी मनु, शनि, ताप्ती, अश्विनी

- **शुभाशुभत्व - क्रूर ग्रह**
- **भोग काल - एक मास - 30 दिन**
- **बीज मंत्र - ॐ घृणि: सूर्याय नम: / ॐ ह्रीं ह्रौं सूर्याय नमः / ॐ सूर्याय नमः**
- **तांत्रिक मंत्र - ॐ ह्राँ ह्रीं ह्रौं स: सूर्याय नमः**
- **वैदिक मंत्र - ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।**
  हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥
- **पुराणोक्त मंत्र - ॐ जपाकुसुम संकाशं काश्यपेयं महाद्युतिम्।**
  तमोरिं सर्व पापघ्नं प्रणतोऽस्मि दिवाकरम्॥
- **जप संख्या - 7000 कलयुगे चतुर्थगुणो अर्थात 28000 + दशांश हवन - 2800 + दशांश तर्पण - 280 + दशांश मार्जन - 28 = 31108**
- **जप समय - सूर्योदय काल**
- **हवनवस्तु - अर्क, मदार**
- **रत्न - 6.5 रत्ती मीणिक या विद्रुम**
- **दान वस्तु - सुवर्ण, ताँबा, माणिक, गुड, गेहूँ, लाल गाय, लाल पुष्प, लाल वस्त्र, लाल चंदन**

सूर्य कवचम् .....

विनियोग - अस्य श्री सुर्य कवच स्तोत्रस्य। ब्रह्मा ऋषि:। अनुष्टुप छंद:। सूर्यो देवता। सूर्य प्रीत्यर्थे जपे विनियोग:॥

याज्ञवल्क्य उवाच .....

श्रणुष्व मुनिशार्दूल सूर्यस्य कवचं शुभम्।
शरीरारोग्दं दिव्यं सव सौभाग्य दायकम्॥१॥

देदीप्यमान मुकुटं स्फुरन्मकर कुण्डलम।
ध्यात्वा सहस्त्रं किरणं स्तोत्र मेततु दीरयेत्॥२॥

शिरों में भास्कर: पातु ललाट मेडमित दुति:।
नेत्रे दिनमणि: पातु श्रवणे वासरेश्वर:॥३॥

ध्राणं धर्मं धृणि: पातु वदनं वेद वाहन:।
जिव्हां में मानद: पातु कण्ठं में सुर वन्दित:॥४॥

रक्षात्मकं स्तोत्रं लिखित्वा भूर्ज पत्रके।
दधाति य: करे तस्य वशगा: सर्व सिद्धय:॥५॥

सुस्नातो यो जपेत् सम्यग्योधिते स्वस्थ: मानस:।
सरोग मुक्तो दीर्घायु सुखं पुष्टिं च विदंति॥६॥

सूर्य स्तोत्रम् .....

नवग्रहाणां सर्वेषां सूर्यादीनां पृथक् पृथक्।
पीड़ा च दु:सहा राजंजायते सततं नृणाम् ॥१॥

पीडानाशाय राजेन्द्र नामानि श्रृणु भास्वत:।
सूर्यादीनां च सर्वेषां पीड़ा नश्यति श्रृण्वत: ॥२॥

आदित्य: सविता सूर्य: पूषाऽर्क: शीघ्रगो रवि:।
भगस्त्वष्टाऽर्यमा हंसो हंलिस्तेजोनिधिर्हरि: ॥३॥

दिननाथो दिनकर: सत्पसप्ति: प्रभाकर:।
विभावसुर्वेदकर्ता वेदांगो वेदवाहन: ॥४॥

हरिदश्व: कालवक्त्र: कर्मसाक्षी जगत्पति:।
पद्मिनीबोधको भानुर्भास्कर: करूणाकर: ॥५॥

द्वादशात्मा विश्वकर्मा लोहितांगस्तमोनुद:।
जगन्नाथोऽरविन्दाक्ष: कालात्मा कश्यपात्मज:॥६॥

भूताक्षयो ग्रहपति: सर्वलोकनमस्कृत:।
जपाकुसुमसंकाशो भास्वानदितिनन्दन: ॥७॥

ध्वान्तेभसिंह सर्वात्मा लोकनेत्रो विकर्तन:।
मार्तण्डो मिहिर: सूरस्तपनो लोकतापन: ॥८॥

जगत्कर्ता जगत्साक्षी शनैश्चरपिता जय:।
सहस्त्ररश्मिस्तरणिर्भगवान्भक्तवत्सल: ॥९॥

विवस्वानादिदेवश्च देवदेवा दिवाकर:।
धन्वन्तरिव्याधिहर्ता दद्रुकुष्ठविनाशक: ॥१०॥

चराचरात्मा मैत्रेयोऽमितो विष्णुर्विकर्तन:।
लोकशोकापहर्ता च कमलाकर आत्मभू: ॥११॥

नारायणो महादेवो रूद्र: पुरूष ईश्वर:।
जीवात्मा परमात्मा च सूक्ष्मात्मा सर्वतोमुख: ॥१२॥

इन्द्रोऽनलो यमश्चैव नैर्ऋतो वरूणोऽनिल:।
श्रीद ईशान इन्दुश्च भौम: सोम्यो गुरू: कवि: ॥१३॥

शौरिर्विधुन्तुद: केतु: काल: कालात्मको विभु:।
सर्वदेवमयो देव: कृष्ण: कामप्रदायक: ॥१४॥

य एतैर्नामभिर्मत्र्यो भक्त्या स्तौति दिवाकरम्।
सर्वापापविनिर्मुक्त: सर्वरोगविवर्जित: ॥१५॥

पुत्रवान् धनवान् श्रीमांजायते स न संशय:।
रविवारे पठेद्यस्तु नामान्येतानि भास्वत: ॥१६॥

पीड़ाशान्तिर्भवेत्तस्य ग्रहाणां च विशेषत:।
सद्य: सुखमवाप्नोति चायुर्दीर्घं च नीयजम् ॥१७॥

॥ इति श्री भविष्य पुराणे आदित्य स्तोत्रम् सम्पूर्णम्॥

भगवान सूर्य के पवित्र, शुभ एवं गोपनीय 21 नाम .....

विकर्तनो विवस्वांश्च मार्तण्डो भास्करो रवि: ।
लोक प्रकाशक: श्री माँल्लोक चक्षुर्मुहेश्वर:॥१॥

लोकसाक्षी त्रिलोकेश: कर्ता हर्ता तमिस्रहा ।
तपनस्तापनश्चैव शुचि: सप्ताश्ववाहन:॥२॥

गभस्तिहस्तो ब्रह्मा च सर्वदेवनमस्कृत: ।
एकविंशतिरित्येष स्तव इष्ट: सदा रवे:॥३॥

विकर्तन, विवस्वान, मार्तण्ड, भास्कर, रवि, लोकप्रकाशक, श्रीमान, लोकचक्षु, महेश्वर, लोकसाक्षी, त्रिलोकेश, कर्ता, हर्त्ता, तमिस्राहा, तपन, तापन, शुचि, सप्ताश्ववाहन, गभस्तिहस्त, ब्रह्मा और सर्वदेव नमस्कृत

॥ चन्द्रमा ग्रह ॥

चन्द्रमा यमुना नदी से उद्भव। आत्रि गोत्र। जाति वैश्य। शुक्ल वर्ण। दक्ष प्रजापति की 27 कन्याओं से विवाह। 27 कन्यायें 27 नक्षत्रों के नाम से जानी जाती है।

- **शुभाशुभत्व - शुभ ग्रह**
- **भोग काल - सवा दो दिन - 2.25 दिन**
- **बीज मंत्र - ॐ सों सोमाय नमः / ॐ ऐं क्लीं सोमाय नमः / ॐ चन्द्राय नमः**
- **तांत्रिक मंत्र - ॐ श्रॉं श्रीं श्रौं सः चंद्राय नमः**
- **वैदिक मंत्र - ॐ इमं देवा असपत्नS सुवध्वं महते क्षत्राय महते ज्यैष्ठयाय महते जानराज्यायेन्द्रस्येन्द्रियाय। इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाS राजा ॥**
- **पुराणोक्त मंत्र - ॐ दधि शंख तुषाराभं क्षीरोदार्णव सम्भवम। नमामि शशिनं सोमं शंभोर्मुकुट भूषणं ॥**
- **जप संख्या - 11000 कलयुगे चतुर्थगुणो अर्थात 44000 + दशांश हवन - 4400 + दशांश तर्पण - 440 + दशांश मार्जन - 44 = 48884**
- **जप समय - संध्याकाल**
- **हवनवस्तु - पलाश**
- **रत्न - 10 रत्ती मोती**
- **दान वस्तु - सुवर्ण, चाँदी, मोती, चावल, कपुर, घी, चाँदी शंख, सफेदपुष्प, सफेदवस्त्र, सफेद बैल**

चंद्र कवचम् .....

विनियोग - अस्य श्री चंद्र कवच स्तोत्र महा मंत्रस्य। गौतम ऋषिः। अनुष्टुप छंदः। श्री चंद्रो देवता। चंद्रः प्रीत्यर्थे जपे विनियोगः ॥

समं चतुर्भुजं वंदे केयूर मकुटोज्वलम्।
वासुदेवस्य नयनं शंकरस्य च भूषणम् ॥१॥

एवं ध्यात्वा जपेन्नित्यं शशिनः कवचं शुभम्।
शशिः पातु शिरो देशं भालं पातु कलानिधि ॥२॥

चक्षुषीः चंद्रमाः पातु श्रुती पातु निशापतिः।
प्राणं कृपाकरः पातु मुखं कुमुदबांधवः ॥३॥

पातु कण्ठं च मे सोमः स्कंधौ जैवा तृकस्तथा।
करौ सुधाकरः पातु वक्षः पातु निशाकरः ॥४॥

हृदयं पातु मे चंद्रो नाभिं शंकरभूषणः।
मध्यं पातु सुरश्रेष्ठः कटिं पातु सुधाकरः ॥५॥

ऊरू तारापतिः पातु मृगांको जानुनी सदा।
अब्दिजः पातु मे जंघे पातु पादौ विधुः सदा ॥६॥

सर्वाण्यन्यानि चांगानि पातु चंद्रोऽखिलं वपु: ।
ऐतद्धि कवचं दिव्यं भुक्ति मुक्ति प्रदायकम् ।
य: पठेत च्छृणुयाद्वापि सर्वत्र विजयी भवेत ॥७॥

॥ इती श्री चंद्र कवचं संपूर्णम् ॥

चन्द्र स्तोत्र .....

श्वेताम्बर: श्वेतवपु: किरीटी, श्वेतद्युतिर्दण्डधरो द्विबाहु: ।
चन्द्रो मृतात्मा वरद: शशांक:, श्रेयांसि मह्यं प्रददातु देव: ॥१॥

दधिशंखतुषाराभं क्षीरोदार्णवसम्भवम ।
नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम ॥२॥

क्षीरसिन्धुसमुत्पन्नो रोहिणी सहित: प्रभु: ।
हरस्य मुकुटावास: बालचन्द्र नमोऽस्तु ते ॥३॥

सुधायया यत्किरणा: पोषयन्त्योषधीवनम ।
सर्वान्नरसहेतुं तं नमामि सिन्धुनन्दनम ॥४॥

राकेशं तारकेशं च रोहिणीप्रियसुन्दरम ।
ध्यायतां सर्वदोषघ्नं नमामीन्दुं मुहुर्मुहु: ॥५॥

॥ इति मन्त्रमहार्णवे चन्द्रमस: स्तोत्रम ॥

चंद्र अष्टाविंशतिनाम स्तोत्रम् .....

विनियोग - अस्य श्री चंद्र स्याष्टाविंशति नाम स्तोत्रस्य । गौतम ऋषि: । विराट् छंद: । सोमो देवता । चंद्रस्य प्रीत्यर्थे जपे विनियोग: ॥

चंद्रस्य शृणु नामानि शुभदानि महीपते ।
यानि शृत्वा नरो दु:खान्मुच्यते नात्रसंशय: ॥१॥

सुधाकरश्च सोमश्च ग्लौरब्ज: कुमुदप्रिय: ।
लोकप्रिय: शुभ्रभानुश्चंद्रमा रोहिणीपति ॥२॥

शशी हिमकरो राजा द्विजराजो निशाकर: ।
आत्रेय इंदु: शीतांशुरोषधीश: कलानिधि: ॥३॥

जैवातृको रमाभ्राता क्षीरोदार्णव संभव: ।
नक्षत्रनायक: शंभु: शिरश्चूडामणिर्विभु: ॥४॥

तापहर्ता नभोदीपो नामान्येतानि य: पठेत् ।
प्रत्यहं भक्तिसंयुक्तस्तस्य पीडा विनश्यति ॥५॥

तद्दिने च पठेद्यस्तु लभेत् सर्वं समीहितम् ।
ग्रहादीनां च सर्वेषां भवेच्चंद्रबलं सदा ॥६॥

॥ इति श्री चंद्राष्टाविंशतिनाम स्तोत्रम् संपूर्णम् ॥

॥ मंगल ग्रह ॥

मंगल अवन्ति देश में उत्पत्ति । भारद्वाज गोत्र । जाति क्षत्रिय । रक्त वर्ण ।

- **शुभाशुभत्व - पाप ग्रह**
- **भोग काल - डेढ मास - 40 दिन**
- **बीज मंत्र - ॐ अं अंगारकाय नमः / ॐ हूँ श्रीं भौमाय नमः / ॐ भौमाय नमः**
- **तांत्रिक मंत्र - ॐ क्राँ क्रीं क्रौं सः भौमाय नमः**
- **वैदिक मंत्र - ॐ अग्निमूर्धा दिवः ककुत्पतिः पृथिव्या अयम्।
अपा $ रेता $ सि जिन्वति॥**
- **पुराणोक्त मंत्र - ॐ धरणी गर्भ संभूतं विद्युत्कान्ति समप्रभम ।
कुमारं शक्ति हस्तञ्च मंगलं प्रणमाम्यहम ॥**
- **जप संख्या - 10000 कलयुगे चतुर्थगुणो अर्थात 40000 + दशांश हवन - 4000 + दशांश तर्पण - 400 + दशांश मार्जन - 40 = 44440**
- **जप समय - दिन का प्रथम प्रहर**
- **हवनवस्तु - खदिर (खैर)**
- **रत्न - 12.5 रत्ती मूँगा**
- **दान वस्तु - सुवर्ण, ताँबा, मूंगा, मसुर, गुड, गेहूँ, लाल बैल, लालपुष्प, लालवस्त्र,**

मंगल कवचम् .....

विनियोग - अस्य श्री अंगारक कवच स्तोत्र मंत्रस्य । कश्यप ऋषिः । अनुष्टुप् छन्दः । अङ्गारको देवता भौम पीडा परिहारार्थं पाठे विनियोगः ॥

**रक्तांबरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाभृत् ।
धरासुतः शक्तिधरश्च शूली सदा ममस्याद्वरदः प्रशांतः ॥१॥**

**अंगारकः शिरो रक्षेन्मुखं वै धरणीसुतः ।
श्रवौ रक्तांबरः पातु नेत्रे मे रक्तलोचनः ॥२॥**

**नासां शक्तिधरः पातु मुखं मे रक्तलोचनः ।
भुजौ मे रक्तमाली च हस्तौ शक्तिधरस्तथा ॥३॥**

**वक्षः पातु वरांगश्च हृदयं पातु लोहितः ।
कटिं मे ग्रहराजश्च मुखं चैव धरासुतः ॥४॥**

**जानु जंघे कुजः पातु पादौ भक्तप्रियः सदा ।
सर्वण्यन्यानि चांगानि रक्षेन्मे मेषवाहनः ॥५॥**

**या इदं कवचं दिव्यं सर्वशत्रु निवारणम् ।
भूतप्रेतपिशाचानां नाशनं सर्व सिद्धिदम् ॥६॥**

**सर्वरोगहरं चैव सर्वसंपत्प्रदं शुभम् ।
भुक्तिमुक्तिप्रदं नृणां सर्वसौभाग्यवर्धनम् ॥७॥**

॥ इति श्रीमार्कण्डेयपुराणे मंगलकवचं संपूर्ण ॥

अङ्गारक स्तोत्रम् .....

विनियोग - अस्य श्री अंगारक स्तोत्रस्य मंत्रस्य। विरुपांगिरस ऋषिः। अग्नि देवता। गायत्री छन्दः। भौम प्रीत्यर्थे पाठे विनियोगः॥

अंगारकः शक्तिधरो लोहिताङ्गो धरासुतः।
कुमारो मङ्गलो भौमो महाकायो धनप्रदः ॥१॥

ऋणहर्ता दृष्टिकर्ता रोगकृद्रोगनाशनः।
विद्युत्प्रभो व्रणकरः कामदो धनहृत् कुजः ॥२॥

सामगानप्रियो रक्तवस्त्रो रक्तायतेक्षणः।
लोहितो रक्तवर्णश्च सर्वकर्मावबोधकः ॥३॥

रक्तमाल्यधरो हेमकुण्डली ग्रहनायकः।
नामान्येतानि भौमस्य यः पठेत्सततं नरः ॥४॥

ऋणं तस्य च दौर्भाग्यं दारिद्र्यं च विनश्यति।
धनं प्राप्नोति विपुलं स्त्रियं चैव मनोरमाम्।
वंशोद्द्योतकरं पुत्रं लभते नात्र संशयः ॥५॥

योऽर्चयेदह्नि भौमस्य मङ्गलं बहुपुष्पकैः।
सर्वा नश्यति पीडा च तस्य ग्रहकृता ध्रुवम् ॥६॥

॥इति श्री स्कान्दपुराणे श्री अङ्गारकस्तोत्रं सम्पूर्णम्॥

ऋणमोचक मंगल स्तोत्र .....

मंगलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः।
स्थिरामनो महाकायः सर्वकर्मविरोधकः ॥१॥

लोहितो लोहिताक्षश्च सामगानां। कृपाकरं।
वैरात्मजः कुजौ भौमो भूतिदो भूमिनंदनः ॥२॥

धरणीगर्भसंभूतं विद्युत्कान्तिसमप्रभम्।
कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहम् ॥३॥

अंगारको यमश्चैव सर्वरोगापहारकः।
वृष्टेः कर्ताऽपहर्ता च सर्वकामफलप्रदः ॥४॥

एतानि कुजनामानि नित्यं यः श्रद्धया पठेत्।
ऋणं न जायते तस्य धनं शीघ्रमवाप्नुयात् ॥५॥

स्तोत्रमंगारकस्यैतत्पठनीयं सदा नृभिः।
न तेषां भौमजा पीडा स्वल्पाऽपि भवति क्वचित् ॥६॥

अंगारको महाभाग भगवन्भक्तवत्सल।
त्वां नमामि ममाशेषमृणमाशु विनाशयः ॥७॥

ऋणरोगादिदारिद्रयं ये चान्ये ह्यपमृत्यवः।
भयक्लेश मनस्तापाः नश्यन्तु मम सर्वदा ॥८॥

अतिवक्र दुराराध्य भोगमुक्तजितात्मनः।
तुष्टो ददासि साम्राज्यं रुष्टो हरसि तत्क्षणात् ॥९॥

विरञ्चि शक्रादिविष्णूनां मनुष्याणां तु का कथा।
तेन त्वं सर्वसत्वेन ग्रहराजो महाबलः ॥१०॥

पुत्रान्देहि धनं देहि त्वामस्मि शरणं गतः।
ऋणदारिद्रयं दुःखेन शत्रुणां च भयात्ततः ॥११॥

एभिर्द्वादशभिः श्लोकैर्यः स्तौति च धरासुतम्।
महतीं श्रियमाप्नोति ह्यपरा धनदो युवाः ॥१२॥

॥ इति श्रीस्कन्दपुराणे भार्गवप्रोक्त ऋणमोचन मंगलस्तोत्रम् ॥

॥ बुध ग्रह ॥

बुध मगध देश में उत्पत्ति। अत्री गोत्र। जाति वैश्य। पिता चंद्रमा।

- **शुभाशुभत्व - शुभ ग्रह**
- **भोग काल - एक मास - 30 दिन**
- **बीज मंत्र - ॐ बुं बुधाय नमः / ॐ ऐं श्रीं श्रीं बुधाय नमः / ॐ बुधाय नमः**
- **तांत्रिक मंत्र - ॐ ब्राँ ब्रीं ब्रौं सः बुधाय नमः**
- **वैदिक मंत्र - ॐ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सऽ सृजेथामयञ्च। अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यशमानश्च सीदत॥**
- **पुराणोक्त मंत्र - ॐ प्रियंगुकलिकाश्यामं रूपेणाप्रतिमं बुधम। सौम्यं सौम्य गुणोपेतं तं बुधं प्रणमाम्यहम॥**
- **जप संख्या - 9000 कलयुगे चतुर्थगुणो अर्थात 36000 + दशांश हवन - 3600 + दशांश तर्पण - 360 + दशांश मार्जन - 36 = 17776**
- **जप समय - मध्याह्न काल**
- **हवनवस्तु - अपामार्ग, चिचिडा**
- **रत्न - 6.5 रत्ति पन्ना**
- **दान वस्तु - सुवर्ण, कांस्य, पन्ना, मूंग, घी, हाथी, कस्तूरी, सर्वपुष्प, हरावस्त्र, पंचरत्न, हाथी दाँत**

बुध कवचम् .....

विनियोग - अस्य श्री बुधकवच स्तोत्र मन्त्रस्य। कश्यप ऋषिः। अनुष्टुप् छन्दः। बुधो देवता बुधप्रीत्यर्थे जपे विनियोगः।

**बुधस्तु पुस्तकधरः कुंकुमस्य समद्युतिः।
पीताम्बरधरः पातु पीतमाल्यानुलेपनः ॥१॥**

**कटिं च पातु मे सौम्यः शिरोदेशं बुधस्तथा।
नेत्रे ज्ञानमयः पातु श्रोत्रे पातु निशाप्रियः ॥२॥**

**घ्राणं गन्धप्रियः पातु जिह्वां विद्याप्रदो मम।
कण्ठं पातु विधोः पुत्रो भुजौ पुस्तकभूषणः ॥३॥**

**वक्षः पातु वरांगश्च हृदयं रोहिणीसुतः।
नाभिं पातु सुराराध्यो मध्यं पातु खगेश्वरः ॥४॥**

**जानुनी रौहिणेयश्च पातु जंघेऽखिलप्रदः।
पादौ मे बोधनः पातु पातु सौम्योऽखिलं वपुः ॥५॥**

**एतद्धि कवचं दिव्यं सर्वपापप्रणाशनम्।
सर्वरोगप्रशमनं सर्व दुःख निवारणम् ॥६॥**

**आयुरारोग्यशुभदं पुत्रपौत्रप्रवर्द्धनम्।
यः पठेच्छ्रणुयाद्वापि सर्वत्र विजयी भवेत् ॥७॥**

॥ इति श्रीब्रह्मवैवर्तपुराणे बुधकवचं सम्पूर्णम् ॥

बुध स्तोत्रम् .....

पीताम्बर: पीतवपु किरीटी, चतुर्भुजो देवदु:खापहर्ता ।
धर्मस्य धृक सोमसुत: सदा मे, सिंहाधिरुढ़ो वरदो बुधश्च ॥१॥

प्रियंगुकनकश्यामं रूपेणाप्रतिमं बुधम ।
सौम्यं सौम्यगुणोपेतं नमामि शशिनन्दनम ॥२॥

सोमसुनुर्बुधश्चैव सौम्य: सौम्यगुणान्वित: ।
सदा शान्त: सदा क्षेमो नमामि शशिनन्दनम ॥३॥

उत्पातरूपी जगतां चन्द्रपुत्रो महाद्युति: ।
सूर्यप्रियकरोविद्वान पीडां हरतु मे बुधं ॥४॥

शिरीषपुष्पसंकाशं कपिलीशो युवा पुन: ।
सोमपुत्रो बुधश्चैव सदा शान्तिं प्रयच्छतु ॥५॥

श्याम: शिरालश्चकलाविधिज्ञ:, कौतूहली कोमलवाग्विलासी ।
रजोधिको मध्यमरूपधृक स्या-दाताम्रनेत्रो द्विजराजपुत्र: ॥६॥

अहो चन्द्रासुत श्रीमन मागधर्मासमुदभव: ।
अत्रिगोत्रश्चतुर्बाहु: खड्गखेटकधारक: ॥७॥

गदाधरो नृसिंहस्थ: स्वर्णनाभसमन्वित: ।
केतकीद्रुमपत्राभ: इन्द्रविष्णुप्रपूजित: ॥८॥

ज्ञेयो बुध: पण्डितश्च रोहिणेयश्च सोमज: ।
कुमारो राजपुत्रश्च शैशवे शशिनन्दन: ॥९॥

गुरुपुत्रश्च तारेयो विबुधो बोधनस्तथा ।
सौम्य: सौम्यगुणोपेतो रत्नदानफलप्रद: ॥१०॥

एतानि बुधनामानि प्रात: काले पठेन्नर: ।
बुद्धिर्विवृद्धितां याति बुधपीडा न जायते ॥११॥

॥ इति मंत्रमहार्णवे बुधस्तोत्रम संपूर्णम् ॥

बुध पञ्चविंशतिनाम स्तोत्रम् .....

विनियोग - अस्य श्री बुध पञ्चविंशतिनाम स्तोत्रस्य प्रजापति ऋषिः । त्रिष्टुप् छन्दः । बुधो देवता । बुधप्रीत्यर्थे पाठे विनियोगः ॥

बुधो बुद्धिमतां श्रेष्ठो बुद्धिदाता धनप्रदः ।
प्रियङ्गुकलिकाश्यामः कञ्जनेत्रो मनोहरः ॥१॥

ग्रहपमो रौहिणेयो नक्षत्रेशो दयाकरः ।
विरुद्धकार्यहन्ता च सौम्यौ बुद्धिविवर्धनः ॥२॥

चन्द्रात्मजो विष्णुरूपी ज्ञानी ज्ञो ज्ञानिनायकः।
ग्रहपीडाहरो दारपुत्रधान्यपशुप्रदः ॥३॥

लोकप्रियः सौम्यमूर्तिर्गुणदो गुणिवत्सलः ।
पञ्चविंशतिनामानि बुधस्यैतानि यः पठेत् ॥४॥

स्मृत्वा बुधं सदा तस्य पीडा सर्वा विनश्यति ।
तद्दिने वा पठेद्यस्तु लभते स मनोगतम् ॥५॥

॥ इति श्रीपद्मपुराणे बुधपञ्चविंशतिनामस्तोत्रं सम्पूर्णम् ॥

॥ बृहस्पति ग्रह ॥

गुरु सिन्धु देश में उत्पत्ति। अंगिरस गोत्र। जाति ब्राह्मण। पीता अंगिरस। पुत्र कच। पीत वर्ण। उत्तर दिशा।

- **शुभाशुभत्व - शुभ ग्रह**
- **भोग काल - एक वर्ष - 365 दिन**
- **बीज मंत्र - ॐ बृं बृहस्पतये नम: / ॐ ह्रीं क्लीं हूँ बृहस्पतये नम: / ॐ गुरवे नम:**
- **तांत्रिक मंत्र - ॐ ग्राँ ग्रीं ग्रौं स: गुरवे नमः**
- **वैदिक मंत्र - ॐ बृहस्पते अति यदर्यो अर्हाद्युम द्विभाति क्रतुमज्जनेषु।**
  यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम्॥
- **पुराणोक्त मंत्र - ॐ देवानां च ऋषीणां च गुरुं काचन सन्निभम।**
  बुध्दि भूतं त्रिलोकेशं तं नमामि बृहस्पितम॥
- **जप संख्या - 19000 कलयुगे चतुर्थगुणो अर्थात 76000 + दशांश हवन - 7600 + दशांश तर्पण - 760 + दशांश मार्जन - 76 = 84436**
- **जप समय - प्रात:काल (सूर्योदय के समय)**
- **हवनवस्तु - पीपल**
- **रत्न - 6.5 रत्ति पुखराज**
- **दान वस्तु - सुवर्ण, कांस्य, पुखराज, हल्दी, नमक, शक्कर, घोडा, पीतपुष्प, पीतवस्त्र, पीतधान्य, माणिक या विद्रुम**

बृहस्पति कवचम् (ब्रह्मयामलोक्तम्) .....

विनियोग - अस्य श्री बृहस्पति कवच महामन्त्रस्य। ईश्वर ऋषि:। अनुष्टुप छन्द:। बृहस्पति देवता। गं बीजं। श्रीं शक्ति:। क्लीं कीलकम्। बृहस्पति प्रीत्यर्थे पाठे विनियोग:।

अभीष्टफलदं देवं सर्वज्ञं सुरपूजितम्।
अक्षमालाधरं शान्तं प्रणमामि बृहस्पतिम्॥१॥

बृहस्पति: शिर: पातु ललाटं पातु में गुरु:।
कर्णौ सुरुगुरु: पातु नेत्रे मेंऽभीष्टदायक:॥२॥

जिह्वां पातु सुराचायो नासां में वेदपारग:।
मुखं मे पातु सर्वज्ञो कण्ठं मे देवता शुभप्रद:॥३॥

भुजौ आङ्गिरस: पातु करौ पातु शुभप्रद:।
स्तनौ मे पातु वागीश: कुक्षिं मे शुभलक्षण:॥४॥

नाभिं देवगुरु: पातु मध्यं पातु सुखप्रद:।
कटिं पातु जगदवन्द्य: ऊरू मे पातु वाक्पति:॥५॥

जानु जङ्गे सुराचायो पादौ विश्वात्मकस्तथा।
अन्यानि यानि चाङ्गानि रक्षेन् मे सर्वतो गुरु:॥६॥

इत्येतत् कवचं दिव्यं त्रिसन्ध्यं य: पठेन्नर:।
सर्वान् कामानवाप्नोति सर्वत्र विजयी भवेत्॥७॥

॥ इति श्री ब्रह्मयामलोक्तम् बृहस्पति कवचं सम्पूर्णम्॥

बृहस्पति कवचम् (मन्त्र महार्णवे) .....

पीताम्बरः पीतवपुः किरीटी, चतुर्भुजो देवगुरुः प्रशान्तः ।
दधाति दण्डं च कमण्डलुं च, तथाक्षसूत्रं वरदोऽस्तु मह्यम् ॥१॥

नमः सुरेन्द्रवन्द्याय देवाचार्याय ते नमः ।
नमस्त्वनन्तसामर्थ्यं देवासिद्धान्तपारगः ॥२॥

सदानन्द नमस्तेऽस्तु नमः पीडाहराय च ।
नमो वाचस्पते तुभ्यं नमस्ते पीतवाससे ॥३॥

नमोऽद्वितीयरूपाय लम्बकूर्चाय ते नमः ।
नमः प्रहृष्टनेत्राय विप्राणां पतये नमः ॥४॥

नमो भार्गवशिष्याय विपन्नहितकारकः ।
नमस्ते सुरसैन्याय विपन्नत्राणहेतवे ॥५॥

विषमस्थस्तथा नृणां सर्वकष्टप्रणाशनम् ।
प्रत्यहं तु पठेद्यो वै तस्य कामफलप्रदम् ॥६॥

॥ इति मन्त्रमहार्णवे बृहस्पतिस्तोत्रम् ॥

बृहस्पति स्तोत्रम् .....

विनियोग - अस्य श्री बृहस्पति स्तोत्रस्य । गृत्समद ऋषिः । अनुष्टुप् छन्दः । बृहस्पति र्देवता । बृहस्पति प्रीत्यर्थं जपे विनियोगः ।

गुरुर्बृहस्पतिर्जीवः सुराचार्यो विदां वरः ।
वागीशो धिषणो दीर्घश्मश्रुः पीताम्बरो युवा ॥१॥

सुधादृष्टिर्ग्रहाधीशो ग्रहपीडापहारकः ।
दयाकरः सौम्यमूर्तिः सुरार्च्यः कुड्मलद्युतिः ॥२॥

लोकपूज्यो लोकगुरुः नीतिज्ञो नीतिकारकः ।
तारापतिश्चाङ्गिरसो वेदवेद्यः पितामहः ॥३॥

भक्त्या बृहस्पतिं स्मृत्वा नामान्येतानि यः पठेत् ।
अरोगी बलवान् श्रीमान् पुत्रवान् स भवेन्नरः ॥४॥

जीवेत् वर्षशतं मर्त्यः पापं नश्यति नश्यति ।
यः पूजयेत् गुरुदिने पीतगन्धाक्षताम्बरैः ॥५॥

पुष्पदीपोपहारैश्च पूजयित्वा बृहस्पतिम् ।
ब्रह्मणान् भोजयित्वा च पीडाशान्तिर्भवेत् गुरोः ॥६॥

॥ इति श्री स्कन्दपुराणे बृहस्पतिस्तोत्रं सम्पूर्णम् ॥

॥ शुक्र ग्रह ॥

शुक्र भोजकर्कट देश में उत्पत्ति । भार्गव गोत्र । जाति ब्राह्मण । दैत्य गुरु । संजीवनी विद्या ज्ञाता । इन्हीं के वंश में जामदग्नेय पुत्र परशुराम का अवतार हुआ था ।

- **शुभाशुभत्व** - **शुभ ग्रह**
- **भोग काल** - **एक मास - 30 दिन**
- **बीज मंत्र** - **ॐ शुं शुक्राय नमः / ॐ ह्रीं श्रीं शुक्राय नमः / ॐ शुक्राय नमः**
- **तांत्रिक मंत्र** - **ॐ द्राँ द्रीं द्रौं सः शुक्राय नमः**
- **वैदिक मंत्र** - **ॐ अन्नात्परिस्त्रुतो रसं ब्रम्हणा व्यपिवत्क्षत्रं पयः सोमं प्रजापतिः । ऋतेन सत्यमिन्द्रियँ विपानऽ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥**
- **पुराणोक्त मंत्र** - **ॐ हिमकुन्द मृणालाभं दैत्यानां परमं गुरुम । सर्वशास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहम ॥**
- **जप संख्या** - **16000 कलयुगे चतुर्थगुणो अर्थात 64000 + दशांश हवन - 6400 + दशांश तर्पण - 640 + दशांश मार्जन - 64 = 71104**
- **जप समय** - **ब्रह्मवेला (सुर्योदय)**
- **हवनवस्तु** - **गूलर**
- **रत्न** - **1 रत्ति हीरा**
- **दान वस्तु** - **सुवर्ण, चाँदी, हीरा, चावल, घी, हल्दी, नमक, सफेदपुष्प, सफेदवस्त्र,सफेद घोडा**

शुक्र कवचम् .....

विनियोग - अस्य श्री शुक्र कवच स्तोत्र मन्त्रस्य । भारद्वाज ऋषिः । अनुष्टुप छन्दः । शुक्रो देवता । शुक्रप्रीत्यर्थे पाठे विनियोगः ।

मृणालकुन्देन्दुपयोजसुप्रभं पीताम्बरं प्रभृतमक्षमालिनम् ।
समस्तशास्त्रार्थनिधिं महांतं ध्यायेत्कविं वान्छितमर्थसिद्धये ॥१॥

ॐ शिरो मे भार्गवः पातु भालं पातु ग्रहाधिपः ।
नेत्रे दैत्यबृहस्पतिः पातु श्रोतो मे चन्दनद्युतिः ॥२॥

पातु मे नासिकां काव्यो वदनं दैत्यवन्दितः ।
वचनं चोशनाः पातु कण्ठं श्रीकण्ठभक्तिमान् ॥३॥

भुजौ तेजोनिधिः पातु कुक्षिं पातु मनोव्रजः ।
नाभिं भृगुसुतः पातु मध्यं पातु महीप्रियः ॥४॥

कटिं मे पातु विश्वात्मा उरू मे सुरपूजितः ।
जानु जाड्यहरः पातु जंघे ज्ञानवतां वरः ॥५॥

गुल्फो गुणनिधिः पातु पादौ वराम्बरः ।
सर्वाण्यंगानि मे पातु स्वर्णमालापरिष्कृतः ॥६॥

य इदं कवचं दिव्यं पठति श्रद्धयान्वितः ।
न तस्य जायते पीड़ा भार्गवस्य प्रसादतः ॥७॥

॥ इति श्रीब्रह्माण्डपुराणे श्रीशुक्रकवचस्तोत्रम् सम्पूर्णम् ॥

शुक्र स्तोत्रम् .....

नमस्ते भार्गव श्रेष्ठ देव दानव पूजित: ।
वृष्टिरोधप्रकर्त्रे च वृष्टिकर्त्रे नमो नम: ॥१॥

देवयानीपितस्तुभ्यं वेदवेदांगपारग: ।
परेण तपसा शुद्ध: शंकरो लोकशंकर: ॥२॥

प्राप्तो विद्यां जीवनाख्यां तस्मै शुक्रात्मने नम: ।
नमस्तस्मै भगवते भृगुपुत्राय वेधसे ॥३॥

तारामण्डलमध्यस्थ स्वभासा भासिताम्बर: ।
यस्योदये जगत्सर्वं मंगलार्हं भवेदिह ॥४॥

अस्तं याते ह्यरिष्टं स्यात्तस्मै मंगलरूपिणे ।
त्रिपुरावासिनो दैत्यान् शिवबाणप्रपीडितान् ॥५॥

विद्यया जीवयच्छुक्रो नमस्ते भृगुनन्दन ।
ययातिगुरवे तुभ्यं नमस्ते कविनन्दन ॥६॥

बलिराज्यप्रदो जीवस्तस्मै जीवात्मने नम: ।
भार्गवाय नमस्तुभ्यं पूर्वं गीर्वाणवन्दितम् ॥७॥

जीवपुत्राय यो विद्यां प्रादात्तस्मै नमोनम: ।
नम: शुक्राय काव्याय भृगुपुत्राय धीमहि ॥८॥

नम: कारणरूपाय नमस्ते कारणात्मने ।
स्तवराजमिदं पुण्यं भार्गवस्य महात्मन: ॥९॥

य: पठेच्छुणुयाद्वापि लभते वाँछितफलम् ।
पुत्रकामो लभेत्पुत्रान् श्रीकामो लभते श्रियम् ॥१०॥

राज्यकामो लभेद्राज्यं स्त्रीकाम: स्त्रियमुत्तमाम् ।
भृगुवारे प्रयत्नेन पठितव्यं सुसमाहितै: ॥११॥

अन्यवारे तु होरायां पूजयेद्भृगुनन्दनम् ।
रोगार्तो मुच्यते रोगात् भयार्तो मुच्यते भयात् ॥१२॥

यद्यत्प्रार्थयते वस्तु तत्तत्प्राप्नोति सर्वदा ।
प्रात: काले प्रकर्तव्या भृगुपूजा प्रयत्नत: ॥१३॥

सर्वपापविनिर्मुक्त: प्राप्नुयाच्छिवसन्निधि: ॥१४॥

॥ इति श्री स्कन्दपुराणे शुक्रस्तोत्रं सम्पूर्णम् ॥

शुक्र स्तोत्रम् .....

विनियोग - अस्य शुक्र स्तोत्र मन्त्रस्य । प्रजापति ऋषि: । अनुष्टुप छन्द: । शुक्रो देवता ।
शुक्र प्रीत्यर्थे पाठे विनियोगः ।

शुक्रः काव्यः शुक्ररेताः शुक्लांबरधरः सुधीः।
हिमाभः कुन्दधवलः शुभ्रांशुः शुक्लभूषणः ॥१॥

नीतिज्ञो नीतिकृन्नीतिमार्गगामी ग्रहाधिपः।
उशना वेदवेदांगपारगः कविरात्मवित् ॥२॥

भार्गवः करुणासिन्धुः ज्ञानगम्यः सुतप्रदः।
शुक्रस्यैतानि नामानि शुक्रं स्मृत्वा तु यः पठेत् ॥३॥

आयुर्धनं सुखं पुत्रान् लक्ष्मीं वसतिमुत्तमाम्।
विद्यां चैव स्वयं तस्मै शुक्रस्तुष्टो ददाति हि ॥४॥

॥ इति श्री ब्रह्माण्ड पुराणे शुक्रस्तोत्रं सम्पूर्णम् ॥

॥ शनि मंत्र ॥

शनि सौराष्ट्र देश में उद्भव। कश्यप गोत्र। जाति असुर। माता छाया। कृष्ण वर्ण। पश्चिम दिशा।

- **शुभाशुभत्व** - **पाप ग्रह**
- **भोग काल** - **ढाई वर्ष - 912.5 दिन**
- **बीज मंत्र** - **ॐ शं शनैश्चराय नमः / ॐ ऐं ह्रीं श्रीं शनैश्चराय नमः / ॐ शनये नमः**
- **तांत्रिक मंत्र** - **ॐ प्राँ प्रीं प्रौं सः शनैश्चराय नमः**
- **वैदिक मंत्र** - **ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये।
शँयो रभिस्रवन्तु नः ॥**
- **पुराणोक्त मंत्र** - **ॐ नीलांजन समाभासं रविपुत्रं यमाग्रजम।
छायामार्तण्ड संभूतं तं नमामि शनैश्चरम ॥**
- **जप संख्या** - **23000 कलयुगे चतुर्थगुणो अर्थात 92000 + दशांश हवन - 9200 + दशांश तर्पण - 920 + दशांश मार्जन - 92 = 102212**
- **जप समय** - **मध्यान**
- **हवनवस्तु** - **शमी**
- **रत्न** - **5 से 7.5 रत्ति नीलम (लोहा)**
- **दान वस्तु** - **सुवर्ण, नीलम, उडद, तिल, तेल, भैस, लोहा, कृष्णपुष्प, कृष्णवस्त्र, कालीगाय**

शनि कवचम् .....

विनियोग - अस्य श्री शनैश्चर कवच स्तोत्र मन्त्रस्य। कश्यप ऋषिः। अनुष्टुप् छन्द। शनैश्चरो देवता। श्री शक्तिः। शूं कीलकम्। शनैश्चर प्रीत्यर्थे पाठे विनियोगः।

नीलाम्बरो नीलवपुः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान्।
चतुर्भुजः सूर्यसुतः प्रसन्नः सदा मम स्याद्वरदः प्रशान्तः ॥१॥

ब्रह्मोवाच

श्रृणुध्वमृषयः सर्वे शनिपीडाहरं महत्।
कवचं शनिराजस्य सौरेरिदमनुत्तमम् ॥२॥
कवचं देवतावासं वज्रपंजरसंज्ञकम्।
शनैश्चरप्रीतिकरं सर्वसौभाग्यदायकम् ॥३॥
ॐ श्रीशनैश्चरः पातु भालं मे सूर्यनंदनः।
नेत्रे छायात्मजः पातु कर्णो यमानुजः ॥४॥
नासां वैवस्वतः पातु मुखं मे भास्करः सदा।
स्निग्धकण्ठश्च मे कण्ठ भुजौ पातु महाभुजः ॥५॥
स्कन्धौ पातु शनिश्चैव करौ पातु शुभप्रदः।
वक्षः पातु यमभ्राता कुक्षिं पात्वसितस्थता ॥६॥
नाभिं गृहपतिः पातु मन्दः पातु कटिं तथा।
ऊरू ममाऽन्तकः पातु यमो जानुयुगं तथा ॥७॥
पदौ मन्दगतिः पातु सर्वांग पातु पिप्पलः।
अंगोपांगानि सर्वाणि रक्षेन् मे सूर्यनन्दनः ॥८॥
इत्येतत् कवचं दिव्यं पठेत् सूर्यसुतस्य यः।
न तस्य जायते पीडा प्रीतो भवन्ति सूर्यजः ॥९॥

व्ययजन्मद्वितीयस्थो मृत्युस्थानगतोऽपि वा।
कलत्रस्थो गतोवाऽपि सुप्रीतस्तु सदा शनिः ॥१०॥
अष्टमस्थे सूर्यसुते व्यये जन्मद्वितीयगे।
कवचं पठते नित्यं न पीडा जायते क्वचित् ॥११॥

इत्येतत् कवचं दिव्यं सौरेर्यन्निर्मितं पुरा।
जन्मलग्नस्थितान्दोषान् सर्वान्नाशयते प्रभुः ॥१२॥

॥ श्री ब्रह्माण्डपुराणे ब्रह्म-नारद संवादे शनैश्चर कवचं संपूर्ण ॥

शनि स्तोत्रम् .....

नमः कृष्णाय नीलाय शितिकण्ठ निभाय च।
नमः कालाग्निरूपाय कृतान्ताय च वै नमः ॥१॥
नमो निर्मांस देहाय दीर्घश्मश्रुजटाय च।
नमो विशालनेत्रय शुष्कोदर भयाकृते ॥२॥
नमः पुष्कलगात्रय स्थूलरोम्णेऽथ वै नमः।
नमो दीर्घायशुष्काय कालदष्ट्र नमोऽस्तुते ॥३॥
नमस्ते कोटराक्षाय दुर्निरीक्ष्याय वै नमः।
नमो घोराय रौद्राय भीषणाय कपालिने ॥४॥
नमस्ते सर्वभक्षाय वलीमुखायनमोऽस्तुते।
सूर्यपुत्र नमस्तेऽस्तु भास्करे भयदाय च ॥५॥

अधोदृष्टेः नमस्तेऽस्तु संवर्तक नमोऽस्तुते।
नमो मन्दगते तुभ्यं निरिस्त्रणाय नमोऽस्तुते ॥६॥
तपसा दग्धदेहाय नित्यं योगरताय च।
नमो नित्यं क्षुधार्ताय अतृप्ताय च वै नमः ॥७॥
ज्ञानचक्षुर्नमस्तेऽस्तु कश्यपात्मज सूनवे।
तुष्टो ददासि वै राज्यं रुष्टो हरसि तत्क्षणात् ॥८॥
देवासुरमनुष्याश्च सिद्धि विद्याधरोरगाः।
त्वया विलोकिताः सर्वे नाशंयान्ति समूलतः ॥९॥
प्रसाद कुरु मे देव वाराहोऽहमुपागत।
एवं स्तुतस्तदा सौरिर्ग्रहराजो महाबलः ॥१०॥

विनियोग - अस्य श्री शनैश्चर स्तोत्रं। दशरथः ऋषि। शनैश्चरो देवता। त्रिष्टुप् छंद।
शनैश्चर प्रीत्यर्थे जपे विनियोगः ॥

दशरथ उवाच

कोणोऽन्तका रौद्रयमोऽख बभ्रुःकृष्णः शनि पिंगलमन्दसौरि।
नित्य स्मृतो यो हरते पीड़ां तस्मै नमः श्रीरविनन्दाय ॥१॥
सुरासुराः किंपु-रुषोरगेन्द्रा गन्धर्वाद्याधरपन्नगाश्च।
पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्री रविनन्दनाय ॥२॥
नराः नरेन्द्राः पशवो मृगेन्द्रा वन्याश्च ये कीटपतंगभृंगा।
पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्री रविनन्दनाय ॥३॥
देशाश्च दुर्गाणि वनानि यत्र सेनानिवेशाः पुरपत्तनानि।
पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्री रविनन्दनाय ॥४॥
तिलैर्यवैर्माषगुडान्नदानैर्लोहेन नीलाम्बर-दानतो वा।
प्रीणाति मन्त्रैर्निजिवासरे च तस्मै नमः श्री रविनन्दनाय ॥५॥
प्रयाग कूले यमुनातटे च सरस्वती पुण्यजले गुहायाम्।
यो योगिनां ध्यागतोऽपि सूक्ष्मस्तस्मै नमः श्री रविनन्दनाय॥६॥

अन्यप्रदेशात्स्वःगृहं प्रविष्टस्तदीयवारे स नरः सुखी स्यात।
गहाद्गतो यो न पुनः प्रयाति तस्मै नमः श्री रविनन्दनाय ॥७॥
स्त्रष्टा स्वयं भूर्भुवनत्रयस्य त्रोता हरीशो हरते पिनाकी।
एक स्त्रिधा ऋग्यजुःसाममूर्तिस्तस्मै नमः श्री रविनन्दनाय ॥८॥
शन्यष्टकं यः प्रयतः प्रयाते नित्यं सुपुत्रैः पशुबान्धवैश्च।
पठेतु सौख्यं भुवि भोगयुक्तः प्राप्नोति निर्वाण पदं तदन्ते ॥९॥
कोणस्थः पिंगलो बभ्रुः कृष्णो रौद्रान्तको यमः।
सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः ॥१०॥
एतानि दश नामानि प्रतारुत्थाय यः पठेत्।
शनैश्चकृता पीड़ा न कदाचिद् भविष्यति ॥११॥

॥ इति श्री दशरथ कृत शनि स्तोत्रम् सम्पूर्णम् ॥

॥ राहु ग्रह ॥

राहु राठिनापुर देश में उद्भव। पैठिनस गोत्र। जाति असुर। माता सिहिंका। निल वर्ण। नैऋत्य दिशा।

- **शुभाशुभत्व - क्रूर ग्रह**
- **भोग काल - डेढ़ वर्ष - 547.5 दिन**
- **बीज मंत्र - ॐ रां राहवे नमः / ॐ ऐं ह्रीं राहवे नमः / ॐ राहवे नमः**
- **तांत्रिक मंत्र - ॐ भ्रॉं भ्रीं भ्रौं सः राहवे नमः**
- **वैदिक मंत्र - ॐ कया नश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता॥**
- **पुराणोक्त मंत्र - ॐ अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम। सिंहिकागर्भ संभूतं तं राहुं प्रणमाम्यहम॥**
- **जप संख्या - 18000 कलयुगे चतुर्थगुणो अर्थात 72000 + दशांश हवन - 7200 + दशांश तर्पण - 720 + दशांश मार्जन - 72 = 79992**
- **जप समय - रात्रिकाल 12 बजे**
- **हवनवस्तु - दूर्वा**
- **रत्न - 6.5 रत्ति गोमेद**
- **दान वस्तु - सुवर्ण, शीसा, गोमेद, तील, तेल, घोडा, लोहा, गेहुँ कृष्णपुष्प, नीलवस्त्र, कम्बल, अर्भक**

राहु कवचम् .....

विनियोग - अस्य श्रीराहु कवचस्य। चन्द्रमा ऋषिः। अनुष्टुप छन्दः। रां बीजं। नभः शक्तिः। स्वाहा कीलकम्। राहु प्रीत्यर्थे पाठे विनियोगः।

**प्रणमामि सदा राहुं शूर्पाकारं किरीटिनम्।
सैन्हिकेयं करालास्यं लोकानां भयप्रदम् ॥१॥**

**नीलाम्बरः शिरः पातु ललाटं लोकवन्दितः।
चक्षुषी पातु मे राहुः श्रोत्रे त्वर्धशरीरवान् ॥२॥**

**नासिकां मे धूम्रवर्णः शूलपाणिर्मुखं मम।
जिव्हां मे सिंहिकासूनुः कंठं मे कठिनांघ्रिकः ॥३॥**

**भुजङ्गेशो भुजौ पातु निलमाल्याम्बरः करौ।
पातु वक्षःस्थलं मन्त्री पातु कुक्षिं विधुन्तुदः ॥४॥**

**कटिं मे विकटः पातु ऊरु मे सुरपूजितः।
स्वर्भानुर्जानुनी पातु जंघे मे पातु जाड्यहा ॥५॥**

**गुल्फ़ौ ग्रहपतिः पातु पादौ मे भीषणाकृतिः।
सर्वाणि अंगानि मे पातु निलश्चन्दनभूषणः ॥६॥**

**राहोरिदं कवचमृद्धिदवस्तुदं यो।
भक्त्या पठत्यनुदिनं नियतः शुचिः सन् ॥७॥**

**प्राप्नोति कीर्तिमतुलां श्रियमृद्धिमायुरारोग्यम्।
आत्मविजयं च हि तत्प्रसादात् ॥८॥**

॥ इति श्रीमहाभारते धृतराष्ट्रसंजय सम्वादे द्रोणपर्वणि राहुकवचं सम्पूर्णम् ॥

राहु स्तोत्रम् .....

विनियोग - अस्य श्री राहु स्तोत्रस्य । वामदेव ऋषिः । गायत्री छन्दः । राहुर्देवता ।
राहुप्रीत्यर्थे पाठे विनियोगः ॥

**राहुर्दानव मन्त्री च सिंहिकाचित्तनन्दनः ।
अर्धकायः सदाक्रोधी चन्द्रादित्यविमर्दनः ॥१॥**

**रौद्रो रुद्रप्रियो दैत्यः स्वर्भानुर्भानुमीतिदः ।
ग्रहराजः सुधापायी राकातिथ्यभिलाषुकः ॥२॥**

**कालदृष्टिः कालरुपः श्रीकष्ठहृदयाश्रयः ।
विधुंतुदः सैंहिकेयो घोररुपो महाबलः ॥३॥**

**ग्रहपीडाकरो द्रंष्टी रक्तनेत्रो महोदरः ।
पञ्चविंशति नामानि स्मृत्वा राहुं सदा नरः ॥४॥**

**यः पठेन्महती पीडा तस्य नश्यति केवलम् ।
विरोग्यं पुत्रमतुलां श्रियं धान्यं पशूंस्तथा ॥५॥**

**ददाति राहुस्तस्मै यः पठते स्तोत्रमुत्तमम् ।
सततं पठते यस्तु जीवेद्वर्षशतं नरः ॥६॥**

॥ इति श्रीस्कन्दपुराणे राहुस्तोत्रं संपूर्णम् ॥

॥ केतु मंत्र ॥

केतु अंतर्वेदी देश में उत्पत्ति। जैमिनी गोत्र। जाति असुर। धूम्र वर्ण। वायव्य दिशा। छाया ग्रह।

- **शुभाशुभत्व - पाप ग्रह**
- **भोग काल - डेढ़ वर्ष - 547.5 दिन**
- **बीज मंत्र - ॐ कं केतवे नमः / ॐ ह्रीं ऐं केतवे नमः / ॐ केतवे नमः**
- **तांत्रिक मंत्र - ॐ स्रां स्रीं स्रौं सः केतवे नमः**
- **वैदिक मंत्र - ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे।
समुषभ्दिरजायथा:॥**
- **पुराणोक्त मंत्र - ॐ पलाश पुष्प संकाशं तारका ग्रह मस्तकम।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम ॥**
- **जप संख्या - 17000 कलयुगे चतुर्थगुणो अर्थात 68000 + दशांश हवन - 6800 + दशांश तर्पण - 680 + दशांश मार्जन - 68 = 75548**
- **जप समय - रात्रिकाल 12 बजे**
- **हवनवस्तु - कुशा**
- **रत्न - 6.5 रत्ति लहसुनीया (पोलाद)**
- **दान वस्तु - सुवर्ण, लहसुनीया, पोलाद, तील, तेल, बकरी,
कृष्णवस्त्र, धूम्रपुष्प, कम्बल, शस्त्र**

केतु कवचम् .....

विनियोग - अस्य श्रीकेतु कवच स्तोत्र मन्त्रस्य। त्रयम्बक ऋषिः। अनुष्टप् छन्दः। केतुर्देवता।
कं बीजं। नमः शक्तिः। केतुरिति कीलकम्। केतु प्रीत्यर्थं पाठे विनियोगः।

**केतु करालवदनं चित्रवर्णं किरीटिनम्।
प्रणमामि सदा केतुं ध्वजाकारं ग्रहेश्वरम् ॥१॥**

**चित्रवर्णः शिरः पातु भालं धूम्रसमद्युतिः।
पातु नेत्रे पिंगलाक्षः श्रुती मे रक्तलोचनः ॥२॥**

**घ्राणं पातु सुवर्णाभश्चिबुकं सिंहिकासुतः।
पातु कंठं च मे केतुः स्कन्धौ पातु ग्रहाधिपः ॥३॥**

**हस्तौ पातु श्रेष्ठः कुक्षिं पातु महाग्रहः।
सिंहासनः कटिं पातु मध्यं पातु महासुरः ॥४॥**

**ऊरुं पातु महाशीर्षो जानुनी मेऽतिकोपनः।
पातु पादौ च मे क्रूरः सर्वाङ्गं नरपिंगलः ॥५॥**

**य इदं कवचं दिव्यं सर्वरोगविनाशनम्।
सर्वशत्रुविनाशं च धारणाद्विजयि भवेत् ॥६॥**

॥ इति श्रीब्रह्माण्डपुराणे केतुकवचं सम्पूर्णम् ॥

केतु स्तोत्रम् .....

विनियोग - अस्य श्रीकेतु पंच विंशति नाम स्तोत्रस्य। मधुपछन्द: ऋषिः। गायत्री छन्दो:। केतुर्देवता। केतु प्रीत्यर्थे पाठे विनियोगः।

केतु: काल: कलयिता धूम्रकेतुर्विवर्णक:।
लोककेतुर्महाकेतु: सर्वकेतुर्भयप्रद: ॥१॥

रौद्रो रूद्रप्रियो रूद्र: क्रूरकर्मा सुगन्धक्।
फलाशधूमसंकाशश्चित्रयज्ञोपवीतधृक् ॥२॥

तारागणविमर्दो च जैमिनेयो ग्रहाधिप:।
पंचविंशति नामानि केतुर्य: सततं पठेत् ॥३॥

तस्य नश्यंति बाधाश्चसर्वा: केतुप्रसादत:।
धनधान्यपशूनां च भवेद् व्रद्धिर्नसंशय: ॥४॥

॥ इति श्री केतु स्तोत्रम् सम्पूर्णम् ॥

नवग्रहकाण्डी
खेमराज श्रीकृष्णदास प्रकाशन,
बम्बई

॥ श्रीः ॥

नवग्रहकाण्डी ।

अर्थात्

नित्यपूजाविधानपद्धति.

संस्कृतटीका और भाषाटीकासहित ।

सदरबजारमेरठ संस्कृतपुस्तकालयाधीश
ईश्वरीप्रसादजीशर्म्मा. संग्रहीत.
सनातनधर्म्मरक्षक संस्कृतविद्यालयके द्वितीयाध्यापक
पण्डितस्वामी हरदयालुशर्माजीने संशोधित

संस्करण - दिसम्बर २००३, सम्वत् २०६०.

मूल्य : ५ रुपये मात्र।

मुद्रक एवं प्रकाशक:

खेमराज श्रीकृष्णदास,™

अध्यक्ष : श्रीवेंकटेश्वर प्रेस,

खेमराज श्रीकृष्णदास मार्ग, मुंबई - ४०० ००४.

भूमिका ।

प्रकट हो कि इस "नित्यपूजाविधानपद्धति" बनानेका प्रयोजन यह है कि जो लोग वेदविद्या नहीं पढे हैं वे वेदमंत्रोंका अर्थ नहीं जानसकते और जो मंत्रोंका फल और माहात्म्य स्मृतियोंमें लिखा है बहुतेरे देहाती नामके पंडित ऐसेभी देखे हैं नवग्रहोंके मंत्रभी नहीं जानते और यदि किसी पण्डितसे पूँछा जावे कि, अमुक ग्रहका मंत्र किस वेदका और कौनसे अध्यायका है. तो सिवाय मूकताके कुछभी उत्तर नहीं देते इसी अभावके दूर करनेको मूलमंत्र भाष्य और भाषार्थसहित निर्म्माण की और सज्जनवेदज्ञ लोगोंसे यह प्रार्थना है कि जो अशुद्ध देखें कृपाकर शोध देवें.

अध्यक्ष–

संस्कृत पुस्तकालय } ब्राह्मणोंका पदरज,
सदर बाजार मेरठ. } ईश्वरीप्रसादशर्मा.

श्रीः ।

अथ नवग्रहकाण्डी

संस्कृतटीका–भाषाटीकासमेत ।

हरिः ॐम्

यजुर्वेद अध्याय २३ मन्त्र ९१.

गणानांत्वागणपति ँ हवामहे
प्रियाणांत्वाप्रियपति ँ हवामहे
निधीनांत्वानिधिपति ँ हवामहे
ठवसोमम ॥ आहमजानि गर्भध
मात्वमजासिगर्भधम् ॥ १ ॥

अर्थ–अनेन मन्त्रेण गणपतेरावाहनं कार्य्यम्
यथा हे मम वसो मदीयधन गणेश वयं गणानां

स्वामिकार्तिकादीनां पतिं गणपतिं स्वामिनं त्वा त्वां स्वकीययज्ञपूजनादौ हवामहे आवाहयामः । पुनः प्रियाणां शिवगणानां मध्ये प्रियपतिंत्वा त्वां हवामहे आवाहयामः । निधीनां त्वा निधिपतिं हवामहे । वसति अस्मिन् सर्वं जगदिति वसु व्यापकत्वात् गणेशश्चैतन्यतया । वसुशब्देन अंतर्यामित्वमुक्तम् । तत्संबुद्धौ हे वसो गणपते त्वया अहमजानि उत्पादितः । कीदृशोऽहं गर्भधं मात्रा गर्भे धीयते यः स गर्भधम् । लिंगव्यत्ययः छान्दसः । गर्भध इत्यर्थः।किंच हे अज अनादे त्वं गर्भधं गर्भधो मासि न भवसि। एतेन जन्मविकारकथनेन गणपतेर्निर्विकारत्वमुक्तम् ॥ १ ॥

भाषार्थ—हे हमारे धन गणेश ! हम स्वामिकार्तिकादि गणोंके स्वामि आपको अपने यज्ञपूजनादिमें बुलाते हैं पुनः शिवगणोंके बीचमेंसे

प्यारे स्वामी! आपको बुलाते हैं, हे गणेश! निधियोंमें निधियोंके स्वामी! आपको बुलाते हैं, हे गणेश! आपने मुझको उत्पन्न किया है कैसा हूँ मैं कि, माताने मुझको गर्भमें धारण किया है और हे अज! अनादि आप गर्भसे नहीं होते हो १॥

यजु० अध्याय ३० अनुवाक १ मंत्र ३.

विश्वानिदेव सवितर्दुरितानिपरा-
सुव॥ यद्भद्रंतन्नआसुव॥ २॥

अर्थ-हे देव सवितः विश्वानि सर्वाणि दुरितानि पापानि परासुव दूरे गमय। यद्भद्रं कल्याणं तन्नोऽस्मान् प्रति आसुव आगमय॥ २॥

भाषार्थः-हे जगतकी उत्पत्तिकरनेवाले प्रकाशवान् देवता! आप हमारे पाप दूर करो और जो कल्याण है सो प्राप्त करो॥ २॥

शुक्लयजुर्वेद अध्याय २५ कं० मं० ९१

स्वस्तिनइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्यों अरिष्टनेमिः स्वस्तिनोबृहस्पतिर्द-धातु ॥ ३ ॥

अर्थ—इन्द्रः नोऽस्मभ्यं स्वस्ति अविनाशं शुभं दधातु कीदृशः वृद्धश्रवा बृहच्छ्रवः कीर्तिः यस्य सः पूषा नः स्वस्ति दधातु ददातु कीदृशः विश्वे-वेदाः विश्वं सर्वं वेदो धनं यस्य विश्वं वेत्तीति वा विश्ववेदाः तार्क्ष्यों रथो गरुडो वाहनः स्वस्ति दधातु कीदृशः अरिष्टनेमिः अरिष्टा अनुपहिं-सितानेमिश्चक्रधारा पक्षौ वा यस्य सः बृहस्पतिः देवगुरुर्नोऽस्मभ्यं स्वस्ति दधातु ॥ ३ ॥

भाषार्थः--इन्द्रदेवता हमारा कल्याण करो । कैसा है बडी है कीर्ति जिसकी विश्वको जानने-वाला पूषा देवता कल्याण करो । अरिष्टोंका नाशक गरुडजी हमारा कल्याण करो । और बृहस्पति देवता हमारा कल्याण करो ॥ ३ ॥

यजु० अध्याय ३५ मंत्र ३६.

पयः पृथिव्यांपयओषधीषुपयो दिव्यन्तरिक्षेपयोधाः॥ पयस्वतीः प्रदिशः सन्तुमह्यम् ॥ ४ ॥

अर्थ-हे अग्ने त्वं पृथिव्यां पयो रसं धाः धेहि स्थापय दधातेर्लुङिमध्यमपुरुषैकवचनेरूपं बहुलं छन्दस्यमाङ्योगेपि ६--४--७५ इत्यडभावः । ओषधीषु च पयो धाः । दिवि स्वर्गे च पयो धाः । अन्तरिक्षेच पयोधाः।किंचमह्यंमदर्थेप्रदिशःदिशो विदिशश्चपयस्वतीःपयस्वत्योरसयुताःसन्तु॥४॥

भाषार्थः-हे अग्ने तुम पृथिवीपर रसस्थापन करो और औषधियोंमें रस स्थापन करो । और स्वर्गमें रस स्थापन करो । अन्तरिक्षमें और मेरे अर्थ दिशा पूर्वादि और विदिशा अग्निकोणादि रसयुक्त हों ॥ ४ ॥

शु० यजु० अध्याय ५ मंत्र २१.

विष्णोरराटमसिविष्णोःश्नप्त्रेस्थो
विष्णोःस्यूरसि । विष्णोर्ध्रुवोसि
वैष्णवमसिविष्णवेत्वा ॥ ५ ॥

अर्थ--हे दर्भमयमालाधारवंशत्वंविष्णोःविष्णुत्वेनोपचारितस्यहविर्धानमण्डपस्य रराटमसिललाटस्थानीयोऽसिहेरराटचौयुवांविष्णोः विष्णुनामकस्यहविर्धानमण्डपस्यश्नप्त्रेस्थः ओष्ठसंधिरूपेभवथःहे स्थूलस्यूबृहत्सूचिस्यूरसि।सीव्यन्तेऽनेने तिस्यूःसूचिः।पिवुतन्तुसन्तानेक्किपिच्छोरि-

त्यूह् हे रज्जुग्रन्थेत्वंविष्णोःहविर्धानस्यध्रुवोसि-ग्रंथिर्भवसि हेहविर्धानत्वंवैष्णवमसिविष्णुदेवताकत्वेन तत्सम्बन्धिभवसितस्माद्विष्णवेविष्णुप्रीत्यर्थंत्वात्वांस्तौम्यथवास्पृशामीति शेषः ॥ ८ ॥

भाषार्थः—हे दर्भमयमालाधारवंश ! तुम हविर्धान मंडपके मस्तकस्थानीय हो । हे रराट ! तुम विष्णु नाम हविर्धान मंडपके श्रेष्ठ संधिरूप हो । हे बृहत्सूचि । तुम हविर्धानमंडपके सूचिरूप हो । हे रज्जुग्रन्थे ! तुम विष्णुहविर्धानके ग्रन्थि हो । हे हविर्धान ! तुम विष्णु देवताके संबंधि हो । इस हेतु विष्णु भगवान्की प्रीतिके अर्थ तुम्हारी स्तुति अथवा स्पर्श करता हूं ॥ ८ ॥

यजु० अध्याय १४ मंत्र २०

अग्निर्देवता वातोदेवता रुद्रोदेवता

सूर्योदेवता चन्द्रमादेवता वसवो देवता रुद्रा देवताऽऽदित्यादेवता मरुतोदेवता विश्वेदेवादेवता बृहस्पतिर्देवतेन्द्रोदेवता वरुणोदेवता ।

यजु० अध्याय ३० अनुवाक १ मंत्र ३.

द्यौःशान्तिरन्तरिक्ष ँ शान्तिःपृथिवी शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वँशान्तिः शान्तिरेव शान्तिः सामाशान्तिरेधि ॥

इति स्वस्तिवाचनं सम्पूर्णम् ।

अर्थ-या त्वं अग्न्यादिदेवतारूपासि तां त्वामुपस्तौमीति स्मरामीति वेति सर्वत्र योज्यम्। अग्न्यादीनां देवतात्वं प्रसिद्धम् । द्यौरिति द्युलोकरूपा या शान्तिःअन्तरिक्षरूपाच या शान्तिःपृथिवी भूलोक रूपा या शान्तिः आपो जलरूपा या शान्तिः ओषधयः ओषधिरूपा या शान्तिः वनस्पतयः वृक्षरूपा या शान्तिः विश्वेदेवाः सर्वदेवरूपा या शान्तिः सर्वं सर्वजगद्रूपा या शान्तिः शान्तिरेव शान्तिः या स्वरूपतः शान्तिः सा शान्तिः मा मां प्रति एधि अस्तु पुरुषव्यत्ययः ॥

भाषार्थः--हेईश! जोकि तुम अग्निआदि देवतारूपहो ऐसे तुमको स्मरण करताहूँ और स्तुतिकरताहूँ । अग्निआदि देवता प्रसिद्ध है । अग्नि देवता है १ वात देवता है २ सूरज देवता है ३ चन्द्रमा देवता है ४ आठ वसु देवता हैं ५ एकादश रुद्र देवता हैं ६ द्वादश आदित्य देवता हैं ७ उंचास

मरुत् देवता हैं ८ त्रयोदश विश्वेदेवा देवता हैं ९ बृहस्पति देवता है १० इन्द्र देवता हैं ११ जलाधिपति वरुण देवता हैं ॥ १२ ॥

प्रकाशलोकरूप जो शान्ति। अन्तरिक्षरूप जो शान्ति। भूलोकरूप जो शांति। जलरूप जो शांति। औषधिरूप जो शांति। वृक्षरूप जो शांति। सर्वदेवरूप जो शांति। वेदरूप जो शांति। सर्व जगरूप जो शांति। शांति ही शांति। जो स्वरूपसे ही शांति है वह शांति मेरे प्रति हो। इति गणानामित्यादिस्वस्ति वाचनमन्त्राणामर्थः समाप्तः ॥

यजुर्वे० अध्याय २ मंत्र १२.

ॐ एतंते देवसवितर्य्यज्ञम्प्राहुर्बृहस्पतयेब्रह्मणे। तेनयज्ञमवतेन यज्ञपतिंतेनमामव ॥ १ ॥

मनोजूतिर्जुषतामाज्यस्यबृहस्पति-
र्यज्ञमिमंतनोत्वरिष्टंयज्ञᳬसमिमं
दधातु । विश्वे देवासइह मादय
न्तामोऽ३म् प्रतिष्ठ ॥ २ ॥

भाषार्थः- समिदाधान करनेको आज्ञाप्रदान के अर्थ बोधन किया ब्रह्मा एतंत इत्यादि ॐ प्र-तिष्ठेत्यन्त मन्त्रकरि आज्ञादे ॥ वैश्वदेवं यजुः । हे देव दातादिगुणयुक्त हे सवितः उत्पत्तिकारक इस समय क्रियमाण यह यज्ञ तेरे अर्थ यजमान कहते हैं । किंच तुमसे प्रेरित देवताओंके यज्ञमें जो ब्रह्मा उसका और बृहस्पतिके अर्थभी कहते हैं जैसे बृहस्पति देवताओंका ब्रह्मा ऐसेही तद-धिष्ठित यह मनुष्य ब्रह्मत्वोंके करता है किंच इस हेतु करके अपने यज्ञको रक्षाकर ॥ १ ॥

किंच हे सवितः अपने मन चित्तको यज्ञ संबंध

आज्यमें स्थापन कर कैसा मन कि भूत भविष्य-
द्वर्तमान तीनों कालगत पदार्थोंमें गमन शील।
किञ्च बृहस्पति इस यज्ञको विस्तार करे।
क्योंकि ब्रह्मा है। फिर इस यज्ञको हिंसारहित
करके स्थापन करे। क्योंकि इडा भक्षणसे
मध्यमें यज्ञ विच्छिन्न हुआ उस हेतु कहा और
सब देवता इस यज्ञकर्ममें तृप्त हों एवं प्रार्थितः
सविता ॐम्प्रतिष्ठ यह अनुज्ञाते। ओम्। अङ्गी-
कारार्थे प्रतिष्ठ प्रयाणं कुरु अर्थात् समिदाधान
कालमें यजमानके अभिप्रेत प्रयाणको जान
सविता देवताअङ्गीकारकर प्रयाणमें प्रेरणाकरें२॥

अथ कलशपूजनमंत्रः।

शुक्ल यजु० अध्याय ४ मंत्र ३६.

वरुणस्योत्तम्भनमसि वरुणस्य
स्कम्भसर्जनीस्स्थो वरुणस्यऽऋ-

तस्रदन्यसि वरुणस्यऽऋतसदन-
मसिवरुणस्यऽऋतसदनमासीद ॥

अर्थ–हे शम्पे त्वं वरुणस्य उत्तम्भनमसि हे शम्पे युवां वरुणस्य स्कंभसर्जनीस्थः । पुनःवरुणस्य ऋतसदनीनाम यज्ञनिष्पत्त्यर्थमुपवेशन स्थानभूता असि । वरुणस्य ऋतसदनमसि । पुनः वरुणस्य ऋतसदनं सत्यस्थानं आसीद ॥

भवार्थः–(वरुणस्योत्तंभनमसि) हे शम्पे तुम वरुणके जलकी स्तंभनकरनेवाली है और वरुणकी तुम शिथिल शम्पा होवे और वरुणके सत्य स्थानमें हो और वरुणके सत्यस्थान होनेसे आप इह स्थित होवें यह वेदमंत्रार्थ है ब्रह्माजीने अमृतोद्भवमंत्रोंसे आपको रचा और हम आपकी प्रार्थना करते हैं कि, हमारे वांछित अर्थ देवें ॥

अथ गणेशपूजनमंत्रः ।

नमो गणभ्यो गणपतिभ्यश्च वो
नमो नमो व्रातेभ्यो व्रातपतिभ्य
श्चवो नमो नमो गृत्सेभ्यो गृत्सप-
तिभ्यश्च वो नमो नमो विरूपे-
भ्योविश्वरूपेभ्यश्चवो नमो नमः ॥

अर्थ—गणेभ्यो नमः च पुनः गणपतिभ्यो नमः व्रातेभ्यो नमः पुनः व्रातपतिभ्यो नमः गृत्सेभ्यो मेधाविज्ञाननिष्ठरूपेभ्योनमः पुनःगृत्सपतिभ्यो-नमः विरूपेभ्यो जीवनमुक्तरूपेभ्यो नमः विश्व-रूपेभ्यः देहाभिमानिरूपेभ्यो नमः वः युष्मभ्यं नमः । गणेभ्यः इत्यादि बहुवचनमादरार्थम् ॥

भाषार्थः—(नमो गणेभ्यो)तुम गणोंकेसमूहोंको और गणोंके स्वामीको नमस्कार है (व्रातेभ्यो)

व्रातनाम शरीरभूत तुमको और (व्रातपतिभ्यो) शरीरभूतोंके स्वामी तुमको प्रणाम है (नमो गृत्सेभ्यो) नमस्कार है विघ्नके करनेवाले याको वा विषयमें लंपटको वा बुद्धिवाले तुमको बुद्धि और विज्ञाननिष्ठरूपकोऔर गृत्स अर्थात् मेधावी ज्ञानस्वामीको (नमः) प्रणाम है (नमो विरूपेभ्यो) प्रणाम है. अनेक रूपवालोंको) नमोहै॥ रूपवालों वा विशिष्ट रूपवालोंको(विश्वरूपेभ्यश्च वो नमः) संपूर्णरूपवालो तुमको प्रणाम है ॥

अथ सूर्यमंत्रः ।

शु० यजु० अध्याय ३४ मंत्र ३१.

आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च ॥ हिरण्ययेन सविता रथेना देवो यातिभुवनानि पश्यन् ॥ १ ॥

अर्थ–हिरण्ययेन रथेन वर्तमानः सविता देवो भुवनानि पश्यन्याति किं कुर्वन् सन् आकृष्णेन तमोरूपधर्मेण बहिर्दृष्टीनां मर्त्यं मृत्युं निवेशयन् च पुनः रजसा कान्त्याऽन्तर्दृष्टिष्वमृतं मोक्षं निवेशयन् ॥ १ ॥

भाषार्थः–सुवर्णमय रथमें बैठाहुआ सूर्यदेवता भुवनोंको देखताहुआ जाताहै क्या करताहुआ तमोरूप धामसे बाहरकी दृष्टिवालोंको मृत्यु प्राप्त करताहुआ अर्थात् जो लोग सूर्यकी आगको गोला मानते हैं उनकोगर्मीसे मारताहुआ और जो चैतन्यरूप सत्ता माननेवाले हैं उनको अपने ज्ञानरूपी प्रकाशसे मोक्षदेताहुआसूर्यदेवता चतुर्दश भुवनोंको देखताहुआ जाताहै ॥ १ ॥ अपरं च ऋग्वेदसंहितायां द्वितीयेष्टके सूर्यसूर्तिरुक्ता । हिरण्यकर्णं मणिग्रीवमित्यादि सूर्यके

कानोंमें सोनेके कुण्डल और रत्नजटित ग्रीवामें कंठा। यजुर्वेदेपि। योसावादित्ये पुरुषः सोऽसावहम्। जोआदित्य मंडलमेंपुरुषहैवह मैंहूँ इससेभी चैतन्य पुरुष आदित्यके मंडलमें सिद्ध हुआ ॥

अथ चन्द्रमन्त्रः।

शुक्लयजु॰ अध्याय १० मंत्र १९.

इमं देवा असपत्नꣳसुवद्ध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जान राज्यायेन्द्रस्येन्द्रियाय ॥ इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोमी राजा सोमोऽस्माकं ब्राह्मणनाꣳ राजा ॥ १ ॥

अर्थ-ब्रह्मा यजमानान् प्रतिवदति। हेयजमाना एषः सोमोऽस्माकं ब्राह्मणानां राजा हे यजमाना

एषोमी चन्द्रः मः मेधायुक्त ईश्चन्द्र ईकारेण जलाधिपतिश्चन्द्रः। अप्सु चन्द्रमाश्चरति इति श्रुतेः।वो युष्माकं राजा इमं सुवध्वं चन्द्रमसं देवा असपत्नं मन्यन्ते इत्यध्याहार्य्यम् । येन विना यदनुत्पन्नं तत्तेनाक्षिप्यते । ब्राह्मणा महते ज्यैष्ठयाय महर्षिपदप्राप्तये मन्यन्ते इडानाड्याश्रयेण । क्षत्राय महते जानराज्याय जनानामाधिपत्याय महते क्षत्राय मन्यंते।विशः वैश्या इमम् अमुष्य ब्रह्मणः पुत्रम् । अमुष्यै पुत्रं ब्रह्मण्याः पुत्रम् । षष्ठ्यर्थे चतुर्थी । इन्द्रस्य व्यापारस्य इन्द्रियाय बलाय अस्यै ब्रह्माण्यै मन्यन्ते । सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । अनेन चन्द्रमसः पिता ब्रह्मा माता च ब्रह्माणी सिद्धा ॥ २ ॥

भाषार्थः—इसमंत्रको अर्थसहित जो यज्ञमें ब्रह्मा पूजन करानेवाला हो वह सुनादे औरइसीसे चन्द्रमाका पूजन करावे (इमं देवा(इति) ब्रह्मा यज-

मानोंको कहते हैं हे यजमानों ! यह चन्द्रमा देवता हम ब्राह्मणोंका राजा है और तुम्हारा भी राजा है इस श्रेष्ठ चन्द्रमाको देवता अपनाही भ्राता मानते हैं । और ब्राह्मण इसको महर्षिपदके लाभके लिये मानते हैं । इडा चन्द्रमाकी नाडीके आश्रयसे और क्षत्रिय इसको बडे भारी राज्य और क्षात्रधर्मके लिये मानते हैं तथा वैश्य इसको ब्रह्माजीका पुत्र और ब्रह्माणीका पुत्र व्यापारके लिये मानते हैं ॥ २ ॥

अथ भौममंत्रः ।

शुक्लयजु० ३ अध्याय मंत्र १२.

अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथि-
व्या अयम् । अपा ꣳ रेता ꣳ
सि जिन्वति ॥ ३ ॥

अर्थ–आचार्य्यो वा ब्रह्मा वदति । हे यजमान अयं मण्डलस्थाग्निरूपो भौमः ककुत्पृथिव्याः पतिः । पुनः दिवः मूर्द्धा पुनः किंभूतः अपां रेतांसि जिन्वति । ककुत् इति महन्नाम निघंटुः ॥२॥

भाषार्थः--आचार्य कहता है यजमान हो यह मण्डलमें स्थित अग्निरूप त्रिकोणाकार मंगल बडीभारी पृथ्वीका पालन रक्षण करनेवालाहै और प्रकाशरूप लोकके ऊपर विराजमान है । फिर कैसा है कि जलोंको उत्पन्न करनेवाला है ॥३॥

अथ बुधमन्त्रः ।

यजु ० अध्याय १५ मंत्र ३.

उद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टा पूर्ते स ꣳ सृजेथामयञ्च । अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत ॥ ४ ॥

अर्थ--हे अग्ने अग्न्युत्पादक बुध त्वद्बुद्ध्यस्व। कोर्थः अस्माकं यज्ञे चैतन्यो भव। वायुमण्डलस्थो बुधो वायुरुत्पादकः। वायोरग्निरिति परम्परया प्राप्तः प्रतिजागृहि जाग्रदवस्थायां भूत्वा यजमानान् पश्येत्यर्थः। च पुनः अयम् इष्टापूर्ते संसृजेथाः वापीकूपतडागादियज्ञसमाप्तिः त्वयैव कारिता। अस्मिन्त्सधस्थे अस्मिन् यज्ञे अध्युत्तरस्मिन् अग्रिमे यज्ञे विश्वेदेवा देवता यजमानश्च यजमानं यज्ञकर्तारमुपरि सीदत प्रसीदन्तु छन्दसि सर्वा विभक्तयः सर्वेष्वर्थेषु भवन्ति व्यत्ययो बहुलं छन्दसीति। प्रसीदन्त्विति प्रार्थनायां लोट्॥ ४॥

भाषार्थः—हे अग्निके उत्पन्न करनेवाले बुधदेवता ! तुम हमारे यज्ञमें विघ्न दूर करनेको चैतन्य होजाओ जिससे राक्षस यज्ञविध्वंस न करे। और हमपर जागकर कृपा करो यह वापी कुवा

तालाव और यज्ञ होम आपहीकी सहायतासे पूर्णहुआ है इस यज्ञमें और पुनः कभी आगेके यज्ञमें आपकी कृपासे विश्वेदेव देवता हमपर प्रसन्न होंय यही हमारी प्रार्थना है ॥ ४ ॥

अथ बृहस्पतिमन्त्रः ।

यजु० अध्याय २६ मंत्र ३.

बृहस्पतेअतियदर्य्योअर्हाद्युमद्विभा-
तिक्रतुमज्जनेषु ॥ यद्दीदयच्छव-
सऋतप्रजाततदस्मासुद्रविणंधेहि
चित्रम् ॥ ५ ॥

अर्थ—ऋतप्रजात सत्येनोत्पन्न हे बृहस्पते बृहतां देवानां पतिः बृहस्पतिस्तत्संबुद्धौ हे बृहस्पते श्रेष्ठो ब्राह्मणः सर्वान् कामानतीत्य यद्ब्रह्मवर्चसंतेजो ऽर्हात् पूजयेत् अर्ह पूजायां लेटचडागमः जनेषु ब्राह्मणेषु द्युमत् दीप्तयुक्तं क्रतुमत् ज्ञानोपेतं यद्ब्रह्म-

वर्चसंविभाति चित्रं चायनीयं तद्ब्रह्मवर्चसरूपंद्र-विणमस्मा सुधेहि विधेहि द्रवति सततं गच्छ-ति तत् यत् द्रविणम् ॥ ८ ॥

भाषार्थः--यजमानकी प्रार्थना बृहस्पतिजीसे हे सत्यसे उत्पन्न बृहस्पतिजी महाराज! जैसे श्रेष्ठ ब्राह्मण ब्रह्मतेजको पूँछकर ब्राह्मणोंके बीचमें प्रका-शित और ज्ञानयुक्त शोभा पाता है और ब्रह्मते-जके बलसे अपने समीपवर्ती मनुष्योंको ज्ञान-रूपी दीपकसे सत्याऽसत्यका विवेक कराता है ऐसा इकट्ठा करनेके योग्य ब्रह्मतेजरूपी धन हमारे में स्थापन करो ॥ ८ ॥

अथ शुक्रमन्त्रः ।

यजु० अध्याय १९ मंत्र ७५.

अन्नात्परिस्रुतोरसंब्रह्मणाव्यपिबत्
क्षत्रं पयःसोमं प्रजापतिः ॥ ऋतेन

सत्यमिन्द्रियं विपान ७ँ शुक्र-
मन्धस इन्द्रस्येन्द्रियमिदं पयोऽ-
मृतं मधु ॥ ६ ॥

अर्थ--प्रजापतिः प्रजानां लोकानामिन्द्रियाणां वा पतिः रक्षाकर्ता शुक्रः अन्नात्परिस्नुतोरसं ब्रह्मणा व्यपिबत् । कथंभूतं रसं क्षत्रं पयः सोमं क्षतात् रक्षाकर्तारं पुनः पयः दुग्धवत् शुक्रं सोमममृतोत्पादकं पुनः ऋतेन सत्येन सत्यमिन्द्रियं बुद्धिं अन्धसस्तमोगुणाद्विपानम् अपसर्पन्तमिन्द्रस्य परमैश्वर्यस्य देहस्येन्द्रियं प्रकाशकम् पयोऽमृतं मधुरूपं यजमानोऽहं वन्दे ॥ ६ ॥

भाषार्थः--संसारके स्वामी शुक्र देवताने अन्नसे निकसे हुये रसको ब्रह्माजीसे पिया। कैसा है वह रस कि घावसे रक्षाकरनेवाला और दूधकी बरा-

बर सफेद अमृतका उत्पन्न करनेवाला है। फिर कैसा है यह शुक्रकी सत्यको ग्रहण करनेवाली जो बुद्धि इन्द्रिय है उसको तमोगुणसे हटाताहुआ और परम ऐश्वर्य अथवा देहके प्रकाश करनेवाले शुक्लवर्ण अमृत और प्रियरूप शुक्र देवताको मैं यजमान वन्दना अर्थात् प्रणाम करता हूँ ॥६॥

अथ शनिमन्त्रः ।

यजु० अध्याय ३६ मंत्र १२.

शन्नोदेवीरभिष्टय आपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः॥ ७॥

अर्थ-देवीः आपः-वर्गक्रमेण (आ) ब्रह्मणः (पः)षष्ठः इति आपः--शनैश्चरःनःअभीष्टये मनोभिलषितप्राप्तये पीतये पूर्णानन्दभोगेन तृप्तये शं कल्याणकरो भवन्तु भवतु भवतात् व्यत्ययोबहुलं छन्दसीति सूत्रात् भवन्तुस्थाने भवतु

इत्येकवचनमाशिषि । पुनः नः अस्मान् शंयोः सर्वतः अभिस्रवन्तु सुखस्य वृष्टिं करोतु ॥ ७ ॥

भाषार्थः—देवी—स्तुतिके योग्य (आप) नाम शनैश्चर देवता वर्गक्रम अर्थात् कुलरीति वंशावलीके अनुकूल ब्रह्मसे छठी पीढीमें उत्पन्नहुआ अर्थात् ब्रह्म १ ब्रह्मा २ मरीचि ३ कश्यप ४ सूर्य ५ शनैश्चर ६ नः हमारी (अभीष्टये) मनोकामनाके अनुकूल लाभ करानेवाला (पीतये) और पूर्णानन्द भोगसे तृप्ति देनेवाला (शं) कल्याणकारी भवन्तु होय। फिर (नः) हमको (शंयोः) सब ओरसे (अभिस्रवन्तु) सुखकी वर्षा करो अर्थात् सुख करो ॥ ७ ॥

अथ राहुमन्त्रः ।

यजु० अध्याय २१ मंत्र ३१.

कयानश्चित्र आभुव दूती सदा

वृधः सखा । कया शचिष्ठया वृता ॥ ८ ॥

अर्थ-सदावृधः-सदा आनन्देन ऊती सहाय-कारी चित्रः अद्भुतवर्णो राहुः नः अस्माकं सखा मित्रम् कया आभुवत् भवतु इति संदेहसहितःप्रश्नः तदुत्तरम् । कया शचिष्ठया वृता नाम अतिश-येन सत्कर्मानुष्ठाने प्रकारतया वृता शुभगुणेषु वर्तमानया कया प्राणवायुशक्त्या सखा भवतु । कोर्थः कृपाकरो भूयात् ॥ ८ ॥

भाषार्थः-सदा आनन्दसे बढ़ताहुआ सहाय करनेवाला नानारूपधारी मत्स्याकार राहु देवता किस प्रकारसे हमारा मित्र होय यह संदेहसहित प्रश्न है । इसका उत्तर इसी श्रुतिमें ईश्वरने दियाहै

कि बहुत सत्कर्मके अनुष्ठान करनेसे और शुभ गुणोंमें वर्तमान रहनेसे प्राणवायुकी शक्ति सामर्थ्यसे राहुदेवता तुम्हारा मित्र होय। अर्थात् प्राणायामादि करके भगवद्भजन करनेसे मार्गरूप ईश्वर तुमपर प्रसन्न होय ॥ ८ ॥

अथ केतुमंत्रः ।

यजु० अध्याय १५ मंत्र ३.

केतुंकृण्वन्नकेतवे पेशोमर्या अपेशसे। समुषद्भिरजायथाः ॥ ९ ॥

अर्थ—हे मर्या हे मनुष्या भवन्तः केतुमकेतवे अज्ञानाय कृण्वन् कुर्वन् मान्यमानाः पेशः रूपं पेश इति रूपनाम पिंशतेरिति यास्कः। दिनाय अपेशसे रात्र्यै समुषद्भिः दाहकैः रश्मिभिः अजायथाः उदपद्यत ॥ ९ ॥

भाषार्थः-हे मनुष्यो तुम केतुदेवताको अज्ञानी समझोगे तो तुम्हारे दिन और रातके लिये केतु दाहकरूपी किरणोंसे तुमको जलावेगा इस हेतु इसको नमन करो और मानो ॥ ९ ॥ इति ।

इति नवग्रहकाण्डी समाप्ता ।

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स- ०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट.
पुणे - ४११ ०१३.
दूरभाष-०२०-६८७१०२५,
फैक्स -०२०-६८७४९०७.

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१.
दूरभाष/फैक्स- ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-४२००७८.

KHEMRAJ SHRIKRISHNADASS